INTRODUCTION

Parīkṣit - Nāṭaka - Cakram (परीक्षित्-नाटक-चक्रम्) is an impressive collection of Sanskrit dramas. In these days when the study of Sanskrit is fast declining and when most of the writers with a flair for writing are turning to provincial languages or their mother-tongues to compose their literary works, using the ancient sacred language of India for determined poetic and dramatic effort certainly bespeaks devotion and earnestness and calls for admiration

Pandit Parikshit Sharma is an expert in his native language, Telugu, and an acknowledged Pandit of Sanskrit, trained both in the time-honoured Sanskrit tradition and the modern University education, having M. A. to his credit. The plays presented here come on the background of his poetic accomplishment. He is the author of *Lalita-Gīta-Laharī*, (ललित-गीत-लहरी), a collection of lyrical songs, *Yaśodharā* (यशोधरा), an epic in 20 cantos, which won him the prestigious Kālidāsa award, *Akṣaya - Gīta - Rāmāyaṇa* (अक्षय-गीत-रामायण), which sings the glory of Rāma. He has written another epic, *Pratāpa - Rāṇāyana* (प्रताप-राणायन), a prose work *Te hi no divasā gatāḥ* (ते हि नो दिवसा गताः) and a theoretical work on *Saundarya-mīmāṁsā* (सौन्दर्यमीमांसा), all of which are ready for press and will be duly published.

•

Of the 27 plays in this collection 14 are based on Purāṇic themes, the subjects taken from the *Mahābhārata*, *Rāmāyaṇa* and stories contained in these national epics. The themes are presented in the classical pattern of a *nāndī* (नान्दी) and a *prastāvanā* (प्रस्तावना) introducing the play and its author and suggesting the opening scene. But the play is developed not through a single or several 'acts', but through a number of 'scenes'. Similarly though the author follows

the traditional style of composing the dialogue in a mixture of prose and verse, there are songs in many plays which can be set to Indian classical music and rendered in scientific *rāgas* and *tāla* measures.

Kaca Devayānīyam (कचदेवयानीयम्) is the well known episodic story The emphasis is not on Kaca's acquisition of *Sanjīvanī vidyā* (सजीवनी विद्या) but on the mutual love of Kaca and Devayānī and on both being presented as accomplished in dance and music the fine arts which draw them together apart from the attraction of youth and handsome personalities

Srāvaṇam (श्रावणम्) dramatizes the familiar episode in Daśaratha s life from the *Rāmāyaṇa* which Kālidāsa has also used in the *Raghuvaṃśa* The fateful error by which Daśaratha kills Srāvaṇa mistaking the sound of dipping a pot in a river for that of drinking water by a wild elephant and the subsequent grief of Srāvaṇa s old and blind parents which results in their deaths are sufficiently tragic The author uses these colours, no doubt But he stresses more the charm of wild nature which strikes both Daśaratha in his hunt and the boy Śrāvaṇa who moves out in search of drinking water for his thirsty parents Further the author rings an unexpected cheerful note in the tragedy by showing Daśaratha taking the curse as a promise that he will be blessed with a son Sometimes calamities spell happiness though rarely!

Pārīkṣitam (पारीक्षितम्) has an innovative angle The death of Parīkṣita is known from the *Mahābhārata* But the motive that led to his death and the manner of its fulfilment are presented in imaginative scenes

Nartanaśālā (नर्तनशाला) is a story of *Kīcaka-vadha* But the emphasis is on King Virāṭa s harem Kīcaka s passion for Sairandhrī and her confrontation with him The death of Kīcaka is suggested only through a stage direction at the end Vallala (Bhīma) coming to the tryst disguised as Sairandhrī

Vajram Vajrena Bhidyate (वज्र वज्रेण भिद्यते) develops the story of Drupada's treachery towards Droṇa, through the scenes of Droṇa's utter poverty, the urge to open the eyes of Drupada, and ending with the noble pardon which Droṇa bestows on his childhood companion intoxicated with royal power and wealth. The underlying lesson is that soft measures are of no use against hard hearts and that hardness must be met by matching hardness alone

Prabodhanam (प्रबोधनम्) is Kṛṣṇa's encounter with Karṇa whom he enlightens on the true story of his birth that he is Kuntī's first son, thus trying to win him over to the side of Pāṇḍavas There is also a scene in which Kuntī pleads with Karṇa, reminding us of Tagore s play Karṇa s loyalty to Duryodhana shines out

A continuation of the theme is found in *Indrāya Svāhā* (इन्द्राय स्वाहा) where Karṇa hands over his armour and ear rings to the disguised Indra The play is reminiscent of Bhāsa s *Karṇabhāra*. But the author reconstructs the meeting between Sūrya and Karṇa which leads, according to the epic version to the exchange of invincible *Śakti* for Karṇa's magnificent gift This is a dramatization of the epic event, rather than a tragic projection of an uncommon personality caught in the grip of nemesis, which Bhāsa artistically presents

Gurudakṣiṇā (गुरुदक्षिणा) is a play about Raghu's gift to Kautsa, the pupil of the sage Varatantu. The story in Kālidāsa s *Raghuvaṃśa* is dramatized here with remarkable vividness of detail, imaginative construction of situations and with an awareness of the ancient Indian virtuous tradition of munificence and of selfless fulfilment of a vow and a promise, underlining the great qualities of both the donor and the recipient

Uttaragograhaṇam (उत्तर-गोग्रहणम्) turns to *Mahābhārata* showing Bṛhannaḷa (Arjuna) helping Prince Uttara against the Kaurava attack to free the cows for King Virāṭa

Svapna Aniruddham (स्वप्न-अनिरुद्धम्) is a love theme from *Bhāgavata*, and is handled delicately with the elements of a young girl's dream of love, the playful harem atmosphere of love-talk, music, painting of picture portrait, and a preponderance of female characters as *Parīkṣitam* is devoid of a heroine and is dominated by male characters.

Dhanurbhangam (धनुर्भङ्गम्) has the Rāmāyana story of Rāma breaking the formidable bow of Śiva and winning Sītā as his bride. The *svayamvara* is presented on the lines of Indumatī *svayamvara* in Kālidāsa's *Raghuvamśa*

Bhīṣmapratijñā (भीष्मप्रतिज्ञा) is a dramatization of Śantanu's passion for Satyavatī and of Devavrata Bhīsma's terrible vow of lifelong celibacy to enable his royal father to marry the fisherfolk king's voluptuous and beautiful daughter.

In *Sāvitrī* (सावित्री) is shown her winning the life of her husband from the God of Death by her utter devotion and faith This is a story which proclaims the unparalleled virtue of Indian womanhood

Kāvyāvataranam (काव्यावतरणम्) presents the story of the birth of *Rāmāyana*. But the author does not follow Bhavabhūti's narration in *Uttararāmacarita*, rather, he constructs the domestic life of Ratnākara (Vālmīki), his association with Bhilla lads and a Bhilla spouse, till his encounter with Nārada changes his life. The *krauñca* incident is merely touched. The play vivifies the colours of the earlier wild, unsocial life, projecting the transformation that came over Ratnākara, when he realised that even his wife did not care for him personally, and which changed him into Vālmīki under the guidance of Nārada.

❀

The next set of 6 plays develop themes which have a basis in history, historical legend or lives of famous men, that have found a place in folk tradition.

Rakṣābandhanam (रक्षाबन्धनम्) is about Alexander (Alakṣyendra) and his confrontation with the Sindhu King Purusottama. · The Kashmir King Ambhī has already sided with Alexander and is dreaming about becoming the ruler of entire Bhārata. Alexander is powerless before Purusottama. Alexander may have lost his life; but Purusottama sends him honourably back to Greece, because he has accepted *rakṣābandhana* from Rajanī, a Pārasika girl, who has fallen in love with Alexander and who has fastened the *rākhī* on the wrist of Puruṣottama, as a holy symbol of sisterly affection. Bound in sacred honour Puruṣottama must protect his sister Rajanī. This is the significance of *rakṣābandhana*.

Varāhamihira (वराहमिहिर) is a sort of biographical play. Mihira's prediction that the prince would die at the age of five, comes true as the flagstaff carrying the symbol of boar (*varāha*) falls on the child and kills him, in spite of all the precautions taken by the king. The king who was wroth with the astrologer and had banished him from his kingdom, seeks him out now, installs him in his court, and gives him the name of Varāhamihira. The device which kills the child-prince bears a resemblance to the trick which ended the life of Parīksita in the Mahābhārata story. There is an element of suspense and wonder in both the plays.

Bilhaṇīyam (बिल्हणीयम्) is the story of the Kashmir poet Bilhaṇa who falls in love with Princess Yāminī and is ordered to be beheaded by the king. The author brings here the motive of *anuloma vivāha* (a Kṣatriya girl marrying a Brāhmaṇa) which the king considers to be against the approved Bhārata tradition. The minister, the queen and Yāminī herself argue and plead with the king that there is nothing untraditional in this love and marriage. The king accepts it finally, as a 'marriage between Music and Literature', and withdraws the death punishment. The scenes between Bilhaṇa and Yāminī resemble those of musical lessons between Udayana and Vāsavadattā

The author does not use Bilhaṇa's love-poem but composes his own verses

Rāṣṭrāya Idam (राष्ट्राय इदम्) is based on the history of Hampi the founding of Vijayānagara empire by Harihara and Bukkarāya with the encouragement and blessings of Vidyāraṇya The play stresses the unbounded regard and devotion of Harihara and Bukka for the traditional glory and splendour of Bhārata, and their firm resolve to restore them, preserve them and perpetuate them by establishing a centre of political power A scene depicts even the common people fired by patriotism and ready to lay down their lives wealth mental and physical might for the cause of national glory The governing note of the play is selfless devotion and sacrifice for the glory of the Nation Hence the title *Rāṣṭrāya idam na mama*, राष्ट्राय इदम् न मम ।

Ātmārpaṇam (आत्मार्पणम्) is the story of the conquest of Simhagaḍa from Marāṭhā history The author catches Marathi atmosphere using a number of Marathi terms in sanskritized form The famous words of Sivājī at the supreme sacrifice of Tānājī are rendered as कोण्ढणगढ़ हस्तमागतः किन्तु सिंहः पञ्चत्वं गतः ।

Parivartanam (परिवर्तनम्) is about Purandaradāsa of Karnātaka who by a stunning experience was converted from the life of an unscrupulous Brahmin merchant to that of a devotee of Shrī Kṛṣṇa An element of marvel works in this play but it does not interfere with the dramatic structure

A peculiarity of this set of historical plays is that they are not opened by the Sūtradhāra and his wife, but by two modern men or women. They speak about a Sanskrit dramatic performance and this provides the opportunity for introducing the play and its author The modern opening as well as the latter-day social set up bring also a new vocabulary. The author uses much inventiveness in constructing his scenes and sanskritizes vernacular or current words consistent with the

atmosphere. Another peculiarity still is the patriotic songs which are used in some of these plays.

The social plays breathe a different air. Modern themes are set in modern atmosphere, and the dialogue and language are consistent with a touch of modernity. A manager of the theatrical production introduces the play and the playwright, speaking before a mike.

Pānaśālā (पानशाला) is a drinking house, a hotel. It is mainly a conversation play, in which the author discusses the language problem Through the speeches of the characters he makes out a patriotic and reasoned case for Sanskrit as the national language of India, suggesting the study of mother-tongue at the primary level, Sanskrit and English at the secondary and higher levels, Hindi being studied as a practical language. The play appears to be propagandist and the debate or discussion has the colour of a symposium. But the undramatic tone is relieved by contrasting characterization, by disco music and a cabaret dance item, and amusing talk at places.

Prema parīkṣā (प्रेम-परीक्षा) stresses the need of mutual love in settling marriages, but insists on the compatibility of education, cultural background, food habits, manners and respect for old traditions. The play uses scenes of a birth-day party, household calls and young lovers' meeting in a garden under a tree on college premises. Sundarī's pretense that she is pregnant by another person is a bold trick that provides a real test for the love of Anila and Avināśa who wish to marry her. The dramatic scene between Sundarī's parents is also amusing, especially her father's remark, सर्वेऽपि पार्थक्ये कुमारायन्ते ।

Pariṇītā (परिणीता) is a play against dowry (वरशुल्क). Two medical students who are against dowry get married in the traditional religious way, but without the knowledge of their parents. The element of surprise in the play is that the parents of both were negotiating the marriage of the same young couple

with the customary terms and conditions of gifts of money, ornaments and feasts.

Aparājitam (अपराजितम्) is a conversation among four-five earnest young persons which seeks to establish that Indian Art is undefeatable. The hero of the piece Abhinaya, assisted by his wife Darpaṇā expounds the beauty of Ajantā Frescoes, Ellora stone-carvings and sculpture of Khajuraho. There is a discussion on *nāṭya* as well. *Bhāratīya Nāṭya* is stated to be a blend or assemblage of 64 arts, an exhibition of the world of emotions, as the fount of beauty. The Western drama is berated as a mere movement of the body, lacking emotion and beauty. The author is not correct about the kinds of Sanskrit drama and mixes Bharata's dramatic modes and *abhinaya* categories, but his enthusiasm and patriotic love are apparent. The character of Abhinaya appears almost to be a self portrait of the author. Incidentally, the author explains the etymology of Ajantā, Ellora, and gives his ideas on *saundarya*; and it provides an opportunity for criticising modern fashions among women and their slavish imitation of the West.

Matibhramaṇam (मतिभ्रमणम्) is a play either of disparate marriage or of a modern liberated woman. Susamā has been married to Sumati, though she does not love him. She is in love with Sudhīra who is a doctor and appears to be in Air Force. Sumati has undergone an operation for birth-control, yet it is found that Suṣamā is pregnant. The doctor who had performed the operation as well as Sudhīra confirm that the operation may sometimes be defective. But the additional discovery that the two children of Susamā are by Sudhīra drives Sumati to the verge of insanity.

Vayam Pañcādhikam Śatam (वयं पञ्चाधिकं शतम्) borrows the central idea from Mahābhārata and intends to assert that though different castes and occupations are bound to remain in any human society, Indians must cultivate the feeling of Dharmarāja and, forgetting differences, must present a united

front for the welfare, happiness, religious and political defence of the nation. The feeling that we are all Bhāratīya must bind us together by bonds of affection and patriotism. Study of Sanskrit by all is a step in this direction, according to the author. The play has an air of propaganda, and the last scene of a mass meeting confirms the impression. But the earlier scenes, where a Harijana goes begging to the houses of caste Hindus, as well as the opening scene of the farmers, have the colours of social realism, and the pathos underlying the traditional treatment of Harijana seen in them is touching.

'*Na Strī Svātantryam Arhati* (न स्त्री स्वातन्त्र्यमर्हति) is also a discussion play but the court scenes provide some dramatic element. The author interprets Manu's' *dictum to mean* that the woman, being a weaker sex, needs protection against licentious, lawless and sex-crazy libertines. A dangerous imitation of un-Indian manners of dress and behaviour on the part of young women is an invitation to the animal instincts in man and is apt to result in danger or death, as the author shows by the murder of a wanton girl, whom a group of boys enjoy and kill afterwards. The author praises Manu for his farsightedness and advocates a correct interpretation of his view consistent with Indian culture.

The collection of dramatic pieces shows some distinctive features No dramatist, even in the classical range, has written such a large number of plays, a cycle of 27 dramas, covering a wide range of the Purāṇic, legendary, *historical* and *modern social* themes. In the present days Shri S. B. Velanakar has many Radio and stage plays to his credit; but I am not sure whether *they would make such a large group and show such a* variety of subjects. This in itself is an achievement on the part of Pandit Parikshit Sharma.

The author follows the conventional structure of the Sanskrit drama but introduces also his own variations. The

Purānic plays have an introduction as already noted by the traditional Sūtradhāra and his wife Naṭī The historical themes are introduced by a dialogue between two friends who are eager to see a modern Sanskrit dramatic performance In the group of social plays a modern technique is used The manager of the theatrical production or director speaks to the audience before a microphone and introduces the play and its author

The author uses the traditional pattern of dialogue with a mixture of prose and verse But the *nāndī* verse is composed anew to suit the theme of the particular play and with many variations So is the case with the *Bharatavākya*. The author also avoids preponderance of verses which is the characteristic of classical plays and of the compositions of some modern Sanskrit writers There is in these plays an impressive prose dialogue in a simple racy and often colloquial style The dialogues are interspersed with allusions and quotations from classical Sanskrit literature which the dramatic characters use in their speeches In addition the author coins his own *subhāṣitas*, like घृते पतितं मापापूपशकलमिव ('स्वप्नानिरुद्धम्' पृ. ८) तत्कार्यमागत्य तत्क्षमापद्दतोपनेन किम् ('इन्द्राय स्वाहा', पृ १४), चोरस्य घ्राधिकादशानमिव, पुरत वापी पश्चात् पल्वलम् ('भीष्मप्रतिज्ञा,' पृ १५, १७), सर्वेऽपि वार्धक्ये कुमारायन्ते ('प्रेमपरीक्षा', पृ ७) etc

Yet another feature of this collection is the author's use of modern or current vocabulary, apart from the modern setting in the social group of plays He boldly uses native or English words like टेबुल, कुर्चीं, कार, पोलिस, गुण्डा, मवाली, दादा, सोडा, लुगी, गड (fort), मावळ, गुरगुरन्ती (snoring) चहा (tea), or Sanskritizes the terms like घातस्कोप (stethascope), सिरिंजि (syringe), पेन्टु (pant), षटुं (shirt), बुटु (boot), सूट्या (suit) सिगरेटु, सोफा, परकरी (petticoat), फोनु (phone), बाटिल, (bottle), ब्यांकु (bank), केकुं कटति (cuts the cake) and the names of vegetables and eatables or tries to translate them as in, चहाशूर्पं (tea tray), कर्ध्वाङ्गुष्ठ (Thums up), कटी (kettle), संख्या वक्रिता (wrong phone number), बाहुहीननिचोल (sleeveless blouse) etc

How far such innovativeness will be acceptable to purists may be a question Yet it must be remembered that it is an attempt to modernise Sanskrit and absorb a large number of words that have become current coins in the present-day spoken language, so that Sanskrit, as the author earnestly desires, may have a footing in the practical life of the people

Although the author uses fewer verses in his dialogue, it is more than balanced by the songs which adorn this dramatic collection. Pandit Parikshit Sharma is a lover of art, a trained musician and himself a vocal singer, the plays bear ample testimony to his musical accomplishment. Remarkable from this point of view are the child song of Aśvatthāmā, the fishermen's song (*Bhīsmapratijñā*), Sāvitrī's hymn of praise to Mrtyuñjaya Yama, the Bhilla song (*Kāvyāvataranam*), the Kashmir song and war song (*Raksābandhanam*), the cradle song (*Varāhamihira*), the duet (*Bilhanīyam*), the two pupils' song on the glory of art (*Rāstrāya Idam*), the love lyric (*Parinītā*), the sleep song (*Mati-bramanam*) the farmers' song (*Vayam Pañcādhikam Śatam*) and the Hymn-song to *Girvānī* (*Pānasālā*) The songs are set in a variety of scientific *rāgas* and they justify the author's title गीर्वाणगेयचक्रवर्ती The author proclaims the glory of the ancient Indian sculpture in *Aparājitam*, the unparalleled beauty of Indian Art, including music and dramatics. His own contribution to music underlines his skill and utter devotion to Indian traditional culture.

In fact, immeasurable regard, devotion and love for India's ancient culture, art, traditional modes of food, dress, speech and behaviour and for the Sanskrit language are the outstanding features of this dramatic collection They are proclaimed in the prologue of each play and form the theme and subject of some of them. Pandit Parikshit Sharma stands out as a patriot, fired by his love for Bhārata and for everything tradi

tional that is Indian His advocacy for Sanskrit is so open and *strong* that his contention संस्कृताय एव जीवति is justified

The only disheartening aspect of this collection is its printing Almost every of its 570 pages bristles with print-errors सुन्य for सुन्द; मृत्वा for मुत्वा, compound expressions not written together or the words connected by hyphen etc *In some cases* where for example, neuter words like सुख are treated as masculine, पञ्चति is used for पञ्चविंशति, a syntactical error occurs as in सर्वेणापि नाट्यनिष्णातः भवितु शक्यते, one wonders whether these *are print-errors or the author s own inadvertant writing which* he has not checked A Sanskrit knowing reader will guess the correct text easily But those who take up these plays for production will have to get the script corrected before the dialogue could be mastered This is rather a serious handicap I wish the author had enlisted the help of a competent experienced Sanskrit knowing proof reader before issuing the work in printed form

This is not to gainsay the value of this impressive cycle of plays Their literary merits their simple flowing prose and lucid charming verses the delightful songs, the innovative construction of scenes at places and the variety of themes all commend themselves The plays have a definite stage value too I wish schools colleges universities and Radio centres take cognisance of these plays and reward the author s labours as well as his love for Bhārata and for the Sanskrit language

G K BHAT
Ex Director
Postgraduate & Research Department
Bhandarkar Oriental Research Institute,
PUNE 4

A 12 Svapnanagari
Karve Road
PUNE 411 004.

प्र स्ता व ना

प्रायेण जनः प्रवाहपतितः। प्रमाथिना बलवता च जलौघेन अशरणम् अगतिकं च प्रसभं नीयमानस्य नास्ति किमपि स्वातन्त्र्य तस्य। विरला एव बलवन्तो ये महाप्रहारैः जलार्गला भित्त्वा बहिः निर्गन्तुं प्रभवः। संस्कृतविषयेऽपि इयमेव अवस्था अद्य। महता वेगेन अभावगर्ता प्रविशति संप्रति संस्कृता भाषा। किंतु 'नश्यत् पुरस्ताद् अनुपेक्षणीयम्' इद सांस्कृतिकं धनमिति जानन्तोऽपि, वरा वरा अपि जनाः संप्रति किंकर्तव्यविमूढाः। न जानन्ति ते कथं संस्कृतभाषा समूलनाश नाशात् परित्रातव्या। अपवादभूतास्तु पं. ओगेटि-परीक्षित् शर्मा सदृशाः ये संस्कृत-भाषारक्षणे बद्धपरिकराः। एभिर्हि परीक्षित् शर्मभिः न केवलं संस्कृतभाषया सप्तविंशतिः नाटकानि विरचितानि। तेषा मुद्रणव्ययादिकं सर्वं प्रकाशनभारं स्वयमेव ऊढ्वा, सुचारुरूपेण तानि मुद्रयित्वा, तानि 'परीक्षिन्नाटकचक्रम्' इति कृतनाम-धेयानि संप्रति प्रकाश्यन्ते इत्यहो भीमपराक्रमत्वम् एतेषां परीक्षित् शर्मणाम्।

न सन्ति परीक्षित् शर्माणः अपरिचिताः संस्कृतजगति। प्रसिद्धानि सन्ति तेषा गीतिकाव्यानि। (अत्रापि नाटकेषु अन्तरान्तरा गीतय सन्ति।) प्रथितमेव तेषा यशोधरा-महाकाव्यं गीतरामायणं च। अनेकैः पुरस्कारैः ते पुरस्कृताः सन्ति संस्कृतसाहित्ये नैपुण्यार्थम्। यन्मध्ये विशेषं निर्देशमर्हति मध्यप्रदेशशासनेन तेभ्यः प्रदत्तः कालिदास-पुरस्कारः।

एवंविधैः एतैः परीक्षित् शर्मभिः नाट्यं कवीना निकषं वदन्ति इति मत्वेव वा, नास्ति नाटकसदृशः अन्यः संस्कृतस्य जनं प्रति (जनस्य वा संस्कृतं प्रति) प्रापणोपायः इति मत्वा वा नाटकलेखनं संकल्य इदानीं सप्तविंशति-संख्याना नाटकाना प्रणयनेन निर्व्यूढोऽस्ति सोऽयं निजः संकल्पः। (नाटकशब्दोऽत्र सामान्यार्थेन प्रयुज्यते, न पारिभाषिकेण अर्थेन।) एषु सप्तविंशतौ नाटकेषु चतुर्दश पौराणिकानि सन्ति, षट् ऐतिहासिकानि, सप्त सामाजिकानि। पौराणिकेषु कानिचित् रामायणम् उपजीवन्ति (श्रावणम्, धनुर्भङ्गम्), भूयांसि तु महाभारतम् (कच-देवयानीयम्, पारीक्षितम्, नर्तनशाला, वज्रं वज्रेण भिद्यते, प्रबोधनम्, उत्तरगो-ग्रहणम्, इन्द्राय स्वाहा, भीष्मप्रतिज्ञा, सावित्री), कानिचिद् एतदितराणि। ऐति-हासिकेषु वराहमिहिरम् तथा च बिल्हणीयम् इति च निगदाख्याते। 'रक्षाबन्धनम्'

पुष्पसिकन्दरौ उपवर्णयति, 'राष्ट्रायेदम्' बुक्कहरिहरौ, 'आत्मार्पणम्' तानाजे सिंहगढग्रहणवृत्तान्तम्। 'परिवर्तनम्' च सन्तश्रेष्ठं पुरंधरदासम्। गतं संस्कृतयुगम् इति केषाञ्चन भ्रमः। तं भ्रमं निरसितुं, जीवति अद्यापि संस्कृतं, जीवितव्यं च तेन इति प्रदर्शयितुमिव लेखकेन वर्तमानकालिकानि सामाजिकाशयानि सप्त नाटकानि विरचितानि सन्ति। तन्मध्ये कानिचित् चिरन्तनं प्रेमविषयं विमृशन्ति, अन्यतमं संस्कृतस्य स्थानम्, इतराणि सद्यःकालीनान् सामाजिकान् दोषान्, स्त्रीस्वातन्त्र्यसदृशांश्च विषयान्।

मन्ये एतानि नाटकानि लिखितवतो लेखकस्य प्रायेण द्विविधो लेखनोद्देशः। एकस्तावत्—सुबोधस्य प्रयोगक्षमस्य च संस्कृतस्य निर्माणम्। सम्प्रति हि शासनेन प्रतिवर्षं संस्कृतनाट्यस्पर्धाः आयोज्यन्ते। अन्यत्रापि क्वचित् संस्कृतनाटकानि अभिनीयन्ते। सन्ति तावत् प्राचीनानि नाटकानि। किंतु तानि भिन्नकालोद्भवानि। भिन्नशैलीविशिष्टानि। दीर्घकालापेक्षीणि च। सम्प्रति तु अल्पः समयो लभ्यः। दीर्घदीर्घाणि वाक्यानि उच्चारयितुं क्लेशकराणि (श्रोतुरपि दुर्गमाणि)। तादृशं च नाटकम् अपेक्ष्यते, यत् आधुनिकजीवितं स्पृशेत्। अतश्च आत्मीयमेव इदमिति प्रतीयेत। इदं सर्वं लक्ष्यीकृत्येव परीक्षित् शर्मभिः इदं 'चक्रं' प्रणीतमिति भाति। तथा हि। अत्र सर्वत्र अल्पाकाराणि, सुखोच्चारणानि च वाक्यानि। परिहृता सन्ति पण्डितैकगम्याः, वैयाकरणं विहाय अन्येन दुर्ज्ञेयाः शब्दाः। संस्कृतं सदपि तत् यावच्छक्यं समनिकृष्यते देश्यभाषाणाम्। क्वचित् देश्यभाषाशब्दा अपि तथैव रूपेण अत्र प्रयुक्ताः सन्ति (यथा 'गल्लिछ', 'परकरी' डिस्को सोडा, अकस्मात् इत्यर्थे हठात् शब्दः, रसार्द्र इत्यस्य रसाळवाल शब्दः, इत्यादि)। यादृशं सुबोधं संस्कृतम् एतेषु दिनेषु अपेक्ष्यते, तादृशमेव संस्कृतम् अत्र लेखकेन प्रयुक्तम्। एतेन हेतुना एतानि नाटकानि लोकप्रियाणि भवेयुः तद्द्वारा च संस्कृतम् इत्याशासे।

परीक्षित् शर्मणा द्वितीयो हेतुः इत्थं भाति—स्वसंस्कृतेः पुरस्कारः, परकीयसंस्कृतेः (आधुनिक-पाश्चात्य संस्कृतेः) भयावहत्वप्रदर्शनं च। अत एव कविरयं रामायण-महाभारतीयाः कथाः पुनरपि कथयति। तत्र पुरस्कृतं दिव्यं भव्यं च जीवनादर्शं पुनरपि उपन्यस्यति। ऐतिहासिकानां वीरपुरुषाणां वीर्यगाथाः गायति। साधुसन्तानां पतिव्रतानां च पुण्यपावनानि चरितानि उद्गायति। पाश्चात्यसंस्कृतेः आपातमधुरं परिणामविषमं च स्वरूपं प्रति जनमनः आकृष्टचित्तं करोति। मन्ये इदमपि आवश्यकमेव कर्म, यस्य कस्यापि संस्कृतलेखकस्य। न हि संस्कृतं केवलं भाषाविशेषः इत्येव

अस्माभिः महीयते। 'संस्कृतिः संस्कृताश्रिता', 'विना संस्कृतं नैव संस्कृतिः' इति डिण्डिम एव खलु संस्कृतानुरागिणाम्। (अस्मिन् सांस्कृतिके प्रकरणे लेखकस्य एकः प्रवृत्तिविशेषो निर्देष्टव्यः, यो न मह्यं रोचते। स नाम शृङ्गारविषयकम् कादाचित्कम् अनौचित्यम्। यथा कन्दुकक्रीडापरायाः सीतायाः वर्णने सा 'पुरुषायितमग्ननाकविलासिनीव' इति द्विः उपमानम्। यथा वा–भवतु नाम डिस्कोगीते–चुम्बनालिङ्गनैः सहैव 'शृङ्गवर्तिं कुरु रे' इ त नम्नं कथनम्। मन्ये वैरस्यावहमेव इदम्। साधु अभविष्यत् यदि एतादृशाः प्रकाराः, ये दिष्टचा अत्यल्पा एव सन्ति, परिहृता अभविष्यन्।)

अस्त्येको विषयो यो मम मनसि चिरात् विपरिवर्तते। सांप्रतिके काले संस्कृतलेखकस्य भाषाविषये कयापि मात्रया स्वातन्त्र्यं भवतु, मा स पूर्वसूरीणां यमनियमैः सर्वथा बद्धहस्तो भवतु इति बह्वः अभिप्रयन्ति। अहमपि तथैव अभिप्रैमि। संस्कृतभाषायाः कठोरनियमबद्धत्वादेव आधुनिकाः तस्याः बिभ्यति, तां च दूरादेव नमस्कुर्वन्ति। तस्यां किंचित् शैथिल्यम्, किंचित् श्वासानुकूलं नियममोचनम् आवश्यकमेव। दिष्टचा परीक्षित् शर्मभिरपि तादृशं मुक्त संस्कृतं प्रयुक्तम्। अत्र च केषु विषयेषु, केन च प्रमाणेन, इदं स्वातन्त्र्य, इद बन्धमुक्तत्वम् आवश्यकम् इष्ट च, कीदृशं च तत्र तारतम्य भवतु इत्यपि विमर्शमर्हति। अस्मिन् हि परीक्षिन्नाटकचक्रे सन्ति अनेके प्रयोगविशेषाः, ये पारंपरिकं व्याकरणं नानुसरन्ति। यथा -पदव्यत्ययः लभतु, गायस्व इत्यादिषु। लिङ्गव्यत्ययः–शुल्कः, व्रतः, स्वरूपः, त्वं सुखी (स्त्रीविषये) इत्यादिषु। श्रु-शृ-व्यत्ययः–श्रृणु इत्यादिषु। भवत् इत्यस्य सर्वनाम्नः द्वितीयपुरुषक्रेण क्रियापदेन सह प्रयोगः–यथा भवती व्रतोपवास-क्षामाऽसि। गायस्व भवती (?ति)। कृत्यप्रत्ययानां कर्तरि प्रयोगः–यथा, चलितुम् अशक्यः (सत्यवान्), ब्राह्मणः····प्रवर्तितव्यः पद्मपत्रस्थितं वारिवत् (? स्थितवारिवत्), स (ब्राह्मणः)····यदृच्छालाभसंतुष्टः कालं यापयितव्यः। ता-प्रत्ययस्य अपूर्वार्थकः प्रयोगः–यथा क्रौर्यता, प्रलोभता, स्वार्थता। कभूधावि (क्त) प्रत्ययस्य कर्तरि प्रयोगः, यथा तव नाटकमनव-बोधितोऽस्मि, नाहमवगतोऽस्मि (=न मयाऽवगतम्), न किमपि भावितोऽस्मि (=न मया किमपि भावितम्)। निर्णेतव्यः इत्यत्र गुणाभावः। मे ते इत्यादीनां रूपाणां वाक्यादौ प्रयोगः। विभक्तिव्यत्ययः–यथा, अहं विठ्ठल (=विठ्ठलस्य) स्तोत्रं विधाय मुक्तिं प्राप्स्यामि। पत्नीम् आह्वात्

हृन्जे प्रयोगः। 'परेषा खलु उपभोगेन मे आनन्दः न भवति' इत्यत्र समासाभावेऽपि विभक्त्यभावः, इत्यादय । काश्चन सस्कृतज्ञान् एतादृशाः प्रयोगाः क्षुदेयुरपि। नाहमत्र अधिकारात् स्वायत्तीकृत्य कमपि न्यायनिर्णय कर्तुमुत्सहे। सस्कृतज्ञैः, सस्कृतानुरागिभिः, कथ नाम सस्कृत जीवेदिति च चिन्ता वहद्भिः जनैः अत्र विमर्शः करणीयः। सस्कृतं Simple अस्तु, Simplified मा भवतु इति बहुभिः उच्यते। तत्वत: इद युक्तमेव भाति। तथापि को नाम उभयोः अन्यूनानतिरिक्तो भेदः, कुत्र च सीमारेखा लेखितव्या इति व्यवहारे न सुकरम्। अतः सस्कृतस्य सुबोधीकरण सुलभीकरण सरलीकरण च इच्छद्भिः कुत्र विषये, कया च मात्रया इद सरलीकरण भवतु इत्यत्र विषये स्वे विचाराः प्रकटीकर्तव्याः।

लेखकोपरि भासप्रभाव स्पष्टमेव दृश्यते, न केवल 'चक्र' नाम्नि, किंतु सारल्यभूयिष्ठाया भाषाशैल्या भाषास्वातन्त्र्ये च। सप्तविंशति-नाटकानाम् इद चक्र नाम किमपि नक्षत्रमालावलयमेव, यत् गीर्वाणीदेव्या कण्ठार्पितमस्ति। परीक्षित् शर्मणाम् अयमुत्साहः सफलो भवतु, तेषाम् महोद्यम कृतार्थो भवतु, अनेन च साधनेन जनस्य सस्कृतभाषाया सस्कृत-नाटकेषु च प्रीतिर् जागर्तु इत्याशासे।

पुणे, महाराष्ट्र (भारत)
६-७-१९८३

डॉ ग बा. पळसुले
सचालक
भाण्डारकर-प्राच्यविद्या-सशोधनमन्दिरम्

PROLOGUE

Indeed it is a matter of pleasure and privilege to me that I have brought out my dramas entitled **Parikshinnataka Chakram** (twenty-seven in number) to all lovers of Sanskrit Dramaturgy. As it has been my ardent desire to compose Epical, Historical and Social Dramas in Sanskrit, I have devotedly completed the same in time with sincere endeavour.

I thought that if in my life I contributed anything at all to literature that should be only through the Sanskrit Language. Any contribution to the ocean like Sanskrit Language is only a drop of dew added to it. But it is a matter of self-satisfaction that I have had the privilege to contribute my mite to the Language which is our legacy and mirror of our culture.

Hence with great devotion first I composed Lalita Geeta-Lahari, a collection of lyrical poems in moderate Sanskrit Language. All these were published in a booklet form in the year of 1968. After that I worked earnestly on the Yasodhara Mahakavyam with enthusiam and zeal in the year 1970, and published it in the year of 1976. For this Mahakavyam I have received Akhila Bharateeya Kalidasa Award at Bhopal in the year 1979. The Geeta-Govinda Kavyam of Mahakavi Jayadeva and the Krishnaleela Tarangini of Narayana Teertha inspired me to undertake a new lyrical composition in Sanskrit on those lines. Then I chased the idea and composed Akshaya Geeta Ramayanam (Saptapadi) in my own way in one hundred and one lyrics subdivided into seven divisions, in the year 1981. After this work I have taken up Telugu Poetry "Amaravani" and published it in the year 1982.

At present circumstances throughout the country up to bottom, among the students of the Educational Institutions, Colleges and Unversities, the moral and ethical values are deteriorating and are in deplorable condition. The modern young

generation lacking in patriatism and culture is behaving ruthlessly in the society having forgotten the glory of the country At this fluctuating point the present generation and coming one may become inhuman and betroyed one and certainly create many a problem to the secular society and unity of the country While I was thinking in this fashion a flash of thought struck my mind that the drama is the best media to instil an ethical and morale values in effecive manner among the existing prodigal student community

In crazily civilised society every one wants to become an actor and actress in any language to show their histrionic talents and to become famous in the field So with the idea some of the students are coming forward to participate in Sanskrit drama competitions even not knowing the language This is a kind of progressive situation and a sign for implementing the Sanskrit language and also creating an interest among the people in the vacillating society

At this moment I was rather convinced by my self that through Sanskrit drama depicting the greatness of the sacrificed souls of the ancient India a considerable change may be brought about among the student community

Now a days everywhere lovers of Sanskrit are staging frequently one or two acts of Sakuntalam and Mrichhakatikam Dramas on the occasion of annual functions of the colleges and universities By and large in modern busy life the practice of the students is to act short skits in short time as they do not find ample time to stage full length dramas On such occasions and functions some of the audience coincidentally alongwith me witnessed the performances of students and have expressed their view to me that the students are staging always the same two dramas as if there are no dramas in Sanskrit other than the Sakuntalam and Mrichhakatikam And some of the connoisseurs have passed casually some remarks that it was boredom and foolishness to see the same dramas a number of times After hearing such remarks during college annual functions I felt that those remarks and comments of the audience are not baseless or far away from the facts Restlessly contemplating on those talks I decided to

compose scrupulously short skits on new themes which would be handy, very short, effective simple and useful to the enthusiastic, stage-artistes at all times.

At this juncture all of a sudden the first dramatist Mahakavi Bhasa and his unique Natakachakram moved as a cinemascope before my eyes and turned into a source of my inspiration This event enthused me to undertake the composition of 27 dramas in three sub-divisions as 14 Epical, 6 Historical and 7 Social ones All these dramas were written in temperate and spoken language as they could be understood by the people without any difficulty Few of the dramas of the Natakachakram were performed by artistes in All India Radio of Nagpur in the year 1981

I have the privilege to state in humble manner that I am a poet endowed with inborn great sensitivity My style and delicacy of thought and my themes of the Kavyas bear witness to the keenness of my perception of aesthetic sense My unhypocratic patriotism perseverance and love towards the Sanskrit language and my rich legacy may stand like a beacon to the dejected and desperate fellow travellers in the field of Sanskrit literature

I am grateful to every individual who devoted their valuable time to write their opinions about this Natakachakram.

My wife Smt Ogeti Sheela Parikshit Sharma, who is working at present as an Assistant Project Officer in the Drought-Prone Area Project Office which is under Zilla Parishad Pune has corrected the proofs of the dramas and also sometimes prepared press copies of the dramas In this context I acknowledge her devoted services as unique one I heartily hope that the Sanskrit World will find this Natakachakram very useful in all respects at all times I request the public to extend the same sympathy and patronage as has been extended to other Sanskrit works

There is considerable delay in bringing out the Natakachakram owing to circumstances beyond my control I have every confidence that the reading and acting public and

षट्-पदी

नावीन्य-संस्कृत-महत्त्व-कवित्व विश्वे
राष्ट्रीयभाव-रसनाटक-काव्यकर्ता
माध्वीक-प्राभिनव-मेदुर-संस्कृतात्मा
वाग्देवता-चरण-नीरज-चञ्चरीकः
वाभाति पण्डित-परीक्षित-शर्म नाम
गीर्वाण-गेय-कविमण्डल-चक्रवर्ती ॥

दिनाङ्क
१५-१-८४

अच्युत कविः
आन्ध्र प्रदेशः

ॐ

प्राञ्जलिरानतोऽस्मि

ॐकाररूपेण विराजमाना
विश्वात्मिका विश्वमनोज्ञरूपाम्
विराट्स्वरूपा प्रियविश्वभाषा
नमामि तां भारतभव्यवाणीम् ॥ १

तरामि गीर्वाणिरसार्णवेऽहं
भणामि नित्यं त्रिदिवीयवाण्या
लुठन्प्रमत्तस्सुरनागिलासे
लिखामि मे राष्ट्रहिताय काव्यम् ॥ २

आगामिनां भारतदेशिकानां
विद्यार्थिनां राष्ट्रहितैषिणां च
प्रोत्साहभावैर्नवसृष्टिरम्यैः
संस्कारपूर्णैर्गुणवद्धगीतैः ॥ ३

पात्रानुगुण्यं नवशब्दजालं
प्राचीननावीन्यकथाविलासैः
सृष्ट्वाऽलिखं नाटकचक्रमेतत्
बृहत्तमं राष्ट्रहिताय रम्यम् ॥ ४

कलाप्रभावेन समाजमूर्तिः
परस्परोश्लिष्टमनोज्ञभावैः
प्रजानुमोदाय पवित्रराष्ट्रे
विराजता चन्द्रमसेव रात्रिः ॥ ५

निन्दां प्रकुर्वन्तु मदीय सृष्टिं
निरन्तरं शाब्दिकतत्त्वमग्नाः
रसार्द्रचित्ताः प्रचुरं स्तुवन्तु
वैविध्यपूर्णां सरसां सहर्षम् ॥ ६

अनन राष्ट्रीयनिगूढतत्त्व
प्रादर्शय भिन्नविभिन्नपात्र
गृह्णन्तु सर्वे रुचिर मनोज्ञ
त्यजन्तु नोचेत्तवनिर्मिति मे ॥ ७

प्रादेशिक सङ्कुचितस्वभाव
बुधास्समस्त सहसा विहाय
गीर्वाणवाणीगुणबद्धचित्ता
समैक्यभावेन रमन्तु राष्ट्रे ॥ ८

विद्वेषशून्या गतमत्सराश्च
त्रिविष्टपीया प्रियविश्वभाषाम्
दृढ स्वराष्ट्र गतभेदभावात्त
विधाय नन्दन्तु पवित्रभावै ॥ ९

एकस्य भाषा भवितु न शक्या
प्रादेशिका नैव कदापि भूता ।
रेमे सदा भारतराष्ट्रभाषा
सवर्धिता नागरिकैस्समानम् । १०

कुर्वन्तु भाषा व्यवहारपूर्णा
भणन्तु नित्य व्यवहाररम्याम्
लिखन्तु सव व्यवहारयोग्या
गीर्वाणवाण्या समलङ्कृताङ्गा ॥ ११

प्रवाहिनीरूपमवाप्य राष्ट्रे
गीर्वाणवाणी रमता नितान्तम्
आचन्द्रतारार्कमहो धरण्या
पुष्णातु सर्वा प्रियदेशभाषा ॥ १२

सर्वोऽपि सर्वं न कदापि लोके
जानाति सपूर्णतया धरण्याम्
स्वकायभावैस्स्वकपालजातै
न कोऽपि तुष्टान् सकलान् करोति ॥ १३

पवित्रदेवालयवास्तुशिल्पे
सदृश्यतेऽश्लीलतया सुशिल्पम्
तदत्र शिल्प रसमानसाना
करोति तादात्म्यरसानुभूतिम् ॥ १४

अश्लीलशिल्पाकृतिनिर्मिति ता
निन्दन्ति लोक बहुछान्दसास्तु
तामेव निय रसपूर्णचित्ता
क्वाश्वराशिल्पनियस्तुवन्ति ॥ १५

महाकवीना कवितासु दृष्टा
प्रयोगदोपास्सतत प्रबन्धे
व्याख्यातृभिस्साधुकृतास्ततस्त
क्रमेण लोके सगुणा विरेजु ॥ १६

सृष्टया बृहत्या प्रभवन्तिनून
समिश्रितादोषागुणा नितान्तम्
तथापि समिश्रितसर्वसृष्टि
न निन्द्यते प्राज्ञजनै कदापि ॥ १७

विशालसृष्टया न विलोक्यते हि
निर्दोषता विश्वसृजप्रवृत्याम्
समस्तदोषास्पदमानवस्य
सृष्टया कथ नैव भवन्ति दोषा ॥ १८

कृषीवलोत्पादितधान्यराशि
भोक्ता प्रिय स्वच्छतम विधाय
भुङ्क्ते रसास्वादनतत्परस्सन्
तथैव काव्य रसिक करोतु ॥ १०

गङ्गौघसङ्गमितजीवजाल
निरस्य लोकास्सरस पिबन्ति
तथैव दोषान्सकलानपास्य
काव्ये रस नाट्यधिय पिबन्तु ॥ २०

भावानुरूप रसपूर्णरम्य
शब्दार्थशय्याकलित सहेलम्
अभोगराष्ट्रीयकथाप्रसङ्गे
परीवृत नाटकचक्रमेतत् ॥ २१

पुराणगाथावलिचित्रितानि
चारित्रवीरैश्च विभूषितानि
विभान्ति सामाजिकनाटकानि
नक्षत्रसत्यामलयाश्रितानि ॥ २२

दिव्यैर्मनोहारिविचित्रपात्रै
प्रयोगयोग्य जनरञ्जक तु
कालानुसार समयानुकूल
चकास्ति लोके नवभावदृश्यै ॥ २३

असाधुवर्णा विलसन्ति नून
सर्वत्र ते राक्षसरूपमाप्य वा
क्वचित्प्रयोगा खलु दुष्प्रयुक्ता
चक्षुश्च्युतिं प्राप्य विभान्ति काव्ये ॥ २४

प्रमादभावेन कथाथशब्दा
कवित्ववेगान्निसृता विभान्ति
तानेव शब्दान्सुधिय पठन्तु
विमाधुरूपेषु रसानुगुण्यम् ॥ २५

समासवाक्यात्परीतकाव्य
भयावह भाति कथाप्रियाणाम्
इत्येवमालोच्य समासवाक्य
प्रादर्शय तत्र विभज्य सर्वम् ॥ २६

तस्मात्प्रयोगे खलु नाटकस्य
यथास्थितिप्राज्ञजनास्सुयोग्य
सयोग्य शब्दान्मधुर विभक्तान्
पठन्त्विति प्राञ्जलिरानतोऽस्मि ॥ २७

पण्डित ओगेटि परीक्षित् शर्मा

परीक्षित्नाटकचक्रे

नाटकानुक्रमणिका

नाटकचक्रे सहत्य पृष्ठानि 24 + 561 = 585



गीर्वाण-गेय-चक्रवर्ती पण्डित ओगेटि परीक्षित शर्मा, एम् ए

जन्म १० आगस्ट १९३०

प्रकाशित गीर्वाणान्ध्र-साहित्यम –

१) ललित गीत लहरी (गेयगीत सग्रह)

२) यशोधरा महाकाव्यम् (अखिल भारतीय कालिदास पुरस्कारेण स मानितम)

३) अक्षय गीत रामायणम (सप्तपदी)

४) अमरवाणी (तेलुगु कविता)

५) परीक्षिन्नाटकचक्रम् (सप्तविंशति नाटकानि)

प्रकाशोन्मुख साहित्यम –

१) प्रतापराणायनम (महाकाव्यम्)

२) ते हि नो दिवसा गता (आत्मचरितम)

३) सौन्दय मीमांसा

4) Pen Flowers (English Poetry)

।। परीक्षिन्नाटकचक्रम् ।।

1. पौराणिक-नाटकानुक्रमणिका

१) कचदेवायानीयम्

२) श्रावणम्

३) पारीक्षितम्

४) नर्तनशाला

५) वज्रं-वज्रेण-भिद्यते

६) प्रबोधनम्

७) गुरुदक्षिणा

८) उत्तर-गोग्रहणम्

९) स्वप्नानिरुद्धम्

१०) इन्द्राय-स्वाहा

११) धनुर्मङ्गम्

१२) भीष्मप्रतिज्ञा

१३) सावित्री

१४) काव्यावतरणम्

।। परीक्षित्नाटकचक्रम् ।।

१. पौराणिक–नाटकानुक्रमणिका

समर्पणम्

१. कैलासवासिभ्या, मे मातुलाभ्या, गुण्टूरु-सत्यवती-दत्तात्रेय-दम्पतीभ्या,

सभक्तिक समर्पितमिद चतुर्दश पौराणिक नाटकनक्षमालाचक्रम् ॥

।। कच-देवयानीयम् ।।

विद्यापरिसमाप्त्यर्थं । नाट्य-सर्व-कलानिधिम् ।
संसार-सुख-दातारम् । कविं वन्देऽसुराधिपम् ।।

(नान्द्यन्ते)

सूत्रधारः — (नेपथ्याभिमुखं विलोक्य) आर्ये इतस्तावत् ।

नटी — आर्य इयमस्मि ।

सूत्रधारः — विस्मयमुखाऽसि किं विवक्षसि ?

नटी — इच्छाम्यार्येण सार्धं कचदेवयानीयं नाम नाटकं प्रदर्शयितुम् ।

सूत्रधारः — किं गीर्वाणान्ध्र भाषाप्रवीणेन परीक्षित् शर्मणा प्रणीते परीक्षिन्नाटकचक्रे, विराजमानं कचदेवयानीयं नाम नाटकम् ?

नटी — आम् तदेवनाटकं, यत् शृङ्गार संगीत प्राधान्येन विरचितम् ।

सूत्रधारः — शृणु ।

संगीत-रम्या कचदेवयानी । विभाति शृङ्गार-रसप्रपूर्णा ।
नटी नटानां सुलभाभिनेया । पद्यश्रियाऽभूषित-सन्निवेशः ।।

नटी — (आकर्णनमभिनीय) आर्य समर दुन्दुभयः प्रताड्यन्ते ।

सूत्रधारः — (आकर्ण्य) आम् सुराऽसुराणां सकुलं समरो भवति ।

नटी — आर्य, समर शब्द श्रवणात्, मम भीतिः संजायते । शीघ्रं गच्छावः एहि ।

सूत्रधारः — आर्ये, इतः पश्य । गुरुपुत्रः कचाख्यः शुक्राचार्य-निकेतनं गच्छति । एहि आवां गच्छावः (द्वावपि गच्छतः)

(शुक्राचार्यगृह् अतीव कलात्मक सकल सुखद, नयनानन्दकर भाति। शुक्राचार्य. आसव पात्रेण सहोऽपविष्टः राजते। ततः प्रविशति ब्रह्मचारी कचः)

कचः — अहो सकल कला परिपूर्णमिद शुक्राचार्य निकेतनमिति आसव गन्धेनैव ज्ञायते। अपिच।

भाति होमाग्नि-संदीप्तं। क्वचित्पुष्पासवाऽविलम्।
रजोगुण-समाकीर्णं। कवेस्सद्म कलामयम् ॥

(समन्ततः विलोक्य एकत्रोपविष्ठं शुक्राचार्यं दृष्टवा आत्मगत) अय वर्चस्विना वर्चस्वी, सौन्दर्यमय मूर्तिश्च। अय ससार सुखदायकः। कलत्र भाव प्रदीपकः। नाटयगान कलाभिनियन्ता। अपिच।

कलाप्रभावेन मनोज्ञमूर्तिः। सांतत्य-संसार-सुखात्तकीर्तिः।
एकत्र-मूर्तीकृत-राजनीतिः। विराजतेऽयं मधु-शुक्रमूर्तिः ॥

(शुक्र समीप गत्वा) अहं भो अभिवादये। (इति साष्टाङ्गं प्रणमति)

शुक्रः — (किंचित् आसव पीत्वा) मनोरथ सिद्धिरस्तु। (इति हस्त मुद्यम्य आशिषः ददाति) कस्त्वम्?

कचः — **कचाख्योऽहं गुरोः पुत्रः। ब्रह्मचर्याऽश्रमे स्थितः।**
कवेः शुश्रूषया सत्यं। ज्ञानमाप्तुमिहागतः ॥

शुक्रः — सुरगुरोः बृहस्पतेस्तनयः कचाख्यः? स्वागत तेऽस्तु ब्रह्मचारिन्।

कचः — अनुगृहीतोऽस्मि कवे।

शुक्रः — प्रतिगृह्णामि तेवचः। अपिच त्वां अर्घ्यं अर्चयिष्ये, तस्मात् बृहस्पतिः अर्चितोऽस्तु। उपविश।

कचः — महौजसा सन्निधौ माभूदविनयः।

शुक्र — अरे त्वं गुरो पुत्रोऽसि। वरिष्ठोऽसि। उपविश।

कचः — कवे, शिष्यस्तेऽहं। भवता शुश्रूषया विद्यामभ्यस्तुं समागतोऽस्मि।

शुक्रः — (किंचित् सुरा निपीय) सकल विद्यापारगतस्य सुरगुरो पुत्रोऽसि। किं मत्तः ज्ञानार्जनमिच्छसि ?

कच. — भार्गव, सर्वं सर्वं न जानाति। मुखे मुखे सरस्वती भाति।

शुक्रः — अरे कच त्वमतीव बुद्धिमानसि। (इति अट्टाहास करोति)

कचः — बुद्धि शास्त्रोल्लीढा तेजोमयी भवति।

शुक्रः — अरे कच, किते वाक् चातुर्यं। त्वमतीव वाङ्गमी। अपिचेदानी मम हृदयालवालेऽङ्कुरायसे।

कच. — उशन, न केवल बुद्धिचातुर्येण प्रयोजन, किंतु उद्यमशीलेन भवितव्य।

शुक्रः — कच, त्व ग्रहण धारण पटुरसि। ब्रह्मचारी असि। ब्रह्ममयेन तेजसा प्रज्वलसि। अवश्य ते कामना सफली भविष्यति।

कचः — महता सेवया श्रद्धयाच ज्ञानार्जन भवति। भवता सेवया नून विद्याधिको भवेयम्।

शुक्रः — कच, शृणु।

गुरुभार्गवयोर्मध्ये। बद्धवैरोस्ति सर्वदा।
तथापि त्वां ग्रहिष्यामि। शिष्यरुपेण बालक ॥

अवश्य तव कामना पूरयिष्यामि।

कचः — अहो मे भाग्यमेतत्किं। सत्यमेवाभिभावना।
पुष्पिता फलिताजस्रं। सुराऽमोदं विधीयताम् ॥

शुक्र — बाल, प्रमुदितोऽस्मि । न ते सशयो भवतु ।

कच — किं ते प्रिय करवाणि भार्गव ।

शुक्र — शीलदाक्षिण्यमाधुर्यैः । गुणैराचारपूरितैः ।
ब्रह्मचर्येण वर्तस्व । नित्य सेवा रतः परम् ॥

कच — अनुगृहीतोऽस्मि गुरो । (इतिप्रणिपत्य गच्छन्) भार्गव सर्वदा लोक अन्योन्य स्वीकार प्रदानेन समानत्व भजते । यत ।

महीतले किंतु रसातलेपि । खगोळदेशे प्रविराजमानाः ।
ग्रहास्सदा स्वीय रुचांप्रभावैः । परस्पराधीन रता भवन्ति ॥

शुक्र — वत्स, मधुरमुक्त भवता । (इति अट्टाहास करोति, कच निर्गच्छति)

(यवनिकापतति)

☆ ☆ ☆

॥ द्वितीयं दृश्यम् ॥

नाट्यमन्दिरे सगीतशाला । देवयानी (एकत्रोपविश्य गायति वसन्त-रागेण)

गीतम्

१ स्मररे स्मर रतिपतिं स्मर । अबला मा नहि रे विस्मर ॥धृ॥

२ अभिनव यौवन मधुराहम् । अविदित नूतन भावाऽहम् ।
कथमिह सेहे चित्तजबाधाम् । कस्मै वक्ष्ये दुर्भर बाधाम ॥

३ अनितर विकसित यौवन लीला । अधिगत भावज चिन्तन शीला ।
रसमय चेतसि मधुमय कविता । निरवधि कलरव काकली-कलिता ॥

४ सतत सुखमय जीवन चालिनी । निर्दय सुमशर चिन्ता तापिनी ।
अविदित पुरुष सगम भाविनी । गाढालिङ्गन चुम्बन कामिनी ॥

(कचः पत्रपुष्पफलै समागत्य, देवयान्याः गायन समये एकत्र पार्श्वे तिष्ठति गीतावसाने)

कच — अये शुक्राचार्य कन्ये देवयानि ! मधुरं गीतं भवत्या । अति रुचिराणि, मनोहराणि, फलपुष्पाणि, समाहृतानि मया, गृहाण । (इति तस्यै ददाति, देवयानी उत्थाय प्रेम्णा त पश्यन्ती गृहणाति)

देवयानी — कच ! एतानि कुसुमानि परिमल भरितानि, अति सुन्दराणि, मनोहराणि । एतानि फलानि अतिरुचिराणी स्वादिष्टानि समाहृतानि भवता । (इति सर्वाणि जिघ्रति)

कचः — गुरुपुत्रि ! कर्तव्य अनुष्ठित मया । अत्र न मे विद्यते कृतिः । अस्या नगर्यां सर्वाणि मनोज्ञानि रुचिराणी भवन्ति ।

देवयानी — कच ! त्व किं वदसि ? अत्र सर्वाणि मनोज्ञानि रुचिरानि भवन्तीति ?

कचः — आम् एवम् ।

देवयानी — कच ! त्व बहु सरस । सर्वं साभिप्राय वदसि ।

कच — विद्यमान रहस्य कथयामि ।

कच — ममलोके देवा सर्वेऽपि, ललित कला निष्णाता भवन्ति। तत्सर्वं जन्मत सर्वेषा सक्रामित भवति।

देवयानी — तर्हि, सर्वदा त्व मयासाक नृत्त वाद्यगीतै काल यापय। मा परितोषय।

कच — मदपेक्षया भवती सरसा कलावती।

देवयानी — भवतुनाम। कला स्त्री पुरुष सयोगात् रसप्लाविता भवन्ति।

कच — साधु भणित भवत्या। तत्र भवती सगीत नाटच वादनै दिवा रात्र तोषयिष्यामि।

देवयानी — कच! प्रकृत्या सुन्दर दृश्य विलोकयन् सुधास्यन्दिनीभि कविता वचनै हिन्दोलरागमालप।

कच — देवयानि शृणु।

गीतम्

मम कविता सारासार। तव हृदये स्मर वारवारम् ॥धृ॥

१ तव चचल यौवन-हेला। मधुराऽपूरित कविता-लीला।
नितरा प्राकृत-शोभा-तरला। सुखदा भवति च सतत विमला ॥

२ चित्रित-तारा-भासिनी। सुन्दर-शशिना-हासिनी।
धवलित-शारद-रजनी। व्यथयति हृदय भामिनी ॥

३ शीतल-मलयानिल शालिनी। मे हृदयान्तर-सतत-कामिनी।
ललित-कलायम-जीवन कामिनी। हृदय व्यथयति मानिनि ॥

देवयानी — कच, त्वदीय कविता चातुर्यं, कण्ठगत स्वर माधुर्यं च, सकल कलाजन चित्ताऽकर्षके भवत।

सुधालिप्तेन रागेण। कृताऽह भाव रागिणी।
विना सगीत-साहित्य। जीवन भाति पाशवम् ॥

कचः — देवयानि ! भवती गुरुपुत्री । सकल कला प्रवीणाऽसि । त्वमपि गायं गायं मे हृदयानन्दं कुरु ।

देवयानी — कच केन रागेण गातव्यं ?

कचः — भवती कलावती खलु, तस्मात् कलावती रागमालप ।

देवयानी — सखे कच ! श्रुणु ।

गीतम्

१ चिन्तय नूनं मम कविता गानम् । नितरां पिबमधुराऽधर पानम् ।।धृ.।।

२ यौवन-मद-भरितं-हृदयम् । चिन्तय रसिकमनाः सदयम् ।
मन्मथ-हेवा-लसितं-मधुरम् । पिब सरसवचो मधुरम् ।।

३ चिन्तय मे पद-निचयम् । निवसतु सुतराममयम् ।
सर्व-कला-कलितं-हृदयम् । जातं-रसमय-निलयम् ।।

४ मुन्चति-मदनः कुसुम शरम् । पश्यत्याशा चतुरस्वरम् ।
समाहर कुसुमचयं प्रेम भरम् । शामय मदनं-हृदय हरम् ।।

कचः — भवती मूर्तीभूत कलावती असि । त्व यौवनेन, नाटचेन, गानेन विलासैश्च आराधनीयाऽसि ।

देवयानी — कच, प्रतिक्षण नृत्य गायन वादनैः मा परितोषय । पितर सभक्तिक शुश्रूषस्व ।

कचः — भवती संतुष्टान्तरङ्गिणी कर्तु सर्वथा कृतप्रयत्नो भवेयम् । भवत्या तुष्टाया मे विद्या सफलो भविष्यति ।

(नेपथ्ये बाले किं करोषि इति शुक्राचार्यः देवयानी पृच्छति)

देवयानी — कच, तातपादाः आगच्छन्ति ।

(ततः प्रविशति शुक्राचार्यः ।)

शुक्र — बाले ! उभौ संगीत नाटच वादनैः अन्योनं कर्तव्यं विस्मृत्य भावप्रपन्चे विचरतः ।

कच — अयि भो भार्गव ! सेवया तत्र भवन्त, गानेन देवयानी च प्रतोषयितव्य तन्मे कर्तव्यामिति तत्र भवता आज्ञाप्तोऽस्मि ।

शुक्र — कच ! यदुक्त त्वया तत् सत्यमेव । त्व सकलकला प्रवीणोऽसि । मा सेवया, नाटच गान वादनै देवयानी च सन्तोषयसि । अद्य प्रभृति गा चारणाय नीत्वा विपिन, ताभिस्साक साय निलय प्रत्यागन्तव्य इति अधिक सेवा ते प्रददामि ।

कच — अयि उशन । व शासन शिरोधार्यं भवति मे । अनुगृहीतोऽस्मि । (इति गच्छति । देवयानी शुक्रो भूमौ उपविशत)

शुक्र — दुहित । अद्यसाय वृषपर्वण भवन गन्तव्य विद्यते । एष राज्ञ आदेश ।

देवयानी — असुराचार्याणा, शुक्राचार्याणा, वृषपर्वण आदेश शिरोधार्य ? किमत्रविचित्रम् ? एतत् आश्चर्यं भवति मम ।

शुक्र — राज्ञ आज्ञा अनुपालनीया । एष राजादेश । राजा प्रजा रक्षक । तस्य आज्ञा सर्वेषा शिरोधार्या भवति । यदि प्रजा तस्याज्ञा धिक् कुर्वन्ति तर्हि पालनाचक्र अस्तव्यस्त भविष्यति यत ।

यथाऽर्क-भाससा-हीने । लोके ध्वान्त भविष्यति ।
तथा राजाज्ञया-हीने । शुक्र-नीतिरियं श्रुणु ॥

(देवयानी अन्यत्र दत्तदृष्टि भवति)

(ता विलोक्य) देवयानि ! ते हृदयमद्य विषयान्तरे सलग्न भाति । किमत्र कारणम् ?

देवयानी — कच कारणम् ।

शुक्र — (आश्चर्येण) कि कच कारणम् ?

देवयानी — (सकोचमभिनयन्ती) नहि । किंतु पित ! कच अनया विद्यया कि साधयिष्यतीति, विचार मग्ना सजाताऽस्मि ।

शुक्र — यत् अन्ये साधयन्ति तदेव सोऽपि साधयिष्यति । किमत्र ते विचारणीय विद्यते ?

देवयानी — जनक ! किमर्थं वृषपर्वा आमन्त्रण प्रपितवान् ?

शुक्र — असुरेषु कलय सजायते, त कलह प्रशामयितु, राजा मम साहाय्य अपेक्षते इति मे वितर्क ।

देवयानी — कीदृश स्वरूपोऽय कलह ?

शुक्र — बाले ! त्व तव प्रश्न परम्परया मे शिरोवेदना जनयसि । सर्वमेतत् असवद्ध अपिच असाम्प्रत ते भवति ।

देवयानी — पित ! अय ते शिष्य कच अतीव सरस । कलाप्रिय । प्रत्यह तव सेवा करोति । गायति । नृत्यति । स मे रोचतेऽत्यन्तम् । सोऽपि मयि स्निह्यति ।

शुक्र — बाले ! उत्तिष्ठ। गच्छाव । माध्याह्निक निर्वर्तनीय भवति । (इति गच्छन)

(यवनिकापतति)

☆ ☆ ☆

॥ तृतीयं दृश्यम् ॥

(उद्याने साय समय । देवयानी सख्या विलासिन्या सार्ध प्रकृति शोभा पश्यन्ती समापते)

देवयानी — सखि ! विलासिनि पश्य एते वातपोतका मन्द मन्द वहन्त मे तनुलता पुलकाङकुरै कम्पयन्ति ।

गीतम् (काफी रागे)

१ सखि कुसुमे भ्रमर मकरन्दम् । पिबति पदेपदे पश्य सानन्दम् ।।धृ ।।

२ आनन्त्य मलयानिलोयमखिल । चुम्बति गात्र क्षणेक्षणे चपलम् ।।

३ याचे नाह किमपि मे जीवने । सेहे नाह दर्पक बाधां यौवने ।।

४ वीक्ष्ये सुखद गुरु-सुत-रूपम् । भोक्ष्ये मधुर-रतिपति-रूपम् ।।

विलासिनी — (आश्चर्येण) देवयानि ! त्व कदापि मे नोक्तवती ते हृदय भावना । अद्य जानामि ते हृदय वेदना । कथ्यता कोऽय कच । का कथेयम् ।

देवयानी — विलासिनि ! अय सुरगुरो पुत्र ब्रह्मचारी । रतिराज सुन्दर । समविभक्ताङ्ग । विनीत । शीलवान् । सुशिक्षित । कर्मसु कुशल । गाननृत्य विद्या विशारद । कामयेऽहृतम् ।

विलासिनी — देवयानि ! कथमय अत्रागत ।

देवयानी — पितृपादाना सकाशे विद्यामभ्यस्तु समागत ।

विलासिनी — देवयानि ! यथा त्व तस्मिन् लग्नाऽसि, तथा स त्वयि लग्न चित्त अस्ति किं ? कामना शृङ्गार रसप्रपूर्णा भवितु, परस्परायत्त चित्त सलग्नमावश्यक भवति । तादृश विवाहानुबन्धन सुष्टु शोभते ।

परस्पर-प्रेम-रसाभिनीताः । भावाः परं वर्धित कामरूपाः ।।
आजीवितान्त मधुर प्रवृद्धाः । कुर्वन्ति कल्याण ममुत्रलोके ।।

देवयानी — सखि मयि स अत्यन्तानुरक्त । यत् अह कामये तत सर्वं स करोति । मयासह गायति । नृत्य त । वादयति च ।

विलासिनी — सखि ! एकत्रैवानुरागश्चेत स रसाभास भवति । तस्मात् स त्वयि लग्न चित्त यथा भवति तथा कुरु । नोचेत् तत् कल्याण न भवति ।

एकत्र भावनापूर्णं । कल्याणं नास्ति भामिनी ।
कल्याणं सतत भाति । यत्रान्योऽन्य मनोभवः ।।

देवयानी — सखि ! स शृङ्गारभावपरम्पराभिसज्जित-रसप्रपूर्णं दृष्ट्या, मा सर्वदा सतोषयति । फलपुष्प पल्लवानि समानयति । मम कर्मणि सहायक भवति । रहसि सकौतुक पश्यति ।

विलासिनी — एतावन्मात्रेण स त्वयि बद्धानुराग इति कथ भाव्यते।

देवयानी — आवयो हृदये जानीत विलासिनि। हृदये प्रणय वचनै सगूढ रहसि भाषेते।

विलासिनी — सखि! देवयानि! त्व न जानासि। स देवकुमार। भवती राक्षस गुरो शुक्राचार्यस्य कुमारी। अपिच लोके एव प्रथा विद्यते, यत् जन्मत सुराऽसुराणा कलह भवति, नतु कल्याणमिति।

देवयानी — विलासिनी! प्रेम जाति वर्गान् न जानाति।

विलासिनी — देवयानि! प्रेमइति न वक्तव्यम्। किन्तु काम इति कथय।

देवयानी — तथा किमर्थं वक्तव्यम्।

विलासिनी — देवयानि! प्रेमकामयो महदन्तर विद्यते।

देवयानी — विलासिनी! अङ्गीकरोमि ते वचन। काम इति भणामि। काम वर्णं न जानाति। यदि स जानाति सवदा सर्वथा तूर्णी करोति तत् वणम्। काम स्वच्छन्द वृत्ति राजते।

विलासिनी — यथा रोचते ते तथा कुरु।

देवयानी — इत पश्य सखि।

सायं सन्ध्या-रक्तदेहोंशुमाली। रक्त. पूर्णं चुम्बतीहप्रतोचीम्॥
गाढ श्रान्त. सर्व लोक. प्रयाति। स्वीय गेह पूण सौख्यायतूर्णम्॥

तरणि पश्चिमाम्बुधौ पतति। एहि गच्छाव। अधुना कच गोभि स्साक प्रत्यावृत्त भवति। त द्रष्टु मे मन त्वरयति। तस्य दर्शनेन विना स्थातु न शक्नोमि। (इति निष्क्रान्ते)

(यवनिकापतति)

☆ ☆ ☆

चतुर्थ दृश्यम्

शुक्र — (भूमौ उपविश्य आसव पिबति । देवयानी द्वारि स्थित्वा कचस्यागमन निरीक्षन्ती तिष्ठति । गवा अम्बारावा श्रूयन्ते)

देवयानी — (ससम्भ्रम पितरमुपसृत्य) तात । गाव समागता । किन्तु कच न सलक्ष्यते । तात ते अग्निहोत्र आहुत । सूर्यश्चास्तगत. । कितु कच न सदृश्यते । तात वने व्याघ्रादय विचरन्ति । तेभ्य तस्य न किचित् बाधा मा भूयात् इत्येव मन्ये । जनक । त विना नाह जीवेयम् । सत्य ब्रवीमि ते । स ब्रह्मचारी । तपोधनश्च स कर्मसु दक्ष । तस्यागमन पर्यन्त नाह भोक्ष्ये । तस्यामार्गान्वेषण करिष्ये । अय मे प्रियवत्तम । अभिन्न । (इतिभय कम्पिता रा'दति)

शुक्र — पुत्रि मा बिभेहि । अयमापन्न नहि अय सजीवो बभूव ।

देवयानी — तात, किं भणसि ?

शुक्र — प्रशान्त चित्ता श्रृणु भवती । अय दानवै गुरो पुत्र इति सहन दग्धश्च । तत् दग्धचय सुराया मिश्रण कृत्वा दानवा मे अयच्छन पातु । अविचार सुरालोलुपोऽह ता सुरा अपिवम् । स. मम उदरे आसीत् । स उदरे मरणकाशात् मृत सजीविनी विद्या अभ्यस्य मदीयाऽज्ञया मे कुक्षि विदार्य विप्र बहि निर्विचक्राम । स जीवन आस्ते । बाले अद्य प्रभृति सुरापानमह विसृजामि । सुरापायिना मति मन्द भवति इतिशपामि । कच श्र प्रभाते परिगमाप्न विद्य त्रिदशालय गच्छति । मा विचारय । मारोदि । त्वत्ते कच आवा द्रष्टु समागच्छति । पश्य ।

> राहुमुखतइवाद्जोऽसौ । निर्गतश्चोदरान्मम ॥
> विराजते यथापूर्वं । परिपूर्ण कलानिधिः ॥

देवयानी — तानगच्छाम्यह सगीत शाल्माम् । (इति निष्क्रान्ता)
(तत प्रविशति कच)

कच — भार्गव ! अभिवादये (इति नमस्करोति) भवता अनुज्ञया, करुणया, कृपया, परिसमाप्त विद्य अभवम् । मे मन त्वरते त्रिदशालय गन्तु । मा गन्तुमाज्ञापयन्तु भवन्त ।

शुक्र — कच ! निष्कण्टक अतिसुखद ते मार्ग भवतु गच्छ । (इत्याशी प्रददाति)

कच — आचार्य, भगिनी देवयानी कुत्र ।

शुक्र — कच ! देवयानी तवागमन निरीक्षन्ती इदानीमेव सगीत शाला गतवती । तत्र ता द्रक्ष्यसि ।

कच — कवे ! गच्छाम्यह ता द्रष्टुम् ।

शुक्र — आम् गच्छ ।

(यवनिकापतति)

☆ ☆ ☆

पंचमं दृश्यम्

देवयानी — (सर्वालङ्कार भूषिता सगीत शालाया उपविश्य आत्मगतम्) कच त्रिदशालय गच्छति । अधुना मत्समीप समागमिष्यति । निर्भीका तमनुसरेयम् । यदि मयि स अनुरक्त वा न वा विचार्य, अनुरक्तश्चेत् परिणेतु प्रक्ष्यामि । मयि अननुरक्तश्चेत् त बलात् आलिङ्गय सुमुखमनस्क करिष्यामि । यदि मा तिरस्करोति तर्हि त शपेयम् । स्त्रीबुद्धि प्रळयान्तका इति दर्शयेयम् । (तत प्रविशति कच)

कच — देवयानि ! अह समाप्तविद्य । अधुना त्रिदशालय गच्छामि । अह तव दाक्षिण्येन अनुकम्पया स्नेहेन अनुगृहीतोऽस्मि । कथान्तरेषु स्मर्तव्योऽस्मि । नाह विस्मरिष्यामि ।

देवयानी — कच ! त्वं समाप्त विद्य । मा भवता भजितुमर्हसि । विधिवत् मंत्र पुरस्सर मम पाणिं गृहाण । अहं त्वयि अनुरक्ता । त्वं ब्रह्मचारी असि । मयासार्धं वसन् मा सतोषयन् वादयन् मया नृत्यन् आसी । त्वं मम हृदि सर्वदा निवससि ।

कच — सुभगे ! यथा तवपिता मम पूज्य, मान्य, तथा त्वं पूजनीयतरा असि । भद्रे त्वं पूज्या गुरुपुत्री । शुक्र तव पिता, मम गुरु ।

देवयानी — त्वं मे पितु पुत्र नहि । त्वं बृहस्पति पुत्रोऽस्मि । तस्मात् द्विजोत्तम त्वं मम मान्य पूज्यश्च । कच ! त्वं न जानासि मे सौहार्दं, अनुराग, उत्तमा मा त्यक्तुं नार्हसि । अहं त्वयि अनुरक्ता । (इति हावभावादिकं करोति, तस्य पाणिग्रहणं कर्तु उद्युक्ता भवति)

कच — (किंचित् दूर अपसृत्य) देवयानि ! त्वं धर्मत मम भगिनी । त्वयि मे मन्यु न विद्यते । विशालाक्षि ! मा त्रिदशालयं गन्तु आदिश । पथिमे शिवमाशस । कथान्तरेषु धर्मस्य अविरोधेन स्मर्तव्योऽस्मि । सुभगे ! अप्रमत्ता मम गुरु नित्यमाराधय ।

देवयानी — कच ! इयन्त काल त्वय्यहं अनुरक्ता, आसक्ताच । स्त्रीणा हृदयभावना त्वमनभिज्ञोऽसि । त्वमरसिकोऽसि ।

सुन्दरं पुरुष दृष्ट्वा । मनोभ्रान्तिर्भविष्यति ।
स्त्रीणां जगति सर्वेषां । रसज्ञाना विशेषतः ॥

कच — देवयानि ! अधर्मचारिणा कामुकाना इय दुरवस्था भविष्यति, न मादृशाना ।

देवयानी — कोऽयमन्तर कामुकाना, अपिच युष्मादृशानाम् ।

कच — कामुका सत्वगुणरहिता, विचारहीना, अन्नत्या इव । प्रेमिका अतिशय सत्वगुणोपेता तन्नत्या इव । सवमेतत् त्रिगुणात्मक व्यत्ययरूप भवति ।

देवयानी — कच ! त्वदीया कल्पना समयानुकूला । विरम ते भाषणम् । जगति स्त्रीणा स्वैरकामित लघुरूप न्यक्कृतरूप च भवति पुरुषाणा ।

निराश्रया मे भुवि यौवन-श्रीः । गतं वयः प्रेम-रसं विनैव ।
निकेतनें तिष्ठति भार्गवश्च । तथापि भोक्तव्यमहो स्वकर्म ॥

मम सर्वं यत्न शिथिलितः । सर्वा मे यौवन श्री निराश्रया ।धिक् मे यौवन । धिक् मे जीवनम् । (इति रुदन्ती गच्छति)

(यवनिकापतति)

☆ ☆ ☆

॥ श्रावणम् ॥

घनाऽकृति घटाऽश्लिष्टः । तप्तानां वारिदायकः ।
सर्वलोक समाराध्यः । श्रावणोऽयं विराजताम् ॥

(नान्द्यन्ते)

सूत्रधारः — अयिकुटुम्बिनि, इतः आगच्छ ।

नटी — (ससंभ्रमं प्रविश्य) एषास्मिस्वामिन् ।

सूत्रधारः — अयं ग्रीष्मः चण्डरविप्रतप्तः, प्राणिनां तृष्णां प्रजनयति ।

नटी — (विहस्य) किं भवान् तृषितः ?

सूत्रधारः — हन्जे ! हृदयगतां भावनां जानासि त्वम् । एतादृश भावगर्भितं वचः आधुनिकाः न जानन्ति ।

नटी — किं पानीयं दद्याम् ?

सूत्रधारः — पानीयं मास्तु ।

नटी — तर्हि किं दद्याम् ?

सूत्रधारः — लवण-मिश्रिततक्रं पायय ।

नटी — अहो तृषितानां शीतल पानीय योग्यं भवति, नतु तक्रम् ।

सूत्रधारः — हन्जे त्वं न जानासि, तक्रस्य भैषजगुणम् । तक्र शक्रस्य दुर्लभम ।

नटी — (हसित्वा) हां तक्रमेव पाययेम् । अधुना किमर्थं, आहूताऽस्मि, निवेदयन्तु भवन्तः ।

सूत्रधारः — शृणु, श्रावणं नाम नाटकं प्रदर्शयितुं समुत्सुकोऽस्मि । तस्मिन् नाटके त्वया गातव्यम् ।

नटी — किं श्रावण नाम नाटकम् ? केन कविना विलिखितमिदम्।

सूत्रधार — इदतु गीर्वाणान्ध्रभाषाप्रवीणेन, कुशलेन परीक्षित् शर्मणा विरचितम्।

नटी — आम् विदितम्। अनेन कविना यशोधरा महाकाव्य, अपिच अक्षय गीत रामायण इत्यादि काव्यनिचय विलिखितम्। अय गीर्वाणान्ध्र प्रपन्चे। सुप्रसिद्ध कवि। अहं अधुना अतीव प्रमुदितास्मि।

सूत्रधार — भवतो प्रमुदितासि। गायस्व।

नटी — क विषयमुद्दिश्य।

सूत्रधार — श्रावणमुद्दिश्य।

नटी — केन रागेण गातव्यम।

सूत्रधार — हाँ, मेघमल्हार रागेण गातव्यम्।

नटी — श्रुणुत मेघमल्हार रागम्।

श्रावणस्तापहारी य.। काव्यरूप विभासक.।
कृष्णमेघालि सभूत:। कुरुते लोक मङ्गलम्॥

सूत्रधार — अहो! साधुगीत भवत्या।

(नेपथ्ये)

पूर्वजन्म कृत पाप। जन्मन्यस्मिन् समागतम्।
अवश्यमनुभोक्तव्य। नहिलेशोऽपि सशय.॥

नटी - (कर्णंदत्वा) आय! कोऽयम् ? स्व दौर्भाग्य विनिन्दयन् इत प्रविशति।

सूत्रधार — हन्ज! पुत्रहीन स्वात्मान विनिन्दयन्, सुमन्त्रणसार्थं, राजा दशरथ प्रविशति।

नटी — राजा दशरथ सुमन्त्रेण सार्धम् ?

सूत्रधारः — ओम् ! मन्त्रिणा सुमन्त्रेण सार्थं इतः एव आगच्छति।

नटी — आर्य ! आवाभ्यां न स्थातव्यमत्र। एहि गच्छावः।

(इति निष्क्रान्तौ)

(ततः प्रविशति दशरथः सुमन्त्रेण सार्थं विचिन्तयन्)

दशरथः — सुमन्त्र, अहो मे दौर्भाग्यं पृथ्वीपतिषु। अहं धराधिपोऽपि सकल सुख समाविष्टितोऽपि, मानसिकानन्दं नह्यनुभवामि। एतत् सत्यमेव मे दौर्भाग्यम्। यतः।

पूर्व जन्म कृतं पापं। जन्मन्यस्मिन् समागतम्।
अवश्यमनुभोक्तव्यं। नहि लेशोऽपि संशयः॥

(दशरथः सिंहासने उपविशति, सुमन्त्रः पार्श्वस्थित पीठे उपविशति)

दशरथः — अयि सुमन्त्र, मम पूर्वजाः संतानार्थं तापं तापं, यज्ञ याग तपः पूजादिकं विरच्य, वंशोन्नतिकारकं सन्तान प्राप्नुवन्तः आसन्।

वैवस्वतमनोः पुत्रः, मे प्रपितामहः राजा दिलीपः, दिलीपस्य पुत्रः, मम पितामहः रघुः, रघोः पुत्रः, मे पिता अजः, यथाक्रमं, परम्पराऽगत राज्यधुरं ऊढ्वा प्रजालि धर्म निरताः प्रशासयामासुः। अहं अजस्य सुतः दशरथः। मम एतावत्पर्यंत वंशाङ्कुरोऽपि न जातः। अहं कति वर्षाणि जीवेयं न जाने। मदनन्तरं कोऽस्य कर्ता अस्य राज्यस्य भविष्यति। मम मरणानन्तरं तर्पणादिक कः दास्यति। मे पूर्वजाः कथं तृप्ताः भविष्यन्ति। एवं विचार्यमाणे सर्वं भविष्यत् तमसा परीवृतमिव विभाति।

कदा वंशे दीपाङ्कुरः भविष्यति। कदा सकलाः दिशः समुज्वलाः भविष्यन्ति। कदा प्रजाः सन्तुष्टान्तरङ्गाः भवेयुः। कदा सुताननं द्रक्ष्येयं। कदा तं बालकं उत्सङ्गे विनिवेश्य, सकौतुकं तृप्तः चुम्बनमाचरेयम। कदा दरहसन विकसित वदनं पुत्रकस्य पश्येय। कदामे वान्छा फलिष्यति। बत एवं विचार्यमाणे मे हृदयं चिन्तया जर्जरितं भवति। अनया सर्वदाऽहं अकर्मकः भवामि। विचारेण हृदयं विदलति।

चिन्ता-ग्रीष्म पर तप्त । हृदयन्त्वनिश भृशम् ।
आनन्द रसहीनत्वात् । दलित बाधते बत ॥

सुमन्त्र — राजन् ! ललाट लिखितारेखा परिमार्ष्टुं न शक्यते । वय भोक्तार । दाता सर्वेश्वर । यत् भव्य तत् भवति । वय सतानार्थं यत् कर्तव्य तत कुर्म । सकल धर्म शास्त्रोक्त रीत्या शान्त्यादिक कारयाम । अवश्य नातिचिरेण शुभसूचक दिवसा भविष्यन्ति । अस्मिन् विषये सतापहेतु नस्यात् । भवता शान्तमनसा भवितव्यम् ।

दशरथ — सुमन्त्र ! भवान् सर्वशास्त्र वेत्ता । त्व अतीव लौकिकोऽसि । पश्य ।

रजनी चन्द्रहीना च । शिशु हीन निकेतनम् ।
कासार पद्महीनश्च । नैवभान्त्येव शोभया ॥

चिन्तया दह्यमान मानस भवामि । केनोपायन बाधा उपशामिता भविष्यति ।

सुमन्त्र — अयि राजन् ! एव चिन्तिते भवति, शरीर व्याधिग्रस्त भविष्यति । तस्मात् भवान मनोरजनार्थं, यत् किमपि वन उत नदातीर वा गच्छतु विश्रान्ति सुख अनुभवतु इति मदीया विज्ञापना ।

दशरथ — सुमन्त्र !

चिन्तादग्ध मनस्कानां । शान्तिर्नास्ति महीतले ।
कुत्रापि यास्यमानाना । भोक्तव्यो दैवनिर्णय. ॥

सुमन्त्र — राजन् तथा मा वदतु । चिन्ताग्रस्ता सर्वथा प्रकृति दर्शनेन प्रशामित चित्ता भविष्यन्ति इति आयुर्वेद सिद्धान्त । तस्मात भवता तथा अनुष्ठेय इति ममाऽभिप्राय ।

दशरथ — सुबुद्धिमता, सुमन्त्र मन्त्रिवर्याणा, भवन्ति प्रशान्ति वचना सत्य मे पालनीया । तस्मात् श्व प्रभाते तमसा तीर गन्तु, सवयत्ना

किमुत मज्जनेन । यद्येषा अपुत्रकस्य, चिन्तादग्धस्य जन्तो उत्तममार्गं प्रदर्शिनी भवेत्, तर्हि धन्योऽहं मन्ये । अत्रोपविश्य किंचित् व्यपगत श्रमो भूत्वा पश्चात् मृगया करिष्ये । अधुना अत्र कानन सर्वं सगीतमय प्रति भाति मे । यत:

सुवाहिनी-रम्य-तरङग-निस्वनैः । पतत्रि-वर्गस्य मनोज्ञ सुस्वरैः ।
मधुव्रतानां मधुराति-गुञ्जनैः । चकास्ति संगीत-सभेव वर्तनैः ॥

(इति उपविश्य चिन्तयन् आस्ते)

(यवनिका पतति)

☆ ☆ ☆

तृतीयं दृश्यम्

(तत प्रविशति सतुलिता तुला वहन् श्रवण कुमार)

श्रवण — (स्वगतम्) आप्रात ग्रीष्मावसाने, तपनद्युतौ बभ्रम्यमान, पित्रो धुर वहन् अधुना तमसातीर समागतोऽस्मि । किंचित् काल अत्रैव विश्रान्ति सुखमनुभविष्ये । (इति तुला विन्यस्य भूमौ, फाल भागात् घर्म जल तर्जन्या विनीय श्रमापनोदन शब्द करोति)

पिता — अयि बाल, त्व अतीव परिश्रान्त असि । किंचित्काल विश्रमस्व । आवयो कृते त्व अतीव कष्टी भवसि । तत् अस्माक असह्य वेदन भवति ।

श्रवण — पित, तथा न वक्तव्य । एतत् सर्वं मम कर्तव्य खलु । भवतो सेवया अह बहु प्रमुदितोस्मि ।

माता — अरे चिरजीव, एहि मत्सकाश । (श्रवण विसर्पति तस्या सकाशम्)

श्रवण — मात, आगतोऽस्मि। (इति समीपे उपविशति)

माता — अयि तनय, ते शरीर घर्मजल सिक्त मस्ति। (इति स्वीय चीराचलेन तस्य शरीर परिमार्जयति)

श्रवण — जननि, तथा करण न मे रोचते। अहतु युवयो सेवा परायण। युवा मया सेवितव्यौ। (इति तस्या पादौ मृदुतर स्पृशति)

माता — अरे बाल, किं ते कष्टमापतितन्। भुजस्कन्धे तुलाया आवा सवहन अतिक्लेश भजसे। आवयो जीवन सुखतम करोषि, ते जीवन सुख विहाय।

श्रवण — मात, किं वदसि भवती। भवत्या ममपोषणे कियत् कष्ट अनुभूतम्। भवत्या क्लेशात् मम क्लेश गुरुतरो न भवति। अपिच श्रृणु।

संवाह्य मातस्तव रत्नगर्भे। सुखेन मां त्वं नवमासकालम्।
प्रसूय दत्वा स्तनमप्रमेयं। इयन्तरूपं वहुधा कृतासि ॥

अम्बे! न मातु पर दैवतम्। मातृ पूजने सर्वा देवता पुज्या भवन्ति। पितृ पूजने सर्वा लोका पूज्या भवन्ति। अह युवयो सेवाया सकल ब्रह्माण्ड मण्डल पूजयामि। धन्योऽस्म्यह पितरौ।

पिता — अरे डिम्भक, श्रवण, शीतल समीर प्रवहति। अत्र कुत्रापि समीपे नद्या भवितव्य इति मे मनीषा।

श्रवण — पित, अय तमसा नद्या परिसर'।

पिता — बाल, तमसाजल पापहर इति लोकश्रुति। पिपासा मा बाधते। किंचिज्जलमानीय पायय बाल।

श्रवण — किंचिज्जल किं, ममसमीपे विद्यमान घटपूर्ण तमसा-जल आनयिष्यामि पित।

माता — तनय, सावधानतया गन्तव्य। तमसातीर गर्जसिह व्याघ्रादिभि समावृत इतिश्रुतम्। क्षिप्रगत्वा अप्रमत्ततया जलमानय। अहमपि बहु पिपासार्दिता।

श्रवण — पितरौ गत्वाहं क्षिप्रं पानीयमानयेयम् । अत्रैवोपविशताम् । (इति गच्छति)

(यवनिका पतति)

☆ ☆ ☆

चतुर्थं दृश्यम्

(तमसानदीतीरं घनकाननावृतभाति तत्र प्रविशति घटहस्तः श्रवणकुमारः)

श्रवण — अहो ! कियत् सुन्दरमेतत् दृश्यम् । विधात्रा एकत्र सौन्दर्यं दिदृक्षयेव तीरमिमं समृजे इति मन्येऽहम् । आहो !

> **विविध परिमलाक्तैः पुष्पितैर्वृक्षषण्डैः ।**
> **बहुल पतगवर्गैः कूजितैश्शब्दरम्यैः ।**
> **प्रथयति गुणरूपे तीरदेशोऽत्रचित्रे ।**
> **विमल-सलिलवाहैः पावनैः शैत्यवातैः ॥**

(इतस्ततः विलोकयन्) इतः कारण्डवचक्रवाकानां कलकल ध्वनिः । इतः मयूराणां केका । इतः मेघगर्जन-निगत, निस्वन स्वना, कर्णपेयं भवन्ति । सर्वमेतत् श्रावणानन्दस्थानं, श्रवणानन्द दर्शनयोग्यंच भवति । इतोऽयाता शीत-वात-पोतकाः चाचल्येन मे तनुं परिस्पृशन्ति ।

> **इतः प्रमत्ताः प्रचुर मयूराः । विचित्रपिच्छैरभिभूषिताङ्गाः ।**
> **केकाभिरस्मिन् विपिने प्रमोदे । नृत्यन्ति लोलं तमसा समीपे ॥**

अत्र लोकत्रय सौन्दर्यं पश्यामीवाहं भावयामि । सर्वविहङ्गमाः पशवश्च अत्रैव निवसन्ति, यतः स्थानमेतत् सर्वसौख्यानां निलयमिति । मे चेतः

तमसा नदी परिसर दर्शनेन अमन्दानन्दमनुभवति । अत्र इयं दिशा दर्शन योग्या भवति ।

महोन्नतास्ते नगराजयश्च । शकुन्तवर्गावृत मस्तकाग्राः ॥
मातङग यूथाञ्चित रम्यरूपाः । तन्वन्ति नेत्रोत्सवमागतानाम् ॥

(किंचित् अग्रेगत्वा) अयं श्रावणः कमपि भाव संदर्शयन् न संदिशतीव न संदर्शयतीव प्रतिभाति । अयं ध्वनिप्रधान काव्यप्रपंचावतारः । नाहं किमपि वक्तुं शक्नोमि ।

मनोमयूरः प्रचुरं प्रमत्तः । प्रवृत्त लास्यातिविलासरूपः ।
वर्षागमे श्रावण वीक्षणेन । करोति नाट्यं बहु शिक्षितः किम् ॥

अत्र सर्वमपि रसप्रपूर्णं विभाति

(इति नद्या अवतरति, जलेन हस्तपाद प्रक्षाळयति, अजलिना जल त्रिवार पीत्वा) अहो केवलमिद जल पीयूषमेव (इति उद्गार करोति) अह अतीव तृप्तोऽस्मि । यत ।

जलमस्याः परं स्वच्छं । पापघ्नं भाति सर्वदा ।
मृतश्चाप्यमृता भान्ति । स्नानपानेन निश्चयम् ॥

(इति नग्नगात्र कुम्भक्षाळयति, कुम्भेन जल तरङ्गी करोति, कुम्भ जले निमज्जयति, तदा बुड बुड बुड शब्द भवति ।

(यवनिका पतति)

☆ ☆ ☆

पंचमं दृश्यम्

(तमसानद्या तीरे दशरथ चिन्तयन् अस्ति बुड बुड बुड शब्द भवति)

दशरथ — (बुडबुड शब्दमाकर्णयन्) अहो आप्रात एकोऽपि जन्तुः अरण्ये नावलोकितः । किन्तु जलपान शब्दस्तु श्रूयते । भवतु किंचित् काल श्रुत्वा शब्द भेदिन विसृजेयम् (इति उत्तिष्ठति) यदि विलम्ब्यते एष पलायित भवेत् । अधुना सहसा शब्दभेदिं विसृजेयम् । (इति आकर्णान्त मौर्वी आकृष्य शब्दभेदिन विसृजति)

श्रवण — (नेपथ्ये) हा हतोऽस्मि । हा तात । हे अम्बे मृतोऽस्मि (इत्युच्चै. आक्रोशति)

दशरथ — (कर्णदत्वा, किमेतदापतित ? कम्पयन्) बालकस्याक्रन्दन मिवाप्याति । अह तदाक्रन्दनस्थान गच्छेयम् । (इति गच्छति)

(यवनिका पतति)

☆ ☆ ☆

षष्ठं दृश्यम्

(शल्यप्रात रुधिरासिक्ताङग कुमार विचेष्टमान अस्ति। तत प्रविशति दशरथ)

दशरथ — (विचेष्टमान बाल दृष्ट्वा) एष कुमार। कि दारुण-मध्यवसित मया। अहोवत कि म अपराद्ध अनन कुमारेण। (इति सानुक्रोश त पश्यति)

श्रवण — (दशरथ दृष्ट्वा) भो! अह श्रवण कुमार। ब्राह्मण पुत्रोऽहम्। अत्रैव दक्षिणत मे पितारावास्ताम। तौ पिपासार्दितौ। ताभ्या कृते जलमानेतु समागतोऽस्मि। तौ जनुपान्धौ। जलकुम्भमिद ताभ्या भवान् प्रयच्छतु। (इति मृत)

दशरथ — (विषण्ण) अय ब्राह्मणकुमार। वहु पाप कृत मया। ब्राह्मणा नहन्तव्य। किन्तु अज्ञानतया मया ब्रह्महत्या कृत। वत मे जीवने सर्वाणि अनिमित्तानि मा अनुधावन्ति। (इति सतप्तचित्त, दुखातिभरेण घटमुन्नमय्य गच्छन्)

अहो मे जीवन सर्वं। तथा पापाविल भृशम्।
श्रावणे वाहिनीवात्र पङ्क्तिलैर्बुद्बुदैर्यथा॥

(इति निष्क्रान्त)

(यवनिकापतति)

☆ ☆ ☆

सप्तमं दृश्यम्

(हजे तनय एतावत्पर्यन्त नह्यागत, इति श्रवणकुमार पितरौ परस्पर भाषयन्तौ स्त)

पिता — हन्ज, तनय अद्य चिरयति कुत।

माता — अय सर्वदा उद्यमशील । क्षिप्र कार्यकारी । कदापि विलम्बन न करोति ।

पिता — हन्जे, मे हृदय कुशङ्कया दोलायित भवति ।

माता — आर्य, डिम्भकस्य वन्यमृगात् त्रासो मा भूयात् ।

पिता — अस्मात् प्रदेशात् तमसा नदी कियत् दूर विद्यतेत्यनभिज्ञो आस्ताम् ।

माता — आर्य, मे हृदय अत्यन्त स्पन्दते । यत् किमपि सजात स्यात् तनयस्येति मे स्फुरति ।

पिता — हन्जे ! तथामावद । शान्त पाप शान्त पापम् । तथा मा भूयात् । भगवन् । (इति हस्तौ उन्नमय्य नमस्करोति)

(पादतलस्पर्शया जनित गमन शब्द श्रुत्वा)

माता — भो श्रुणु गति शब्द श्रूयते ।

पिता — (आकर्ण्य) हा गति शब्द समायाति ।

माता — आय अय तनय समागच्छति ।

पिता — अरे तनय, किमर्थमेव चिरयसि ।

माता — एहि तनय ! आवा पुनरुज्जीवितौ तवागमनेत ।

(दशरथ प्रविश्य मौनेन तिष्ठति)

माता — अरे कुमारक ! किं कारण, त्व प्रत्युत्तर न ददासि । कुत्थोऽसि ? किं आवयो सेवया परिश्रान्तोऽसि ?

पिता — अरे तनय ! अनन्तर त्व रुष्टो भव । प्रथमत पानीय देहि ।

माता — तनय, त्वमेव आवयो रक्षकोऽसि ।

पिता — अरे त्वमेव आवयो दृष्टि यष्टिश्च ।

माता — तनय, श्रवण, जलकुम्भ मे प्रयच्छ । अह पिपासोपशमन करिष्ये । अरे मे जिह्वा शुष्कीभूतारे । (इति हस्तौ प्रसारयति)

(दशरथ शनै शनै तयो पुरत आगत्य कुम्भ प्रयच्छति)

माता — तस्य हस्ताभ्या पात्रं नयति, तस्य हस्त स्पर्श सजनित सुखमनुभूय, मनसि) अय स्पर्शः तनयस्य नहि । अयं कोवा अन्य पुरुषः ।

पिता — अयि भो. कस्त्वम् ।

माता — किं भोः मौनमवलम्बसे । प्रत्युत्तर देहि ।

दशरथः — पितरौ । (अर्थोक्त्या विरम्य)

माता — किं भोः वद संपूर्णं । कोऽसि ?

दशरथः — पितरौ ! अह अयोध्यापतिः । दशरथः ।

माता — राजन् दशरथ ! भवान् किमर्थं आगतवान्-असि ।

पिता — क्वास्ति अस्मत् तनयः ।

दशरथः — पितरौ ! तमसानद्यां जनित बुडबुड शब्द श्रुत्वा गजशङ्कया शब्द भेदिनमिषुं अज्ञानतया व्यसर्जयम् । तेन शरपातेन श्रवण-कुमारः मृतः । तस्य कथनानुसारं जलकुम्भमहं आनीतोऽस्मि । (इति सगद्गद कथयति)

पितरौ — हातनय श्रवण (इति सोरस्ताड रुदन्त.)

पिता — राजन् ! तेन किं ते अपराद्धम् । हे अयोध्यापते । भवान् प्रमत्त अस्ति । आवा अक्षणाभ्या काणौ नहि बभूवतु । भवानेव अक्षणाकाणः । श्रवणाभ्या बधिर । राजान. स्वाथिन भवन्ति ।

माता — राजाऽधम ! अय श्रावण आवयोः तनयः, जीवनत्राता, प्राणाः । किं त्व जानासि पुत्र प्रेम । राजन्, भवता अविचार्य कर्म कृतम् । धिगस्तुते ।

पिता — राजन् श्रुणु । त्व ते कर्मणः फल इह जन्मन्येव अनुभविष्यसि । त्वमपि पुत्रप्रेम्ना परितप्यमानमानस., अयि कुमार, हा तनय, अयि मे प्राणाः, इति दह्यमान चित्तः, जल्पन् क्रन्दन्, पचत्व प्राप्स्यसि, इति अह त्व शपामि । (द्वावपि हा तनय, श्रवण, इति पचत्व प्राप्नुतः)

दशरथः — (चिन्ताक्रान्त मानसः) अह अज्ञानतया अकृत्य अकरवम् । एतत् सर्वं देवाज्ञया घटितम् । अह अपुत्रकः "अपुत्रस्य गतिर्नास्ति" इति

शास्त्राणि घोषयन्ति । तस्मात् अह गतिहीन । अह भ्रष्टाजात । "भ्रष्टस्य कावागति" ।) इति विचारयन् भूमावुपविशति) (किंचित्कालानन्तर सानन्दम्) अनेन ब्राह्मणेन शप्तोऽह् यत् पुत्रप्रेम्णा पचत्व प्राप्नुया इति । अह पुंन्नाम नरकात् त्रात भविष्यामि । अहो कियदानन्द भवति मे । अधुना मे हृदय श्रवण कुमार वध जनित शोकेन, अनयो दम्पत्यो शापेन करुणाद्भुत रसाभ्या मज्जनोन्मज्जन कुर्वदस्ति । मे हृदय करुणाद्भुत रसाभ्या निर्भर श्रावणमेघ कुम्भयत परिपूर्णं भासते । मम दु खादपि आनन्द भवति । यत् भवति तत् कल्याणार्थं भवति यत ।

भविष्ययाणं नहि शक्नुवन्ति । ज्ञातुं धरण्यां बहुधाबुधाऽपि ।
शापस्तु जातो मम जीवनेस्मिन् । वरः प्रियं पुत्रक दर्शनोन्मुखः ॥

अह पुत्रक वदनकमल दर्शन सुखमनु भविष्यामि । सत्य अय तमसातीर कल्याण समुत्पादनहेतु भवति अधुना मे आनन्दस्य अवधिर्नास्ति । अह पुंन्नामनरकात् मुक्त (इति हर्षभरेण हृदयेन प्रयाति)

(यवनिका पतति)

☆ ☆ ☆

॥ पारीक्षितम् ॥

वन्दे-समुद्रजलशीकर चित्रिताङ्गं ।
शेषाहितल्प-सुखनिद्रित-चिन्मयास्यम् ॥
लक्ष्मीकटाक्ष-चय-चन्दन-चर्चिताङ्गं ।
विष्णुं प्रियं सतत मोक्षदमानताङ्गः ॥

नान्द्यन्ते

सूत्रधार. — अये कुटुम्बिनि, एह्यत्र किञ्चित् कथनीयं विद्यते ।

कुटुम्बिनी — एषाऽस्मि कथ्यता आर्य. ।

सूत्रधारः — कुटुम्बिनि, बहुकालानन्तरं भागवतकथा नाटकरूपेण प्रदर्शयितुं वयं समुत्सुकास्मः ।

कुटुम्बिनी — नाटकस्य नाम किम् ।

सूत्रधार. — पारीक्षितम् ।

कुटुम्बिनी — भागवतोत्तम राजान परीक्षितमुद्दिस्य कृतं नाटक किं इदम् ?

सूत्रधार. — आम् सत्यं यः भागवतकथा मूलकारकः भागवतोत्तमः, तं राजानमुद्दिस्य कृतमिदम् ।

कुटुम्बिनी — कोऽय कविः ? तस्य नाम किम् ?

सूत्रधार — अयं कविः गीर्वाणान्ध्र भाषाप्रवीणः ललित गीताल्हर्या, यशोधरा महाकाव्यस्य अपिच अक्षयगीतरामायणस्य प्रणेता, आन्ध्रदेशीयः, ललित कलाभिलाषी। तस्य नाम परीक्षित् शर्मा ।

कुटुम्बिनी — सर्वं चारुतरं प्रतिभान्वितं च भाति । गीर्वाण्या अश्रुतपूर्वमिदं नाटकम् । अयं कविः ब्राह्मीमय मूर्तिः यतः ।

संगीत-साहित्य कलाभिमानी । पवित्र संस्कार परीत-चित्तः ॥
विराजतेऽत्र प्रतिभान्वितोऽयम् । गीर्वाण-साहित्य विशाललोके ॥

तस्मात् समुत्सुकास्मि भूमिकाग्रहणे ।

सूत्रधार — एतन्नाटकं स्त्रीभूमिका रहितम्, अत्यन्तभयद दु खान्त च ।

कुटुम्बिनी — (आकर्णनमभिनीय) कोऽय कल्कल ।

सूत्रधार — (आकर्ण्य) एषोऽय राजा परीक्षित् मृगयार्थं समायाति । एहि गच्छाव । (इति निष्क्रान्तौ)

(तत प्रविशति मृगयावेषेण उन्नमित धनु राजा परीक्षित् ।)

राजा — एषोऽय मृग । (द्विवार वेगेन नेपथ्यन्तर्भाग गत्वा पूर्ववत् प्रविश्य) अहो ! मृगोऽय विद्धो न भवति । एष शरपतनभयात् उत्प्लुत्योत्प्लुत्य वेगे वायु निहत्य चक्रमणं धावति । एनमनुसरण साम्प्रत न भवति योग्य मे । यदि गृहीत तत किम् ? न गृहीत तत किम् ? अहमकारण चापल्यात् बाल इव एनमनुसरामि । धिक् मृगया विरमेयम् । (इति प्रशामित धनु भवति) तत ! भृशमह परिश्रान्तोस्मि । शरीरं सर्वमपि घर्मवारिसिक्त । शरीरमेतत् धावनेन विदारित, शतधा घूर्णित च । आनत्य उच्छ्वास निश्वास परम्परा मा चलितुमशक्त करोति । अत्रन्यग्रोधवृक्षस्य, अधस्थित पाषाण वितर्दिकाया उपविश्य, विश्रान्तिसुखमनुभवेयम् । (इति तथा करोति) आ अय मन्दसमीर धर्मांविल मे देह सशीतल चर्चयति । अत्र सर्वत्र प्रकृति कलामयी दरी दृश्यते । पत्तने सर्वत्रापि रेणुपरीत अस्वच्छानिल प्रसरति । (इति समन्तत विलोक्य) सर्वाङ्ग सुन्दरीयं प्रकृति । जगति प्रकृत्याभिन्न न किञ्चिदन्यत् रमणीय विद्यते । अहो अतिसौख्यमनुभूयते । क्लेशेन सुखस्य परमावधि ज्ञायते ।

वायुना चालिता वल्ली । श्रमयाप्रविदारितम् ॥
गात्र मे सत्वरं वाति । प्रियेव परिचारिका ॥

भोगभाजन क भोग नाप्नोति ? सर्वे प्राणिन सुखमिच्छन्ति । किन्तु एते नगरा जिन सुखरहिता स्थायसतुचर्य , मर्म धरानत, सुखायत्त कुर्वन्ति । तेषा जन्म सार्थक भवति । यत

पीत्वा क्वचिज्जलद-दत्त जलं-महोजाः ।
मुक्त्वाऽनिलं निरत-शीतल-वीचिकालिम् ॥
सोढ्वाच तीक्ष्णकर-सूर्य-मयूखजालम् ।
तन्वन्ति सौख्यमनिशं जगति प्रजानाम् ॥

अहमधुना अपगतश्रमोऽभवम् । पिपासा मे जिह्वा पिण्डी करोति । एतत् सर्वमपि निर्जनारण्यम् । कुत्रापि सल्लक्ष्यते जलमय प्रदेश नाति दूरे । चञ्चच्चञ्चरीक झंकार सङ्कुलमेतत् विपिनम् । अपिच क्रूर सत्वावृत्त, बहुभयदमेतत् । शिलोच्चयावकीर्णं परिसरमेतत् । मृगयार्थं, अज्ञानतया इयन्त दूर समागतोस्मि । नात्रकुत्रापि मर्त्येन भवितव्य । इद दण्डकारण्यवत् अतिगहन । पिपासार्दितस्य मे पानीय कोदास्यति इतः नदी सरस्वती दूरं वर्तते । भवतु यतिष्ये पानीयम् । मामन्यत्र तृष्णा नयति तया वशीकृतोऽह । इन्द्रियाणि मन समाकर्षन्ति ।

पञ्चेन्द्रियाणां प्रबलेन जन्तवो ।
जीवन्ति लोके खलु सौख्य-दर्पिताः ॥
षड्वर्ग शत्रूदय भावचोदिताः ।
मृत्युं प्रयान्त्येव महीतले ध्रुवम् ॥

(इति निष्क्रान्त)

[यवनिका पतति]

* * *

द्वितीयं दृश्यम्

शमीकमुने. आश्रम. (एकस्मिन् दिग्विभागे शमीक' पद्मासने तपति) ततः प्रविशति राजा परीक्षित् (इतस्तत. विलोक्य)

सर्वत्र शान्तता भाति । मुनीनां स्वान्तवत् भृशम् ॥
कदापीदं नचस्थानं । लौकिकानां भवत्य हो ॥

अत्र यत्रकुत्रापि जलेन भवितव्यम् । इति शनैः शनैः चलति] [अग्रे दृष्ट्वा] अयं मुनिः । इदं मुने आश्रमस्थान । एनं जलं पृच्छेयम् । अहं भणितुमपि अशक्तः भवामि । मे जिह्वा शुष्का भूत्वा पञ्चप्राणान् आकर्षति । भवतु पृच्छेयम् ।

१ **अयि भोः मुने अहं राजा परीक्षित् ।**
पिपासार्दितोऽस्मि पातुं जलं दीयतां ॥
(प्रत्युत्तरमप्राप्त तारस्वरेण)

२ **अयि भो. मुने पिपासार्दितोऽहं जलं दीयतां ।**
अहं भाषितुमप्यशक्त ॥
(प्रत्युत्तरमप्राप्त किञ्चिदुच्चै)

३ **अयि भोः ब्रह्मन् किं मां निर्लक्ष्यसे ।**
(प्रत्युत्तरमप्राप्तः कृध्यः)

किं मे राज्ये तपोधना गर्वान्धा भूत्वा धराधिपतिमपि तृणीकुर्वन्ति ? भवतु अस्य मे प्रभावं दर्शयिष्यामि । [इति परित विलोक्य तत्र विद्यमान मृतसर्पं धनुष्कोट्या उद्धृत्य, राजा मुने. कण्ठस्कन्धतले संसृज्य, मौनेन निर्गत]

[तत प्रविशति कमण्डलुधारी शृङ्गी]

शृङ्गी — ओं शाम्यन्तु घोराणि । शाम्यन्तु पापानि । शाम्यन्तु ईतय नित्यं शुभानि वर्धन्ताम् । [तपस्यन्तं शमीक विलोक्य क्रोधपरीतमानसः] किमेतत् चित्र, तपस्यत मे पितुस्कन्धे मृतसर्प. ? [इति तीक्ष्णं विलोक्य] इदमरण्यं निर्मानुष्यम् । कदापि जनसचारोऽपि नास्त्येयात्र । कथमेतत् आपतितम् ? केनापि दर्पितेन अधमेन नूनमितिमन्ये ।

तप्तुं नितान्तं खलु शक्तिहीनाः । सतः परं नाशयितुं यतन्ते ।
आदर्शहीनाः भुविभारभूताः । केचित् वृथाः पाशव शक्तियुक्ताः ॥

एतत् कर्म विधीतस्य तस्य, विनाशकाल: सप्राप्त । कोऽय दुरात्मा मनुज-पशु , ममपितु स्कन्धे, तत्रापि तपस्यत , मृतसर्पं विसृष्टवान । सर्वभौतिक सौख्य परित्यज्य, जलपानाशनमपि सत्यज्य, केवल वाताशनेन तपस्यता, मत्पित्रा किमपकृतम् । योऽय एव पन्नगमस्राक्षीत्, स. तिग्मतेजसा, तक्षकाशी विषपन्नगेश्वरेण, मद्वाक्य वलात् चोदितेन, सप्तरात्रादित. यमस्य सदन नेष्यति । (इति शापजल विसर्जति)

शमीक — (नेत्रे उन्मील्य) कुतोऽत्र मन्योराविर्भाव (पुरत तनय श्रृङ्गिन विलोक्य) कि वत्स, किमेव स्फुलिङ्ग प्रायवचनै ज्वलसि, कि कारणमत्र क्रोधस्य ।

श्रृङ्गी — जनक, कोवा जाल्म', स्वविनाशकालमाहूयमान , अकरणीय कर्मविधाय, धर्म तिरस्कृतवान् । तस्मिन् एव क्रुध अभवम् ।

शमीकः — अकारण त्व क्रुद्धो भवसि विरम । शान्तिमाप्नुहि । क किमकरणीय चकार ।

श्रृङ्गी — पितः तव स्कन्धे कोवा मरणमियुष्णु मृतसर्पं अस्राक्षीत् । त लवमान मृतसर्पं विलोक्य, क्रोधानलेन दह्यमान हृदय. अशपमह त, यत सप्तमेऽह्नि त पापिन, तक्षकः, पन्नगोत्तम., वैवस्वतस्य सदन नेता इति ।

शमीक — (अक्षिणो निमील्य किंचित्काल ध्यात्वा अक्षिण्युन्मील्य) तात श्रृङ्गिन् न मे प्रिय कृत । अय नरेन्द्र । वय नरेन्द्रस्य विषये निवसामहे । यदि राजा न सरक्षेत्, पीडा भवेत् परमस्माक । वय धर्ममाचरितु नशक्नुयाम । क्षुधितेन तेन अद्य क्षान्तेन कृत मन्ये अजानता । कस्मात् त्वया सहसा दुष्कृत वाल्यात् कृत । अय नृप. अस्मत्तः शाप नार्हति सर्वथा । शम एव यतीना भूषण सिद्धिकारकश्च ।

श्रृङ्गी — अपकारक अनुपदमेव शिक्षणीय । जनक ! तत्र कापि विचारणा मास्तु ।

शमीक — अय अधार्मिक. नहि । मान्यः प्रजा रक्षकः ।

श्रृङ्गी — जनक ! नाय प्रजारक्षक किंतु प्रजाभक्षक । अय समापन्न विपत्ति काल, अप्रिय कृतवानस्माक ।

शमीक — तात, अय नरपति सम्राट् साक्षात् महाभागवत धर्मपाल, राजर्षि, ह्यमेधराट् राजा परीक्षित् ।

श्रृङ्गी — (आश्चर्येण) जनक, किमय राजा परीक्षित् । (विलपन्) बहु अपराद्ध मया । अनालोच्य शाप दत्त । धिगेतत् मे जन्म । महापुरुष धर्मपाल राजान परीक्षितम् शप्तवानस्मि । न मे प्रायश्चित्तो विद्यते । तपोधना सुलभ क्रोधिन भवन्ति । क्रोध तापसाना अभूषण भवति । मे वाक् परशु आकुण्ठितो भवति । न केषा अपि शक्य मोघीकर्तु भवति । मे जिह्वा सप्तजिह्व प्राया । न कोऽपि शामयितु शक्त. भवति । (इति विलपति)

शमीकः — वत्स, विलापेन किं प्रयोजन । शतथा धर्मपालोऽयम् । अस्मत्त शाप नार्हति । नह्यस्य कर्मण विद्यते ते प्रायश्चित्तम् ।

श्रृङ्गी — समापन्न विपत्तिकाले देवाश सभूताना धियः अपि मलिनी भवन्ति जनक ।

शमीकः — तात तथा न वक्तव्य । कर्म सर्वथा विचिन्त्य कर्तव्य । किमुत शाप विषये ।

श्रृङ्गी — पित, अद्यप्रभृति शममास्थाय यच्छक्य कर्तु तत् करिष्यामि । तस्मात् तात बालेन कुश बुद्धिना मम पुत्रेण शप्तोऽसीति नृपायवार्ता प्रेषयिष्ये ।

शमीकः — बाल विप्रा पश्चिमबुद्धय । क्रियता यद्रोचते । यत् भव्य तत् भाविता । ओ शान्ति श्शान्ति श्शान्तिः ।

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

रङ्गमचमध्ये सिंहासन विद्यते। सिंहासनस्य उभयतः ब्राह्मणाः मन्त्रिणश्च तिष्ठन्ति। (राजा परीक्षित् प्रविशति)

स्तुतिपाठकः — परम भागवतोत्तम, धर्मपाल, राजर्षे परीक्षिन्महाराज, जयतु नितरा जयतेतरा।

ब्राह्मणा — "ध्रुवन्ते राजा वरुणो ध्रुव देवो बृहस्पति। ध्रुवन्त इन्द्रश्चाग्निश्च राष्ट्र धारयता ध्रुवम्"। (राजा परीक्षित् सिंहासने उपविशति सर्वे उपविशन्ति)

राजा — अयि भो सदस्याः सकल धरातल सौख्यमय विधातु चन्द्रवशजाः समुत्पन्नाः। सर्वत्र महीतले सकल प्राणिना सुख भवतीति, सर्वे सुखिनः सन्तीति वय आशास्महे।

मन्त्री — राजान् चन्द्र वशीयाना पालने, सकल धरातल, धर्मार्थ काम चतुर्विध पुरुषार्थं, यथाक्रम सुख अनुभवतीति, विशेषत, युष्मदीय छत्रच्छायाया, सर्वे सुखिनः सन्तीति कथने, पुनरुक्ति भवति।

पुरोहितः — सर्वोऽपि आबाल गोपाल विकसित वक्त्राम्बुजः जीवति।

ब्राह्मणा — चन्द्रो यथा भाति च शारदाम्बरे।
पङ्केरुह श्शारद सारसान्तरे।
राजान् त्वमेवासि तथा महीतले।
सन्तोष भारेण विभान्ति नागराः॥

ब्राह्मण — महाराज सर्वत्र जगत् आनन्दे नरीनर्ति।

क्वचित्कनकमण्डनाडम्बरं। क्वचित्क्वणन वीणयानंदितम्।
क्वचिन्मधुर नाट्याभिरंजितं। क्वचिन्मधुर भोज्याभिनंदितम्।

सर्वे — व्हाव्वा इविहाहारव कुर्वन्ति।

भट — (प्रविश्य) राजान् गौरमुखानाम शमीकमुने शिष्य तत्र भवते वार्तामानीय समागत द्वारितिष्ठति ।

राजा — किं तत्रभवत महातापमात मे सदश ? प्रवेश्यतामनुपदम ।

भट — यथाऽज्ञापयति देव (इति प्रणम्य गच्छति)

(तत प्रविशति गौरमुख)

गौरमुख — राजन् आचन्द्र ताराक ते चरित लोकव्याप्त भवतु । (इत्याशी प्रददाति)

राजा — गौरमुख अभिवादय तत्र भवन्त (इति उत्थाय प्रणमति) अपिच पृच्छति ।

अप्यस्ति कुशल सर्वं । धरण्या मम पालने ।
श्रोतुमिच्छामि सदेश । निस्सन्देह निवेद्यताम् ॥

गौरमुख — भवता पालने धरणी चक्र सव सुखमनुभवत्यव महाराज किंतु ।

मन्त्री — किंतु किं ? वद ।

राजा — उच्यता कोऽप सदश ।

ब्राह्मणा — निवद्यता मुने सदश ।

राजा — सवहितैषिणा मुनीना सदश शिरोधाय भवति चन्द्र वशायानाम ।

गौरमुख — राजन् ! महातापस शमीकस्य स्कन्ध भवता मृतसप निक्षिप्त । तस्मात मुलभ क्रोधन तस्य पुत्रण शृङ्गिणा सप्तरात्रण तक्षकेन भवत मृत्यु भविष्यतीति शप्तोऽसि तस्मात् रक्षा कुरुष्वेति । केनचिदपि तदन्यथाकतु न शक्य भवति, इतिच कथित । तव हितार्थिना तेन प्रपितोऽह वातयितु । (इत्यधामुख तिष्ठति)

मन्त्री — (श्रुत्य) गौरमुख ! कि वदसि । इय राज्ञ परीक्षित सभा । त्व राजसभाया भणसि । त्व राजसभा दर्शनेन कम्पितोऽसीतिमन्य । त्व

राजमर्यादा न जानासि। कं हितं कथनीयं कमहितं कथनीय इति विचक्षणा ज्ञानं तपो-वनाय ते नास्ति। त्वमलौकिकोऽसि विरमते भाषणं।

राजा — गौरमुख, गम्यता (गौरमुखः गच्छति) शिरसि दक्षिणहस्तं निक्षिप्य विचार चित्तः भवति) *अयि सभास्ताराः शृण्वन्तु भवन्तः। ह्यः मृगयार्थे गते मयि* पिपासापीडिते सति अज्ञानतया किंकृतं इति ज्ञातुमपि नहि शक्यते। वत किंकृतं मया।

क्षुत्पिपासादि तापेन। परीश्रान्तोऽभवं तदा।
न जाने किं कृतं तत्र। बुद्धिः कर्मानुसारिणी॥

(इति विषण्ण वदनः अधोमुखश्चिन्तयति) जातस्य मरणं ध्रुवं। मरणं, हेतु पुरस्सरं भवति। एतत् अवस्थामात्र भवति। नहि विचारः कर्तव्यः।

ब्राह्मणः — अयि भोः राजन् न भवता चिन्ताकार्या। वयं जानीमहे मन्त्र-शास्त्र तन्त्रादिकं। सर्वमपि सुमुखं सुखान्तं भविष्यति।

मन्त्री — राजन् श्वः प्रमातेऽहं सर्वशिल्पिनः समाहूय समुद्रे एकस्तम्भ सौधं निर्माय भवता वासः कल्पयेयं। न कापिहानिः भविष्यति। अहमधुनैव सर्वं व्यवस्था कर्तुं गच्छेयम्।

ब्राह्मण — राजन् सर्वानि भद्राः वेत्रहस्ताः गारुड मन्त्रोच्चारणैः तत्र आहिण्ट मानाः भविष्यन्ति। सकल वेद शास्त्र पारगनाः अनवरतं वेदाऽध्ययनं करि-ष्यन्ति। अपिच अपर धन्वन्तरिः आयुर्वेत्ता मन्त्रशास्त्रद्रष्टा, स्रष्टा, च काश्यपः, विद्यते। सः पन्नगारिमन्त्रेण, दग्धमपि, चेननं करोति यथा पूर्वं। कियत् धनं तेन अनुमीयते तावत् धनं वयं दास्यामः। श्वः स. आहूत. भविष्यति। वयं सर्वमपि सुकरं करि-ष्यामः। अस्मिन् विषये चिन्ता न कार्या।

राजा — केनचिदपि तदन्यथाकर्तुं न शक्यं भवतीति कथितं। वयं निरु० प्रयत्ना भवेम।

ब्राह्मण — राजन्! मन्त्र शास्त्रावरुद्ध, नकिमपि धरातले भवितुमर्हति। काश्यपः चतुर्दश भुवनेषु विख्यात भिषक्। स एव तक्षक विषवेग निहन्ता।
(नेपथ्ये घण्टारव.)

पुरोहित — घण्टारव श्रूयते राजन् माध्यान्हिक कर्तव्यानुष्ठानवेला भवति आगम्यताम्। (राजा उत्थाय चलति)

वेत्रहस्त — राजन् इतस्तत (इति मार्ग दर्शयति)

सर्वे गच्छन्ति

(यवनिका पतति)

*　　*　　*

चतुर्थ दृश्यम्

(तत प्रविशति काश्यप मन्त्रमुच्चारयन्) स्वस्तिर्मानुपेभ्य । शनो अस्तु द्विपदे। शचतुष्पदे। ओं शान्ति शान्ति शान्ति । (तक्षक तस्य अभिमुखो भवति)

तक्षक — नमामि महाब्राह्मणे काश्यपाय।

काश्यप — मनोरथ सिद्धिरस्तु ।

तक्षक — कि काश्यप ? भवान् त्वरित कयाति ।

काश्यप — किञ्चिदनुपद करणीयमस्ति । तस्मात् अह गच्छामि ।

तक्षक — कुत्र कि चिकीर्षति भवान्।

काश्यप — कुरुकुलात्पन्न, परीक्षिन्मन्दिरे चिकीर्षामि । तस्मात् तत्र गच्छामि ।

तक्षक — राज परीक्षित मन्दिरम् ।

काश्यप — हाँ सत्यं परीक्षिन्मन्दिरम्।

तक्षक — तत्र तत्र कि कार्य वियत

काश्यपः — **यतो बुद्धि स्ततो कर्म । यतः कार्यं ततो जयः ।**
कुशाग्रमेधसां सन्ति । कर्तव्यानि महीतले ॥

तक्षकः — काश्यप ! अद्य भवता किं क्रियते, क्व गम्यते इति पृष्टम् ।

काश्यपः — अद्य तं परीक्षितं पन्नग श्रेष्ठ. तक्षक तेजसा प्रधक्ष्यति ।

तक्षकः — भवान् तत्र गत्वा किं करिष्यति ।

काश्यपः — अग्नितेजसा पन्नगेन्द्रेण दष्टं, तं सद्यः, अपज्वरं कर्तुं त्वरितं गच्छामि ।

तक्षकः — ब्रह्मन् ! अहं स तक्षकः ।

काश्यप. — त्वं कुतोऽत्रागतोऽसि ।

तक्षकः — तं महीपतिं धक्ष्यामि, तस्मात् अहं तत्र गच्छामि ।

काश्यपः — अहं रक्षयिष्यामि तं नृपं, तस्मात् गच्छामि ।

तक्षकः — मयादष्टं चिकित्सुतुं, त्वं न शक्तः ।

काश्यपः — अहं शक्तोऽस्मि ।

तक्षकः — *त्वमसमर्थोऽसि । निवर्तस्व ।*

काश्यप. — **विद्याबल समायत्ता । बुद्धिर्मे श्रृणु तक्षक ।**
असाध्यं साध्यमेवाऽस्ति । नास्ति लेशोऽपि संशयः ॥

तक्षकः — तया विद्यया त्वं न किमपि कर्तुं शक्नोषि ।

काश्यप — त्वया दष्टं तं नृपतिं जीवन्तं करिष्यामि ।

तक्षक. — किं तव शक्ति परीक्ष्येऽहम् ?

काश्यपः — *परीक्षस्व ।*

तक्षकः — (पार्श्वभागे स्थित वृक्षं दर्शति दीपोपशमनं भवति) काश्यप ! अयं न्यग्रोध वृक्षः मया दष्टः जीवयतम् ।

काश्यप — ओ हा हा भ इति मन्त्रयन् वृक्ष समजीवयत् (दीपज्वलन वृक्षस्य भाग)

तक्षक. — ब्रह्मन् एतत् महदद्भुत त्वयि त्रियते ।

काश्यप — तपोमहिम्ना ब्राह्मण असाध्य साध्य करिष्यति । तपोविहीन ब्राह्मणः अधमः भूत्वा न किमपि साधयितु समर्थ भवति । ब्राह्मणाना तपोमहिमा केवल महिमा ।

तक्षक — तपोधन, कमर्थ त्व अभिप्रेतु यासि ।

काश्यप — धनार्थी भूत्वा तत्र गच्छामि ।

तक्षक. — काश्यप ! तस्मात् नृपात् फल यत् प्राप्तु अभिलाषित तेऽस्ति, तत् अहमेव तुभ्य प्रदास्यामि ।

काश्यपः — तत् धन यत् तेन दीयते, त्वमेव दास्यसि ।

तक्षक — अह अवश्य दास्यामि । अपिच विप्र शापाभिभूते, नराधिपे क्षीणाऽयुषि, घटमानस्य ते सिद्धि , सशयिता भवेत् ।

काश्यप — (अक्षिणी निमील्य दिव्य ज्ञानेन त नृपति क्षीणायुष पाण्डवेय विलोक्य) ओम् सत्य त्वदुदीरित भवति । भुजङ्गम, देहिमे अर्बुद परिमित धन, निवर्तिष्येऽहम् ।

तक्षक — एतस्मादधिक धन अह प्रदास्यामि । द्विजोत्तम ससुख भवान् निवर्तंतु (इति धनप्राय ददाति)

काश्यप — (नीत्वा) इष्टनाम्यसिद्धिरस्तु (इति आशी कृत्वा]

धन्योऽस्मि नून खलुतक्षकाख्य । विना प्रयास प्रभवामि लोके ।
धनी, सुखी, भोगपरोत चेतः । सदाच ते कामितमस्तुपूर्णम् ॥

[इति गच्छति]

तक्षक — [अट्टहास कृत्वा] मया वञ्चितोऽसौ काश्यप । मे यत्न निरमगय सफल भविष्यति । अथ परीक्षिन्महाराजा प्रयतन , विषहरै. गदै मन्त्रै सरक्ष्यमाण ,

एकस्तम्भ सौधे समुद्रे निवसति, इति श्रुत। तस्मात् राजा मायायोगेन वञ्चयितव्य. मया। भवतु प्रयतिष्ये। (इति निष्क्रान्त)

(यवनिका पतति)

*   *   *

पंचमं दृश्यम्

(सिंहासनासीन तक्षक। अन्यो द्वौ भुजङ्गमौ पार्श्वे उपविश्य विचारयन्तौ स्त)

प्रथमः — राजन् तक्षक आवां किमर्थमाहूतौ।

तक्षक — अयि सुहृदौ शापवशात् अकरणीय कार्यं कर्तुं मम विद्यते।

प्रथम — तत् किं कथ्यतां भोः।

द्वितीय — आवा भवता किं आज्ञाप्यते तत् कर्तुं समुद्यतौ निवेदयतु।

तक्षक — अयि मित्रोत्तमौ श्रृणुता। शृङ्गिणा राजा परीक्षित् तक्षक विषण निधन समागमिष्यतीति शप्त।

प्रथम — किं राजा परीक्षित् शप्त.। अहो किमेतत् वैपरीत्य।

द्वितीय — कर्मक स्वकृतमत्रैव भुङ्क्ते।

तक्षक — अनालोच्य कृत तेन।

प्रथम. — किं कर्म कृत तेन।

तक्षक — कुकर्म कृत तेन।

द्वितीय. — किं तत्।

तक्षक — अयि मित्रोत्तमौ श्रृणुता भवन्तौ। पिपासार्दितः राजा

परीक्षित जपन्त शृङ्गिण पितर शमीक अजानन् मत्सरेण तस्य स्कन्ध मृतसर्प निक्षिप्तवान । तत दृष्टन तस्य पुत्रेण शृङ्गिणा राजा परीक्षित, सप्तरात्रेण तक्षकेन पञ्चत्व नेष्यतीति शप्त ।

प्रथम — वत ! लोके न जानाति विद्वानपि, किं कस्य श्वो भविष्यति ।

द्वितीय — सवजन्तूना मरणस्य किमपि कारण भवति ।

प्रथम — धमरक्षितु परीक्षित इयमवस्था सजाता इति स्वप्नेऽपि नकोऽपि चिन्तयत्यवम ।

तक्षक — प्रस्तुतमनुसराम शृणुता । परीक्षिन्महाराज मन्त्रिभिश्चैव समन्त्य एकस्तम्भ प्रासाद कारयित्वा तत्रैव मन्त्रिपुरोहितै, विविधमन्त्रोच्चारणै, अनेक सायुध भटवर्गै परिरक्ष्यमाण अस्ति । स केवल कदमूलानि जग्ध्वा, दिवसान सयापयतीति जनश्रुति ।

प्रथम — शापमूलकत्वात श्वोवा, परश्वोवा, अय राजा मृतो भविष्यति । तथाऽपि आत्मान परिरक्षितु यतते ।

द्वितीय — पराक्रमशालिनापि प्राणा रुचिरा भवन्ति ।

तक्षक — प्रथमत युवाभ्या राज्ञ परीक्षित मन्दिर गन्तव्य ।

प्रथम — तत्रगन्तु अह् अशक्तुरस्मि ।

द्वितीय — अधुना राज्ञ मन्दिरे सर्वे खड्गहस्ता गारुड मन्त्रोच्चारणा कुवन्त आहिण्डमाना जाग्रति । यदि दृष्टिपथ भवेव आवयो मरणमेव ।

तक्षक — श्व तत्र मया प्रवश कतव्य ।

प्रथम — कथ भवता विधीयते प्रविश्यते च ।

तक्षक — शृणुता राजा परीक्षित धममार्गानुसारीमहानुभाव । ब्राह्मण पक्षपाती । ब्राह्मणदत्त अविचाय गृह्णाति । तस्मात् युवाभ्या ब्राह्मण रूपधाभ्यां तत्र गन्तव्यम् ।

प्रथम — तत्र कथ गन्तव्यम् ।

तक्षकः — शुचिर्भूत्वा ब्राह्मणवेषाभ्यां फलपुष्पाणि गृहीत्वा राज्ञे दातव्यानीति उक्त्वा प्रवेष्ठव्यं।

द्वितीयः — मायावेषेण प्रवेष्टव्यमिति आज्ञाप्यते भवता। आवां तथा गन्तुं शक्नुवः (इति प्रथमेन द्वितीयस्यकर्णे) इदं योग्य मेव खलु आवयोः।

प्रथमः — आम् इदं योग्यं (इति शिरः कम्पनं करोति)

तक्षकः — श्वः सप्तमः दिवसः भविष्यति युवाभ्यां गन्तव्यं। अहं सूक्ष्म कीटक रुपेण, एकस्मिम् फले गुप्तः भूत्वा, यदा सः राजा फलाघ्राणं करोति, तदा तं दष्ट्वा निजरुपेण बहिरागच्छेयम्।

प्रथमः — राजन् तक्षक, गच्छावः आवां। (इति नमस्कुरुतः)

तक्षकः — कार्यं निर्विघ्नं समाप्ति भूयात्। जयोस्तु (इति गच्छति)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(पीताम्बरधारी वैष्णव साम्प्रदाय तिलकाञ्चितः भूत्वा अधः पीठं उपविशति) उभयपार्श्वो तत्रैव ब्राह्मणमन्त्रिपुरोहिताः तत्र उपविशन्ति।

वेत्रहस्तः — राजन् परमयोगीन्द्राः शुकयोगीन्द्राः समागच्छन्ति।

राजा — (ससंभ्रमं समुत्थाय प्रत्यभिमुखं गत्वा पादौप्रक्षाळ्य अन्तः आनयति) अयि भोः शुकयोगीन्द्राः आसनेऽस्मिन् सुखेन उपविशन्तु (इति पीठं दर्शयति शुकयोगीन्द्रः उपविशति, राजा तस्याभिमुखं अन्यस्मिन् पीठे उपविशति)

शुकः — परीक्षिन्नरेन्द्र! जानाम्यहं सर्वं यत् भूतं। तस्मात् स्वयं, धर्मपाल, हयमेधराजं, त्वां महाभागवतपुराणं, उत्तम श्लोक प्राप्त्यर्थं उत्तमलोक प्राप्त्यर्थं च श्रावयितुं स्वयं समागतोऽस्मि।

राजा — धन्योऽस्मि। अनुगृहीतोऽस्मि। (इति नमस्करोति)

शुकः — (भागवत पठति)

इदं भागवतं राजन्। पुराणं मुनिनाकृतम्।
अधीतं तत्पुराणं तु। द्वापरे पितृ सन्निधौ ॥

मयापुरामहाराज। समधीतं प्रियं भृशं।
तदहंतेभिदास्यामि। स्यान्मुकुन्दे मतिप्रियम् ॥

योगिनां नृप निर्णीतं। हरेर्नामानुकीर्तनम्।
यस्यचित्तं भवत्यस्मिन्। तस्य सर्वं भविष्यति ॥

(भट प्रविश्य)

भट — राजन् ब्राह्मणोत्तमौ तत्र भवन्त द्रष्टु फलपुष्पसभारे द्वारि तिष्ठत।

राजा — अनपद प्रवेशय।

भट — (गच्छति) तत. प्रविशत ब्राह्मणौ।

प्रथम· — अयि भो राजन् यथा निर्दिष्टमस्तु। साक्षात् शुकयोगीन्द्र महाभागवत पुराण भवत उत्तम लोक प्राप्त्यर्थं श्रावयतीति श्रुत्वा अधुना दृष्टवाच प्रमुदितोऽस्मि।

द्वितीय — महाराजन् भवान् धन्योऽस्ति। नून उत्तम श्लोकोऽस्ति। अवश्य भवान् उत्तम लोकान् प्राप्नोतु। तुभ्य उपायनमिव स्वादुफलानि अतिरुचिराणि आवाभ्या समाहृतानि। (इति तत्र स्थापयत)

राजा — अयि विप्रौ अत्रोपविशताम्। तौ उपविशत)

प्रथम — राजन् निराहारेण आत्मान शोषयितु नयुक्त। दुग्धवा उताहो फलवा अनुभोक्तव्य इति ममाभिप्राय।

द्वितीय: — राजन् अत्यन्त स्वादुफलानि आवाभ्या समाहृतानि ।तेभ्य. एक फल गृहीत्वा भुञ्जतु भवान् ।

राजा — अयि भो मन्त्रिवर्या । वेदपारगा ब्राह्मणा, अमात्या सहृदश्च भुञ्जन्तु भवन्त' एतानि फलानि (इतितेभ्य फलदान करोति अवशिष्ट फल स्वय गृहणाति । फलजिघ्रति, पञ्चत्व प्राप्नोति) सर्वे हाहाकार कुर्वन्ति ।

शुक — ओ शान्ति शान्ति शान्ति ।

(यवनिका पतति)

* * *



।। नर्तनशाला ।।

नमामि तां दैविकशक्तिशालिनीं । सचेतनाऽचेतन वस्तु संचये ।
विभिन्नरुपेण विशालभूतले । शिवां जगन्नाटक सूत्रधारिणीम् ।।

नान्यन्ते

सूत्रधारः — अयि, जीवन सहभागिनि । सत्वरं इतः एहि ।

नटी — इयमस्मि देव ! निवेद्यतां ।

सूत्रधारः — हञ्जे ! अद्य वयं नर्तनशालां नाम नाटकं दुर्भिक्षा निवारणार्थं प्रदर्शयितुं समुत्सुकास्मः । तस्मिन् नाटके त्वया पात्र धारणं कर्तव्यमस्ति ।

नटी — यदि रोचते मह्यं नाटकमिदं, अवश्यं पात्र ग्रहणे उद्युक्ता भवेयम् । कोयं कविः तस्य परिचयः कः ।

सूत्रधारः — अयं महाकविः गीर्वाणान्ध्र भाषाप्रवीणः । अयं ललित गीतलहरीं, यशोधरा महाकाव्यं अपिच अक्षयगीत रामायण काव्यं च विलिखितवान् । अयं भारतीय संस्कृति प्रेमिकः । अस्यनाम परीक्षित् शर्मा । अयमान्ध्रदेशीयः ।

नटी — आर्य अस्मिन् शरन्नवरात्र महोत्सवे इदं नाटकं यदि प्रयोक्ष्यते तर्हि तस्मिन् पात्रधारणं कर्तुं समुत्सुकाऽस्मि ।

सूत्रधारः — आर्याणि शारदमुद्दिश्य किञ्चित् गीतं श्रावय ।

नटी — श्रूयता–

तुहिनकिरण जाले शर्वरीं तां निगृह्य ।
शरदि मधुरमूर्तिश्चन्द्रमाश्चन्द्रिकायाम् ।
विकसित कुमुदानां नव्यसौरभ्य मत्तः ।
रमयति सरसाङ्गीं चुम्बनैश्चारुहासैः ।।

सूत्रधारः — अहो ते बुद्धिकल्पनाचातुर्यं।

नटी — (श्रवणमभिनीय) कुलोत्तस्त्रीणां भाषणं भवति।

सूत्रधारः — अयं अन्तःपुर कोलाहलः इव सदृश्यते। (इति आकर्णयति)

नटी — आम् अयं तथ्यं अन्तपुर कोलाहलः।

सूत्रधारः —हञ्जे जानासित्वं। इतः सैरन्ध्रीसुदेष्णामञ्जरीचन्द्रिकाः पर्व दिवस मण्डनार्थे पुष्पापचयाय प्रविशन्ति। एहि गच्छावः (इति निष्क्रान्तौ)

(विराटनगरे विराटराज्ञः निकेतनम्। सुदेष्णायाः उभय पार्श्वयोः याज्ञसेनी सैरन्ध्री अन्याः अन्तपुर परिचारिकाश्च उपविशन्ति)

सुदेष्णा — सैरन्ध्रि, मदनोद्याने शेफालिका पुष्पाणि, पारिजात कुसुमानि, चम्पा मल्लिकाः विरचय।

सैरन्ध्री — तथैव राज्ञि (इति पुष्पपात्रंनीत्वा गच्छति)

सुदेष्णा — हञ्जे पल्लवि, मया अभ्यञ्जन स्नानं कर्तव्यमद्य। स्नानगृहे उष्णोदकं, अङ्गोद्वर्तनार्थम् मुद्गचूर्णमिश्रित चणकचूर्णं अपिच गन्धिलतैलद्रव्याणिच संस्थापय। मयूरपिञ्छ चित्रितं नीलाम्बर चीरं नील निचोळं च स्थापय। शरीर संमार्जनार्थं वस्त्रशकलं तु माविस्मर।

पल्लवी — राज्ञि सर्व वस्तु संचयैः स्नानगृहं सज्जीकरिष्यामि। (इति गच्छति)

सुदेष्णा — (गच्छन्त्यः आहूय) हञ्जे शृणु मम केलीगृहे शयनमन्दिरं धौत वस्त्रैस्समलंकृत्य सकल गंधिल कुसुम निचयैः सर्वधूपैः आघ्रायितं कृत्वा सुसज्जितं कुरु।

पल्लवी — यथोक्तं करिष्ये राज्ञि (इति गच्छति)

मञ्जरी — चन्द्रिके! सैरन्ध्री अधुना पुष्पाणि समाहर्तुं उद्यानं गतवती। पुष्पाहरणानन्तरं आवाभ्यां राज्ञी सुदेष्णा अलङ्करणीया। भवत्या कुत्रापि नगन्तव्यम्।

चन्द्रिका — हञ्जे मञ्जरि, अहं क गमिष्यं अन्तःपुरं संत्यज्य। आवाभ्यां सरस्वतीनुभव अलङ्करणीयं दिवसे।

मन्जरी — चन्द्रिके ! अन्त पुरालङ्करण आवाभ्या न कार्यम्। विद्यते सैरन्ध्री सर्वकर्मसु कुशलतमा। तया सर्वं विधास्यते।

चन्द्रिका — मा अतीव कुरुत। सैरन्ध्री इति तस्या नाम केवल द्योतयति तस्या कौशल्यम्।

सुदेष्णा — सत्यो सैरन्ध्री अस्माकं सर्वेषामपि अत्यन्त विश्वसनीया भवति। सा च गन्धर्वाणा पत्नी। अस्माभि सा साधु दर्शनीया। सा केन वैपरीत्येन अस्मदीय सुकृत परिपाकेन अस्मद्गृहे परिचारिका सजाता। सा महाराज्ञीलक्षण सपन्ना भाति।

मन्जरी — सखि सुदेष्णे तदीयावासेन विराट नगरी शृङ्गार रस परिप्लाविनी भाति।

चन्द्रिका — तस्या. आगमनेन अन्त पुर सकल कलाप्रपूर्ण विलसति।

सुदेष्णा — न केवल अन्त पुर सर्वं विराटनगर सुभिक्ष सानन्द प्रतिभावति।

मन्जरी — सुष्टु भणित भवत्या।

सुदेष्णा — सा पाण्डवाना गृहेपि परिचारिका रूपेण कुशल कर्म अकरोत् इति कथितवती।

चन्द्रिका — सर्वं चारुतर शोभते। सा अतीव तज्ज्ञा भाति। (तत प्रविशति वेत्रवती)

वेत्रवती — (नमस्कृत्य) अयिराज्ञि भवत्या सोदर राजा कीचक समायाति (इति विज्ञापयति)

सुदेष्णा — आयातु प्रवेशाय।

वेत्रवती — तथैव (इत्युक्त्वा प्रणम्य गच्छति)

मन्जरी — *चन्द्रिके एहि आवा गच्छाव शयन मन्दिराऽलङ्करणाय।* (इति गच्छत तत प्रविशति कीचक)

(कीचक सुदेष्णाया समीप प्रहसन् गच्छति)

कीचक — अग्रज सुदेष्णे !

सुदेष्णा — किं त्व उल्कापातवत् अन्त पुर हठात् प्रविशसि।

कीचक — अय राजा अक्रमको भूत्वा अकारण कदापि नागच्छति।

सुदेष्णा — कि नियत तत्राऽत्र अन्त पुरे करणीयम्।

कीचक — यदि त्व मम साहाय्य करिष्यसि तर्हि अन्तपुरे रमणीय करणाय विद्यते।

सुदेष्णा — विराटराज्ञ गृहे अपूर्व रमणीय करणीय किंते विद्यत।

कीचक — [उस्] उच्चर्मानिद भित्ति कर्णिका भविष्यति। एतत् कर्म रहसि भवत्या साधयितव्य विद्यते।

सुदेष्णा — सादर, कि कर्म विद्यते प्रथमत कथय। अनन्तर साधयितु प्रयतिष्ये।

कीचक — भवती मे अग्रजा। एतत् कर्म भवत्या अध्यवसितव्यम्।

सुदेष्णा — निवेदय रे प्रथमम्।

कीचक — [इतस्तत विलोक्य अग्रजाया कर्णे रहसि] विराटस्यराज्ञ निवेशने अपिच अन्त पुरे, नेय मया जातु दृष्टा कासा ?

सुदेष्णा — [साभिप्राय] अरे निपुल सविस्तर वद केय इति।

कीचक — अत्रनकोऽपि नियते खलु।

सुदेष्णा — नकोऽपि नियते आज्ञा विना।

कीचक — अग्रजे श्रृणु।

सुन्दराङगी विशालाक्षी । विलासपरिसर्पिणी ।
उन्माद कारयित्री च । कुत कंवा समागता ॥

सुदेष्णा — [दक्षिणहस्तन साश्चर्य मुख पिधाय] वत ' व कामेव प्रनाम।

कीचक — मय तथ्यच भवत्या प्रातम् नह कदापि नैव प्रवर्तित अभवम्। नाहमपि जान मद्दाय रोगम्।

सुदेष्णा — त्वं तादृशी दुर्भावनां सत्यज।

कीचकः — अग्रजे श्रुणु–

मध्नाति चित्तं रसनिस्तुलं मे। नवतं दिवं कामविवर्धिनीसा।
सर्वत्र पश्यामि तदीय रुपं। स्मरामि लावण्य विलास चेष्टाम्॥

अह तस्याः वशमभवम्। अस्या अवस्थाया न मे ओषधं विद्यते। इय ते परिचारिका किम्?

सुदेष्णा — सत्य एषा मे परिचारिका। किमर्थं ते मनः परिचारिकायां सलग्न?

कीचकः — सौन्दर्यस्य कुलवर्ग वर्णाः नसन्ति।

सुदेष्णा — न युक्ता अयोग्या च ते भावना।

कीचकः — इय परिचारिका। किन्तु प्रत्यग्र रुपा प्रतिभाति।

सुदेष्णा — अरे! एषा परिचारिका नीरसाऽकारा। एषा ते अयोग्या। अन्तः पुरे वह्व्य. सुरसुन्दरीसमानाः इन्दुवदनाः विद्यन्ते। ते दृष्टिदोषः सजात. श्रुणु रे भ्रात।

तावकीन दरहास वीक्षणैः। पञ्चबाणनिभ राजयौवतम्।
पादनूपुर रवाभिरञ्जितम्। यास्यतीह तवपादसन्निधिम्॥

तवदृष्टि दोष. सजात.। कामः अन्ध. भवति। सः न जानाति युक्तायुक्त विचारणा। त्व अहार्यनिश्चयाद्विरम।

कीचक — अग्रजे भवती न जानाति। कला रहस्य श्रुणु।

स्त्रीणां विलासादिकमात्मदृष्ट्या। पुमान् विजानाति तथा न नारी।
महोन्नतं दार्ढ्य गभीर रुपम्। पुंसां विमुग्धा तरुणी न मर्त्यः॥

हे भगिनि! एषा स्वरुपायुक्त कर्म करोति। तस्या. एतत् कर्म नोचितम्।

प्रभूत नागाश्वरथ समलङ्कृत मनोहर मम गृह काञ्चन चित्रभूषित इव शोभयतु।

सुदेष्णा — नाह जान ते मनोभिप्राय कीचक। त्वमेव तस्या॰ समीप गत्वा विचारय नाहमस्मिन् कर्मणि नियोक्तव्या।

कीचक — त्व तथा मा आज्ञापय। अह तस्या सकाश गत्वा साधनीय साधयिष्यामि।

शुकीमेना ग्रहिष्यामि। सुदृढं बाहु पञ्जरे।
कोरवाणी दिवारात्रं। दद्यान्मे मूर्च्छनादिकम्॥

(इति हसन् गच्छति)

(यवनिका पतति)

*　*　*

द्वितीयं दृश्यम्

(सैरन्ध्री भूमाउपविश्य पुष्पमाला कुर्वन्ति आस्त। तत प्रविशति कीचक हृपा कृत्वा)

कीचक — (तस्या समीप गत्वा) कल्याणि कान्त्व। कस्मात् त्व विराटनर प्राप्तासि मा आचक्ष्व।

सैरन्ध्री — (भयचकिता तमदृष्ट्वैवस्वीय कर्म कुर्वन्ती आस्ते)

कीचक — भामिनि! ते रूप अग्रय। सौकुमार्यं उत्तम। ते वक्त्र शशाङ्क इव निर्मलम्। ते नत्रे पद्मपत्र निभे। जघन विशाल। ते वाक्य परपुष्टस्वनासमम्। एव रूपा नारी महीतल मया न दृष्टपूर्वा। तरुणि।

सर्वदा मां दहत्येव । दावाग्निरिव मन्मथः ।
संगमाम्भोधरेण त्वं । मन्मथाऽग्निं प्रशामय ॥

मत्तेभ गामिनी ! त्वं मत्तः उत्तमं सौख्यं प्राप्नुहि (इति तस्याः समक्षं गच्छति)

सैरन्ध्री — (तिरोमुखी भूत्वा) हे सूतपुत्र ! इदं ते नयुक्तं ।

कीचकः — कुटिलालके ! त्वं स्वादूनि अमृत कल्पानि विविधानि, पेयानि मनोज्ञानि पिबमाना यथासुखं रममाणा विविधान् भोगान् सौभाग्यं उत्तमैः भोगैः अनुभवस्व ।

सैरन्ध्री — (उत्थाय किंचित् दूरे उपविशति) सूतपुत्र, त्वं अकथनीय भाषसे । विरम त्वदीय भाषणम् ।

कीचक — अहो ते वाक्षु अनिर्वचनीय माधुर्यता स्पन्दते । त्वदर्थं मे पुरातनदारान् ते दास्यः करिष्यामि । अहं स्वयं ते दास भविष्यामि । अहं ते वशगः भविष्यामि । शृणु रति सुन्दरि !

अधार्यमाणा मालेव । राजसे नैव सुन्दरी ।
संमर्दं नैव राजन्ते । वनिता मणयः प्रियम् ॥

सैरन्ध्री — हे सूतपुत्र ! अप्रार्थनीया मा विहीनवर्णां सैरन्ध्री कथं अभिमन्यसे । मेधावी स्वेषु दारेषु उत्तम यत्न कुरुते । सर्वदा स्वदार निरतः नरः भद्राणि पश्यति । स्वदारेषु रतिः धर्मः । तत् अक्षय्य धर्म्यं स्वर्ग्यं मनीषिण. प्राहु ।

कीचकः — कामिनि ! किं त्वं धर्मशास्त्राणि बोधयसि । न मह्यं रोचते भाषणमेतादृशम् । भण भण सातत्य भण । तवोपदेशात् ते कलकण्ठ कण्ठनादः रसना माधुर्यंच अपूर्वानन्द मे वितरतः ।

सैरन्ध्री — सूतपुत्र, उत्तम भावनाभिः ते वशोन्नति कारय । इदं ते न योग्यम् । स्वजाति दारजाः पुत्रा. कुल पूजिताः भवन्ति । तस्मात् त्वं धर्मभाक् भव । पापात्मा नरः मोहमास्थितः घोर अयशः प्राप्नुयात् । तस्मात् त्वं विरम तव पथः ।

कीचकः — (विहस्य) वरारोहे त्वं एवं प्रत्याख्यातु नार्हसि। एतत् भाषणं ते न योग्यं। याः रूपवत्यः ते मदन साम्राज्यस्य राज्यः भवितारः। किंतु नीतिवचन पठयितारः न भूयासुः।

सैरन्ध्री — अहं यद् ब्रवीमि तत् सर्वं सज्जन सम्मतं समाजानुकूलंच।

कीचकः — हे सुभ्रु! अहं अस्य राजस्य प्रभुः। अहं क्षितौ वीर्यस्या प्रतिमः। मत्समोनास्ति कुत्रापि सप्तसमुद्रपरीतधरावलये वीरः बलिष्ठश्च।

न कोप्यस्ति विशालेऽस्मिन्। भूतले मत्समो बली।
स्त्रीणां सुरत सौख्यंतु। जायते बलिनः परम्॥

रूपयौवनसौभाग्यैः उत्तमभोगैः भोक्तव्येषु अनुपमेषु भोगेषु नान्यः मत्समः अस्ति।

सैरन्ध्री — सूत, नाहं कामये किमपि। अहं दासी।

कीचकः — **कल्याणि त्वं रता दास्ये। किमर्थं विपुलं वद।**
मां भजस्व वरारोहे। भुङ्क्ष्व भोगान् रसार्णवे॥

सैरन्ध्री — सूतपुत्र! मामुह्यस्व। जीवितं मा त्यक्ष्यस्व। पंचगन्धर्वाः मामनिशं रक्षन्ति। तत् त्वं जानीहि। मे पतयः गन्धर्वाः। त्वया नाहं लभ्या। ते कुपिताः त्वां हनिष्यन्ति। मा व्यनीनश। त्वं सह बान्धवैः वृत्तात् फलमिव अवशः पतिष्यसि। गच्छ त्वं। अपसर मम सम्मुखात्। (इति सक्रोधं कथयति)

कीचक — सैरन्ध्रि, क्रोधेऽपि ते वदनमण्डलं सौन्दर्यं वितनोति। अहं सप्तसागरपरिवेष्ठितमहीवलये बलवत्तमः। अहं तान् गन्धर्वान् एकमुष्टिपातेन हनिष्यामि न ते शक्ता। त्वं मम मार्गे विचर सुखमनुभव। अहं सिंहबलः। पदेपदे विचारय। पुनरागच्छयम्। (इति गच्छति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(सुदेष्णा गृहम् । कीचकः प्रविश्य)

कीचकः — सुदेष्णे, अहं तया प्रत्याख्यातः ।

सुदेष्णा — जानाम्यहम् ।

कीचकः — भवति कथं जानासि ।

सुदेष्णा — अहं सैरन्ध्री गुणगणान् स्वभावंच सुष्टु जानामि ।

कीचकः — अग्रजे, किं कुर्यां अधुना । अहं अमर्यादेन घोरेण कामेन अभिपरिप्लुतः ।

सुदेष्णा — कीचक त्वं तत पथः विरम ।

कीचकः — विरम इत्यस्य पदस्य अर्थं न जानामि मे जीवने । किंतु जानामि रम इत्यस्य पदस्य अर्थः ।

सुदेष्णा — एतस्मिन् विषये नाहं करिष्यामि किञ्चिदपि साहाय्यम् ।

कीचकः — सुदेष्णे येनोपायेन गजगामिनी सैरन्ध्री मा भजेत् तथा त्वं कुरु । (इति भर्त्सयति)

सुदेष्णा — अरे कीचक ! इयं सुश्रोणी शरणागता । मया सा दत्ता अभया । साच शुभाचारा । नैना वक्तुं उत्सहे । एषा पापेन चेतसा अन्येन स्प्रष्टुं न शक्या । एना गन्धर्वाः रक्षन्ति रमयन्तिच । एवं मा प्रथम संगमे मा अवादीत् । ते क्रुधाः ते जीवितं नाशयेयुः ।

कीचकः — अग्रजे त्वं जानासि मदीय भुज पराक्रमम् । त्वं मा बिभेहि मम मृत्योः ।

सुदेष्णा — राजाऽपि ता विलोक्य संमोह गतवान् ।

कीचकः — यदि रसिकः धरातले अस्ति सः अवश्यं ✓ दृष्ट्वा संमोहं प्राप्स्यति । स्त्रीणां सौन्दर्यं पुरुषाः जानन्ति नतु स्त्रियः ।

सुदेष्णा — मया महीपतिः सत्यवचनैः अनुनीतः। अयं जीवितस्य उपघातीना गन्धर्वा मुख्याना भयात् मनसाऽपि एना न चिन्तयति। ते यदि जानन्ति कृत्धाः भवेयुः। युगान्तेषु भास्कराइव त्रीन् लोकान् दहेयुः।

कीचकः — सुदेष्णे किमर्थं मां तव वचनैः विमोहयसि। त्वं जानासि मम सामर्थ्यम्।

सुदेष्णा — भ्रातः! सैरन्ध्री तेषा महद्बलं मां न्यगादीत्। इदं गुह्य। अहं बन्धुवत् तव स्नेहात् आख्यामि। त्वं कुत्सितम गति मागमः। बलिनः ते कुलस्य धनस्यच नाशनं कुर्यु। यदि प्राणाः प्रियास्तव अस्या मनः कर्तु नोत्सहस्व।

कीचकः — सुदेष्णे

गन्धर्वाणां शतं नोचेत्। सयस्रं चायुतानि वा।
हनिष्याम्येक घातेन। किं पुनः पञ्च संख्यकैः॥

(इति अट्टहासं करोति)

सुदेष्णा — यदि त्वमेवं अभिप्लुत. कामेन किं शक्यं मयाकर्तु। ध्रुवं गतायुस्त्वं। अरे नराधम अकर्तव्ये पापे मा नियुनङ्क्ष।

कीचक — त्वं मे भगिनी असि। अनुपदमेव अवश्यं मे सहायता करिष्यमि।

सुदेष्णा — कीचक! त्वं अलौकिकोऽसि। पुराप्रोक्तं निपुणैः पापं कुरुते एक.। तेन स्व जाति हन्यते। त्वं सर्वं स्वजनं घातयिष्यसि। त्व तुष्टोभव कुलक्षयात्।

कीचक — भगिनी मत्त ते भीतिर्मास्तु। त्वं यथाकथंचित् मत्समीपं ता प्रेरय। तदनन्तरं यत् करणीयं तदहं विधास्ये।

सुदेष्णा — अलौकिक! भ्रातृ सौहृदात् अहं एवं कथयामि। कथं सा नीरसाकारा स्पृहणीया भवति भवता। अत्र बहव्य. विद्यन्ते कलहंस गामिन्यः। विशाल जघना। किमर्थं त्वं विनाशं प्राप्तु मृत्यु आह्वयसि।

कीचक. — भगिनि!

भवतयं नीरसाकारा। सैरन्ध्री सेविका ध्रुवम्।
चेतसां रसपूर्णानां। रसाकारा वरानना॥

कामः मां प्रेरयति। अद्य अप्रतिहत। भगिनि! कर्तव्य क्षिप्र कुरु। (इति गर्जति)

सुदेष्णा — सदा जनः शान्त पवित्र बुध्या।
करोति कर्माणि सुयोग्य काले।
हठात्स्वयं पापपरीत कर्म।
विनाशकाले विपरीत बुद्धिः॥

अरे भ्रातः शृणु आगामिनि पर्वाणि विविध भक्ष्य भोज्य चोष्य पेयादिक अनेक प्रकार सुरान्न विधाय सिद्ध कुरु। तत्र तत्र शयन मन्दिरात् सुरामानेतुं एना तवान्तिकं प्रेषयिष्यामि। सम्प्रेषितामेना तत्र विजने यथा काम निगृह्य विचर।

कीचक — अग्रजे त्वं मे प्रियकारिणी। भवत्याः आदेशानुसारं अहं सर्वं तथाहं करिष्येय। अहो स्त्रीणा बुद्धि समयानुसारिणी यत

आगते सङ्कटे काले। कर्तव्यंक्षिप्रयुक्तिभिः।
स्त्रियः शान्तं विधास्यन्ति। स्त्रीबुद्धिस्सर्वतोमुखी॥

(इति हसन् गच्छति।)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

सुदेष्णा — चन्द्रिके! मञ्जरी क्व गता।

चन्द्रिका — मञ्जरि! तवान्तपुरं अलङ्कर्तुं सखीभिस्साकं तत्र गतवती।

सुदेष्णा — त्वं किं करोष्यत्र। अहं मञ्जरीं द्रष्टुं उपागतास्मि। शृणु, अद्य

कीचकस्य जन्म दिवस । तत्र अस्माभि सर्वैरपि गन्तव्य। विविध भोज्य चोष्य खाद्य पदार्था करणीया विद्यन्ते।

चन्द्रिका — विद्यते खलु सैरन्ध्री ! तया साक वय सर्वे मिलित्वा यद् यद् आचरणीय तत् कुर्म ।

सुदेष्णा — सैरन्ध्री कार्यान्तरे निमग्ना तस्मादह मञ्जर्या मार्ग निरीक्षे।

चन्द्रिका — सखी सुदेष्णे त्व अनतर सावकाश कीचक गृह समागच्छ। अह मञ्जर्या सार्थ तत्र गच्छेयम्।

सुदेष्णा — वय सर्वे मिलित्वा, अनतर गच्छेम। किञ्चित् काल तिष्ठ।

चन्द्रिका — अह मञ्जरी सकाश गत्वा, अत पुरालङ्करण कियत्पर्यन्त अध्यवसित इति विलोक्य, तया साक त्वा प्रत्यागमिष्यामि।

सुदेष्णा — आम् तथैव कुरु।

चन्द्रिका — भवती आवयो मार्ग प्रतीक्षस्व (इति गच्छति)

सुदेष्णा — (एकान्ते निश्वसन्ती उपविशति। ततः प्रविशति सैरन्ध्री)

सैरन्ध्री — राज्ञि किं एकाकिना विचारयसि किं करणीय ते विद्यते।

सुदेष्णा — अह अशक्ताऽस्मि चलितुमपि। किञ्चित् पानाय देहि।

सैरन्ध्री — आनयेय (इति गन्तुमिच्छति)

सुदेष्णा — सैरन्ध्रि ! मा पिपासा प्रबाधते सुरामानय कल्याणि।

सैरन्ध्री — कुत्र विद्यते सुरा कथय देवी।

सुदेष्णा — कीचकस्य वेश्मनि।

सैरन्ध्री — मया तत्र गन्तव्य किं।

सुदेष्णा — हा गन्तव्यम्।

सैरन्ध्री — महाराज्ञि ! नाह गच्छेय कीचकस्य वेश्म।

सुदेष्णा — त्व मे दासी असि। यत् मया कथ्यते तत् त्वया करणीयम्।

सैरन्ध्री — राज्ञि त्वमेव जानासि म निरपत्रप.। तत्र वेश्मनि कामवृत्ता पतन्ता व्यभिचारिणी न भविष्यामि।

सुदेष्णा — सैरन्ध्रि ! अकरणीयं कुरु इति नाहं कथयेयम्।

सैरन्ध्री — देवि ! भवती जानाति प्रविशन्त्या मया पूर्वं समयः कृतः तव वेश्मनि।

सुदेष्णा — जानाम्यहं। सर्वमपि विचार्य आदिशामि।

सैरन्ध्री — देवि कीचकः मूढः मदन दर्पितः सः मां दृष्टवा अवमंस्यति न यास्ये तत्र।

सुदेष्णा — सैरन्ध्रि ! स त्वां नैव हिंस्यात् (इति उत्थाय सुरापात्रमानीय सैरन्ध्रया सकाशं गत्वा) सैरन्ध्रि गृहाण पात्रमेतत् (इति सपिधानं पात्रं ददाति)

सैरन्ध्री — (रुदन्ती कीचकस्य निवेशनं गच्छन्ती) यद्यहं भर्तृभ्य अन्यं कंचन नाभिजानामि तेन सत्येन कीचकः एकान्ते दृष्टवा मां न किमपि कुर्यात्। (इति अश्रुमार्जन्ती गच्छति)

(यवनिका पतति)

*   *   *

पंचमं दृश्यम्

(कीचकः एकान्ते उपविष्टः चिन्तयति)

कीचकः — कालविलम्बनं भवति। भगिनी मे वचः विस्मृतार्कि। उताहो दासी तिरस्कृतवती। यदि दासी मे निवासं आगन्तुं उद्युक्ता तर्हि मे मनोरथः फलिष्यति। यदि मे अग्रजा तिरस्कृता सैरन्ध्रया तथापि मे यत्नः सुलभः भविष्यति। (आकर्णनमभिनीय) हा पादशब्दं श्रूयते। हा सैरन्ध्री कलहंसगत्या मां एति। (इत्युत्थाय तस्याः प्रवेशं वीक्षते) हा अहो—

मराळयाना स्वयमेति गहम् । विलासमाधुर्य गुणाभिरूपा ।
कारुण्यशृङगार परीत भावा । मामेव यातीह मदालसा सा ॥

(तत प्रविशति वामकरतलोपरि पात्र वहन्ती पात्रोपरि दक्षिण करतल पिधाय वामभाग किंचिन्नताङगी सैरन्ध्री)

कीचक — सैरन्ध्रि ! स्वागत ते रजनी चिक्वणा जाता। मम प्रिय कुरु। अत्र पश्य मे शयन दिव्य विराजते। एतत् त्वदर्थ उपकल्पितम। एहि तत्र मया सार्धं। मधु माधवी पिबस्व (इति तस्या समीप गच्छति)

सैरन्ध्री — कीचक अपेहि। नाह त्वया स्प्रष्टु शक्या। दुर्बुद्ध भ्रष्टा गति मा भजस्व।

कीचक — सैरन्ध्रि ! यदा त्व मदीय निवेश प्रविष्टाऽसि नक्त एकाकिनी एकान्ते सत्य त्व मदीयासि न ते अधिकार मामवरोद्धु। पश्य।

यामिन्या सरसा तन्वीम् । एकान्ते कोऽपि न त्यजेत् ।
अधुना मे वशी भूता। नास्ति मोक्षस्तवाङगने।

सैरन्ध्री — महाराज्ञी मा तवान्तिक सुरामाहर्तुं प्रपयामास । मे महती पिपासा समजनि सुरा आनय क्षिप्र इत्यवोचत ।

कीचक — भामिनी ! श्रुणु।

समागमोऽय सैरन्ध्रि । निर्णीत पूर्वमेवहि ।
प्रिये विलास रूपे त्व । एहि मे वाहु बन्धनम् ।

त्व न जानासि अत्र विद्यमान रहस्य। भद्र अन्या राजपुत्र्य सुरा नेष्यन्ति। त्वमेहि मे बाहुपञ्जरम। (इति ता दक्षिण हस्तेन कर्षति)

सैरन्ध्री — मूढ जहीहि मा। (इति पात्र विसृज्य) विधून्वाना कीचक भूमावाक्षिप्य। (पलायिता)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(वल्वल इतस्त भ्रमन् आस्ते, तत प्रविशति त्रस्ता सैरन्ध्री)

सैरन्ध्री — वल्वल ! घोरमापतित । समूढ मा हस्तेन चकर्ष । अह बलात् त भूमौ पातयित्वा अत्रागतास्मि ।

वल्वल — भीरु किमर्थं कम्पसे ? धैर्यमवलम्बस्व ते भद्र करिष्यामि ।

सैरन्ध्री — कथ भवान् करिष्यति । अय अज्ञातवास । यदि पाण्डवा अत्र विद्यन्ते इति प्रतिपक्षिण जानीयु तर्हि यथा पूर्वं अस्माभि अध्यवसितव्यम् । विचार्यमाणे मे भीति जायते ।

वल्वल — मा बिभेहि याज्ञसेनि । अद्य सहबान्धव त कीचक विना रक्त स्पन्दन, क्रन्दन अति मृदुल त कीचक सूदयिष्यामि सहबान्धव । पश्यसि मे कौशल्यम् । अस्या शर्वर्या प्रदोषे अनेन सगत कुरुष्व ।

सैरन्ध्री — तेन भाषणमपि अति भयद भवति । कथ सगत कर्तव्य ? कुत्र कर्तव्यम् ।

वल्वल — शृणु, अत्र नर्तन शालाया कन्या दिवा नृत्यन्ति । रात्रौ यान्ति गृहम् । तत्रास्ति दृढ सुखद शयन । तत्र अनेन दुरात्मना सार्थं समय कुरुष्व ।

सैरन्ध्री — यथा निर्दिष्ट अह सवमपि कर्तुं प्रयतिष्ये त्वया अवश्य अत्रैव अन्तर्हितेन भवितव्यम् नोचेत् सर्वं अस्तव्यस्त भविष्यति ।

वल्वल — अस्मिन् विषये न किमपि विचार कुरु । अह सर्वं सकुशल निर्वर्तिष्ये ।

सैरन्ध्री — वाढ । अधिक समय जात । सत्वर आवाभ्या गन्तव्य विद्यते । (इति द्वावपि निर्गतौ)

(यवनिका पतति)

* * *

सप्तमं दृश्यम्

(सैरन्ध्री कीचकसदन प्रविशति)

कीचक — अहो भामिनी भवती स्वय आगतासि।

सैरन्ध्री — कीचक मत्कृतापराध सहस्व। अहं त्वा अनुसरिष्यामि। अह ते एक रहस्य कथयिष्यामि।

कीचकः — भामिनी! मन्त्रदद्धनागिनीव मदीय वशमागतासि। पश्य मम वशीकरण शक्तिम्।

सैरन्ध्री — अधुना भवन्तमुद्दिश्य ज्ञातमासीत् मया। भवान् अत्यन्त रसिकोऽस्ति।

कीचक — भामिनि! भवती परहृदय वेदिनी। मधुर भाषितं त्वया। मे हृदय निस्तुल रसपूर्ण भवति।

सैरन्ध्री — मे कामना किं पूरयिष्यसि?

कीचकः — काते कामना सविस्तर कथय। अद्य प्रभृति तव दासोऽस्म्यहम्। अहं अनुपद पूरयिष्यामि ते कामनाम्।

सैरन्ध्री — कीचक! कथयितु लज्जितास्मि।

कीचकः — मानिनि! प्रणये लज्जा कुत। लज्जा त्यागे प्रणयः पराकाष्ठा भजते। यत।

प्रेम्णाच्च हृदये यत्र। प्रपूर्णे रसनिस्तुले।
सततं मधुरं भातः। परस्पर फलायिते॥

सैरन्ध्री — अहो साधु प्रोक्त भवता। अद्य समय मे प्रतिपद्यस्व। मया सगत त्वा न सखा भ्राता वा जानीयात्। अह गन्धर्वाणा अनुप्रवासात् भीतास्मि। अह ते वशगा अस्मि तथा जानीहि।

कीचक. — सुश्रोणि यथा भाषसे तथैव करिष्यामि। अह धन्योऽस्मि सुश्रोणि। यतः।

विलासिनी या स्मरबाधया च । स्वयं समायाति सुखाय रात्रौ ।
कामं समीपं पुरुषस्य लोके । सेयं सुरात्रिः पुरुषश्च धन्यः ।

सैरन्ध्री — अत्र तव वेश्मनि मे भीतिः भवति । भवान् सन्ध्या समये नर्तनशाला समागच्छतु । सर्वमपि तत्र सुकरं अति सुखदं भविष्यति । त्वं एकाकी भूत्वा समागच्छ । अन्येषा दर्शनेन कामः भीतः भवति ।

कीचकः — भवती माभण ! जानाम्यहं सर्वं । अहं एकाकी तत्रागमिष्यामि, यथा गन्धर्वाः मा न पश्येयुः । भवती गच्छतु । (सैरन्ध्री लज्जया निवृत्ता भवति) वडिश लग्ना शफरी (इति अट्टहासं करोति)

[यवनिका पतति]

* * *

अष्टमं दृश्यम्

(कीचकः नर्तनशालाया सुसज्जित शयने उपविश्य चिन्तयति)

कीचकः — हा विपुल जघने सैरन्ध्रि ! किमर्थं विलम्बसे । इयं शर्वरी बहुक्रूरा । निर्दया । मा एकाकिन अतीव बाधयति । इयं कामवेदना दुर्भरा भवति मे । रजनी सर्व पापाना सर्व बाधाना सर्व सौख्याना च निदानं भवति । भामिनी सत्वरं मा समेहि । मे बाहुपञ्जरे सुखं निवस शुकप्रलापैः । आवा मन्मथ साम्राज्यं पालयावः । अहं मदनः त्वं रतिः । मे कामवासना यथा दग्धा भविष्यति तथा विहरावः एकान्ते रजन्या । अहो किमर्थं विलम्ब्यते भवत्या । कामिनि त्वया विना नाह जीविष्यामि । अङ्गरागाः समानीताः । विविध पुष्पफलपानीयानि समाहृतानि । धृतानि मृदुदुकूलानि । सर्वत्रापि घुमघुम वासना प्राक्तन कामवासनादीन् प्रेरयन्ती आस्ते । अतीव सुखदा इयं रजनी । मे निपायते । विलासिनि किमर्थं चिरयसि त्व । अहो अतीव वेला यापिता निरर्थका । प्रिये !

अलिङ्गय देह कुचभारनम्र । विलास लावण्य सरोवरे ते ।
तरन् यथेच्छ रसमग्नचित्त. । प्रशामयेय मम म रबाधाम ॥

एहि कृशोऽदरि मे शयन मन्दिर । मया साक सानन्द रमस्व । (इति कि कर्तव्यता मूढ हस्तवाद प्रसाय शयन अशेत)

(वल्लव सैरन्ध्रावेशण प्रविश्य काचकशयने उपविशति । कीचक वामहस्तेन कण्ठ निगृह्य दक्षिणहस्तेन मुष्टिभि मारयितु उद्युक्त भवति)

[यवनिका पतति



।। वज्रं वज्रेण भिद्यते ।।

निरन्तरं द्वेषपरीत मत्तसान् । जनान्परं प्रेमदयाप्रपूर्णान् ।
विधास्यमानः सततं प्रशान्तम् । संवर्धता शान्तिमय स्वभावः ।।

(नान्द्यन्त)

सूत्रधार — अयि कल्याणशालिनि प्रिये ! श्रूयताम।

नटी — (प्रविश्य) अहो शृणोमि कथयन्तु।

सूत्रधार — सावधानेन श्रोतव्यम्।

नटी — को विशेष ।

सूत्रधार — न कोऽपि विशेष विद्यते। किन्तु प्रपञ्चे मानवा कचित् गर्वाहङ्कार दर्पिता प्रयतन्ते, स्व लाभाय त्यक्त्वा मानवता।

नटी — तस्मात् भवता किं क्रियते।

सूत्रधार — विशाल भाव सम्पन्न, मानव हृदयान्तर्गत भावप्रबोधक, अपिच शत्रुमपि मित्रवत् समादरणीयमिति प्रदर्शयन्त "वज्र वज्रेण भिद्यते" इति नाटक प्रयोक्तुमुद्यता ।

नटी — प्रिय, नाटकमेतत् कनकविना विलिखितम्।

सूत्रधार — नाटकमेतत् गीर्वाणान्ध्रभाषा प्रवीणेन महाकविना परीक्षित् शर्मणा प्रणीत ।

नटी — सत्य सुन्दर प्रतिभाति मे। नाटकमेतत् सार्वकालीनक भवितु महर्ति। यत ।

प्रत्यहं द्वेषपूर्णंच । शत्रुषड्वर्ग रञ्जितम् ।
समाजं पावनं कर्तुं । नाटकं रचितं प्रियम् ।।

सूत्रधार — प्रिय, इत पश्य द्रोणद्रुपदौ सहाध्यायिनौ परस्पर सल्लाप कुर्वन्तौ प्रविशत । एहि गच्छाव । (इति गच्छत)

(तत प्रविशत द्रोणद्रुपदौ)

द्रोण — सखे द्रुपद आवा परिसमाप्त विद्यौ। अत पर गृहस्थाश्रम प्रविशाव ।

द्रुपद — अरे सुहृद् द्रोण ! अहतु क्षत्रिय । त्व ब्राह्मण । अपिच आवा सुहृदौ। एकशयन एकपात्रे सुखमन्नौ भुक्तवन्तौ, सहाध्यायिनो विद्यापारगतौ। आवा स्नेह एवमेव सर्वथा वर्धिष्णुता भूयात् इति मामकीन विचार ।

द्रोण — अरे द्रुपद ! आवा जन्मना ब्राह्मण क्षत्रियौ। किन्तु विद्यया कर्मणा भ्रातरन्तौ सवृत्तिरहे ।

द्रुपद — मित्र द्रोण ! मम पितु आज्ञा एवमस्ति प्रथमत मम विवाह विधाय मत्पर राज्य पट्टाभिषेक कर्तव्य इति।

द्रोण — अरे सुहृद यदि त्व राजा भविष्यसि मा नून विस्मरिष्यसि।

द्रुपद — तथा नाह विस्मरिष्यामि।

द्रोण — तवाभिप्राय कालान्तरेण रूपान्तर धारयिष्यति। कालक्रमेण समयानुकूल बुद्धि परिणमति।

द्रुपद — तथा न भवतु महति। पश्य।

अह राजा भविष्यामि। मया सार्थं भवान प्रियम्।
भुनक्तु काम सवस्व। वित्त भोगान सुखानिच ॥

द्रोण — (विहस्य) अरे द्रुपद ! अह कथ राज्य सौख्य नृपतिरिव अनुभविष्यामि।

द्रुपद — कथ नहि। अपराध क ।

द्रोण — अरे त्व जानासि यत् ब्राह्मणाना ज्ञानार्जनमेव कर्तव्य नतु धनार्जन सुखानुभूतिश्च इति।

द्रुपद — कालप्रभावेन सकल अस्त व्यस्त भवति जगति जन्तूनाम्।

द्रोण — अहा त नित्याधाग प्रशसनीया।

न भवन्ति महात्मानः । सर्वे जगति मानवाः ।
त्वादृशाः विरलाः सन्ति । तस्मात्त्वं मे सुहृद्वरः ॥

द्रुपद — अर कुम्भसभव, त्व निरशङ्क तव कामना पूर्त्यै मम सकाश समागच्छ। तव कामना सफला भविष्यति।

द्रोण — मित्रोत्तम ! त्व मे बाल्य मित्र। त पिता मम पिता च बाल्यमित्रौ। तस्मात् आवया मैत्री पारपर्येण सप्राप्ता। अय सबन्ध अच्छेद्य अविभाज्य।

द्रुपद — सत्यमव इय मैत्री अविभाज्या मातृत्वेन प्रवर्तिनाया (इति द्रोणस्य दक्षिण हस्त स्वाय दक्षिण हस्तेन गृहीत्वा चालन करोति)

द्रोण — अयि मित्र। अहमभिनन्दामि ते विशाल भावना सौहार्दं च।

द्रुपद — अर कलश सम्भव ! ब्राह्मण क्षत्रियाणा मध्ये अन्तर न किमपि विद्यत।

द्रोण — अन्तर न किमपि विद्यत किन्तु भावनाया अन्तर विद्यत।

द्रुपद — जगति मानवा सर्व शरार स्पर्शा समाना किंतु मानसिकदृष्ट्या विभिन्ना।

द्रोण — सत्यमव सर्वेषा अवयव निमाण एकमेव भवति।

द्रुपद — किन्त भावनाकृति विभिन्ना भवति।

द्रोण — आहार विहारेऽपि वैविध्य भवति।

द्रुपद — किन्तु आवयार्मध्य न किमप्यन्तर विद्यत यस्मिन् कस्मिन् विषयेऽपि।

द्रोण — मित्र ! तस्मात् आवा समवयस्कौ समान शालिनौ। समान भावुकौ। सर्वत्रापि समानता प्रतिभाति।

द्रुपद — आवयार्मध्य सर्वेषु विषयेषु अविनाभाव सम्बन्ध विद्यत।

द्रोण — सुष्ठु भावित त्वया।

द्रुपद — शृणु, अहं राजा।

द्रोण — अहं मन्त्री।

द्रुपद — अहं शरीरम्।

द्रोण — अहं प्राणा।

द्रुपद — आवां सूर्य चन्द्रौ।

द्रोण — आवां दिवारात्रम्।

द्रुपद — आवां सम्बन्ध अविभाज्यः।

द्रोण — सहाध्यायिरूपेण सम्बन्ध पटु त्रिक्कणात्मकः बभूव।

द्रुपद — विद्यार्थिदशा सर्वासु दशासु शक्ति समन्विता।

द्रोण — आवां समान शीलिनौ समानीव आकृति। समानी हृदयानि। (इति द्रुपदः अलिङ्गय) मित्र शृणु

सौहार्दपूर्णं वरमित्र भावं। पुराणरूप जगति प्रसिद्धम्।
विलोक्य मे कौतुकमेव जातं। रे मित्र मित्य शुभमस्तु लोके॥

(इति निष्क्रान्ता)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(द्रोण व्याघ्रहाँ बध्नाति, कृपी समार्जिन्या गृह मार्जयन्ति आस्ते)

कृपी — किं कुर्यां जीवन सर्व कष्टमय भवति। न कस्याऽपि कुटुम्बे रक्तिः विद्यते। वेलाया समागत्य भुक्त्वा गच्छन्ति कुटुम्बीक। गृहे किं विद्यते, किं न विद्यते

इति नकोऽपि विचारयति। स्त्रियोहि नाम गृहे दास्यं अनुभवन्त्यः पुरुषाणां सुख दात्र्यः। अहो किमेतत् जन्म। अस्मिन् संसारे स्त्रीणां न कापि स्वतन्त्रता विद्यते। कुटुम्बिनीषु कुटुम्बीकानां नकोऽपि आदरभावः न काप्यनुकम्पाच विद्यते। स्त्रीजन्मनः अरण्ये तरु जन्म श्रेष्ठतरं भाति (इति सक्रोधं सवेगं समार्जनं कुर्वन्ती आस्ते)

द्रोणः — किं भवती कृत्या कृशानुः भवति।

कृपी — नाहं कृत्या किन्तु चिन्ताक्रान्तास्मि।

द्रोण. — चिन्तायाः निदानं किम्?

कृपी — अयि भोः बालः अश्वत्थामा दिने दिने व्यपचीयमान शरीरः निर्बलः भवति।

द्रोणः — किं कुर्यां अहं तस्य बलविषये?

कृपी — खाद्य पदार्थेषु पौष्टिक पदार्थः न्यूनः भवति।

द्रोणः — तस्यकृते किं कुर्यां अहं।

कृपी — किं कर्तव्यमिति नाहं भणामि।

द्रोणः — हञ्जे, खाद्य पदार्थेषु पौष्टिकाहारस्य आवश्यकता अङ्गीकरोमि। किंतु जन्मतः संक्रामितस्य निर्बलस्य पौष्टिकाहारोऽपि अजीर्णं जनयिष्यति।

कृपी — अत्र सर्व बालाः प्रातः उत्थाय गोक्षीरमासेवन्ते।

द्रोण. — वय निर्धनाः ब्राह्मणाः। अस्माकं गो क्षीरं कथं लभ्यं भविष्यति।

कृपी — तस्मादहं वच्मि यथा कथं चित् वरिष्ठ कपिला एका सम्पाद्यस्वेति।

द्रोण. — अत्र नकोऽपि दाता अस्ति। भवतु नाम। अश्वत्थामानं तेषां बालानां सकाशं प्रेष्य तैस्माकं सोऽपि किञ्चित् क्षीरं पास्यति।

कृपी — तेषां मध्ये कलहः भवति। तस्मादहं न प्रेषयेयं बालं।

द्रोणः — बालानां कलहः भवत्येव किंतु सः कलहः तात्कालीनः।

कृपी — बालानां कलहकारणात् पितरौ कलहायमानौ भवतः।

द्रोणः — तथा करणं मौर्ख्यमेव। बालाः कलहायन्ते अनन्तरं क्रीडन्ते। किंतु ज्येष्ठाः कलहायमानाः यावज्जीवं मौर्ख्येन दर्शयिष्यन्ति तेषां मानसिक संकुचितत्वम्।

कृपी — बाला ज्येष्ठमण्डलात् अधिकतरं बुद्धिमन्त. भवन्ति।

द्रोणः — बाल अधुना कुत्र गतः।

कृपी — स बालमित्राणा सन्निधि गत ।

द्रोण — किमर्थं गत ।

कृपी — दुग्धपानं कर्तुं गत ।

द्रोणः — साधुकृत तेन। पश्य,

भिक्षादानेन लोकेऽस्मिन्। ब्राह्मणो जीवते धिया।
तस्मात् साधु कृत तेन। गोक्षीरास्वादने प्रिये॥

कृपी — बाल्यात् प्रभृति स. परालम्बन पर. जातः। हा धिक् कष्टम्।

द्रोणः — प्रिये बाल रूदन् इवास्ते पश्य।

कृपी — (उत्थाय गत्वा विलोक्य रूदताबालेन साकं प्रविश्य) अरे चिरंजीव किमर्थं रोदिसि।

बाल — मात ते सर्वे क्षीर मद्य अदत्त्वैव अपिबन्।

कृपी — मारोदि अह ते गोक्षीरं दास्यामि (इति अन्त गत्वा पिष्टमिश्रित जल आनीय एकस्मिन् पात्रे पूरयित्वा तस्मै गो क्षीरमिति ददाति)

बाल — (सन्तोषभरेण) मात त्व मे अत्यन्त स्पृहणीयासि। (इति पिबन् परमानन्देन मुखशब्द कुर्वन्) मातः अहं उदरपूरं गोक्षीरं पिबामि ते बाला अर्धकुक्षि क्षीरं पीत्वा प्रमोदन्ते। (इति हसति)

कृपी — (विचारयन्ती) वत्स पिब सानन्द पिब एतदेव ते गोक्षीरम्। वयं दरिद्रा कथं प्रत्यहं गोक्षीरं पास्याम॰।

बाल — (सर्व पीत्वा) कलशं भूमौ निक्षिप्य नृत्यन् गायति)

गीतम्

१ क्षीर पीत मया भृशम्। मात्रा दत्त मुदा प्रियम्॥

२ बाला क्षीर पिबन्ति च। सध्या समये रमन्ति च॥

३ प्रचुर स्वैर गायन्ति ते। नित्य देव नमन्ति त॥

द्रोण — (सर्वान् नर्तन विलोक्य स्वगतम्) गोक्षीर त्वलब्धाऽय सुत पिष्टोदक पीत्वा स्वामान विस्मृत्य नृत्यति किमिदमाश्चर्यं? दृष्ट्वा तस्य स्थिति मे हृदय विदलति।

कृपी — (द्रोण विलोक्य) किमर्थं यूय विचाराधीना।

द्रोण — बालस्य अज्ञान वर्तनात् मे हृदय विदलति।

कृपी — किमर्थं विदलति? वय असमर्था। कार्य साधन अकुशला। वय कार्यकरणे अक्षमा।

द्रोण — कृपि! तथा मा वद। पिष्टमिश्रित पानीय पीत्वा तन सत्यमेव गोक्षीर पीतमिति आनन्देन नर्तित। तत् दृश्य मे अत्यन्त हृदयविदारक भवति, मम असहन भवति।

धिगस्तु मे निर्धनमौख्यजीवित। नचास्ति वित्त नच धेनुमण्डलम्।
बालाय दातु ममनास्ति दुग्धम्। दग्धो भवत्यत्र ममान्तरङ्ग॥

(इति विचार तत्र भवति)

कृपी — चिन्ता विसृज्य स्मयार्गी भव।

द्रोण — कि कुर्यामहे? क आश्रयेयम्। को नाम दास्यति?

कृपी — प्रिय, उक्त भवता गर्भादानस्य प्रथमदिनन्या यत् तत्रभवता मित्र एक द्रुपदो नाम, स सम्पन्नराजेति अधुना तस्य सकाश गत्वा गोदान स्वीकुर्वन्तु।

द्रोण — हाँ सत्य उक्तमेव मया। किन्तु तत् बहुकालात् प्राक् संवृत्त। अधुना स मयि स्निह्यति उत नहि अय प्रश्न भवति।

कृपी — **मित्रच मित्रवद् लोक। करदानैः पुनाति च।**
तस्मात्त्व तत्रगत्वैव। प्रार्थयस्व महीपतिम्॥

द्रोण — प्रिये! अहो ते समय स्फूर्ति विशेष। तस्मादेव भार्या नाम करणेषु मन्त्री इति भणित पूर्वसूरिभि। सकुटुम्ब आवा मे मित्र द्रुपद द्रष्टु गच्छाव।

कृपी — यदि स अधुना स्मरिष्यति सर्वमपि सुगम सुकर भविष्यति।

द्रोण — अथ अवश्यमेव स्मरिष्यति मा। तेनोक्त च। यत।

अहं राजा भविष्यामि। मया सार्थं भवान्प्रियम्।
अनुभोक्ष्यति सर्वस्व। वित्त भोगान् सुखं सखे॥

कृपी — अहो साधु प्रतिपादित तव मित्रेण। अथैव तस्य सन्निधि गच्छाव।

द्रोण — शुभस्य शीघ्रम्। एहि गच्छाव।

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

[द्रुपदराज सभास्थानम्‌ सिंहासने द्रुपद उपविष्ट अस्ति। पार्श्वे छत्रचामर वाहिन्यौ वीजयत]

मन्त्री — अयि राजन् गङ्गाया दक्षिणत विराजमान धरणीमण्डल नाशयत भवत राज्ये न कुत्रापि भीति चौर्य अमानुष चेष्टादिक दृश्यते। त प्रापणी यान् दानाश भागान् वय सामन्त राजान सभक्तिक प्रेषयामहे। तव एकछत्राधिपत्ये वय सर्वे अपूर्वानन्द सुखचानुभवाम। ते सर्वसन्मङगळानि भवन्तु। समस्त सौख्यानि भवन्तु इति परमेश्वर प्रार्थयामहे। [इति पठित्वा मन्त्री उपविशति]

वेत्रहस्त — [तत प्रविशति] जयतु जयतु महाराज। भरद्वाजपुत्र कलश सम्भव द्रोणाचार्य सदारपुत्र तव भवत द्रष्टु द्वारि तिष्ठति।

राजा — (आत्मगतम्) द्रोणाचार्यः सभार्या पुत्रः द्वारि तिष्ठति । सः मा दिदृक्षुरस्ति । अनुपदं प्रवेशय (इति आज्ञापयति)

वेत्रहस्तः — बाढम् (इति नमस्कृत्य गच्छति)

राजा — मंत्रि ! भवान् गच्छतु ।

(मन्त्री गच्छति, ततः प्रविशति सदारपुत्रः द्रोणः)

द्रोणः — स्वस्ति भवते ।

राजा — नमोवः (उत्थाय नमस्करोति तेषां आसनं दर्शयति) सर्वे उपविष्टाः।

द्रोणः — यूयं द्रुपद महाराजानः । कोवाऽहं इति भवतां विदितमेवस्यात् इति मे वितर्कः ।

द्रुपदः — नाहं जाने ।

द्रोणः — बहुकाल वियोगात् विस्मृतवन्तः अभवन् इति मे कल्पना ।

द्रुपदः — काल विपर्ययेन स्मृति विभ्रमः भवति ।

द्रोणः — यदि स्मृति विभ्रमः भवति तर्हि अनुमानेन सुयोज्यः भविष्यति किंतु न चित्त विभ्रमः ।

द्रुपदः — चित्त विभ्रमोऽपि जातः ।

द्रोणः — महाराज !

शरीरे शौर्य माणेतु । बुद्धिर्गच्छति हीनताम् ।
सम्पदां निचये राजा । तेजो वृद्धिः विराजते ।।

महाराज अहं ब्रवीमि शृणोतु । मम नाम द्रोणः भरद्वाज तनयः ।

द्रुपदः — ओम् एकदा शृणोतु मया पूर्वम् ।

द्रोणः — किं उच्यते भवता ?

द्रुपदः — सत्यं ब्रवीमि ।

द्रोणः — किमाश्चर्यं ? आवयो व्यवहारः बालनादिकं सर्वं विस्मृतं किम् !

द्रुपद — तत् सवमपि गत जन्मानि जात इति मन्ये।

द्रोण — कथ गत जन्मानि। गुरुकुलवासे इह जन्मानि। पञ्चवर्षेभ्य प्राक् सवृत्तम्।

द्रुपद — गुरु कुलवासे बाल्ये सवृत्त ।

द्रोण — हा सत्यम्।

द्रुपद — तत् मे गतजन्म वृत्तान्त इव प्रतिभाति।

द्रोण — विद्यार्थिदशाया भावना विचित्र बुद्धिविशेष, अन्योन्याश्रय जीवन इत्यादिक अत्यान प्रेम सबद्ध भवति। यौवने सवमपि दर्भावपरीतजीवन भवति तदानी भावना अन्या।

द्रुपद — सयमेव तत् अधुना भावना अन्या।

द्रोण — अधुना कथ अन्या भवति।

द्रुपद — अह अधुना राजा। राज्य धुरधरोऽस्मि।

द्रोण — राजत्वशजाना अय महान पन्।

द्रुपद — अयमपि सहन यत् राज्य रे बाल्यस्नह विस्मरणम्।

द्रोण — वयसि सवृत्त सर्वमपि विस्मरणाय भवति तत् सत्यमेव।

द्रुपद — भवता सत्यमुक्तम्।

द्रोण — राजन् कौमारदशाया गुरुकुलवास यत् सवृत्त तत् विस्मरणीय कथ भवति? श्रृणातु।

> **क्रीडारस पर राजन। सर्वेषुच रसेष्वपि।**
> **नित्य सस्मरणीयोऽस्ति। भवान त विस्मृत कथम॥**

द्रुपद — द्राण मे जीवन अह सामपि शैशवपन्न सर्वघटनादिक विस्मृतोऽस्मि।

द्रोण — राजन् अह स्मृतिपथ प्रापयितु प्रयात्स्ये। श्रृणातु भवान्। त्व पञ्चा मा अरे कृष्ण! अरे द्राण इति परिहासेन सबोधयन् आसी। तदा अह अरे द्रुपद द्रुत इति त्वा सबाधितोऽस्मि। तत्र त्व क्रुद्धोऽसि।

द्रुपद. — एतत् सर्वं मे नवीनं प्रत्युत्पन्नं प्रतिभाति।

द्रोण: — एकदा अहं त्वा मर्त्सयन् एवं परिहासः न कर्तव्यः इत्यवोचम्. किं सा घटनादृष्टिपथं समागता?

द्रुपद: — नाहं किमपि जाने। अधुना तत्र प्रयासः कुतः।

द्रोण: — राजन्, अहं सपत्नीकः। इयन्त भवन्तं प्रार्थयितुं समागतोऽस्मि। अयं मे पुत्रः पिष्टोदकं पीत्वा गोक्षीरं सेवितमिति बुध्या आनन्देन नृत्यन् आसीत्। तत् दृश्यं विलोक्य विदीर्णमान मानसः एका गा कपिला भवतः प्राप्तुं समागतोऽस्मि।

द्रुपद: — अयं राजा केभ्यामपि न किमपि ददाति। ददाति केवलं रक्तसंबन्ध बान्धवेभ्यः वस्तुचयम्। आवयोः कोऽयं सम्बन्धः?

द्रोण. — भवतु अहं कथयेयं आवयोः संबन्धः कीदृश.।

द्रुपद — कोऽयं संबन्धः आवयोर्मध्ये विद्यते। अह लक्ष्मीकटाक्षालिङ्गित.। सम्पत्तवान् राजा। त्वं तु निर्धनः एकः दरिद्रब्राह्मणः। आवयोः कथं संबन्धः भवति। आवयोर्मध्ये हस्तिमशकान्तरं विद्यते। स्नेहस्याऽपि समान शीलता अस्ति। पश्य।

सपन्नैर्जायते सख्यं। संपन्नैरेव भूतले।
धनिनां निर्धनानां च। न सख्यं जायते कदा।।

समान शालिना, समान गुणरता, समान भावुकाना, समान जन्मना. समान विद्या विलसिताना. सख्यं भवति, तत् भिन्नानां कथं?

द्रोण — राजन् आवां अग्निवेशस्य सन्निधौ सकल विद्या पारङ्गतौ आस्ताम्। विद्या परिसमाप्त्यनन्तरं आवाभ्या गार्हस्थ्यधर्मः स्वीकर्तव्य. इति निश्चित। तदा त्वया भणितं त्वया राज्ञा भवितव्यं इति अनन्तर विवाह कर्तव्य इति।

द्रुपद. — द्रोण! यदा त्वं मां आत्थ सखा तेऽहमिति. श्रुत्वा मे आश्चर्यं भवति। कालेन सगतानि जीर्यन्ति। पूर्वं त्वया मे सौहृदं चासीत् तत् केवल सामर्थ्य बन्धनम्। अश्रोत्रियः श्रोत्रियेण स्नेह न कुरुते। रथी अरथिनः सखा न भवति। नहि राजा एवंभूते नरे कश्चिदपि स्नेह. भवति।

द्रोण. — राजन्, धनदर्पेण तत्सर्वं त्वया विस्मृतम्। त्वं अधुना धनान्धोऽसि।

द्रुपद — मन्दात्मन्! श्रियाहीनै धनच्युतै सन्यं भवति। त्वा अहं न जानामि। किन्तु ते एक रात्र भोजन दास्यामि।

द्रोण — (सक्रोध उत्थाय) नमस्तेऽस्तु महाराज। कालं निरीक्षस्व। सर्वदा काल नैकरीत्या चलति। नाव शकटानि भवन्ति शकटानि नाव भवन्ति। समय निरीक्षस्व आवयो समागम वैपरीत्येन भविष्यति। (सपुत्रदारः उत्थाय) राजन् विप्रकृत. पन्नगः फणा कुरुते, अन्तत दशतिच पश्य। (इति प्रस्थितः)

द्रुपद — एते ब्राह्मणा याचने अग्रेसरा। पौर्वापर्य सम्बन्ध खनन्ति। स्वेच्छया निरातङ्क अतः प्रविशन्ति। निर्धन पुरुषः शष्पसमान. न किमपि साध-यिष्यति। पश्यामि कि करिष्यत्ययम्। (इति उत्थाय गच्छति)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(तत प्रविशत द्रोणार्जनौ

द्रोणः — वत्स! सव्यसाचिन्! त्वमधुना धनुर्विद्याया कुशलोऽसि। मया यद धीत तत् सर्व त्वयि पश्याम्यहम्। त्व सर्वेषु शिष्येषु मे प्रियतम। सर्वा मे आशा त्वयि पुञ्जीभूता. भवन्ति। कि त्व जानासि? किमर्थमहं त्वा एव एश्यामि।

अर्जुन — गुरो! नाहं किमपि जानामि। भवद्भि यत् बोधित तत् सर्व भवत्कल्पितम् अस्ति।

द्रोण — त्वमेव मे प्रिय शिष्य। त्वमेव भक्तिमान्। विद्यावान्। भवता साध नीय कार्य विद्यते।

अर्जुन — गुरो! कि तत् कार्य कथयन्तु।

द्रोण — तस्मादेव त्वा एकान्तप्रदेश आनीतवानस्मि। सावधानेन शृणु मया उदीरितम्।

अर्जुनः — अवहितोऽस्मि।

द्रोणः — राजा द्रुपदः अहच सहाध्यायिनौ। सकल विद्यासु सः मत्समानः। विशिष्य धनुर्विद्याया अप्रतिहतकुशलः सः। विद्या परिसमाप्त्यनन्तरं यदा आवा गृहोन्मुखौ अभवाव तदा तेनोक्तं।

> **अहं राजा भविष्यामि। मया सार्थं भवान्प्रियम्।**
> **भुनक्तु गाढं सर्वस्वं। वित्तं भोगान् सुखं सखे॥**

अर्जुनः — साधु ततस्ततः।

द्रोणः — एकदा मे सुतः अश्वत्थामा गोक्षीरार्थं रोरूयमाणः आसीत्। तदाहं मम पत्न्या प्रेरितः एका कपिला प्रष्टुं द्रुपदस्य समीपं अगच्छम्।

अर्जुनः — साधु कृतं भवद्भिः।

द्रोणः — तदा तेन मन्दात्मन्। श्रिया हीनैः धनच्युतैः सख्य भविष्यति, किन्तु धनिना राज्ञा, निर्धनाना ब्राह्मणाना सख्यं न भवति। अरथी रथिनः सखा न भवति इत्यवोचत्।

अर्जुनः — धनश्रिया गर्वान्धः जातः द्रुपदः। ततस्ततः।

द्रोणः — तदाहं, अयि राजन्! ते सुहृत् त्वया निर्दयं तिरस्कृतः, विप्रकृतः पन्नगः फणा कुरुते, समयं निरीक्षस्व, कालः विपर्ययः भवति, निरीक्षस्व आवयोः पुनः समागमाय इत्युक्त्वा प्रस्थितोऽहम्।

अर्जुनः — यथोचितं सुष्टु प्रोक्तं भवद्भिः।

द्रोणः — तस्मात् अह मनसि व्यथाविलः आगच्छन्, वीटया खेलयता कौरव पाण्डवाना कौशल्यमपश्यम्। ततः प्रभृति धनुर्विद्याया त्वं मे परम प्रीतिकरः शिष्य संजातः। तस्मात् त्व मे गुरुदक्षिणा प्रयच्छ।

अर्जुनः — गुरो तदर्थं सन्नद्धोऽस्मि। किं रोचते भवद्भ्यः। आज्ञापयन्तु।

द्रोणः — जीवन्तं द्रुपदं बध्वा मे चरणं सन्निधिं प्रापय। इयमेव गुरुदक्षिणा दातव्या।

अर्जुन — अनुगृहीतोऽस्मि। तथैव करिष्यामि।

द्रोण — पन्थानः सुखिनः सन्तु। मङ्गलानि भवन्तु ते।
आशिषः सन्ति मे नित्यं। इप्सितं चास्तु फल्गुन॥

अर्जुनः — (नमस्कृत्य प्रस्थित)

द्रोण — आशीविष विष प्रपूर्ण मानसा राजानः मधुरगीर्भिः जल्पन्त. तेषा प्रभुत्व व्यापयन्ति। योग्यमयोग्य न चिन्तयन्ति। तेषा चण्डशासन निवारयितु गरुड मन्त्रवत् ब्राह्मण बुद्धिविशेष एव योग्य. भवति। अधुना मे बुद्धि विशेषेण वज्ररूपिण द्रुपदराजान, वज्ररूपिणा अर्जुनेन भेत्तु प्रयतामि (विहस्य) श्रीमता राज्ञा निर्धनाना ब्राह्मणाना मैत्री कथ भविष्यति वा दर्शयेयम्। अरे द्रुपद! ब्राह्मण मेधा अप्रतिहता। चण्डरवि प्रताप इव प्रचण्ड ब्राह्मण सर्वं साधयिष्यति। न विस्मर्तव्य भवता। पश्य मे शक्ति द्रुपद! पश्य। (इति हसन् गच्छति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(द्रोण वृक्षच्छायाया प्रस्तरे उपविशति। तत प्रविशति सशस्त्रपाणि अर्जुन द्रुपद हस्तग्राह कृत्वा)

अर्जुन — राजन् प्रचल द्रोणाचार्य सन्निधिम्। (इति द्रुपद समाकर्षति)

द्रुपद — (द्रोणाचार्यपादयो पतति)

द्रोण — (विहस्य) अयि भो यूय द्रुपद महाराजान। केय स्थिति। अहो कालप्रभाव निर्धन ब्राह्मणस्य पादसन्निधौ श्रीमता द्रुपद महाराजाना शिर। किमत्र चित्रम्। किमाश्चर्यं। श्रिया हीनै", धनच्युतै साक सख्य भवति तत् सत्यमेव। अह जितोऽस्मि। त्व पराभूतोऽसि। आवयो स्नेह कथ भवति, इति नाह वदेयम्। मे शिष्येण श्रीमता त्व पराजितोऽसि। नमया। त्वमधुना भग्न दर्पोऽसि। हृतधनोऽसि।

त्वं मे वशमागतोऽसि। वीर माभैः प्राण भयात्। वयं ब्राह्मणाः क्षमिणः। शृणु।

> आश्रमे तु त्वया बाल्ये। क्रीडितं च मयासह।
> तस्मात् संवर्धित स्नेहः। प्रीतिश्च नृपसत्तम ।।

अपिच। जनाधिप! त्वया सख्यं पुनः प्रार्थयेयं। ते राज्यस्यार्धं ददामि. अवाप्नुहि।

द्रुपदः — ब्रह्मन्। इदं नाश्चर्यं विक्रान्तेषु महात्मसु। त्वया सह शाश्वतीं प्रीतिमिच्छामि।

द्रोणः — सर्वदा, सर्वथा आवां मित्रे। अहं भवता कृतं तिरस्कारं विस्मरामि। शृणु।

> पुष्पेण भिज्यते नैव। वज्रं जगति पार्थिव।
> ततो वज्रात्मना भाव्यं। वज्रं वज्रेण भिद्यते ।।

* * *

॥ प्रबोधनम् ॥

अनश्वर त यदुवंश भूषणम् । सदा जगन्नाटक सूत्रधारिणम् ।
विलोभयन्तं जन सन्तति धिया । भजामि कृष्णं महि धर्म रक्षकम् ॥

(नान्द्यन्ते)

सूत्रधार — (नेपथ्याभिमुख विलोक्य) हञ्जे ! कुटुम्बिनि ।

नटी — आगच्छामि भो ।

सूत्रधार — विलम्ब सजात ।

नटी — एषाऽस्मि ।

सूत्रधार — हञ्जे ! अलसित मण्डनाऽसि किम् ?

नटी — आम्, अलसित मण्डनाऽस्मि ।

सूत्रधार — हञ्जे अद्य अस्माभि प्रबोधन नाम नाटक प्रदर्शयितव्य विद्यते ।

नटी — तदर्थं अह कि कुर्याम् ।

सूत्रधार — तस्मिन् नाटके भवत्या गातव्य अस्ति ।

नटी — अह जिगासामि । किन्तु प्रथमत कि तन्नाटक, केनलिखित सविस्तर कथयतु भवान् ।

सूत्रधार — अयि कुटुम्बिनि शृणु । गीर्वाणान्ध्र भाषाप्रवीणेन परीक्षित् शर्मणा विरचितमिद प्रबोधन नाम नाटकम् । अय सस्कृतान्ध्र साहित्य प्रपञ्चे प्रख्यात कवि ।

नटी — अयमेव यशोधरा महाकाव्यस्य, अक्षयगीत रामायणस्य च प्रणेता ।

सूत्रधार — आम्। अयमेव। अधुना सप्तविंशति एकाङ्किकात्मक परीक्षिन्नाटकचक्र लिलेख। तस्मिन् नाटके विराजमान इद प्रबोधन नाम नाटक प्रदर्शयितु वय उद्युक्ता ।

नटी — गीर्वाण प्रसङ्गे इयती मह्या परिमित नाटकसचय न केनापि कृत इति मे मनीषा ।

सूत्रधार — सत्यमेव। यत । अय पूर्व सूरिणा पादचिन्हेषु निवसन्, यत किंचित् साहित्य रूपेण, राष्ट्र वासिभ्य सविनय, अश दानेन प्रदातु प्रयतते।

नटी — आधुनिकेषु दिवसेषु एतादृशा विरला भान्ति। अय सत्य राष्ट्रा राधक । अह अधुना अधिगत विषयाऽस्मि। कि वस्त्वधिकृत्य, केन रागेण कस्मिन् वृत्ते गातव्य आदिशतु भवान्।

सूत्रधार — हञ्जे ! वसत ऋतुमुद्दिश्य, वसत रागेण वसत तिलकावृत्ते गाय।

नटी — **शान्त वसन्त तिलका कलिका प्रभाभिः ।**
भृङगाङगना लसित गीत पिकालि रावैः ।
सानन्द माधव समागम पुष्पिताशा ।
धात्री प्रिय लसति मजुल राग रम्या ।।

सूत्रधार — अहा ! अतीव जन रञ्जन भाति ते कण्ठगत स्वर माधुर्यम्।

नटी — (आकर्णयन्ती) इत कुत्रापि रथ चक्रनेमिघोष सश्रूयते।

सूत्रधार — (आकर्णयन्) सत्यमभिहित भवत्या। (इतस्तत पश्यन्) इत भगवान् श्रीकृष्ण राधेयेन सार्ध स्यन्दनारूढ आगच्छति। नात्रस्थातव्य आवाभ्याम्। एहि गच्छाव । (इति गच्छत)

(तत प्रविशति राधेयेन सार्धं भगवान् श्रीकृष्ण)

कृष्ण — कर्ण ! किमर्थमह त्वा अत्र आनय कि त्व जानासि ?

कर्ण — कृष्ण नकोऽपि जानाति, तव कृत्यस्य कारणम्। कोऽह ज्ञातुम्।

कृष्ण — कर्ण त्व सनातनान् वेदनादान् जानासि। अपिच सूक्ष्मेषु धर्म शास्त्रेषु परिनिष्ठितोऽसि ।

कर्णः — कृष्ण ! अधुना तैः किं प्रयोजनम् ।

कृष्णः — कर्ण ! यदहं कथयामि तत् सर्वं सत्यम् ।

कर्णः — कथ्यतां भावः ।

कृष्णः — कर्ण त्वं कानीनोऽसि ।

कर्णः — सत्यम् ।

कृष्णः — हाँ सत्यं धर्मतः त्वं पाण्डोः पुत्रोऽसि ।

कर्णः — कथम् ।

कृष्णः — त्वं न जानासि ?

कर्णः — तदहं न जानामि ।

कृष्णः — अहं त्वां ज्ञापयितुमेव अत्रानीतोऽस्मि ।

कर्णः — अहं कानीनः कथम् ?

कृष्णः — शृणु । एकदा दुर्वासाः कुन्ति भोजस्य गृहं समागतः ।

कर्णः — सुलभ क्रोधः, विख्यात ऋषिः दुर्वासाः ।

कृष्णः — आम् स एव ऋषिः ।

कर्णः — अनन्तरं ।

कृष्णः — कुन्ती तं ऋषिं बाल्ये श्रद्धया अर्चयामास ।

कर्णः — ऋषिपूजनं युक्तमेव भवति भारतीय नारीणाम् ।

कृष्णः — सः ऋषिः प्रीतः तस्यै वरं प्रायच्छत् ।

कर्णः — कोऽयं वरः कीदृशः ।

कृष्णः — सः मन्त्रमेकं उपदिश्य, तेन मन्त्रेण सूर्यः ते वश्यः भविष्यति इति वरं दत्तवान् ।

कर्णः — ततस्ततः ।

कृष्णः — एकदा कुन्ती गङ्गायां स्नातुं गत्वा उद्यन्तं सूर्यं विलोक्य मन्त्रं पपाठ ।

कर्ण — तदा किं जातम्।

कृष्ण — सूर्य कुन्त्या समीपमागत्य, तया स किंचित् कालं यापयामास।

कर्ण — तेजस्विनां सर्व साध्यं भवति।

कृष्ण — आम् लोके असाध्यमपि तेषां साध्यं भवति।

कर्ण — ततस्तत ।

कृष्ण — तदा त्व तस्या सद्योजात ।

कर्ण — आश्चर्यमेवैतत्।

कृष्ण — सावधानतया शृणु।

कर्ण — भाव ! चित्तैकाग्र्येण अवधारयामि।

कृष्ण — तदा लोक भयात् सा त्वां गङ्गानद्यां एकस्यां पेटिकायां तत्याज।

कर्ण — अहो किमाश्चर्यमेतत्।

कृष्ण — सा सूर्यमहिम्ना कन्यात्व प्राप पुन ।

कर्ण — भाव ! अयं वृत्तान्त बहुरोचको भवति।

कृष्ण — त्वं अधुना विदित वृत्तान्तोऽसि।

कर्ण — आम विदित वृत्तान्तोऽस्मि।

कृष्ण — तस्मात् त्वं कानीन ।

कर्ण — कृष्ण! अनेन प्रकारेण जन्मत कानीन सत्यमेव।

कृष्ण — तत त्व धर्मशास्त्राणां निग्रहात् पाण्डवपक्षे राजा भविष्यसि।

कर्ण — कृष्ण ! एतावत्पर्यन्त यदुक्त भवता तत् सर्वं श्रद्धया श्रुत। इत पर नाह श्रोतुमिच्छामि केशव !

कृष्ण — कर्ण ! मद्वाक्य शृणु।

कर्ण — नहि मे प्रयोजन भवति केशव।

कृष्ण — कर्ण, श्रद्धया शृणु। पितृपक्षे ते पार्था सन्ति। मातृपक्षे वृष्णय सन्ति। तस्मात् मत्पक्ष एहि। ते सर्वदा शुभमेव भविष्यति। यत ।

अवश्यं शृणु मे वाक्यं । आसान्तं सूर्यनन्दन ।
पार्थाश्च वृष्णयस्सर्वे । सहायास्ते भवन्ति च ॥

कर्णः — कृष्ण ! त्वं मां विमोहयितुमिच्छसि । अधुना तत्कथं भविष्यति । ते कथं मां जानन्ति.।

कृष्णः — शृणु !

आयान्तं त्वां मयासार्थं । अभिजानन्तु पाण्डवाः ।
युधिष्ठिरात्पूर्वजातं । कौन्तेयं हर्षवर्धनाः ॥

कर्णः — अधुना अभिज्ञानेन किं प्रयोजनं भवति ।

कृष्णः — तथामावद । तत् अत्यन्तं प्रयोजनं भविष्यति ।

कर्णः — कथम् ?

कृष्णः — पाण्डव कौरव विरोधः समाप्तः भविष्यति । रक्तपातः न भवति ।

कर्णः — तत् कथम् ।

कृष्णः — त्वमेव कारणं महाभारतयुद्धस्य ।

कर्णः — कथमहं कारणं भवामि ।

कृष्णः — तवाधारेण, तव साहाय्येन कौरवाः पाण्डवान् जेतुमिच्छन्ति ।

कर्णः — सा भावना निराधारा ।

कृष्णः — निराधारा इति मा वक्तव्यम् ।

कर्णः — भवतु नाम । यत् भावि, तत् भूतं । अधुना तत् न परिवर्तनीयं भवति ।

कृष्णः — भवतु नाम । शृणु ।

संपूजयिष्यन्ति नितान्तभक्त्या । पादौ गृहीत्वा भवतः प्रकामम् ।
ते भ्रातरः पञ्च परं विनीताः । मत्वा धरेन्द्रं मनसा भवन्तम् ॥

कर्ण — कृष्ण ! तव उक्ति वैचित्रि मे आश्चर्य कारिणो भवति।

कृष्ण — अपिच शृणु। युधिष्ठिर ते व्यजन नीत्वा वीजयिष्यति।

कर्ण — ततस्तत ।

कृष्ण — महाश्वेत छत्र भीमसेन तव ग्रहिष्यति।

कर्ण — ततस्तत ।

कृष्ण — श्वत हयर्युक्त ते रथ अर्जुन वाहयिष्यति।

कर्ण — कृष्ण ! ते भाषण श्रोत्र पेय भवति।

कृष्ण — अरविन्दसमान सुन्दरास्य डिम्भक अभिमन्यु नित्य ते प्रत्यासन्ना भविष्यति।

कर्ण — अहो महत् भाग्यम्।

कृष्ण — सत्यमेतत् महत् भाग्यमेव।

अभिमन्युस्तवोत्सङ्गे। सदा प्रेम्णा चरिष्यति।
पञ्चाननो हसन् बाल । सकलानन्ददायक ।।

महाबाहो ! भ्रातृभि सह पाण्डवै राज्य भङक्ष्व। ते भ्रातृभि पाण्डवै सह सौभ्रात्र भवत्वस्तु। अपिच।

अह स्वय त्वामभिषिच्य राज्ये। सर्वंसहापालनदक्ष भूपम।
समस्त सौख्यानि विधाय कर्ण। क्षेम त्वदीय शतधा करिष्ये।।

कर्ण — हे वेदवेद्य कृष्ण ! भवता प्रतिपादित सर्व जानाम्यह। अह धर्मत पाण्डो पुत्रोऽस्मि। किन्तु।

आदित्यस्य प्रभावेन। कन्या साऽसूत मा प्रियम्।
विसृष्टोह तया सद्य । स्तन्यपान विना हरे।।

कृष्ण — तत् दैविक सनातम्। न तत् विस्मर।

कृष्णः — कौन्तेय ! जानाम्यहं सर्वमेतत् ।

कर्णः — नारायण ! संबन्धाः विवाहाश्च मया सूतैः कृताः ।

कृष्णः — कर्ण मया कथितं सर्वं रक्तसंबन्ध बान्धव्यमेव । परमार्थतः तत्वं कथयामि न कथाम् ।

कर्णः — केशव ! नाहं कुर्या किमपि विषयेऽस्मिन् ।

भयलोभात् वधात् कर्तुं । अनृतं नोत्सहे हरे ।
धार्तराष्ट्रस्य भूपस्य । मित्रद्रोहंतु पातकम् ।

वधात्, भयात्, लोभात्, बन्धात्, अनृतं नोत्सहे कर्तुं धार्तराष्ट्रस्य । तत्र वशित्वात पाण्डवाः सर्वं कुर्युः नात्र संशयलेशोऽपि विद्यते ।

कृष्णः — कर्ण त्वामहं अन्यत महत्तमं विषयं कथयामि श्रद्धालुर्भव ।

सती प्रिया पाण्डव धर्मपत्नी । यस्यै पुरा भण्डनमेव जातम् ।
यज्ञात् प्रभूता सुरसुन्दरो या । षष्ठं पति त्वां मनसा वृणीता ॥

कर्णः — कृष्ण ! मा शतधा अङ्गीकारोन्मुखं कर्तुं त्वं प्रयतसे । मा बहुधा विलोभयसि । किन्तु मामकीनं मनः अन्यायं कर्तुं न समीहते ।

कृष्णः — कर्ण ! सन्निहितेषु संदर्भेषु तदा तदा असत्यं अन्यायं च कर्तव्यं भवति । तत् धर्मशास्त्र प्रामाणिकं च भवति ।

कर्णः — अच्युत ! यदि धर्मात्मा मा कुन्त्याः प्रथमजं पुत्रं जानाति, स. राज्यं न ग्रहिष्यति ।

कृष्णः — तत् मर्वं अहं पश्येयं । ते विचारः मास्तु ।

कर्णः — यदि अहं तत् राज्यं प्राप्नुया तर्हि तत् दुर्योधनाय दद्याम् । किमर्थं एतत् मर्वं करणीयं । धर्मात्मा स एव शाश्वत. युधिष्ठिर अस्तु ।

कृष्ण. — किं समाप्त तव भाषणम् ।

कर्ण. — जनार्दन यत् चिन्तितं यत् अनुभूतं, मया तत् सविस्तरं निर्भयं तव निकटे उच्चारितम् ।

कृष्णः — अयि कर्ण ! राज्य लम्भोऽप्यपादनं त्वां न लभेत्, मया दत्तां पृथिवीं न प्रशाशयितुमिच्छसि शृणु।

जयो भवत्येवहि पाण्डवानां। अन्योन्य संभूत रणाङ्गणे तु।
तदा भवन्तं विलपन्तमाजि। त्रातुं न भूतो भवतीह वीरः॥

कर्णः — जानाम्यहं महात्मन्।

कृष्णः — त्वं न किमपि जानसि। शृणु।

युधि ते रोदनं कोऽपि। न श्रोष्यति महाभुज।
गाण्डीविनं महायुद्धे। कोऽपि नैव विजेष्यति॥

कर्णः — कृष्ण ! अहं प्रयतिष्यामि अर्जुनं प्रतिरोध्दु।

कृष्णः — कर्ण ! प्रतिरोध्दु त तत्र समयः अपि लभ्यः न भवति। शृणु।

श्वेताश्वरथिनं युद्धे। गर्जन्तं कृष्णसारथिम्।
कपिकेतन वीभत्सुं। दृष्टवा मृत्युं भवेः परम्॥

अपिच।

धर्मात्मा यदि क्रुद्धोऽस्ति। समभयं यान्ति सागराः।
दृष्टवा तत् भीषणं दृश्यं। सर्वेनष्टाः भवन्ति च॥

गाण्डीविनं महाबाहो। शङ्करोऽपि न जेष्यति।
लक्षाधिकैश्च राधेयैः। धार्तराष्ट्रैश्च किं भवेत्॥

कर्ण, त्वं अभिमान धनोऽसि। वर्तमान स्थिति त्वं न जानासि। कथं ज्ञास्यति वर्तिष्यमाण। अहं त्रिकालज्ञः। सर्वं ते कथयिष्यामि शृणु। अर्जुनस्य गाण्डीव निर्घोषं अशनि घातमिव मत्वा सर्वे इतस्ततः पलयिताः भवेयुः।

राजन राजपुत्राश्च । दुर्योधन समायुता ।
निधन प्राप्य बर्णश्च । भजेयुनरक ध्रुवम ॥

कण — वासुदेव ! त्व भविष्यमाण जानासि तथापि मा समोहयितुमिच्छसि। जानाम्यह पृथिव्या विनाश सप्राप्त इति। अह शकुनि दुश्शासन दुर्योधनश्च निमित्ता । कृष्ण असशय महत् युद्ध उपस्थित पाण्डवाना, कौरवाणा च।

पराजिता भवेयुश्च । धातराष्ट्रा न सशय ।
विजेताश्च भविष्यन्ति । पाण्डवेया स्वय ध्रुवम् ॥

सर्वे वय गाण्डीवाग्नि प्रवेश्याम । सर्वेऽपि शस्त्राग्नि दग्धा यमसदन प्राप्स्यन्ति।

कृष्ण — कर्ण ! वसुधरा अवश्य विनाश प्राप्स्यति। सर्वनाश त्वमूल भविष्यति। मदीय वचन ते हृदय तापति।

वसुन्धराविनाशोऽय । सूचितोऽशुभसूचकं ।
त्वन्मूल भविता नून । विद्धि सर्वं महारथ ॥

कण — कृष्ण ! यदि वय अस्मात् रणात् जीवन्त भवेम त्वा पश्याम ! नोचेत् कृष्ण स्वर्गे मिलिष्याम ।

कृष्ण — कण

सता वच सदाश्रेय । मन्तव्य बुद्धिशालिभि ।
विनाशकाले सप्राप्ते । बुद्धि नाशो विजायते ॥

कण — कृष्ण ! भवता प्रतिपादित सत्य भवति । अह विश्वसिमि त्वा वेन्वेय इति।

विश्वास सुहृदा लोके । सर्वलाभ प्रदायक ।
विश्वासबद्ध राजान । सत्यज्य निवसे कथम ॥

अपिच।

विश्वस्त मित्रं स्वार्थाय । वंचयेयं कथं हरे ।
मरणं मे वरं लोके । जीवने मित्र वंचनात् ॥

अहं स्वार्थाय धार्तराष्ट्राणा अपकारकः न भवेयम् । पुनर्मिलनाय मा आदिश । नमस्तेस्तु भगवन् । (नमस्कृत्य गच्छति)

कृष्ण. — रक्तपातं निवारयितुं मतया कृत प्रयत्नोऽभवम् । किन्तु भविष्यमाणं न कोपि निरोत्स्यति ।

पृथिव्याः नाशनं प्राप्तं । उल्कापाताः भवन्ति च ।
सर्वे वीराश्च शत्रूणां । प्राप्स्यन्ति मरणं ध्रुवम् ॥

(इति गच्छति)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(भागीरथी तीरे कुन्ती एकाकिनी उपविश्य चिन्तयन्ती आस्ते)

कुन्ती — (आत्मगतम्) श्रुतं मया विदुरात् यत् कृष्णः कुरुन्यः असिद्ध अनुनयः पाण्डवान् प्रत्यागत. इति । अपिच अविग्रह भाववचन श्रीकृष्णस्य सुयोधनः नाङ्गीचकार । असौ चेदि पाचाल केकयैः भीमार्जुनाभ्या कृष्णेन यमैश्च युयुधानः अस्ति । किन्तु युधिष्ठिरः सर्वदा धर्ममेव काङ्क्षते । धृतराष्ट्रः पुत्रगत मदेन मत्तः निधर्मे पथि चलति । अवश्यं कुरूणा अनयः भविता । अहो बत अहं कथं मे बाधा सहेय, केनमार्गेण मे शान्तिः भविष्यति । अह दु खार्ता । हाधिक् महान् ज्ञाति वध भवति । अधनस्य मरण श्रेय । नहि ज्ञातिक्षयः जय । शान्तनवः चमूपति. आचार्य.

कर्णश्च धार्तराष्ट्रार्थं वर्धयन्ति। कर्ण सदा पाण्डवान् द्वेष्टि। दुर्वासा मे वर ददौ। स्त्रीभावात् बाल्यभावाच्च तदा तथा अचिन्तयम्। मार्ताण्ड समागत। कन्यादशाया स्थिताया मयि कर्ण सजाता। मार्ताण्ड मायया अह पुन कन्यकात्व अवाप। अधुना समय सप्राप्त। इयत काल सर्वमपि मे हृदि गूढ निक्षिप्त मया। मातृ हृदय कथ परितपति, शुष्यति, नृत्यति, रसपूर्ण भवति नकोपि जानाति। केवल माता जानाति।

धर्मः स्थिरो भवत्यत्र। धर्मो धारयते भुवम।
तस्माद्धर्मं गमिष्यामि। शरण जीवने भृशम्॥

य कानीनगर्भे मे पुत्रवत् परिरक्षित स कथ भ्रातृ हित वचन न कुर्यात्। स एतावत् पर्यन्त न जानाति। ज्ञानाविर्भावानन्तर स पाण्डवपक्ष समेष्यति। अय मे प्रथमगर्भशुक्ति मुक्ताफल। स्त्रीणा स्त्रीयापत्य मधुर भवति। काकशावक काकस्य प्रीतिकर भवति। गत्वाहं अधुनैव कर्णस्य भागीरथी तीरगृह तेन सर्वमपि विदित यथा भवेत् तथा कथयेयम्। (इति अश्रुकरुहै परिमार्जयन्ती गच्छति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(भागीरथी तीर गृह। कुन्ती उपविष्टा अस्ति। तत प्रविशति कर्ण)

कर्ण — मात कासित्वम्।

कुन्ती — अह पाण्डवाना जननी। अह भवन्त द्रष्टु समागतास्मि।

कर्ण — राधेयोऽहम्। त्वामभिवादये। (इति नमस्करोति) ते किं करवाणि ब्रूहि मात।

कुन्ती — अनामयं ते भवतु कुमार। (इति हस्तमुद्यम्य कथयति)

कर्णः — कासि त्वं। किं ते सहायं करिष्यामि ब्रूहिमातः।

कुन्ती — किञ्चिन्मे कथनीयं विद्यते।

कर्णः — कथ्यतां अवहितोऽस्मि।

कुन्ती — सुत! त्वं राधेयः नहि। कौन्तेयः। त्वं सूतकुले न जातः। मे वचः विद्धि। एतदुदन्तं कथयितुमेव त्वत्सकाशं समागताऽस्मि।

कर्णः — हे मातः। सर्वं जानाम्यहं। श्रुतं मया श्रीकृष्ण मुखारविन्दात्। तथापि।

किमिच्छसि त्वं वद मातृमूर्ते। मत्तः प्रियं सौख्यकरं त्रिना भीः।
कथं त्वमस्यां भयद क्षपायां। समागता शोक परीत चित्ता॥

कुन्ती — अहं एतदिच्छामि त्वा कथयितुं। त्वं कानीनः। कुन्तीराजस्य भवने मम संजातः। हे पुत्रक! त्वं पार्थः असि। यथा राम जनार्दनौ, तथा कर्णार्जुनौ भवेताम्। संहितात्मनोः युवयोः असाध्यं लोके नस्यात्। कर्ण! त्वं शोभिष्यसे पञ्चभिः भ्रातृभिः सहितः। त्वं सूतपुत्रो नहि। त्वं वीर्यवान् पाण्डववंशे संजातोऽसि। शृणु।

त्रयीतनुप्राभव दत्तरूपः। कन्यादशायां मम चारुमूर्ते।
जातः पुरा हाटक कुण्डलाभ्यां। जानीहि सत्यं त्वमसीति पार्थ॥

कर्णः — मातः! अहं क्षत्रियो जातः। किन्तु न प्राप्तः क्षत्रसत्क्रियाम्। मम हितं पूर्वं त्वया मातृवत् न चेष्टितम्। सा मा संबोधयसि अद्य केवलं आत्महितैषिणी। पूर्वं अभ्राता विदितः। अधुना युद्धकाले प्रकाशितः। यदि पाण्डवानहं गच्छामि लोकः किं मा क्षत्रं वदिष्यति? अहं धार्तराष्ट्राणां अफलं कथं कुर्याम्। ततः।

कर्णः परं नश्यतु किन्तु मातः। धर्मस्वरूपस्सततं धरण्यां।
चकास्तु दद्याद्बहु चारसानां। सुनीतिमार्गं मम धर्म मार्गात्॥

कुन्ती — कानीन! त्वं पाण्डवपक्षं समागच्छ। त्वा दृष्ट्वैव दुर्योधनः युद्धाय

कृतनिश्चय । त्वया हीन धार्तराष्ट्र: जलनिर्गत मत्स्यः इव विचेष्टमानः भवति। तदा युद्धविराम भविष्यति। त्वयि केन्द्रीकृता धार्तराष्ट्राणा भावना विशेषाः। युद्धाऽभावे सर्वोऽपि देश सर्व समृध्या नर्तिष्यति। तन्मूलकः देशसौख्य. भवति। त्वं पाण्डवानां अग्रजोऽसि। त्वं मे वचनं शृणु।

कर्ण — माता! त्व अधुना स्वार्थे विचेष्टमाना पाण्डवान् त्रातुं मम समीप भिक्षार्थे समागतासि, यतः कर्णः भिक्षित स्वजीवितमपि दास्यतीति। विद्यते किं ते मातृहृदयम्। तदानीं त्वं निर्दया मातृहृदय विहीना मा सद्योजातं शिशुं गङगाया विसृष्टवती। किमिदं ते मातृ हृदयं भवति। प्रेमपरीत हृदया माता कदापि शिशुं न त्यजति जलधारायाम्। व्यतीतानि सवत्सराण्यनेकानि। [एतावत्पर्यन्तं कर्ण क कुत्र विद्यते? कथं विद्यते इति ते उत्सुकताऽपि नासीत्। अधुना पञ्चपाण्डवेषु संजात ममकारेण मत्सकाशात् तेषा हानि यथा न भूयात् तथा शब्दं नेतुं त्वं समागतवती। एतत निश्चयं ज्ञायते यत् ते मातृ हृदयं नास्तीति। त्वं पाण्डव रक्षाभिक्षार्थ समायाताऽसि। नहि कर्णोऽपरिस्यन्दमान प्रेम्णा। अहं प्रथमत त्वा पश्यामि मम जीवने। एतावत्पर्यन्त भवती मे दृष्टिपथ नायता किमिदमाश्चर्यम्।

कुन्ती — सुत! त्वं मातृ हृदयं अज्ञात्वा मातृ वात्सल्यं टीका करोषि। मातरं विनिन्दसि। त्वं मम तदा वर्तमान स्थिति, समाज रचना च विचार्य मा विनिन्द। अहं कस्या स्थित्या तथाऽकरवं त्वं न जानासि। अहं त्वत्कृत निन्दा सेहे। मम कन्या दशाया त्व जातोऽसि। तादृशी स्थिति लोके टीकास्पदा भवति। तस्मात् तत् वृत्तमासीत। अह सर्व मातृ हृदयेन ब्रवीमि। नाह जानामि यत् युद्धं उभयोः वरयोः भविष्यतीति। अह अचिन्तय यत्र कुत्रापि त्वं कुशली जीवन् असि इति। अधुना भविष्यमाण युद्ध विचार्य पुत्रप्रेम्णा त्वा द्रष्टु प्रष्टुंच समागताऽस्मि। युद्धस्तु अनिवार्य कृतः दुर्योधनेन। अस्मिन् मयुगे क जीविष्यति कः मरिष्यति नकोऽपि वक्तुं समर्थः भवति। जयाजयौ दैवनिर्णीतौ। तस्मात् त्वा सत्यं ज्ञापयितु समयेऽस्मिन् समागतास्मि। त्वं सद्यस्थिति सत्य ज्ञात्वा व्यवहर। यत् भविष्यति तत् भविता।

कर्णः — दैवं। दैवं कुत्र विद्यते। सर्वस्यापि स्वयमेव कारणम्। श्रीकृष्णात् सर्व ज्ञात्वाह कथयामि यत् पाण्डवाना जय निश्चय भवति इति। तथापि धर्म नाह त्यक्ष्यामि। इद वपु दुर्योधन समाश्रयात् पुष्ट निवर्धितं च। बहुः समाः तस्य सकाशे यापिता.। अधुनाऽहं त त्यक्त्वा त्वत्सकाश आगच्छेयं यदि धर्मनाशकः भविष्यामि।

तदपेक्षया मम मरणमेव वरं मात । मे अपकीर्तिभारजीवन योग्य न भवति। किन्तु कीर्तिकृते अहं मरिष्यामि। मातः यत् उद्भूतं जगति तत् सर्व यदा कदापि नशिष्यति। तस्मात् मरणात् मे भीति. न विद्यते। अपयश सः भीतिः जायते। अय मे निर्णयः नाहं पाण्डवपक्ष गन्ता। यत ।

स्वार्थाय लोके सततं यतन्ते। जनाः परं धर्मपथं विहाय।
माताऽसि सत्यं ननु पाण्डवानां। तवाऽपि नास्त्येवहि धर्म भावः॥

कुन्ती — त्वं मे बाधा न जानासि। मातृदेवो भव इति वेदाः घोषयन्ति। वयं वेदमतानुयामिन.। त्वं मातृदेवो भव।

कन्यादशायां शतथा प्रसूतिः। लोकापवादस्य निदान भूता।
इत्येवमालोक्य ससर्ज बालं। हेतुर्नचास्तीह सुत द्वितीयः॥

कर्णः — अहं न तूर्णी करोमि ते कथनम्। लोके विद्यमान स्थिति कथयामि। माता यदि शिशोः मलमूत्रादिकं उद्धृत्य स्वच्छता करोति, तेन शिशुना सार्धं खेलति, तस्य सुखदुःखादिकं आत्मीयं पश्यति सा माता भवितुमर्हति. तदा सा माता मातृ हृदय पूर्णा भवति। मयि तत् कर्म त्वया न कृतम्। ततः मयि न विद्यते पुत्रप्रेम। अहं कदापि त्वां मातः जननि, अम्बे इति नाहूतवानस्मि। अनेन कारणेन त्वयि मम मातृ भावना नास्ति। त्वं जानासि मा प्रसूतवती इति। तस्मात् तत् प्रसूति कारणं निमित्तीकृत्य मा बोधयितुं समागतासि। मम शैशवं त्वमदृष्टवती। तव मातृ हृदयं अहं अदृष्टवानास्मि। तस्मात् आवयोर्मध्ये माता सुत भावः शून्यरूपेणास्ति।

कुन्ती — त्वं अतीव कठोरं वदसि। त्वं मातृ हृदयानभिज्ञः। हृदय विहीनः। त्वं अन्येषा बाधा न जानापि। अहं मे बाधा विशदयितुं अशक्ता भवामि। अधुना मे स्थितिः क्रमुक कर्तरामध्ये क्रमुकस्य स्थितिरिवास्ति। अहं प्रेम्णा तुलाभारमिव माध्यस्तमवलम्बे।

कर्णः — भवती मम समक्षं तव भावं विदशयितु। अहं सन्नद्धोऽस्मि ते भावनानुसारं विधातुम्।

कुन्ती — सुत! शृणु यदि त्वं युद्धे मरिष्यसि पञ्च पाण्डवाः मे जीविष्यन्ति।

यदि त्वया युद्धे अर्जुन व्यापादित भवति तर्हि त्वयासहिता पाण्डवा पञ्चपाण्डवा भविष्यन्ति। एतदेव मे कामित भवति।

कर्ण — श्रुत मया ते कामना काऽस्ति। तस्मात् कथयामि ते सुतान् न हनिष्यामि। शतश युद्धे मे मरणमेव भवति सर्वथा।

कुन्ती — (कर्णौ पिधाय) शान्त पाप तथामावद पुत्र।

कर्ण — शृणु मात ।

न ते जातु नशिष्यन्ति। पाण्डवाः पञ्च भ्रातरः।
निरर्जुनास्सकर्णाश्च। सार्जुनाः पञ्च पूर्वकम् ॥

कुन्ती — (कर्णस्य वच श्रुत्वा दु खात् प्रवेपमाना कर्ण धैर्येण समालिङ्ग्य) कर्ण देव तु वत्सत्तरम्।

कर्ण — जननि ! अनामय स्वस्ति च ते भवतु।

कुन्ती — (अश्रु समार्ज्य) कर्ण पार्थ ! तेऽप्यनामय स्वस्तिच भवतु। (इति कुन्ती चिन्तया निर्गच्छति)

कर्ण — अहो ! सर्वथा मम जीवने अनेके अन्तराया भवन्ति। इय सृष्टि अनाय विचित्रा। सर्वथा सर्वेण स्वगम्यस्थान प्राप्तु प्रयत्नशीलेन भवितव्यम्। (आकाशम्) जयस्त्वस्मान् वरिष्यति।

मेधावी शकुनिश्चाह। राजा दुर्योधनस्तथा।
दुश्शासनश्च चण्डात्मा। जेष्यामो पाण्डवान् ध्रुवम् ॥

मार्गे अनेक अन्तराया भवन्ति तथापि जना गम्यस्थान प्रविशन्ति। तद्वत् कौरवा विघ्नाभिहता अन्तत युद्धे विजेतार भविष्यन्ति। अधुनाऽह राजराजसभा गच्छेयम्। (इति निष्क्रान्त)

(यवनिका पतति)

* * *

।। गुरुदक्षिणा ।।

गुरु बलायुत धीमय छेकान् । निरत दानरतान् प्रिय भूपान् ।
महितराष्ट्र हितैक महर्षीन् । भरतवर्ष सुखाय नमामि ।।

नान्द्यन्ते

सूत्रधारः — (नेपथ्याभिमुखं विलोक्य) अये विद्यावति प्रिये ! (इति आह्वयति ।

नटी — (नेपथ्ये) शान्तं भोः आगच्छामि ।

सूत्रधारः — कालातीतो भवति त्वरस्व ।

नटी — (ससंभ्रमं प्रविश्य) एषाऽस्मि देवः । निवेदयतु भवान् ।

सूत्रधारः — प्रिये विद्यावति अद्य का तिथिः ।

नटी — न जाने ।

सूत्रधारः — तत्र भवती अद्य तिथिमपि न जानाति ।

नटी — भर्त्रा सर्वेषां ज्ञायते किं भोः ?

सूत्रधारः — भवतीं विद्यावतीं इति पृच्छामि ।

नटी — जानाम्यहं विद्यमान वस्तु स्थितिम् ।

सूत्रधारः — भवती किं जानाति कथय ।

नटी — अहं वासरान् मासांश्च जानामि ।

सूत्रधारः — तथा यदि स्यात् अवश्यं भवत्या तिथिज्ञानेनापि भवितव्यं इति मे वितर्कः ।

नटी — आर्य ! शालासु, विद्यालयेषु, विश्वविद्यालयेषु, कार्यालयेषु सर्वे सर्वत्र वासराः आङ्ग्ल मासाश्च उपयुज्यन्ते । प्रतिवर्षं विराम दिवसाश्च वासर मास दिनाङ्क

रूपेण दीयन्ते। न कदापि तिथि रूपेण गणायित्वा यच्छन्ति। एतादृशी परिपाटिः वर्तते जगति तस्मात् तिथि न जानाम्यहम्।

सूत्रधारः — अत्र विद्यते न ते दोषः। साधूक्तं भवत्या। भारतीय संस्कृतिः पामव्याधिना परिव्याप्ता प्रतिभाति। सरोगः समूलं नाशयितव्यः।

नटी — प्रस्तुतांशः कः कथयतु भवान्।

सूत्रधार — अद्य पौर्णिमा।

नटी — हाँ जानामि अद्य पौर्णिमा इति। किन्तु तिथि न जानामि।

सूत्रधारः — अद्य पौर्णिमा तिथि ।

नटी — पौर्णिमा तिथि प्रतिमासं भवति।

सूत्रधार — अद्य आषाढ पौर्णिमा तिथि ।

नटी — कोऽत्र विशेष ।

सूत्रधार — विद्यतेऽत्र महान् विशेष.। अद्य भारतीयाना पर्व दिवसः।

नटी — किमय पर्व दिवस ? अहं श्रोतुमिच्छामि सविस्तरं कथयतु भवान्।

सूत्रधारः — इयं गुरु पौर्णिमा। शृणोतु भवती।

भारते सर्व लोकस्य। प्रिया च गुरु पौर्णिमा।
सर्वे जुहवति सर्वत्र। भक्त्या तां व्यासपूर्णिमाम्॥

नटी — (माश्चर्य) तत्कथं भो.।

सूत्रधारः — भारतवर्षे भगवान् व्यास. अष्टादश पुराण स्रष्टा। महाभारत भागवत ब्रह्मसूत्र मीमांसादि ग्रन्थाना कर्ता। अयं विज्ञान निधिः। अपिच सूरिभिः कथ्यते यत् व्यासोच्छिष्ट जगत्सर्वं इति। किंबहुना भारतीय वाङ्मयस्य, भारतीय परम्परायाः अयमेव गुरुः। अयमेव मूलाधारक। भारतवर्षे अयं दिवसः गुरु दक्षिणा दिवसः इति गुरुपौर्णिमा दिवसः इति व्यास पौर्णिमा दिवस. इति सर्वैरपि परिगण्यते विषयमेनमुद्दिश्य बह्व्यः कथा सन्ति।

नटी — आर्य अहं शुश्रूषे।

सूत्रधार — श्रवणानन्दात् दर्शनानन्द अधिकायते।

नटी — मा जिज्ञासा प्रेरयति प्रष्टुम्।

सूत्रधार — पृच्छतु भवता।

नटी — अस्य नाटकस्य नाम किम्?

सूत्रधार — अस्य नाटकस्य नाम गुरुदक्षिणा।

नटी — केन ग्रथितमिदं नाटकम्।

सूत्रधारः — नाटकमेतत् उभय भाषा प्रवीणन महाकविना पण्डित परीक्षित् शर्मणा ग्रथितम्।

नटी — कीदृशोऽयं कविः।

सूत्रधारः — **नितान्त साहित्य रसग्रहीता।**
नाट्ये तथा गायन लोलुपश्च।
अनन्य साधारण देशभक्तः।
सस्कारवाण्या समलङ्कृतोऽयम्॥

नटी — अस्य कवे माहात्म्य मा कुतूहलयति नाटक प्रदर्शयितुम्।

सूत्रधार — एहि मयासार्धं गुरुदक्षिणा नाटक प्रदर्शयितुम्। मा विलम्ब कुरु। अहं गच्छामि।

नटी — *आर्य अहं त्वामनुगमिष्यामि। (इति गच्छत)*

(तत प्रविशति वरतन्तु शिष्यैस्सह। वरतन्तु मध्य उपविशति त परित छात्रा उपविष्टा सन्ति।

वरतन्तु — अयि भो छात्रा! अय दिवसः भवता विद्याभ्यासस्य अन्तिम दिवस.। यूय अधुना परिसमाप्तविद्या सजाताः गृह गच्छन्तु।

प्रथम — (चिन्ताक्रान्त) गुरो विंशति वर्षाणि तव भवत. सन्निधौ विद्यामभ्यस्य अधुना गृह गन्तु नय नोत्सहामहे। विचार्यमाण हृदय व्यथाविल भवति।

द्वितीय. — गुरो! भवानेव अस्माक पिता माता च। पितरौ केवल जन्म दायिन तस्मात् भवता विसृज्य गृहगमनोन्मुखा न भवाम वयम्।

तृतीयः — अयि भो वयं परिसमाप्त विद्याः। पुनः जीवने युष्माभिस्साकं मेलनं अस्माकं कदा भविष्यति वयं न जानीम.। तस्मात् गुरु दक्षिणा समर्प्य वयं जिगमिषामः। यत् अस्माभि दीयते तत् अनुगृहणन्तु।

वरतन्तुः — अयि भो. पुत्रका' कुर्वन्तु भवता कामनानुसारम्।

प्रथमः — (दक्षिणा गृहीत्वा तस्य पुरतः स्थित्वा] अयि भोः गुरो! अयं सुवर्ण खण्ड गृहणातु भवान्। [इति समर्प्य साष्टाङगदण्ड प्रणामं करोति]

द्वितीय — अयि तपस्विन्। नाहं धनी, किंतु पत्रं पुष्पं फलं तोयं इति न्यायेण अहं पुष्पचयः वस्त्रादिकं, चन्दनं, पूगीफल कर्पूरयुक्त नागवल्लीदळ ताम्बूलं श्रीफलं च ददामि। [इति साष्टान्डगप्रणामं करोति]

तृतीयः — अयि ज्ञानदायिन्! इयं रजत खण्डं स्वीकारोतु भवान्। [इति समर्प्य प्रणमति]

वरतन्तुः — अयि भोः अन्ते वासिनः शृण्वन्तु भवन्तः। सत्यं वद। धर्मंचर। स्वाध्यायान्माप्रमदः। धर्मान्नप्रमदितव्यम्। देवपितृकार्याभ्या न प्रमदितव्यम्। मातृ देवो भव। पितृ देवो भव। आचार्य देवो भव। अतिथि देवो भव। एष आदेशः। एष उपदेशः। एषा वेदोपनिषत्। ओ शान्ति. शान्ति शान्ति ।

[सर्वे छात्रा उत्थाय प्रणम्य गच्छन्ति। ततः प्रविशति प्रियशिष्य. कौत्स.]

कौत्सः—[प्रणम्य] अयि ज्ञानदायिन् गुरो! सर्वे सहाध्यायिनः तत्र भवद्भ्यः सुवर्ण रजत महावस्त्रादिक समर्प्य गुरुभक्ति प्राकटयन्। किन्तु [अर्धोक्त्या]

वरतन्तु — त्वं न किमपि कर्तु समर्थः असि। अरे डिम्भक कौत्स! जानामि ते हृदयबाधा।

कौत्स. — गुरो! भवाद्भिः अध्यापितं यत् गुं=अज्ञानान्धकारं राति= नाशयति इति गुरुः। तेन ज्ञानेन अहं प्रतिभा व्युत्पत्तिभ्यां समन्वितः अभवम्। अहं भवता शुश्रूषया सुशिक्षितः, क्रम शिक्षणाल्डकृतः अभवम्। भारतीय परम्परा गाङगा वाहिनीव पवित्रा अविच्छिन्ना। तदनुसारं विद्यापरिसमाप्त्यनन्तरं गुरुदक्षिणा देया इति साम्प्रदायः। भोः गुरवे यत् रोचते तत् दातव्यं इति मे मनीषा। तस्मात् नाहं गुरुदक्षिणा कामपि एतावत्पर्यन्तं अयच्छम्। भोः भवदीयाभिलाषा प्रकटी कुर्वन्तु विनासंकोचं भवन्तः इति प्रणिपत्य याचे।

वरतन्तुः — अरे छात्र । न कामये किमपि । सर्वाः कामनाः अलङ्गलयित्रेण विछिन्नाः मया ।

कौत्सः — तथा मा कथयन्तु गुरुवर्गाः । यदि गुरवः एवं भणन्ति तर्हि गुरुदक्षिणायाः कोऽर्थः । सा निरर्थका भवति । लोकसाम्प्रदायः विनश्यति । अहं साम्प्रदाय विनाशं न कामये ।

वरतन्तुः — अरे पुत्रक ! तव विचारधारया अहं प्रभावितः अभवम् । अहं अतीव तुष्टोऽस्मि । मे महान् आनन्दः भवति, यत त्वं भारतीय परम्पराभिलाषी सञ्जातः ।

कौत्स — धन्योऽस्मि गुरो ! अहं भवता मनोरथं पूरयितु अभिलषामि । यतः ।

गुरूणां सेवया पूर्णाः । भवन्ति च मनोरथाः ।
विद्या सदा ददात्येव । सर्वं कल्पलतेव सा ॥

वरतन्तुः — भवतु । त्व गुरुदक्षिणारूपेण मह्यं चतुर्दश कोटि सुवर्ण मुद्राः समर्पय ।

कौत्स — अनुगृहीतोऽस्मि भोः । युष्मदीय कामना पूरयिष्यामि । (इति नमस्कृत्य गच्छति)

वरतन्तुः — ओं भद्रं कर्णेभिः शृणुयाम देवाः भद्र पश्ये माक्षभिर्यजत्राः स्थिरैरङ्गै स्तुष्टुवांसु स्तनूभि व्यशेम देवहितं यदायुः । ओं शान्तिः शान्तिः शान्तिः ।

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(एकस्याया वटवृक्षस्य छायाया क्रमपठघन जटापाठकाः उपविश्य परस्पर भाषन्ते)

क्रमपाठकः — अरे पदपाठक ! राजा रघुः अस्मिन् विश्वजिति अध्वरे सकलं संपच्चयं ब्राह्मणेभ्यः दक्षिणारूपेण, संभावना रूपेणच प्रददौ ।

पदपाठकः — भवता कियती दक्षिणा प्राप्ता ?

क्रमपाठकः — मया प्राप्ता सहस्र रूप्यक परिमिता संभावनारूपा दक्षिणा ।

घनपाठकः — अरे इयन्ती संभावना प्राप्ता ।

जटापाठकः — भवान् कियत् प्राप्तवानसि ?

घनपाठकः — अहं सहस्राधिक सुवर्ण मुद्राः प्राप्तवानस्मि ।

पदपाठकः — भवता इयन्ती संभावना कथं प्राप्ता ?

घनपाठकः — अहं तु घनपाठकः । तस्मात् अधिकतमा संभावना मया लब्धा ।

जटापाठकः — मम तावत् सहस्र सुवर्णमुद्राः प्राप्ताः आसन् ।

क्रमपाठकः — विचार्यमाणे महानानन्दः भवति, यतः रघुवंशीयाः वेदपूजकाः इति । अस्मिन् अवसरे राजा रघुः सर्वान् सदस्यान् ब्राह्मणान् तेषां योग्यतानुसारं संभावनादिकं दत्वा, वेदवाङ्मये तेषां विद्यमान गौरवं प्रादर्शयत् ।

पदपाठकः — रघुवंशीयानां वेदपाठकेषु अति भक्तिश्रद्धादयः भवन्ति ।

जटापाठकः — अयि सुहृद् । विश्वजिति अध्वरे आकाशे नक्षत्राणीव ब्राह्मणा वेदपारगाः समुपस्थिता ।

घनपाठकः — सर्वं जगत् जानाति यत् रघुवंशीया- वितरण शीलिनः इति । तस्मात् समस्त राजन्यकं, ब्राह्मण्यं समागतं तत्र । एते सर्व विषयेषु अनन्यसालङ्कारिका भवन्ति ।

क्रमपाठकः — आहाहा ! किं भोजनं । का समाराधना । अहो भक्ष्य भोज्य चोष्य पेय लेह्यादिकं स्वादिष्टं रसप्रपूर्णं आसीत् । सर्वे मानवाः आकण्ठं भुक्त्वा उद्गारं कुर्वन्तः रघुं कीर्तयन्तः समापित भोजना उदतिष्ठन् ।

पदपाठकः — तत्र न केवलं वेदपण्डिताः सन्मानिताः किन्तु सकल शास्त्र पुराणेतिहास निष्णाताः अपि भूखण्ड दानेन सन्मानिताः आसन् ।

जटापाठकः — सालङ्कार रसप्रपूर्ण मधुराकाराः कवयः अपि कविता गोष्ठ्या सन्मानिता अभवन् ।

क्रमपाठकः — अस्मिन् विश्वजिति अध्वरे वेदपाठकाः, पदशास्त्र पण्डिताः, पटहग निष्णाताः, भरतनाट्य पारीणाः, नर्तकाः इत्यादयः सर्वेऽपि सन्मानिताः। किमुत विस्तरेण। सर्वशुक्ला गीर्वाणसुन्दरी शारदा समाराधिता।

पदपाठकः — अधुना सराजा निर्धनो संजातः इति जन श्रुतिः।

घनपाठकः — जनश्रुति निराधारा। यतः

कदापि निर्धनो भूयात्। राजा दानेन भूतले।
कला निर्गत चन्द्रश्च। कलाहीनोऽस्ति किं सदा॥

जटापाठकः — रघुवंशीयाः त्यागाय संभृतार्थाः भवन्ति। ते कदापि निर्धनाः न भवन्ति।

पदपाठकः — अरे जटापाठक! निर्गते सर्व कासारजले किं कासारः निर्जलः न भवति?

क्रमपाठकः — कासारः निर्जलः भवति। किंतु रघुवंशीयाः निर्धनाः न भवन्ति।

जटापाठकः — शृणु।

दानेन वर्धते लक्ष्मीः। जलेन तरवो यथा।
तस्मात् दातव्यमस्माभिः। दाने धर्मः प्रतिष्ठितः॥

पदपाठकः — यदि वयं दानं एवं कुर्मः एकस्मिन् क्षणे निर्धनाः भवेम।

क्रमपाठकः — तत् दानं, तादृशी वितरणशीलता राज्ञा केवलं भूषणं योग्याच भवतः। ते कर रूपेण प्रजाभ्यः गृह्णन्ति दानरूपेण समयेषु वितरन्ति।

घनपाठकः — सत्यमुदीरितं भवता। यथा रविः रसं गृहीत्वा समयेषु रूपान्तरेण वर्षारूपेण सहस्रगुणं आदत्ते तद्वत् राजापि करग्रहणं करोति ददाति च।

जटापाठकः — अनेन दृष्टान्तेन समयः अलङ्कृतः। वयं पल्वल सदृशाः। राजानः अकूपार समानाः।

पदपाठकः — इदं दृश्यं न कदापि विस्मरणीयं भवति मे। यतः ब्राह्मण्यं सर्वं विश्वजिति अध्वरे संतुष्टमभूत्। अनुपदमेव सर्वे ब्राह्मण्यं एक चित्तीभूय वेदमन्त्रैः

राजान रघु आशीर्वचन पुरस्सर कीर्तयामासु । सर्वमपि अन्तत शान्तरसे परिणद्धम्।

जटापाठक — एतादृश समागम, कार्यारम्भश्च मम जीवने एतावत्पर्यन्त न श्रुत न दृष्ट च।

क्रमपाठक — अस्माभिरपि न कुत्रापि पठित श्रुतच।

घनपाठक — अयि सुहृद भोजनवेला अतिक्रान्ता त्वर्गता त्वर्गता भोजनार्थ। सर्व विहाय भोक्तव्य इति सिद्धान्त गच्छाम यूय सर्वे मामनुसरन्तु। (इति सर्वे एकरेखाया गच्छन्ति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(राजा रघु मृण्मयपात्र सहित एकत्र उपविशति। तत प्रविशति मन्त्री)

मन्त्री — (प्रविश्य) अयि महाराज ! नमामि।

रघु — एहि मन्त्रिवर्य। उपविशतु भवान्।

मन्त्री — [उपविश्य] महाराज ह्य सकलकला परिपूर्ण भवत वदनचन्द्र अद्य किञ्चित् कलाविहीन भाति किमत्र कारणम्।

रघु — मन्येऽमेतत् भवता काल्पनिक भवति। अह सर्वदा आनन्देन परिपूर्ण कलानिधि भवामि।

मन्त्री — महाराज ! भाग्योपम मास्तोतु। मेघच्छन्नेन्दुरिव भवता वदन प्रतिभाति। विश्वजिति अध्वर भवता कोशागार निश्शेष अभूदिति कि चिन्ता।

रघु — तादृशा चिन्ता न कदापि मा वृणात।

मन्त्री — तव भवन्त धीरोदात्त नायका ।

रघु — मन्त्रिवर्ग श्रृणुतावन्मम वचनम्।

चिन्ता मे न कदाप्यस्ति । स्वार्थाय जगती तले ।
सर्वदा दूयते स्वान्त । नास्ति दानाय साम्प्रतम् ॥

मन्त्री — सर्वेभ्य ब्राह्मणेभ्य, गुरुभ्य सर्व सञ्चय दत्वा तेभ्य दारिद्र्य क्रीतमानस्ति महाराज ।

रघु — मन्त्रिवर्ग तथा मा वदतु भवान्।

दत्तं हुत विराजेते। गुरवे च धनंजये।
यथाक्रम धरण्यातु। साधनीयं हि शाश्वतम् ॥

मन्त्री — एतादृश भावना लब्ध्वा कीर्ति. आचन्द्र तारार्क जगति विराजते।

रघुः — महामन्त्रि जीवितेन कि प्रयोजनम्? शृणोतु भवान्।

जीवितेन च किं भोगैः। शाश्वत भुवि जन्तवः।
नैव जीवन्ति तस्माद्धि। कीर्तिस्साध्या धरातले ॥

मन्त्री — प्रभो एतादृश कर्म रघुवंशीयाना जन्मत सङ्क्रामित भवति किन्तु नान्येषा। सत्य धर्मंच पालयितु राजा दिलीप सिंहाय स्वजीवित समर्पयितु प्रायतत।

रघु — सत्य दान दया धर्माः। रक्षणीयाहि सर्वशः।
विनष्टास्ते भवेयुश्चेत्। धरा तूर्णं विनश्यति ॥

मन्त्री — भवता यदुदीरित तत् सत्यम्। मे समक्ष सर्व विश्वजित् अध्वर चलन चित्रमिव भासते। सकल भारतात् नैरराजान रथतुरग गजारूढा अध्वर विशेष दिदृक्षव समागता ।

रघु — सूर्यवंशीया आध्यात्मिक शक्तिसम्पन्ना ।

मन्त्री — तस्मात् सभावनार्थं समागत वेदपारगाणा भासुर भूसुराणा मण्डल भूतलावतीर्णं खगोलमिव व्यराजत ।

रघु — वय भारतीय साम्प्रदाय प्रचारयितु कटिबद्धा स्म ।

मन्त्री — आसेतु हिमाचल भरतवर्ष वेदमन्त्रै प्रतिध्वानित पूतश्चासीत्।

रघु — वय भारतदेश परम्परा न विस्मरिष्याम ।

मन्त्री — नैकजन षड्रसापेत भोजन भुञ्जन्त तवकीर्ति प्रगलयामासु ।

रघु — अध्वर समये विशषत विश्वजिति अन्नदान विशेषेण कार्य इति सिद्धान्त ।

मन्त्री — प्रभा मे हस्तात् याचकेभ्य ब्राह्मणेभ्य अर्बुदकादि रूप्यकाणा दानमभूत्।

रघु — सर्वमपि अध्वर निश्शेषमासीत्।

मन्त्री — **धन्योऽय वंश एवासीत्। दानेन महताध्वरे।**
तृप्ताश्च बाडवास्सर्वे। भूतले सर्व याचका॥

रघु — (उत्थाय विचारयति)

मन्त्री — (हठात् रघु विलोक्य) महाराज किमथ यूय अतीव उदासीना दृश्यन्त।

रघु — इद मम रघुणा महनीय इति विचारयामि।

मन्त्री — महनीयमिति जानामि किन्तु भवता वदन निर्लिप्तता जात कारण किम्?

रघु — मम कोशागार याचकेभ्य पण्डितेभ्य गायकेभ्य दानरूपेण प्रदत्त आसीत्। अधुनाऽपि ममास्ति कोशागार अभवत्। यदि कोऽपि याचक अधुना समागत्य याचिष्यते तर्हि कि कार्यम् इति चिन्तयाम्यह।

मन्त्री — महाराज! अधुना न कोऽपि याचक अस्ति भारते। मा चिन्तयतु भवान्।

रघु — अयि मन्त्रिमहोदय! भवान् अधुना गत्वा मत्समीपस्थान् मण्डम स्वाय गृहाण प्रदीपितु व्यवस्था करोतु।

मन्त्री — भवता आज्ञानुसारं गत्वाहं सर्वं यथास्थिति निर्णेयिष्ये। नमामि महाराज। (इति नमस्कृत्य निर्गतः)

रघुः — (दीर्घं निश्वस्य) यत् योग्यं तत् भविष्यति। (इति निर्गतः)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(ततः प्रविशति कौत्सः)

कौत्सः — [आत्मगतम्] गुरुदक्षिणार्थी कुत्र गच्छेयमहं। चतुर्दशकोटि मुद्रा परिमितं धनं कः दास्यति। [इतस्ततः पश्यन् रथ्यायां गच्छन्तं स्वीय सहाध्यायिनं दृष्ट्वा तं उच्चैः एवं आह्वयति] अरे बदरिक एहि इतः अरे एहि इतः [इति हस्त-मुन्नमय्य आह्वयति। ततः प्रविशति बदरिकः]

बदरिकः — [प्रविश्य] अरे कौत्स। त्वं अत्र एकाकी रथ्यायां किं करोषि ?

कौत्सः — मे रथ्यायां न किमपि विद्यते कर्तुं। किं करणीयं इति चिन्ता निमग्नः अभवम्।

बदरिकः — केयं चिन्ता।

कौत्सः — कथ्यतेचेत् चिन्ता निवृत्तिः भवति किम् ?

बदरिकः — मनसि निक्षिप्यते चेत् तस्याः निवृत्ति भविष्यति किम् ?

कौत्सः — न भविष्यति। किन्तु सुखदुःखौ, जयाजयौ लाभालाभौ समान-तुलाया निक्षिप्य शान्ततया कार्यं कर्तव्यं इति मे चिन्ता।

बदरिकः — भवतु नाम। अहं किमर्थं आहूतः।

कौत्सः — अहं मे चिन्ता कथयामि श‍ृणु। अहं गुरुदक्षिणार्थी किं कर्तव्यता मूढतया एकान्ते अत्रोऽपविश्य रथ्यायां चिन्तयामि। अत्रान्तरे ते दर्शनं बभूव।

वदरिक — गुरुर्दक्षिणा येनकेनापि रूपेण दातुं शक्यते।

कौत्स — जानाम्यह। इय गुरुदक्षिणा न सुलभ साधनीया भवति।

वदरिक — किनात्मकेय गुरुदक्षिणा कथय प्रथम।

कौत्स — चतुर्दशकोटि मुद्रा परिमित विद्यते।

वदरिक — अरे वत ! इयन्ती गुरुदक्षिणा भवता देया किम् ?

कौत्स — इयन्ती दातव्या इति चिन्तयामि।

वदरिक — अस्मिन् धरातले न कोऽपि दाता विद्यते इयन्त धन दातुम्।

कौत्स — अरे वदरिक ! एक शिरम द्वे शिरसी योग्यरीत्या विचारयिष्यतः।

वदरिक — भवान् यत् कथयति तत् सत्य। किन्तु न कोऽपि मे दृष्टिपथं न याति। [इति द्वावपि निमेष मात्र मौनेन विचारयन्तौ स्त। हठात् आश्चर्येण वदरिक कथयति]

वदरिक — अरे कौत्स ! शृणु। राजा रघु विश्वजिति अध्वरे पर्याप्त धन विद्वद्भ्य याचकेभ्य प्रादात् इति मया श्रुतम्।

कौत्स — यद्यह अधुना गच्छेय तर्हि स राजा पृष्ट सह्य इयन्त धन दास्यति किम् ?

वदरिक — प्रयत्ने दोषो नास्ति। अधुना बहु विलम्बन जात। स राजा याचकेभ्य वेदशास्त्र पुराणेति हास सगीत नाटय विद्वद्भ्य सर्वस्व प्रदाय मृण्मयपात्र द्वितीय अभूदिति कि वदन्ती प्रचलति।

कौत्स — तव मतानुसारेण न किमपि प्रयोजन विद्यतेऽति भवान् वदति।

वदरिक — गच्छ त्व। भवान् अवश्य अस्मिन् विषये सफलो भविष्यति इति मे अन्तरात्मा कथयति।

कौत्स — गत्वा त राजान पृच्छेयम्। यतः शृणु !

कासारपूर्णं जलमातनोतुं। ऋते च वर्षात् नहि कोऽपि शक्तः।
दाता रघुस्सर्व महीतलेऽस्मिन्। नीहाररूपाः खलु सर्व भूपाः॥

बदरिकः — साधु श्लोकितं तदीय महिमान मुदिश्य। अरे कौत्स ! त्वामन्तरेण न कोऽपि समर्थः भवति गुरुकामनां पूरयितुं। अधुनैव त्वं गच्छ।

कौत्सः — अरे बदरिक ! दैवेच्छया तव समागमः जातः। सम्यक् मार्गदर्शनमपि जातम्। इतःपर मे कर्म अविघ्नपरिसमाप्तिं प्राप्स्यति इति कथने न कापि शङ्का।

बदरिकः — रघुवंशीयाः असाध्यमपि स्वीय पराक्रमेण साधयिष्यन्ति। तत् तेषां व्रतम्।

कौत्सः — यदि एतावन्मात्रं धनं रघोः समीपे नस्यात् तर्हि अन्यत्र गत्वा तावन्मात्रं समानीय मह्यं दास्यति इति भवान् वदति।

बदरिकः — ते राजानः दातारः। प्रतिगृहीतारः वयं। जगत् आधाराधेयेन प्रचलति। चतुर्दश भुवनाः अपि अन्योन्याश्रयेण सहकार भावेन चलन्ति। स राज रक्षकः। वयं रक्षणीयाः। वयं अस्मदीम तपोशक्त्या सकल वसुन्धरा निरोगां करिष्यामः। अत्र अन्योन्याश्रय गुणः वर्तते। तस्मात् ते कार्ये अवश्यं भविता। गच्छाम्यहं।

कौत्सः — तिष्ठ तिष्ठ। अहं अत्यन्त ऋणी भवामि ते।

मित्रेणाहं समाविष्टः। भ्राजे ज्ञानेन रंहसा।
मित्रोदये द्रुवं ध्वान्तं। भजते खलु शुद्धताम्।।

(इति बदरिकेनसार्धं हस्तचालनं कृत्वा तेन सार्धं गच्छति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(रघुः एकाकी उपविश्य चिन्तयति। ततः प्रविशति परिचारकः)

परिचारक — (प्रविश्य) अयि महाराज ! कौत्सानाम वरतन्तु शिष्य तत्र भवत द्रष्टु द्वारि तिष्ठति ।

रघु — क्षिप्र प्रवेशय ।

परिचारक — यथाज्ञापयति देव । (इति नमस्कृत्य गच्छति)

रघु — (आत्मगतम्) अवश्य अय वरतन्तु शिष्य यत् किमपि अर्थ याचितु समागत इति मन्ये । (तत प्रविशति विनम्र कौत्स)

कौत्स — महाराज स्वस्ति भवते । चिरकाल राष्ट्र धारयतु भवान् ।

रघु — [उत्थाय] नमोवाक प्रशसामहे ऋषिवराय । [इति नमस्करोति]

कौत्स — प्रभो रघो ! तव भवत कीर्तिचन्द्रिका दिगन्तराल स्पृशति ।

रघु — धन्योऽस्मि महाभाग । [इति कौत्सस्य पादयुगुल मृण्मय पात्रजलेन प्रक्षाल्य तमासयित्वा पीठोऽपरि उपविष्टु विज्ञापयति]

कौत्स — [उपविशति]

रघु — [हस्तौ बध्वा विनम्र]

कुशाग्रबुद्धे कुशली गुरुस्ते । यस्मादवाप्तोसि भवानशेषम् ।
विज्ञानराशि वदनारविन्दात् । लोकस्तु चैतन्यमिवार्क बिम्बात ॥

कौत्स — प्रभो रघो भवति सुशासने नगरा तत्र प्रजाना क्लेश कुत ।

रघुवशे प्रशास्तोह । क्लेशस्य प्रभव कुत ।
आदित्ये पुष्करे भाति । तमसस्थानमस्ति किम् ॥

रघुः — अयं दिवसः भारतीय संस्कृत्याः निकषोपलः वर्तते ।

कौत्सः — अहं अस्मिन् दिवसि गुरुदक्षिणा दित्सामि गुरवे वरतन्तवे। तस्मात् महाराजानं भवन्तं याचितुं समागतोऽस्मि ।

रघुः — अहो तपस्विन् । भवान् मत्सकाशं अधुना याचितुं समागतोऽस्ति । (मुहूर्तं विचिन्त्य) साधु किं याच्यते तत्र भवता ।

कौत्सः — नरेन्द्र ! शरीर मात्रेण तिष्ठन् आभाति । नृपाः गलित विभवाः शोभन्ते । क्रमेण पीतस्य कलानिधेः कलाक्षयः पुनः वृद्धे भवति खलु । तस्मात् अधुना गुर्वर्थमाहर्तुं अन्यत्राहं यतिष्ये । निर्गलिताम्बुगर्भं शरत्घनं चातकः न याचते । (इत्युक्त्वा उत्थाय जिगमिषति)

रघु. — विद्वन् । त्वया गुरवे प्रदेयं वस्तु किमात्मकं । किं परिमाण भणतु ।

कौत्सः — राजन् । परिम्मिमात्त विद्येन मया वरतन्तुमहर्षिः गुरुदक्षिणार्थं विज्ञापितः विद्यापरिसंख्यानुसारेण चतुर्दशकोटि मुद्रापरिमितं धनं मह्यमाहरेत्युक्तवान् । अहं अधुना भवन्तं प्रभुशब्दशेषं मत्वा विद्यामूल्यं अल्पेतरत्वात् निर्बन्धुं नाभ्युत्सहे । तस्मात् अहं जिगमिषुः अस्मि ।

रघुः — अयि भोः श्रुतपारजस्य । गुरुदक्षिणार्थं रघोः सकाशात् मनोरथ मनवाप्य दात्रान्तरं गतोऽसिचेत् मे परिवादस्य नूतनाविर्भावः भविष्यति, तथा मा भूयात् । महात्मन् त्वा प्रशस्ते मदीये अग्न्यागारे द्वित्राण्यहानि चतुर्थ. अग्निः इव वसन् सोढुमर्हसि । अहं तव प्रयोजनं साधयितुं यतिष्ये ।

कौत्सः — राजन् तथैव वसिष्ये । स्वस्ति भवते । [इति निष्क्रान्तः]

रघुः — [आत्मगतम्] अहो अयं वरतन्तुशिष्यः गुरुदक्षिणार्थं अर्थहीनं मा शरणं प्रपन्नः । किं कर्तव्यमधुना । मत्सकाशे यदासीत् तत्सर्वं प्रदत्तं ब्राह्मण याचकेभ्यः । वयं रघुवंशीयाः त्यागाय सम्भृतार्थाः । यदि न दास्यामि रघूणां कलङ्कः भवति । भवतु तत्र मे न व्यथा । किन्तु भारतीय संस्कृतिः भ्रष्टा भविष्यति । तदहं नसहे । देश परम्परा समक्ष वैयक्तिक जीवन तुच्छम् । कुटुम्ब जीवन निरर्थकम् । तस्मात् भारत संस्कृति संरक्षणार्थं अवश्यं करणीय अहर्वास्ति । क्षतात् त्रायते इति क्षत्रियः । अथ क्षत्रिय शब्दः भुवनेषु रूढः ।

वय हि लोके खलु नीच जन्तवः। सुखेषु नित्य मधुर विलोलुपा.।
अशाश्वत कश्मल दूषित तनुः। विदामहे देशहिताय केवलम्॥

देशगोवेद रक्षणार्थ युद्धमपि वर भविष्यति। तस्मात् अह धनाधिप कुवेर रोत्स्यामि। रघुवशायाना असाध्य भुवि न विद्यते।

अशाश्वतेन देहेन। साधनीय हि शाश्वतम्।
वस्तुलोके नितान्त च। सज्जनानामिय कृतिः॥

[इति गच्छति]

[यवनिता पतति]

* * *

षष्ठं दृश्यम्

[तत प्रविशति कुवेर श्रेष्ठीसहित द्वावपि स्वीय स्थानयो उपविशत]

श्रेष्ठी — महाभाग कुवेर। भवान् मे अत्यन्त रोचते यत धना।

कुबेर — अह धनमन्तरण नान्यत् चिन्तयामि। सर्वमपि कर्म धन सपादनार्थ मया क्रियत।

धन सत्य धम विद्या। धन ज्ञान धन प्रभु.।
कृत्याऽकृत्य भवत्येव। धनार्थं वसुधातले॥

श्रेष्ठी — चतुर्विध पुरुषार्थेषु अर्थार्जन पुरुषलक्षण। जीवन अर्थ यदि स्यात् धम काम मोक्ष पुरुषार्थान् मानव साधयिष्यति। सर्वे गुणा काञ्चनमाश्रयन्ते। इति उक्ति सत्यमेव भवति।

कुबेरः — मदपेक्षया जगति नऽकोपि धनाढ्यः विराजते। अहं सर्वं करिष्यामि। अहं असाध्यं साधयिष्यामि। दिक्पालेषु अहं धनाढ्यः उत्तराधिपतिश्च।

अर्थोहि सत्यं जगति प्रजानां। अर्थोहि नूनं व्यवहारयोग्यः।
अर्थोहि लोके बलदायकः परम्। अर्थेन हीनः खलु शष्पतुल्यः॥

श्रेष्ठी — न केवलं भूवलयं किन्तु लोकत्रयमपि धने प्रतिष्ठितम्।

कुबेरः — सत्यं भणितं भवता। यतः।

धनमग्निर्धनं वायुः। धनं सूर्यो धनं वसुः।
धनमिन्द्रो बृहस्पति। वरुणं धनमश्नुते॥

अर्थेन हीनः मानवः सकलगुणगणसमन्वितोऽपि, सुन्दरोऽपि, बुद्धिमानपि, कुलीनोऽपि, वक्ताऽपि लोके गौरवहीनः भवति। तस्मात् यथा कथं चित् मानवेन अर्थवता भवितव्यं। अर्थसाधनं वाणिज्येन भवति। ततः अर्थकाङ्क्षिणः वाणिज्यं कुर्वन्ति।

श्रेष्ठी — भवता भाषणे प्रत्यक्षरं अर्थयुक्तं भाति मे।

कुबेरः — अपिच शृणु।

वाणिज्यं सर्व देशेषु। कर्तव्यं मानवैः प्रियम्।
वाणिज्येन विना राष्ट्रं। अशान्तिमधिगच्छति॥

तस्मात् देशहिताय वाणिज्यं षाड्गुण्य रसायनमिव शक्तिदायकं भवति।

श्रेष्ठी — (इतस्ततः विलोक्य) अयि राजन् कुबेर। उत्तरस्या दिशि धरापराग पटलः धूम मालिकेव सर्वत्र व्याप्नोति।

कुबेरः — अयं आषाढमासः। कालकण्ठ कन्धर कालकूटच्छायानुकारी मेघमालेयं अम्बराङ्गणे प्रच्छन्ना भाति न परागपटलः।

(ततः प्रविशति गणकः)

गणक. — (ससंभ्रमम्) अयि भोः कुबेर शस्त्रास्त्रपाणिः राजा रघुः सबलं गज तुरग रथ पदातिभिः पत्तनं रोद्धु समायाति इति जनाः हाहाकारं कुर्वन्ति।

कुबेर — राजा रघु मा राध्द समायाति।

गणक — इति किंवदन्ती प्रचलति।

श्रेष्ठी — तस्य राज्ञ धनस्यावसर कुत । अय वश रघूणा भवति। तेषां धनावश्यकता कदापि न भवति। ते पालका धर्मरक्षकाश्च।

कुबेर — गणक त्व गत्वा काशागार अन्य कनिष्ठ गणकै सह परिरक्ष्व।

गणक — यथाज्ञापयति देव । (नमस्कृत्य गणक गच्छति)

कुबेर — अयि भो श्रेष्ठिन् ! न ज्ञायते भवता। अय राजा विश्वजिति अध्वरे सवमपि स्वीय काशागार वेदशास्त्र पुराणेतिहास तज्ज्ञेभ्य अभिनय दक्षेभ्य दक्षिणा रूपेण दत्तवान्। अय तेषा रक्षा अनूचान साम्प्रदाय ।

श्रेष्ठी — त्यागे भारतीय सस्कृति समुद्भूता। ततस्तत ।

कुबेर — अधुना तस्य राज्ञ सकाशे एक द्रम्मकमपि न विद्यत।

श्रेष्ठी — दानेन दारिद्र्य क्रीतवान्। तत स निर्धनो जात ।

कुबर — अधुना धनस्य काध्यय नावश्यकता सजाता इति मन्ये।

श्रेष्ठी — तस्मात् धनार्थ धनद त्वा राद्ध स राजा समायाति।

कुबेर — यदि मा स राजा प्रष्टु समायाति तत राद्ध, नाह जान। किंतु जनश्रुत प्रचरति यथेच्छम्।

श्रेष्ठी — ते राजान सवदा देवाहताय गोब्राह्मण रक्षणाय सवस्व त्याग कुर्वन्ति।

कुबर — राजा याध्दमव समायाति चेत् त प्रतिराद्ध न कस्यापि शक्ति विद्यत। अय अप्रतिहत शरवग ।

श्रेष्ठी — अयि कुबेर ! तव वाक्य श्रवणेन ममापि किञ्चित् दमनकारिभार त्यजत शरीर। मदङ्ग परिशुष्यत। वपथु जायत। कि कतव्यमधुना धनद !

कुबर — श्रेष्ठिन् ! वय कर्तुं ध्यवामस्ता । मा बिभहि।

श्रेष्ठी — कि कथ ?

कुबर — नान्यत्र उपायान्तर धनकनक वर्षान्त।

श्रेष्ठी — किं सुवर्ण वृष्टिं वर्षाप्यते ?

कुबेर — हां सुवर्ण रौप्यमय मुद्रावर्षं वर्षापयिष्यामि।

श्रेष्ठी — यदि भवता तथा क्रियते तर्हि स: प्रति निवृत्त भविष्यति किम् ?

कुबेर — हां सत्यमेव सः प्रतिनिवृत्तः भविष्यति। वयं च लोके सर्वैरपि कीर्त्यमाना: भवेम। यतः विना युद्धेन सर्वं शान्ततया कृतमिति।

श्रेष्ठी — युद्धेन न प्रयोजनं विद्यते। अनुपद भवान् सुवर्णं वर्षापयतु यथा स राजा निवृत्त भवति तथा।

कुबेर — एहि गच्छाव सुवर्ण वर्षं वर्षापयिष्याव। (इति गच्छत)

(यवनिका पतति)

* * *

सप्तमं दृश्यम्

(तत: प्रविशति रघु)

रघु — (प्रशान्त वदन) धनाढ्यः कुबेर रघुणा गुणगणान् सम्यक् जानाति। तस्मात् रजत सुवर्णवर्षं वर्षापयामास। अद्य मे दानदान सफलं भविष्यति। सर्वत्रापि सुवर्ण मुद्रा वर्षापिता:। सर्वमिदं सचयन विधाय आगतस्य कौत्साय प्रदास्यामि।

प्रतिष्ठा भाति सर्वत्र। रघूणां त्याग चेतसाम्।
यथा भानोः प्रकाशस्तु। सर्वत्र धरणीतले॥

सत्यमेव कुबेर मे भावना तर्कयित्वा विना च युद्ध सर्वमपि सुकर चकार।

सकल्पमात्रेण मनोरथे मे। पूर्णस्सुकाले च विना प्रयासम्।
यत्रास्ति भावस्तु पवित्र रूपः। तत्रैव कार्यं फलरूपमेति॥

यतः अस्मदीय वंशजाः देशहिताय सर्वस्वं त्यक्तवन्तः आसन् ततः सर्वमपि कर्म सुकरं सपद फलदायकं बभूव ।

सत्यं दानदयाधर्माः । शाश्वताः मौलिकाः प्रियम् ।
रघुवंशीय भूपानां । नितान्तं भारतावनौ ॥

अधुना कौत्सः मे अग्निहोत्रगृहे चतुर्थाग्निरिव प्रतिभाति तस्य सकाशं गत्वा सर्वमपि धनकनक वस्तुचयं तस्मै प्रदास्यामि । (इत्युक्त्वा निर्गच्छति)

(यवनिका पतति)

* * *

अष्टमं दृश्यम्

(कौत्स उपविश्य गायत्रीजपं कुर्वन्नास्ते । ततः प्रविशति रघुः धनग्रन्थि सहायकेन सार्धं)

रघुः — महातेजाः कौत्स ! अह अभिवादये । (इति नमस्करोति)

कौत्सः — अयि भोः राजन् । किमह कामित फल ग्रहीता भविष्यामि ।

रघुः — अहं सत्यं ते कामित फलदायकः भवामि ।

कौत्सः — राजन् रघो ! मे आनन्द अगति प्रवाहः भवति ।

रघुः — महात्मन् ! एताः सुवर्ण रजत मुद्राराशयः । एताः गृहीत्वा मा अनुगृह्णन्तु भवन्तः ।

कौत्सः — राजन् ! मम केवलं चतुर्दश कोटि मुद्रापरिमितं धनं अपेक्षित मस्ति । तस्मात् तावत् धन गृहिष्यामि । नाधिकम् ।

रघुः — कौत्स ! लक्ष्मीः त्वा वृणोति । सा ते पादसन्निधिं समागता । ता मा तृणीं कुरुष्व ।

कौत्सः — प्रभो रघो ! किं भवान् मां परीक्षितुमिच्छति।

गृह्णामि राजन् गुरुदक्षिणार्थं। कुर्यां सदा ज्ञान समार्जनं च।
विप्रस्य माभूत् विषयानुरक्तिः। मधुप्रमग्ना मधुमक्षिकेव॥

(इति चतुर्दशकोटि मुद्रापरिमित गृहीत्वा)

प्रतिष्ठा भाति सर्वत्र। रघूणां त्यागचेतसाम्।
यथा भानोः प्रकाशस्तु। सर्वत्र धरणीतले॥

राजन् — स्वस्ति भवते। (इति गच्छति)

रघु — अहो तपस्विना प्रभाव। यदि ईदृशाना' तपस्विना स्थिति भारते भवेत् तर्हि भारत सर्वथा भारत स्थास्यति। नमासि भूयासि तपस्विभ्य। (इति नमस्करोति)

(यवनिका पतति)

* * *

नवमं दृश्यम्

(वरतन्तु प्राणायामादिक कुर्वन् आस्ते। तत प्रविशति सधन कौत्स)
कौत्सः — (वरतन्तु विलोक्य, आत्मगतम्)

अय गुरुः परं साक्षात्। भ्राजतेऽत्र पितामहः।
इवायं दृश्यते लोके। ज्ञानाद्दिव्यं न विद्यते॥

गुरो अह भो अभिवादये। (इति साष्टाङ्ग नमस्करोति)

वरतन्तुः — वत्स ! अपि कुशली भवान्। कथ हठात् समागतोऽसि। त्व विलोक्य बहुवर्षाणि व्यतीतानीत्यास्ति मे।

कौत्स — अयि तपस्विन् ! भवता आशीर्वाद बलेन अह सुखी। अयि गुरो ! भवद्भि यावत्परिमित धन पृष्ट तावत् परिमित समानीत धन स्वीकृत्य मा अनुगृह्णतु। (इति धन गुरो पादमूले निक्षिपति)

वरतन्तु — छात्र ! त्वया कथ आनीत कथ सम्पादित इयत धन कथयस्व।

कौत्स — गुरो अह दिनसमेव गुरुदक्षिणार्थी भ्राम भ्राम अन्तत भवता छात्रेण, मम सहायाय भूतेन वदरिकेन समादिष्ट सर्वथा अलाघ्य महाराजान रघु प्रति गतवानस्मि।

वरतन्तु — ततस्तत ।

कौत्स — स राजा विश्वजिति अध्वरे सर्व स्वीय सम्पत्ति वेदशास्त्र, पुराण, सगीत, नाट्य तज्ज्ञेभ्य अपिच याचकेभ्य प्रदाय निर्धनो जात । स राजा मृण्मय पात्रावशिष्ट आसीत्।

वरतन्तु — अय रघूणा त्याग चेतसा कीर्ति वितनोति। अय तेषा परम्परा गत आचार । ततस्तत ।

कौत्स — स राजा मया याचित न किमपि दातु शक्त अभूत्।

वरतन्तु — यत ! ततस्तत ।

कौत्स — मा अन्यत्र निगमिषु निवार्य स्वीयाग्निगृहे चतुर्थाग्निरिव मा निव सितु प्रार्थ्य स राजा स्वय कुबेर अरौत्सीत्।

वरतन्तु — ततस्तत ।

कौत्स — कुबेर तदायागमन श्रुत्वा सुवर्णमुद्रा वर्ष वर्षयामास।

वरतन्तु — ततस्तत ।

कौत्स — स राजा रघु सकलमपि धन समानाय गुरुदक्षिणार्थं गृहाणेति मा यवन्यत्।

वरतन्तु — ततस्तत ।

कौत्स — मम गुरव चतुर्दशकोटि मुद्रापरिमित धन केवल अपेक्षित तावन्मात्र मस्ति नाधिक इत्यह राजानमयाचम्।

वरतन्तु — ततस्तत ।

कौत्स — सर्वमपि धन नतत्य इति राजा मा प्रार्थयामास। किन्तु अह।

नास्ति काङक्षा धने राजन्। तापसाना महौजसाम्।
ज्ञानार्जने सदामग्न। जीवित न तु भौतिके॥

इत्युक्त्वा चतुर्दशकोटि मुद्रापरिमित धन गृहीत्वा समागतोऽस्मि।

वरतन्तु — वत्स! साधुकृत भवता। त्व अर्तीव ज्ञानी। मत्यमेव भातिक सुख त्यक्तवानसि। त्वया कृत सर्व महदानन्ददायक भवति म। तव गुरुभक्ति अपश्यमह। रघुवशायाना नावारमुद्रिपचेषु कियानादरभाव गारवश्च विद्यन त अधुना अवगतोऽस्मि। राजा रघु अस्मान् परीक्षितुमेव सर्वमपि धन गृहाणेति उक्तवान्। अस्मिन् सदर्भे कुबेरस्य रघुवशे भक्ति। रघुवशस्य तपस्विषु समादर भावः। धनविषये तापसाना भावना। शिष्याणा गुरौ भक्ति। परम्परागत गुरुदक्षिणा पद्धति इत्येव मादय लोकस्य कमपि महान्त सदेश प्रयच्छन्ति। अय अपि तव एक नवीन पाठ।

कौत्स — अनुगृहितोऽस्मि गुरो!

वरतन्तु — वय नाहार मुष्टिरुचा। जगति भौतिकमौग्य विसृज्य केवल परब्रह्माणि सचारिणा स्म। अस्माक धनन धनन न किमपि प्रयोजन विद्यत। तस्मात् धनमेतत् गृहीत्वा त्व लोकहिताय बहुजन सुखाय, भारतीय परम्परा वृद्ध्यर्थ व्ययी कुरुष्व इति प्रोक्त्वा रघु महाराजाय समर्पय। (इति धन शिष्याय ददाति)

कौत्स — यथाज्ञापयति महात्मा। (इति गृहीत्वा निर्गत)

वरतन्तु — ओ न कर्मणा न प्रजया धनन त्यागे नैके अमृतत्वमानशु। परेण नाक निहित गुहाया विभ्राजदेतद्यतयो विशन्ति। वेदान्त विज्ञान सुनिश्चि तार्था सन्यास योगाद्यतय शुद्ध सत्वा। ते ब्रह्म लोकेतु परान्तकाले परामृतात्परि मुच्यन्ति सर्वे। ओ शान्ति शान्ति शान्ति।

(यवनिका पतति)

* * *

।। उत्तर-गोग्रहणम् ।।

गो-सम्पदं संस्कृति मूलभूतं । आदित्य रुद्राऽदि परं वसूनाम् ।
बान्धव्य रूपेण विराजमानं । भजामि मे राष्ट्रहिताय नित्यम् ।।

(नान्द्यन्ते)

सूत्रधारः — अयि भारत परम्परानुरागिणः सभास्तारा: । अद्य वयं शरन्नवरात्रिषु *विजय दशमी पर्वणि, उत्तर गोग्रहणं नाम नाटकं प्रयोक्तुं उन्मुखाः अभवाम।* तन्नाटकस्यादौ शरदृतुमुद्दिश्य वर्णयन्ती नटी मे कुटुम्बिनी गीतिका गास्यति शृण्वन्तु भवन्तः ।

नटी — (ससंभ्रमं प्रविश्य) प्रिय प्रथमतः अहं नाटककर्तुः परिचयं विधाय अनन्तरं गास्यामि।

सूत्रधारः — तथैव कुरु ।

नटी — अयि भो: सदस्याः । अस्य नाटकस्य कर्ता गीर्वाणान्ध्र भाषाप्रवीण. पण्डित ओगेटि परीक्षित् शर्मा। अयं महाकविः अयं स्वीय काव्य सन्तानैः गीर्वाणवाणीं अवाकिरत् भूमण्डले, विंशतितम शताब्दे ।

गीर्वाणवाणी समलङ्कृतोऽयम् । राष्ट्रीय भक्त्या कृतजीवनश्रीः ।
संगीत साहित्य रसग्रहीता । सदा मनोहारि वचः प्रवृत्तिः ।।

सूत्रधारः — प्रिये त्वमधुना प्रकृतमनुसर ।

नटी — तत्र भवन्त. रसिकाग्रेसराः शृणुत ।

— गीतम् —

शरदृतुमुद्दिश्य) (केदार राग

श्वेताम्बर सज्जित वेषा। स्तौमि प्रियं सात्विक हृदयं राजानम्।
निर्मल देहावृत धवलाम्बर भूषित। सुन्दर शरदृतु नामानम्॥ ध्रु.

विलसित तारा मण्डन मण्डित। विश्वाकृति मधुरलसन्तम्।
विलसित नीरज गन्धावृत्त। शीतसमीर तरङ्ग विराजन्तम्॥ १

सुधाकर निसृत ज्योत्स्ना पुन्ज। परागान्चित देहम्।
महोकाश मराल पयोधि। प्रभासित मेदुर देहम्॥ २

सूत्रधार — अहो ते गानकुशलता। केदार राग रञ्जित शब्द रचना सुश्लिष्ट।

नटी — अयि भो (आकर्ण्य) मदमत्ताना धेनूना अम्बारवाः श्रूयन्ते। किमर्थं मेरं गोमातर आक्रोशन्ति।

सूत्रधार — न हि केवल धेनूना अम्बारवा गोपालकाना आक्रोशनमपि श्रूयते।

नटी — (आकर्ण्य) सत्यमेव तुमुलोदयंनाद। गत्वा पश्याव। (इति गच्छत:)

(यवनिका पतति)

(रङ्गमध्ये स्त्रीभिस्साकं भाषमाण उत्तर आस्ते)

चतुरिका — अयि उत्तरकुमार! भवान् योद्धा इति, वारंवारं अस्माभिस्साकं सोत्साहं सानन्दं कथयति अन्तःपुरे। अथ अन्तःपुरं विलासिनीनां स्त्रीणां योग्य स्थान भवति नहि योद्धाना इद आसनन भवति।

उत्तर — जानामि चतुरिके। योद्धाना स्थान समर भूमिरिति। मम योग्य अवसर न समागत तस्मात् अत्र निवसामि।

चतुरिका — कुमार! किं अधिक प्रलापेन। कार्यं शौर्येण भवितव्य भवता।

उत्तर — चतुरिके धीर समर दर्शने।

निपुणिका — चतुरिके। यदि समयः समापन्नः भवति सर्वोऽपि प्रज्ञाचक्षुः भवति।

उत्तरः — साधूक्तं भवत्या निपुणिके।

निपुणिका — कुमार यः खेलन परः भवति सः योद्धा भविष्यति।

चतुरिका — खेलनेषु, विशिष्य भारतीय खेलनेषु युद्धोपायाः निगूढाः सन्ति।

निपुणिका — न केवलं युद्धोपायाः वेदान्त भावनाश्च भारतीय खेलनेषु अन्तर्हिताः भवन्ति।

चतुरिका — तस्मात् सर्वैरपि खेलनपरैः बाल्ये भवितव्यम्।

निपुणिका — कुमार। त्वं अधुना संप्राप्त यौवनोऽसि। त्वया युद्धभेदाः ज्ञातव्याः।

उत्तरः — अहं जन्मतः योद्धास्मि। यदि युद्धकालः संप्राप्तः अहं अनुपदमेव कालो भूत्वा। सकलारिवर्गं मदीय करवालेन अस्त्रैच खण्डशः कुर्याम्। (इति हस्तं युध्यमानः इव भ्रामयति।

चतुरिका — कुमार। त्वया कदापि युद्धं कृत किम्?

उत्तरः — न कृतम्। किंतु समर्थोऽस्मि। मे पिता कथयति अहं शूरः इति।

निपुणिका — राजपुत्र। अन्तपुरभाषणे, समराङगण विहरणे महानन्तरः विद्यते।

उत्तरः — धैर्यवन्तः शूराः युद्धकर्मणि कुशलाः भवन्ति, न केवलं युद्धानु भवेन।

चतुरिका — भवता प्रोक्तं सत्यमेव किंतु भाषणे, आचरणेच अन्तरः महान् अस्ति।

उत्तरः — यदि समयः आसन्नः भवति, अहं योद्धु प्रथमः अस्मि।

निपुणिका — चतुरिके सुदेष्णादिष्टाह गोक्षीरार्थं गोशाला गच्छामि। मया साकं त्वमपि एहि मत्वर कार्यं समाप्य पुनरागच्छाव । (इति गच्छत.)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(उत्तर एकस्या कुटाया उपविष्ट गान शृण्वन् भाव प्रकटना कुर्वन् आस्ते)

— गीतम् —

(सारङ्ग रागे

भ्रम भ्रम भ्रम भ्रमर। भज भज भज नीरज पण्डम्।
पिब पिब पिब मधुविन्दु। कुसुमात्कुसुमं विटपाद्विटपम्॥ ध्रु

प्रति कुसुमं पीत्वा मकरन्दं। कुरुषे परिमल कुसुमाकर विटपम्।
मधुरस सभरित फलभरविटप। भ्रमर ते हृदय रसभर हृदयम्॥ १

जम्बूफल सादृश्य ते रूप। कुसुमपरागे लुठित ते देहं।
दृष्ट्वा फल बुद्धचा सानन्दम्। आगच्छति ग्रसितुं त्वा कीरकुलम्॥ २

(नेपथ्ये कोलाहल भवति। तत प्रविशति भीत गोपाध्यक्ष:)

गोपाध्यक्ष — (आक्रोशन्) अहो हत अहो हत प्रलय मजात। आकाश भिन्न भूम्या पतन। (इति आक्रोशन् भूमिजय आगच्छति)

उत्तर — किं रे गोपाध्यक्ष। किमर्थं आक्रोशसि किमर्थं त्व कम्पसे।

गोपा — किं वदेयं महागान प्रलय मजात ।

उत्तर — कोय प्रलय ।

गोपा — सर्वं गोसम्पद् गत गतं। अहं अशक्तः संजातः। [इति क्रन्दति]

उत्तरः — किमर्थमेवं क्रन्दसे।

गोपा — मत्स्य पुत्र। गोधनं विजेतुं समुत्तिष्ठ।

उत्तरः — कथ गोधनस्यापत्तिः संजाता।

गोपा — मत्स्यपुत्र। कौरवा अस्मदीय गोधनं गृहीत्वा गता।

उत्तर — अपि सत्य अयं वृत्तान्तः।

गोपा — सत्यमेव। भवान् राष्ट्रवर्धन हितेप्सुः सत्वरं स्वय निर्याहि।

उत्तरः — अस्मदीय राज्ये बहवः सन्ति अस्मिन् कर्मणि शक्ताः।

गोपा — न कोपि विद्यते। केवल भवता गन्तव्यम्।

उत्तर — (भीत) अल्पकृत्यस्यास्य नाह शक्तः।

गोपा — न हि। भवता केवलं गन्तव्यं विद्यते।

उत्तरः — अह कथं गच्छेयं। किमर्थ गच्छेयम्।

गोपा — मत्स्यपुत्र। महीपालः त्वा परिषदः मध्ये श्लाघते सर्वदा।

उत्तरः — भवतु नाम। युक्तमेव। किमिति।

गोपा — ममपुत्रः उत्तर. अनुरूपः, शूरश्च। अयं इष्वस्त्रे निपुणः योधः वीरश्चेति।

उत्तरः — तत् सत्यमेव। इदानीं अहं किं कुर्याम्।

गोपा — सः त्वं मनुष्येन्द्रस्य भाषितं दर्शयितुं, कुरून् जित्वा रणे, महद्यशः अवाप्य पुरीं त्वं प्रविश।

उत्तरः — गोपाध्यक्ष। अहं कथं गच्छेयम्।

गोपा — स्यन्दने अक्षय तूणीरादिकं धनुर्बाणांश्च नीत्वा याहि।

उत्तरः — रथचोदकः कः?

गोपा — तत्र सारथिना याहि।

उत्तर — मे मारथि एकस्मिन् महति युद्धे हत ।

गोपा — अन्य निरीक्षस्व।

उत्तर — यदि अश्वषु कोविद एक सारथि स्यात्, अह गवाग अनुगच्छेयम्।

गोपा — यन्तार निराक्य व्रमेव।

उत्तर — अह न जानामि यन्ता क भवेत्।

गोपा — पश्याम ।

उत्तर — प्रयास्यत मम युक्त मारथ्य क्षिप्र पश्यध्वम्।

गोपा — अवश्य भवान् अवाप्नुयात् सारथिम्।

उत्तर — यदि हययानविद नर लभेय गजवाजि रथाकुल परानीक विगाह्य कुरून् जित्वा पशून आनयेयम्।

गोपा — कुमार। तान् सर्वान् त्व जेष्यसि कि।

उत्तर — (अट्टहास कृत्वा) पश्य।

दुर्योधन शान्तनव। द्रोण कर्ण महारणे।
त्रासयित्वा पर वीरान। ग्रहिष्यामि पशून् प्रियम॥

(इति स्मश्रू मार्जयन् हसति)

गोपा — सत्य महत् युद्ध भविष्यति।

उत्तर — यदि अल्प युद्ध नाहगन्ता।

गोपा — तत इद महत् युद्ध भवति।

उत्तर — पश्येयरद्य मम्वीर्ये ते कुरव एव।

गोपा — कथ त्वा ते द्रक्ष्यन्ति।

उत्तर — किमय साक्षात् अर्जुन अस्मान् प्रबाधते इति।

गोपा — मत्स्यपुत्र ! त्वया साक अहमपि। योद्धु आगच्छेयम्।

उत्तर — मास्तु इद घोर महद्युद्ध भविष्यति।

गोपा — अह युयुत्सामि।

उत्तर — तत्र प्रथमत लघुयुद्ध योद्धव्य गत।

गोपाः — भवता कथ युद्ध्यते, इति द्रष्टु त्वा अह आगच्छेयम्।

उत्तर — त्व मम युद्ध कौरव सेनाच विलोक्य पलायन मन्त्र पठिष्यसि।

गोपा — त्वं मा रक्षस्व।

उत्तर — अहं युद्ध निमग्न भवामि। त्वा कथमहं रक्षयेयम्।

गोपा — कुमार! अहं ते युद्धं द्रष्टुमिच्छामि।

उत्तर — त्वं युद्ध न द्रक्ष्यसि।

गोपा — कथमहं न द्रक्ष्यामि।

उत्तर — गोपाध्यक्ष! कौरवैस्सार्धं युद्धं महत् दुष्करं अतीव भयदं भविष्यति।

गोपा — अहं धैर्यमवलम्ब्य युद्धं द्रक्ष्यामि।

उत्तर — गाव कौरवैं गृहीता इति वार्ता कथयितुं क्रन्दन्, आकाशवत् इव सम्मुखं समागतोसि। किं त्वं प्रत्यक्षं युद्धं द्रक्ष्यसि। शृणु।

आग्नेयास्त्रादि बाणैश्च। गारुडैर्नाग वारुणैः।
युद्धचमानान् विलोक्य त्व। पञ्चत्व प्राप्स्यसि ध्रुवम्॥

गोपा — (भीत) तथा यदि भवेत् तर्हि नाहमागमिष्यामि। मत्स्यपुत्र! त्वमेव गत्वा सर्वो मारय। अहं गच्छामि। (इति गच्छति।

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(उत्तर एकाकी उपविश्य चिन्तयति तत. प्रविशति सैरन्ध्री)

सैरन्ध्री — उत्तरकुमार ! किमर्थमेवं चिन्ताक्रान्त· एकाकी उपविष्टोसि ।

उत्तर — न कापि चिन्ता विद्यते मम ।

सैरन्ध्री — ते वदनमण्डलं चिन्ताकुलं भाति त्वं कुमारोऽसि का ते चिन्ता मे कथय ।

उत्तर — सैरन्ध्रि ! सत्यमेवाहं चिन्ताक्रान्तोऽस्मि । अहं एकस्मिन् संङ्कटे निपतितोऽस्मि ।

सैरन्ध्री — कोयं संङकट ।

उत्तर — अस्मदीय गाव कौरव हस्तगता अभवन् । शृणु ।

गावः सर्वाः पराक्रान्ताः । योध्दुमिच्छामि तैः स्वयम् ।
अश्वशास्त्र परिज्ञाता । यदि कोप्यस्ति सारथिः ॥

सैरन्ध्री — कथं ज्ञातमेतत् ।

उत्तर — गोपाध्यक्षः आगत्य अकथयत् ।

सैरन्ध्री — अहो विराटराजस्य गाव· पराक्रान्ता । किमेतदाश्चर्यम् ।

उत्तरः — तं साकं योध्दु गन्तव्यमिति गोपाध्यक्ष· अवदत् ।

सैरन्ध्री — तव पिता अस्ति खलु । त्वं कुत· ।

उत्तर· — पिता अन्यत्र योध्दु गतः ।

सैरन्ध्री — अहो ! तथा यदि, त्वं गच्छ योध्दुम् ।

उत्तरः — अहं योध्दुमेव चिन्तयामि । किंतु ।

सैरन्ध्री — किंतु, किं जातम् ।

उत्तर· — यदि कश्चन सारथिः स्यात्, अहं सर्वं साधयिष्यामि ।

सैरन्ध्री — ते सारथिः वर्तते खलु।

उत्तरः — मे सारथिः महति युद्धे निहतः।

सैरन्ध्री — बत ! कथं ते सारथिः लभिष्यति।

उत्तरः — तं विषयमुद्दिश्यैवाहं चिन्तयामि।

सैरन्ध्री — अधुना सर्वमत्रहितास्मि।

उत्तरः — अश्व कोविदः सारथिः अपेक्ष्यते।

सैरन्ध्री — उत्तर कुमार अहं कथयामि शृणु।

बृहन्नलेति विख्यातः। स आसीत् सारथिः पुरा।
अर्जुनस्य परं युद्धे। धैर्यवान् अश्व कोविदः॥

यः वारणाभः सुप्रियदर्शनः युना बृहन्नलेति विख्यातः पार्थस्य सारथिः आसीत्। सः मया दृष्टपूर्वः आसीत्। यदा पावकः खाण्डव अदहत् तदा अर्जुनस्य हयोत्तमाः अनेन सगृहीताः। तादृक् यन्ता कुत्रापि नास्ति।

उत्तरः — सैरन्ध्रि। अहं तं नपुंसकं प्रष्टु न शक्नोमि ममहयान् चालयेति। कुत इतिचेत्।

पुरुषोऽस्मि युवा चाहं। संग्रामे परमेश्वरः।
कथं क्लीबेन कुर्यां मे। भाषणं वनिते वद॥

सैरन्ध्री — उत्तरकुमार। अधुना ते भावना जानीतास्मि। तत. वीर। ते भगिन्याः उत्तरकुमार्याः वचनं सः अनुपदं करिष्यति।

उत्तर. — यदि सः मे सारथिः भविष्यति विना सशयं तान् सर्वान् जित्वा गाः समादाय ध्रुवं आगमिष्यामि। क. कोऽत्र भोः (इति आह्वयति।

प्रतीहारी — (प्रविश्य) अहमस्मि (इति नमस्करोति)

उत्तर. — सत्वरं उत्तराकुमारीं आह्वय।

प्रतीहारी — यथाज्ञापयति भवान्। (इति निर्गतः)

(ततः प्रविशति मुग्धा साळङ्कारा उत्तराकुमारी)

उत्तरा — भ्रातः ! किमर्थमहमाहूतास्मि।

उत्तरः — स्वसः ! अधुनाहं कौरवैस्सार्धं योद्धुं जिगमिषामि। मे सारथिः महति युद्धे निहतः। यदि सारथिः ते गुरुः बृहन्नळः भवेत् सर्वं सुकरं भविष्यति। तस्मात् त्वं तव गुरुं बृहन्नळं प्रति कथय मदीयं वृत्तान्तं सर्वमपि अपिच तमानय।

उत्तरा — भ्रात. अहं अधुनैव गत्वा तमानयेयं।

उत्तरः — तं कथय। अस्मदीय गाः पराक्रान्ताः अभवन्, तस्मात् अधुनैव मे भ्राता योद्धुमुद्युक्तः। किंतु तस्य अनुरूपः सारथिः नोपलब्धः। सैरन्ध्री त्वामुद्दिश्य सविस्तरं जगाद इति।

उत्तरा — भ्रातः ! अहं सर्वं कथयेयम्। सैरन्ध्रि त्वमपि आगच्छ मया सार्धं मे गुरुगृहम्।

सैरन्ध्री — तथैव एहि कुमारी गच्छावः। (इति द्वेऽपि गच्छतः)

* * *

चतुर्थं दृश्यम्

(बृहन्नळः नाट्यं शिक्षयन्ती आस्ते। बालिकाः नाट्यं कुर्वन्त्यः वर्तन्ते)

गीतम् (मोहन रागे)

लास्यं स्मर हर मानस दास्यं। कुरुते सुन्दर नर्तन शीला।
हृदयाह्लादन सज्जित वेषा। शीतल नगराज सुता बाला॥

अतुलित मायास्पद लीला। अभिनव मण्डित शृङ्गारा।
पदवारिज चालन नूपुर। यम्मर गुन्जन झं झं झंकारा॥

किंशुक सुम निचयान्वित सुषमा। मुखरित भ्रमरी कबरी मारा।
मधुमय हासेक्षण लज्जा विनमित। पेशल कम्र सुमध्य कुचनारा॥ २

लोकनय मूर्तीकृत निरुप सन्ध्या। रन्जित मन्जुल लीला सुषमास्या।
प्रावृट् कालाम्बर प्रथम स्फोरक। चपला वल्ली चन्चल शोभा लास्या॥ ३

(ततः प्रविशति उत्तराकुमारी)

वृहन्नल. — अयि कुमार्यः। अद्य नाट्य पर्याप्त बभूव, भवत्यः गृहं गच्छन्तु। (सर्वाः अपि नमस्कृत्य गच्छन्ति)

उत्तरा — गुरवे नमः। (इति नमस्करोति)

वृहन्नल — को विशेष कुमारी।

उत्तरा — गुरो मे मनः अद्य त्रस्तमासीत्।

वृहन्नलः — त्रासस्य हेतु का?

बाले तव मुखाम्भोजं। ग्लपितं केन हेतुना।
कदापि नैव दृष्टासि। विचारवृत वीक्षणैः॥

उत्तरा — गुरो! मे सोदरः उत्तरकुमारः अतीव भयद सङ्कटे पतितः।

वृहन्नल — तस्मात् ते मुखकमलं म्लानं जातम्।

उत्तरा — अयि वृहन्नल! नः गावः गावः कुरुभिः आक्रमिता।

वृहन्नलः — कदा आक्रमिता.।

उत्तरा — अद्य मध्यान्हे।

वृहन्नल. — केनोक्तम्।

उत्तरा — गोपाध्यक्षेण।

वृहन्नलः — केन श्रुतम्।

उत्तरा — भ्रात्रा उत्तरकुमारेण।

वृहन्नलः — भ्राता किमवादीत्।

उत्तरा — मे सारथि महति संग्रामे मृत । तस्मात् अधुना मे अश्वु कापिद् यन्ता आवश्यक । यदि स लभ्य स्वय गत्वा कौरवान् विजित्य गा प्रत्यानयेय इति अवादीत् । तस्मात्

मे भ्राता याति योध्दुतैः । कौरवैर्धेनु मोचने ।
सारथिर्नैव लब्धोऽस्ति । तस्माच्चिन्तावृता गुरो ॥

बृहन्नल — विदित सर्व । ततस्तत ।

उत्तरा — सैरन्ध्री त अवादीत् यत् बृहन्नला पूर्व अर्जुनस्य सारथ्य चकार । यदि त्व तत्र सादरौ बृहन्नलस्य समाप सप्रश्य विचारयिष्यसि अवश्य स बृहन्नला त सारथ्य करिष्यतीति ।

बृहन्नल — ततस्तत ।

उत्तरा — तस्मात् त्वा मम भ्रातृ पश्चात् इयन्तमर्थं प्रष्टु समागता ।

बृहन्नल — तत् सत्यमत पुरा च मया कृतम् ।

उत्तरा — तत बृहन्नड ! त्व मम भ्रातु रथसारथ्य कुरु । नाचेत् ।

सारथ्य मम भ्रातुस्त्व । नैवकर्तुं समीहसे ।
अधुना तव सान्निध्ये । परित्यक्ष्यामि जीवितम् ॥

(इति बृहन्नला नमन्ती तिष्ठति)

बृहन्नल — उत्तराकुमारि । मा विचारय अह त्वया सार्धं आगच्छामि । आगत्य भ्रातु सकाश गच्छाव वहि । इति तया सार्धं निगच्छति)

(यवनिका पतति)

• • •

पंचमं दृश्यम्

(उत्तरः चिन्ताक्रान्तः इतस्ततः विचारयन् तिष्ठति। ततः प्रविशति उत्तरासहित बृहन्नलः)

उत्तरः — (उत्तरासहित बृहन्नलं वीक्ष्य) एहि बृहन्नल एहि।

बृहन्नलः — उत्तरकुमार ! किमर्थं त्वं अकारण चिन्ताग्रस्तोऽसि।

उत्तरः — अयि बृहन्नल। त्वया सारथिना खाण्टवे पार्थः अग्निमतर्पयत्। पृथ्वीं अजयत्। सैरन्ध्री तं विषयं सर्वं मे समाचष्टे।

बृहन्नलः — अयि उत्तरकुमार।

न शक्तिर्विद्यते मेऽत्र। परं सारथ्य कर्मणि।
तौर्यत्रिके सदा बुद्धिः। प्रसरत्येव पुत्रक॥

राजपुत्र ! सग्राम मूर्ध्नि सारथ्यं कर्तुं का शक्तिः मम विद्यते। गीतं वा नृत्यं वा पृथक्-विधं वादित्रं वा करिष्यामि। ते सारथ्यं मम कुतः।

उत्तरः — बृहन्नले त्व गायकोत्रा उत नर्तकोत्रा भवतु। क्षिप्रं हयोत्तमान् निगृह्णीष्व।

बृहन्नल. — भवदनुज्ञया अह निग्रहिष्यामि।

उत्तरा — बृहन्नल ! भीष्मद्रोण मुखान् कुरून् संग्रामे विजित्य, सूक्ष्माणि, मृदूनि चित्रविचित्राणि, रुचिराणि वासासि आनयेथाः पाञ्चालिकार्थम्।

बृहन्नलः — उत्तराकुमारि !

उत्तरो यदि तान् सर्वान्। विजेष्यति महाबलः।
पाञ्चालिकार्थं वासांसि। तुभ्यं दास्यामि बालिके॥

उत्तरः — बृहन्नल ! त्वं इद कवचं धरस्व। (इति ददाति)

बृहन्नलः — (कवचं अस्तव्यस्तं धरति। उत्तरः उत्तराच तत् दृश्यं विलोक्य प्रहसन्तौ करताल ध्वनिं कुर्वाते)

उत्तर — बृहन्नल ! कवच एव धार्यते किम् ?

बृहन्नल — अहा ज्ञात सुष्टु धरामि । (इति धारयति)

उत्तर — बृहन्नल ! कशा गृहाण शिरस्त्राण पादत्राणे धरस्व ।

बृहन्नल — (धरति)

उत्तर — बृहन्नल ! गच्छाव (इति चलत)

उत्तरा — भ्रात ! समस्त सन्मङ्गलानि भवन्तु ।

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(रणदुन्दुभय श्रूयन्ते, तत प्रविशति उत्तर बृहन्नलो)

उत्तर — बृहन्नल ! कोयनाद ।

बृहन्नल — अय दुन्दुभि नाद ।

उत्तर — मे हृदय विदलित भवति । अह भीतोऽस्मि ।

बृहन्नल — न भेतव्यम् ।

(नेपथ्ये शङ्खाना नादा भवन्ति)

उत्तर — (आकर्ण्य) बृहन्नल कोय नाद ।

बृहन्नल — अय शङ्खनाद ।

उत्तर — अह बधिरो भवामि मे कर्णरन्ध्रौ विदलितौ भवत । (इति कर्णौ पिदधाति)

बृहन्नल — उत्तरकुमार ! अहमास्मि तव पुरत चिन्ता मा कुरू ।

उत्तरः — बृहन्नल ! भीतोऽस्मि सैन्यं दृष्ट्वा। एते सर्वे नादाः मां बधिरान्धपङ्गुं कुर्वन्ति।

बृहन्नलः — उत्तर ! भीतिः कथम्।

उत्तरः — बृहन्नल ! कुरुभिर्योद्धुं नोत्सहे। कुरु सैन्यमनन्तकं। अहं प्रतियोद्धुं नशक्ष्यामि। एतान् कुरून् दृष्ट्वैव रोमाणि हृषितानि। मम कश्मलं संजातं। बालः अहं। अहं एकः सूनः मे पितुः। अस्त्रशस्त्रेषु अकृतश्रमः। बृहन्नल ! निवर्तस्व। प्रतियोद्धुं न शक्ष्यामि।

· **बृहन्नलः** — राजपुत्र ! तथा स्त्रीषु प्रतिश्रुत्य पौरुषं अभिनिर्माय कत्थमानः किमर्थं न युयुत्ससे।

उत्तरः — भीतोऽस्मि चमूदर्शनेन। अहं गृहं गच्छेयम्।

बृहन्नलः — ताः गावः न विजित्य त्वं गृहं कथं प्रतियास्यसि।

उत्तरः — नाहं याचे किमपि।

बृहन्नलः — अकार्यं त्वं करोषि।

उत्तरः — कार्याऽकार्यं नाहं जाने। अहं भीतोऽस्मि।

बृहन्नलः — त्वा नराः नार्यः वीराश्च प्रहसिष्यन्ति।

उत्तरः — के नराः। काः नार्यः। के वीराः। अहमनभिज्ञः।

बृहन्नलः — अहमप्यत्र सैरन्ध्र्यां सारथ्य कर्मणि ख्यातः।

उत्तरः — तव ख्याति नाहं विचारयामि।

बृहन्नलः — अनिर्जित्य गाः पुरं प्रतियातुं न शक्ष्यामि।

उत्तरः — मत्स्यानां भूयान् धनं कामं कुरवः हरन्तु न मे [illegible]।

बृहन्नलः — किमर्थं ते हृदयदौर्बल्यम्।

उत्तरः — नराः नार्यश्च मा प्रहसन्तु। न [illegible]।

बृहन्नलः — संग्रामे एवं न प्रवर्तितव्यम्।

उत्तरः — मे संग्रामे न च कार्यम्।

बृहन्नल — क्षत्रियस्य सग्राम कार्य ।

उत्तर — सग्रामा मास्तु । गच्छन्तु गाव ।

बृहन्नल — ता भवदीय देशसम्पद ।

उत्तर — मे नगर गच्छतु शून्यम्। पितु न विभेम्यहम्। (इति अभिद्रवति)

बृहन्नल — [बृहन्नल त प्रतिगृह्य] मत्स्यपुत्र ! एप धर्म शूरै न स्मृत ।

उत्तर — नाह शूर ।

बृहन्नल — क्षत्रियस्य पलायन न याग्य युद्धे।

उत्तर — अह क्षत्रियकुमार । किन्तु न मयि विद्यते क्षत्रियत्वम्।

बृहन्नल — भीतस्य पलायन न श्रेय ।

उत्तर — क श्रेय कथय।

बृहन्नल — मरणम्।

उत्तर — [कम्पयन्] बृहन्नले रथं क्षिप्र निर्वासय।

बृहन्नल — अयाग्य मिद कर्म ।

उत्तर — बृहन्नल ! नर जीवन् भद्राणि पश्यति।

बृहन्नल — तादृश जन्मना कि प्रयाजनम्।

उत्तर — बृहन्नल ! अह ते सुवर्ण निष्कशत दास्यामि। मा विसृज।

बृहन्नल — अपिच कि दास्यसि।

उत्तर — हेमवद्धान् दश वैदूर्य मणीन् च ते दास्यामि।

बृहन्नल — अपिच कि दास्यसि।

उत्तर — मत्तान् दश मातङ्गान् ते दास्यामि।

बृहन्नल — तत अहं कि कुर्याम्।

उत्तर — मुञ्च मा बृहन्नल !

बृहन्नलः — कुमार।

सारथिर्नास्ति ते मत्वा। सारथ्यं कर्तुमुद्यतः।
लब्ध्वा मदीय साहाय्यं। युध्यस्व कृत निश्चयः॥

उत्तरः — नाहं योत्स्यामि। (इति उपविशति)

बृहन्नलः — राजपुत्र! यदि नोत्सहे योध्दुं, सारथ्यं कुरु। अहं योत्स्यामि शत्रुभिः। (इति सान्त्वयति)

उत्तरः — ओम्। सारथ्यं करिष्ये। नहि नहि सारथ्यं कर्तुं नोत्सहे।

बृहन्नलः — कुतः।

उत्तरः — प्रथमतः शात्रवबाणाः मामेव प्रहरिष्यन्ति। तस्मात् सारथ्यं नाह मनुवहामि।

बृहन्नलः — कुमार! अरिवीरबाणस्पर्शं विना अहं त्वां रक्षयिष्यामि शस्त्रास्त्रेभ्यः।

उत्तरः — तथा यदि भवेत् तदा सारथ्यं अहं करिष्यामि।

बृहन्नलः — उत्तरकुमार। त्वं प्रथमतः अस्य शमीवृक्षस्य समीपं रथं चोदय।

उत्तरः — किमर्थं।

बृहन्नलः — अयि मत्स्य राजनन्दन! पाण्डवाः तेषां आयुध सम्पदं अस्य वृक्षस्योऽपरि निक्षिप्य गताः।

उत्तरः — ते अधुना कुत्र गताः।

बृहन्नलः — ते सर्वे अज्ञातवासं कुर्वन्ति।

उत्तरः — कोऽयं संबन्धः तत्र च अस्य आयुध सम्पदश्च।

बृहन्नलः — अस्माकं अविनाभावसंबन्धः विद्यते। तेषां आयुधाः एव अस्माकमपि आयुधाः।

उत्तरः — तत्कथं भवति।

बृहन्नलः — भवितुं शक्यः। पश्य त्वहं अर्जुनोऽस्मि।

उत्तर — (कर्णौ पिधाय) हा शान्त पाप शान्त पाप।

बृहनल — किमासीत्। किमर्थ तथा वदसि।

उत्तर — कि त्व अर्जुन ? (इति हसति)

बृहन्नल — किमर्थ हससि।

उत्तर — त्व नपुसक । अर्जुन महापुरुष । तत्सादृश्य त्व कथं प्राप्स्यसि।

बृहन्नल — अय मे शाप ।

उत्तर — अय ते शाप ।

बृहन्नल — ओम् सत्यम्।

उत्तर — अन्य ते भ्रातर कुत्र सन्ति।

बृहन्नल — कुमार शृणु।

> युधिष्ठिरस्सभास्तार । वल्वलो भीम पूरुषः।
> नकुलश्चाश्व बन्धुश्च। गोकुले सहदेवकः॥

उत्तर — किमेतदाश्चर्यम्। बृहन्नल ! पाण्डवाना पत्नी द्रौपदी कुत्रास्ति।

बृहन्नल — शृणु।

> सैरन्ध्री द्रौपदीं विद्धि। शृणु सर्वेऽपि कीचकाः।
> निहता. सुतरा गूढ। वाल त्व बहु श्रद्धया॥

उत्तर — (आश्चर्येण) यदि त्व अर्जुन तस्य दशविध नामानि श्रावय।

बृहन्नल — शृणु।

> अर्जुनः फल्गुणो जिष्णुः। किरीटी श्वेतवाहनः।
> बीभत्सुः विजयी कृष्णः। सव्यसाची धनुजयः॥

उत्तर — त्व साक्षात् अर्जुन । अह त दास । मे मन स्वास्थ्य जात। मे महत् भाग्यमेतत्।

बृहन्नल — पुरुषव्याघ्र ते न भय विद्यते। ते शत्रून् सर्वान् अह रणे नुदामि।

उत्तर — नाह बिभेमि। त्वा सव्यसाचिन युधिष्ठिर जानामि। अह त सारथि भवामि। (इति नमस्करोति)

बृहन्नल — (त उद्वहन्) न ते भाति चल। (इति द्वावपि गच्छत)

(यवनिका पतति)

*   *   *



॥ स्वप्नानिरुद्धम् ॥

स्वप्नानिरुद्ध मधुराधर दंशनेन ।
तेजोविराजित मनोभव वैभवेन ।
नाकीय भव्य विषय प्रविचेष्टितोषा ।
त्रैगुण लोकमनिशं महसा पुनातु ॥

नान्द्यन्ते

सूत्रधार· — आर्ये यद्यवसित नेपथ्यालङ्कारा इतः आगम्यताम् ।

नटी — आर्य ! नेपथ्याऽलङ्कार· चरमालङ्करण दशाया विद्यते किञ्चित काल निरीक्षस्व समागच्छेय्यम् ।

सूत्रधार — (उच्चै)विलम्ब सजात हञ्जे । (आत्मगतम्) स्त्रिय न केवल मन्दयानाः किन्तु मन्द कार्यकरण्यश्चाऽपि ।

नटी — (ससभ्रम प्रविश्य) आर्यपुत्र इयमस्मि । नेपथ्यालङ्कार· अवसित अस्ति ।

सूत्रधार — आर्ये ! सकलकलागुणालङ्कार भूयिष्ठा खल्वियं सभा ।

नटी — नूनमव एषा सभा कलाभिर्न परिपूर्णा ।

सूत्रधारः — तस्मात् अद्य गीर्वाणान्ध्र भाषाप्रवीणेन सम्वमूर्ति शर्मण सूनुना परीक्षित् शर्मणा ग्रथितवस्तुना स्वप्नानिरुद्धम् इत्यनेन नाटकेन उपस्थातव्यमस्माभि । तथा पात्रग्रहणे आधीयता मति· ।

नटी — आर्यस्य मधुरा प्रयोगतया न किमपि परिहीन भविष्यति ।

सूत्रधार — आर्ये गीयता किंचित् ।

नटी -- क विषयमुद्दिश्य गातव्यम ।

सूत्रधार — सगीत साहित्य प्रभाविम वसन्तमुद्दिश्य गीयताम ।

नटी -- अनेन सबधन किमत्र प्रयोजनम ।

सूत्रधार --आधुनिक दिवसेषु सुशिक्षितानामपि सगीतसाहित्य सबध मुद्दिश्य सम्यक ज्ञात न भवति ।

नटी -- तत्कथम ।

सूत्रधार -- गायक साहित्य न जानाति । साहित्यज्ञ सगीत न जानाति । यदि तौ गायकौ भवत तदा तयो गाने रसाविर्भाव सम्यक न भवति ।

नटी — तस्मात किं कतव्यमिति भवता मनीषा ।

सूत्रधार -- गायन समय रसाविष्करणार्थं साहित्य सम्यक ज्ञात्वा सुस्वरेण सगीतेन गीते विद्यमान भाव गायकेन प्रकटी कतव्य । तदानी आनन्दस्य परमावधि भविष्यती । शृणु ।

विशदार्थं प्रभावेन । साहित्य ज्ञानदायकम् ।
नादब्रह्म वशेनैतत् । सगीत मोक्षदायकम ॥

तत गायन समय गायकस्य सगीत साहित्ययो समानीदृष्टि भवितव्या । तदानी साहित्यज्ञान मिश्रित सगीतमार्गेण गायक श्रोतार अपि मुक्ति प्राप्स्यन्ति इति भारतीयाना समय ।

नटी -- आय ! आधुनिका गायका तथा न कुवन्ति किं !

सूत्रधार -- नहि । ते पदस्य विच्छेद कुत्र कर्तव्य । कुत्र दीघ कतव्य, कुत्र ह्रस्व कतव्य इति ज्ञानेन विना केवल ताले निबद्ध चित्तवृत्तय गायन्ति । तत भवती वसन्तमुद्दिश्य वस त रागण गायतु ।

नटी -- आय ! काचन शङ्का विद्यते ।

सूत्रधार -- का शङ्का पृच्छतु ।

नटी — आर्य ! गीर्वाणप्रपञ्चे विराजमान नाटक संचयं विसृज्य किमर्थं नूतन नाटक व्यमोहः ।

सूत्रधारः — आर्ये शृणु ।

शब्दार्थ संप्राणित रम्यभावैः । कृतं प्रियं नाटक चक्रमेतत् ।
नवं पुराणं खलु कल्पनेयं । तात्कालिका सर्वमिदं पुराणम् ॥

अपिच ।

शृङ्गारपूर्णं मधुशब्दरम्यं । संगीत चित्रावली मञ्जुकाव्यम् ।
प्रिया परिष्वङ्गवदीहृयां तत् । स्वर्गीय सौख्यं प्रददाति लोके ॥

नटी — अधुना अर्धात तत्रास्मि ।

सूत्रधारः — अधुना परिषदः श्रुति प्रसादन निमित्तं गायनमुपक्रम्यताम् ।

नटी — श्रूयता

तन्त्री स्वरोपमित षट्पद नादपुञ्जैः ।
गायन् विमोहयति कोकिल कण्ठनादैः ।
कौसुम्भराग परिचर्चित चित्रिताङ्ग ।
चैत्रः प्रियं स्वकवितां मधुमास काले ॥

सूत्रधारः — आर्ये साधुगीतं । अहो पश्य सर्वतः परिषदियं बद्ध चित्तवृत्तिः आलिखितमिवाभाति तव वसन्त गीत रागेण ।

नटी — आर्य ! शृङ्गार रसपूर्णं स्वप्नानिरुद्धं नाम अपूर्व नाटकं वयं प्रकटयितुं उद्युक्तास्म, यतः शृङ्गारस्य वसन्तर्तौ आनुकूल्यत्वात् ।

सूत्रधारः — आर्ये ! अन्यत्र दत्तावधानोऽस्मि पश्य ।

उषा चित्र सुवर्णाख्याः । बाणकुम्भाण्ड कन्यकाः ।
आलपन्त्यः प्रियं भावैः । प्रविशन्ति यथा प्रियम् ॥

ततः गच्छावः एहि । (इति तया सार्धं गच्छति)

(शोणित पुर्यां राजप्रासाद । तत प्रविशन्ति हसन्त्य उषा चित्रलेखा सुवर्णाख्या)

चित्रलेखा — सखि उषे एहि उपविश अस्मिन् पीठे। अह ते केश प्रसादन कारष्ये।

उषा — (उषा पीठ उपविशति)

चित्रलेखा — (कडकतिक्या उषाया केश प्रसादन करोति, तत वेणी रचयति)

उषा — स्वसौन्दर्य हस्तदर्पणे पश्यन्ती शृन्डगार चेष्टादिक कुर्वन्ती आस्त)

सुवर्णरेखा — हञ्जे चित्रलेखे राजोद्यान अद्य बहुधा पुष्पै चित्रित गोचल आस्त। अह पर्याप्त पुष्पस्तवकान् विक्रय उषामण्डनार्थे आनीतास्मि। अधुनाह माला विरचेयम्। (इति उषाया पार्श्वे उपविश्य माला रचयति)

चित्रलेखा — उषे अयमधुना मधुमास खलु।

उषा — हा अय मधुमास ।

चित्रलेखा — अस्मिन् मधुमास सदा प्रकृति नवनवोन्मेष शालिना भूत्वा यौवतस्य चित्ताह्लादकारिणी भवति।

उषा — हा सत्यमेव भवति।

चित्रलेखा — प्रायश समय अतिसुखदा परम रमणीया भवन्ति कि सत्य मव खलु। (इति सुवर्णरेखा पश्यन्ती हसति)

उषा — चित्रलेख मदपेक्षया त्व अनुभव शालिना असि। वयसि ज्येष्ठासि। त्वदीय जीवन अनेका वसन्ता व्यतीता। कि मत्त सर्व नातुमिच्छसि।

सुवर्णरेखा — (हसन्ता) सखि उषे त्व मदपेक्षया ज्येष्ठाऽसि मा कथय तत् सत्य। कि तत् सत्य यदुदाहित चित्रलेखया ? उत सा त्वा परिहासयति ?

उषा — सख्यौ वय सदा किञ्चिन्न्यूनाधिक वर्षे समवयस्का । अलाक समाता सर्व अनुभवकत्रय भवति। तरतम भावपूर्णा वय सदा । अनुभवक्त्रय कथ वक्तु शक्यत।

सुवर्णरेखा — वाक्चातुर्य यदिस्यात् अनुभवक वय स्वप्नदृष्टमपि वक्तु शक्यत।

उषा — सखि, जगति अनुभवैक वेद्यानि वक्तु दुष्कराणि भवन्ति, किन्तु अनुभोक्तुं सुकराणि भवन्ति।

चित्रलेखा — सखि! उषे त्व एषु दिवसेषु किञ्चित् नाशिकानर्तित कोपेन प्रत्युत्तर ददासि किमत्र कारणं भवति।

उषा — नाह कदापि कुपिता भवामि। युवा मा कुपितमनस्का कुरुत।

चित्रलेखा — उषे त्व कतिपय दिवसेभ्य अन्यमनस्का भवसि। त्वदीय सर्व व्यवहार अस्मदृशाना शङ्कास्पद भवति।

सुवर्णरेखा — सखि एतं कुसुमै सुन्दरमाला मया ग्रथिता। इति चित्र लेखायै ददाति)

चित्रलेखा — (*ता माला गृहीत्वा आघ्राय ता हेलया उषाया वेण्या* निक्षिपति, उषाया भुजौ गृहीत्वा ता वामत दक्षिणत भ्रामयित्वा, तदीय सौन्दर्यं पश्यन्ती) सखि! सर्वा मधुमास लक्ष्मी त्वयि मूर्तीभूतेव सदृश्यते। अह किं कथयेय ते सौन्दर्यमुद्दिश्य।

सुवर्णरेखा — नूनं *त्वया कथित सत्य। परतु अह एव कथयेय इय उषा* मधुमासलक्ष्मी इति।

उषा — युवा कि कथयत नाह जाने। भवत्या संभाषण मे दुर्बोधा भवति। भवत्यो वाक्प्रसारसराणि कथ्यन्या भाति।

चित्रलेखा — सखि! त्व सर्व जानासि। अधुना त्व अवगत तत्त्वाऽस्मि किन्तु वहि दुर्बोधा भवति इति कथयसि। भवती अवहित्था जानाति।

सुवर्णरेखा — एषा उषादेवतेव प्रत्यह दृष्टापि नवान शाभामावहन्ती अलौकिकानन्द प्रजनयति।

चित्रलेखा — तस्मादेवास्या पिता बाण अस्यै उषासुन्दरीति नामकरण मकरोत्।

उषा — त्व न जानासि कस्मात् मे पिता तन्नामकरण अकरोत्।

चित्रलेखा — त्व कथय कस्मात्।

उषा — अहं कल्ये ब्राह्मी मुहूर्ते उषोदये सजाताऽस्मि तस्मात् मे नामकरण तथा कृतवान् पिता।

चित्रलेखा — सखि ! सुवर्णरेखे यदा यदाऽहमेना पश्यामि तदातदा ममैता दृशी भावना सजायते।

सुवर्णरेखा — काते भावना कथय।

चित्रलेखा — शृणु।

उषा सखी विश्वसृज प्रवृत्ते । प्रतीक रूपा लसते धरण्याम् ।
कोवाऽनुभोक्ता प्रियरूपमस्या । धन्योऽस्ति नित्य खलु कामराज्ये ॥

सुवर्णरेखा — सखि चित्रलेखे भवत्या साधु समुद्गीरितम्। ममापि तदा तदा एव प्रति भाति, सत्य उषा गगनमण्डलात् भूतलमवतीर्णा उषा सुन्दरी इति। एषा स्वीय सौन्दर्यालङ्कारैः कामस्य पञ्चबाणान् तिरस्कृत्य षष्ठ शर इव प्रतिभाति। यतः

अशोकपुष्पं नवमालिकासुमं । अलङ्कृता पङ्कज शोभिताननाः ।
नीलोत्पलाक्षी नवपल्लवाधरा । हिनस्ति नून कुसुमायुध सा ॥

उषा — (कोपेन लज्जया च एकस्मिन् कोणे अवनत मुखी भूत्वा हस्तनखान् उल्लिखन्ती आस्ते)

चित्रलेखा — सुवर्णरेखे पश्य। एषा किलिकिञ्चितवती दूर गत्वा तिष्ठति। तस्या व्याजानादिक सौन्दर्यपूर्ण भासते पृष्ठभागऽपि। विलोकय।

रोलम्बमाला निभ रम्यवेणी । चक्रक्रिया कम्र नितम्ब भारा ।
स्रस्तास रम्या भुजवल्लरीभ्या । कस्य प्रिया नैव भवत्यहो सा ॥

सुवर्णरेखा — तस्मादह रम्य नमत सौन्दर्य सक्रमित भवात। शृण।

सौन्दर्यं कविता गान । सक्रामन्तिच जन्मत ।
सस्कार भावनाभ्यासै । पूर्णत्व यान्ति भूतले ॥

चित्रलेखा — (उषायाः समीपं गत्वा) उषे किमर्थं त्वं रुष्टासि कथय मे। (इति ता सान्त्वयति)

उषा — वृथा मा लज्जानम्रमुखीं कुर्वन्त्यौ आस्ताम्।

चित्रलेखा — उषे अत्र न कोप्यन्यः उत काप्यन्या वा विद्येते। वयं सर्वाः सख्यः। किंचित्कालं परिहास पूर्वकः कालः यापनीयः इति ममाभिप्रायः। अहं यत् कथयामि तत् असंगतं न भवति। अह सर्वदा वर्तमानस्थितिं कथयामि। एहि उषे (इति ता स्वनिकट गृहीत्वा) सुवर्णरेखे पश्य। एषा उषासुन्दरी युवतीना उन्माद कारयित्री भवति किमुत पुरुषाणा विषये शृणु।

स्वर्णं प्रयाति खलु वीक्ष्य तदीय हेला।
माद्यन्मनोभव विलास विकार भावम्।
किं किं वदेयमहमत्र विचित्र लोकं।
कामावृताखिल मदोद्धत राजलोकम्॥

सुवर्णरेखा — सखि ! राजा बाणस्तु नितान्तं दुर्वार दोर्गर्व समन्वितः दुहितृ सौख्य न विचारयति।

चित्रलेखा — यदि एवमेव पराधीन मनस्कः बाणः व्यवहरिष्यति तर्हि दुहितृ जीवने वक्रः पन्था भविष्यत्यवश्यम्।

सुवर्णरेखा — संस्कारबलेन वक्रः पन्था न भवति।

चित्रलेखा — सखि बह्व्यः राजकन्यकाः वक्रमार्गे विचरन्त्यः अन्ततः दुःख-सागरे निमज्जिता अभवन्।

सुवर्णरेखा — तथा न भूयात् अस्याः अपि जीवनम्। सखि बह्व्यः कथाः संश्रूयन्ते सुखान्ते परिणताः।

चित्रलेखा — सखि ! कास्ताः कथाः श्रावय।

उषा — सख्यौ किमर्थं मा टीकात्मिका कुर्वाते।

सुवर्णरेखा — सखि आवा त्वामुद्दिश्य न किमपि कथयावः।

चित्रलेखा — उषे ! आवयोः भाषणं मा शृणु। किंचित्कालं पराङ्मुखी भव।

सुवर्णरेखा — चित्रलेखे ! नगराज पुत्री उमा शंङ्करं तपसा विचिक्रिये।

चित्रलेखा — तयो दाम्पत्य जगत आदर्श बभूव। तथा यदि स्यात् जीवन धृते पतित मापापूप शकलमेव भवति।

सुवर्णरेखा — अपिचान्या रुक्मिणी कृष्णेन सार्थ पलायन मन्त्रं पपाठ।

चित्रलेखा — स. पलायनमन्त्रः योग्य सर्वथा अभिनन्दित सर्वै ।

सुवर्णरेखा — एव बहव्य कथा संश्रूयन्ते। यदा पितरौ दुहितृसर्गकल्याण मुद्दिश्य न चिन्तयत· तदा उमारुक्मिणीवत् दुहितृणा विवाह भविष्यति।

चित्रलेखा — यदि तथा भवेत्। स विवाह काम्य भवति।

सुवर्णरेखा — किन्तु व्यथापरिणामकारक मा भूयात्।

चित्रलेखा — सर्वोऽपि जीवन सुखान्त कामयते। तद्भिन्नं कदापि कोऽपि न कामयते।

सुवर्णरेखा — सखि ! निम्नगा सर्वदा पति उदन्वन्त प्रयान्ति लोके अय निसर्गस्वभाव ।

उषा — सख्यौ युवा नद्य इव निम्न स्थान कामयेते कि ?

चित्रलेखा — उषे ! आवा लोके वृत्त वर्तिष्यमाणाना कथाना विषये संलापं कुर्वं । त्व विहर भावप्रपञ्चे।

उषा — (कुपित चालन करोति)

चित्रलेखा — (तस्या संमुख गत्वा किञ्चित् नाटय कुर्वन्ती। उपाहस्तौ गृहीत्वा कल्याण रागे गायन्ती आस्ते।

गीतम्

कुप्यत्येषा। वनिता चोषा।
मञ्जुलहासा। शोभितवासा॥

पङ्कज वदना। कुड्मल रदना।
चञ्चल नयना। मन्मथ शयना॥

(ता विसृज्य नाट्यं कुर्वन्त्यौ आस्ते)

सुवर्णरेखा — (उषां नत्वा)

(आनन्दभैरवी रागे)

कुप्यत्येषा । वनिताचोषा ।
मंजुलहासा । शोभितवासा ॥ ध्रु.

वक्रित केशा । मदनावेशा ।
सज्जित वेषा । पल्लविताशा ॥ १

चित्रलेखा — (उषां गृहीत्वा)

(मोहन रागे)

कुप्यतेषा । वनिताचोषा ।
मंजुलहासा । शोभितवासा ॥ ध्रु.

पृथुल नितम्बा । राका बिम्बा ।
चलने शम्पा । गन्धिल चम्पा ॥ १

(इति ता नृत्यति)

उषा — सख्यौ किं मां मानस भावनाया विहारिष्यमाणामिव नानीयाते (इति रुष्टा निर्गमिष्यति)

सख्यौ — (तां धारयत ।)

[ततः प्रविशति वेत्रवती]

वेत्रवती — अयि उषानन्दिनि । राजा बाण भवती सभा समाहूयति । (इति नमस्कृत्य कथयति)

उषा — सख्यौ अहं गच्छामि ।

सख्यौ — सखि उषे आवामपि त्वां अनुसराव । (इति सर्वे गच्छन्ति)

(यवनिका पतति)

*   *   *

द्वितीयं दृश्यम्

(शयनमन्दिरे उषाचित्रलेखासुवर्णरेखाः स्वपन्ति)

उषा — (हा हा शब्दं कुर्वन्ती शनैः शनैः उत्तर काये उपविश्य) क्वाऽसि प्रिय। (इति बाहू उद्यम्य विरौति)

(तस्याः शब्दं श्रुत्वा चित्रलेखा सुवर्णलेखा च प्रजागय उषां पश्यतः। चित्रलेखा उत्थाय उषा समीपं गत्वा तां धृत्वा)

चित्रलेखा — सखि! उषे किमभूत् किमर्थं विरौषि?

उषा — प्रिय क्वासि प्रयच्छ मे प्रतिवचनम्। (इति नभसि गाढालिङ्गन करोति)

सुवर्णरेखा — [तस्याः समीपं गत्वा] सखि उषे किमधमेन निर्लज्जया प्रलपसि।

उषा — [तं निरीक्ष्य सव्रीडं अधोमुखी आस्ते]

चित्रलेखा — [उषाया पार्श्वे उपविश्य] सखि उषे किमधमेन उच्चैः क्रन्दसि।

उषा — सखि न किमपि विद्यते।

चित्रलेखा — तथा मावद। किमपि गोप्यं न विद्यते ते मत्सकाशे। कथय किं वृत्तम्।

उषा — नाहं वस्तु समर्थास्मि।

सुवर्णरेखा — किमधमेन हाहाकारं कृतवती।

उषा — महानानन्दः अनुभूत मया।

चित्रलेखा — कोऽयं आनन्दः।

उषा — अनिर्वाचनीय आनन्दः।

चित्रलेखा — सखि त्वं एतावत्पर्यन्तं असूर्यं पश्या असि। किं अनुभूतं भवत्या सविस्तरं कथय।

उषा — सखि स्वप्नः दृष्टः।

चित्रलेखा — जानाम्यहं अयं स्वप्नः इति। कीदृशः स्वप्नः इति मे प्रश्नः।

सुवर्णरेखा — उषे किमयं दुःस्वप्नः।

उषा — न हि दुःस्वप्नः।

चित्रलेखा — तर्हि कथं इयमवस्था तव भवति।

उषा — सखि ! स्वप्ने दृष्टः कश्चित् दिव्यमानुषविग्रहः।

चित्रलेखा — [सुवर्णरेखां विलोक्य हसन्ती] किमयं दिव्यमानुषविग्रहः दृष्टपूर्वः।

उषा — न मया दृष्ट पूर्वः।

सुवर्णरेखा — किं श्रुतपूर्वः।

उषा — नहि।

सुवर्णरेखा — किं चित्रमेतत्।

उषा — इदं विचित्रमेतत्।

चित्रलेखा — यदि विचित्रं स्यात् अहं प्रत्यक्षं करिष्यामि।

उषा — मया दृष्टं चित्रं, कथं त्वं प्रत्यक्षं करिष्यसि।

चित्रलेखा — करिष्याम्यहम्।

उषा — न शक्यं भवति ते।

चित्रलेखा — जगति अशक्यं न किमपि विद्यते।

उषा — तर्हि शृणु। सः स्वप्नसुन्दरः।

चित्रलेखा — हा सत्यं स्वप्नसुन्दरः ?

उषा — सः अनिर्वचनीयः।

सुवर्णरेखा — यथा दृष्टं वर्णय।

उषा — श्यामाकृतिः।

सुवणरेखा — अपिच कथ ।

उषा — कमल लाचन ।

चित्रलखा — अपिच ।

उषा — पातग्रामा ।

सुवणरेखा — ततस्तत ।

उषा — बृहद्बाहु ।

चित्रलेखा — अपिच कान्श ।

उषा — योषिता हृदयङ्गम ।

चित्रलेखा — स कस्मिन् कर्मणि रत ।

उषा — [लज्जिता भवति]

चित्रलेखा — सखि । आवा तत्र सख्यौ । आवया समक्ष लज्जा कुतस्ते ।

सुवणरेखा — निर्भीका सविस्तर अल्पाक्षरै कथय ।

उषा — सखि । नाह वक्तु शक्तास्मि ।

सुवणरेखा — प्रयतस्व ।

उषा — अह सक्षिप्तेन कथयामि ।

अधर मे निपीड्यासौ । बद्धवा मां बाहुपञ्जरे ।
यथेष्ट विहरन् कामे । तोषयमास सर्वथा ।।

चित्रलखा — [सुवणरेखा पश्यन्ता, भ्रूविक्षेप कुवन्ता साभिप्राय] कथम् ?

उषा — गाढमालिङ्गय । [इति चित्रलखा आलिङ्गति]

सुवणरेखा — त महान्त आपादमस्तकं यथा रूप वर्णयित्वा चित्रलखा कथय । मामपि सुचर करिष्यात ।

चित्रलेखा — ततोऽह त उपकरिष्यामि ।

उषा — त्वं त्व करिष्यामि ।

उषा — कथं त्वं करिष्यसि ।

चित्रलेखा — यस्ते मनोहर्ता तं वर्णय ।

उषा — नाहं जाने स. कथं ते उपयोगः भवति ।

सुवर्णरेखा — तस्याः नाम चित्रलेखा । त्वं जानासि । सा अश्रुतं अदृष्टं केवलं श्रुत्वा चित्रलेखन करिष्यति । साकुशाग्र धिषणाशालिनी ।

उषा — हला मे प्रियसखी चित्रलेखा भविष्यति । (इत्यालिङ्गति ताम्)

चित्रलेखा — सखि उषे ! त्वं निर्लज्जया यथा दृष्टं तं दिव्यमानुषविग्रहं वर्णय ।

उषा — चित्रलेखे शृणु ।

कर्णान्त विस्फारित लोचनोऽयम् । पीनोन्नतोरस्थल कम्बु कण्ठः ।
नीलोत्पलश्याम तनुप्रकाशः । संभोगकाले रतिसुन्दरोऽभूत् ॥

सुवर्णरेखा — सखि चित्रलेखे । सिद्धचारण पन्नगान् देवगन्धर्व दैत्य विद्याधरान् यक्षान्, मनुजान, रामकृष्णौ, कन्तजयन्तौ, प्रद्युम्न च विलिख । उषे त्वं विना चिन्ता स्वपस्व । आवां त्वत्कृते यत्कर्तव्यं तत् सर्वं विधाय पुनरागच्छावः । (इति निर्गतवत्यौ, उषा सुप्ता भवति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(ततः प्रविशतः चित्रलेखा चित्रसंवाहिनी सुस्मिता च)

चित्रलेखा — हञ्जे चित्रवाहिनि सुस्मिते !

सुस्मिता — कथय तत्र भवती ।

चित्रलेखा — अद्य चित्रगृहं सप्तवर्णपूरित चित्र कलशावळि विविध कूर्चिका तूलिका नकचित्र फलकानि समाहृत्य ससिद्ध कुरु चित्रलेखनार्थं।

सुस्मिता — मन्त्रिणि। अद्य भवता अतीव सन्तुष्ट हृदया दृश्यसे। किमत्र कारणम्।

चित्रलेखा — हञ्जे सुस्मिते। मे सखा उषा स्वप्ने कमपि दिव्यमानुषविग्रह दृष्ट्वा तस्मिन् अनुरक्ता अस्ति। स क। कीदृश। न काऽपि जानाति। उषाया वर्णनानुसार चित्र मनसि निधाय तस्य प्रतिकृति कर्तव्या। तस्मात् मे हृदय आनन्देन दोलायित भवति।

सस्मिता — अहो बहुकालानन्तर आनन्दमयी वार्ता श्रुता।

चित्रलेखा — इय वार्ता अस्माक परमानन्ददायिनी भवति।

सुस्मिता — अय तवारम्भ सदुद्देशाय भविष्यति।

चित्रलेखा — एतावत्पर्यन्त ममारम्भ फलिताथ अभूत्।

सुस्मिता — देवि। बाण दुहितरि न कदापि वात्सल्य दर्शयति। कात्र हेतु।

चित्रलेखा — अय सर्वदा भुजकण्डूयनयनार्थं युयुत्सति। सर्वदा नाने वाद्य, युद्धकरणे आसक्त। एकैकस्यास्ति एकैकव्यामोह संसारे। सर्वस्यापि स्वार्थोन्मत्तता स्वीयानन्दाय भवति।

सुस्मिता — कन्या विवाहयोग्या जाता इत्येतमात्रमपि तस्य न विदित भवति किं?

चित्रलेखा — अन्येषा व्यवहारेषु न रोचते मे हस्तक्षेप। राजान प्रति त्व किमपि माभण। तथा भणण अस्माक योग्य न भवति। पश्यतोहर वाताहार भविष्यति। पितरौ दुहितृ विषये न श्रद्धावन्त जातौ तदस्माकं किमर्थं।

सुस्मिता — साधु भणित भवत्या। वय कर्मचरा न तु मन्त्रिण।

चित्रलेखा — भवता सत्वर सर्व व्यवस्था कुरु।

सुस्मिता — देवि भवता अत्र उपविशतु। अह सर्वाणि पात्राणि अत्रैवान यिष्यामि। (इति सर्व वस्तुचय अपेक्षित यत्, तत् सर्वं आनाय तत्र निक्षिप्य गच्छति)

चित्रलेखा — (तूलिका गृहीत्वा सप्तवर्णं पूरित कलशेषु निक्षिप्य यथोचितं चित्राणि करोति)

(ततः प्रविशति सुवर्णरेखा)

सुवर्णरेखा — हञ्जे चित्रलेखे, कियत्पर्यन्त चित्रलेखनं समाप्तं दर्शय मे ।

चित्रलेखा — (एकैकं सुवर्णरेखायै दर्शयति)

सुवर्णरेखा — (आश्चर्येण) अहो कियत् सुन्दरं कृतं चित्रलेखनम् । एषु चित्रेषु को नाम भविष्यति । प्रिय सख्यः उषायाः स्वप्नसुन्दरः वरः ।

चित्रलेखा — वयं न किमपि निर्णेतुं शक्ताः ।

सुवर्णरेखा — कथं भवत्या विचित्रवर्ण चित्राणि लिखितानि । सत्यं ते कला जन्मतः संक्रामिता ।

चित्रलेखा — मम बाल्ये मे पिता मदीय मानसिक प्रवृत्ति विलोक्य मम चित्रलेखा इति नामकरणं कृतवान् ।

सुवर्णरेखा — त्वयि सर्वमेतत् योग्यं युक्तं च भवति । लोके मूर्खः किंचित् अभ्यस्य तस्य कला जन्मतः संक्रामिता इति कथयन् आत्मानं महापुरुषं कर्तुं प्रयतते । इयं परिपाटिः लोके दृश्यते ।

चित्रलेखा — उषाया कथनमनुसृत्य चित्रमेतत् चित्रितं । किमयं जन्मतः संक्रामित संस्कार. न भवति ।

सुवर्णरेखा — बाल्ये केवलं जन्मान्तर वासनाः छायारूपेण व्यक्तिमत्वं प्रदर्शयन्ति । ताः वासनाः अभ्यासक्रमेण परिपूर्णाः भवन्ति । त्वयि इयमवस्था प्रत्यक्षं भवति ।

चित्रलेखा — भवत्या सत्यमुदीरितं । तथैव अत्र उषासुन्दरी विषयेऽपि पूर्वजन्मकृत वासनाः ता अनुधावन्ति, यतः एषा न कदापि अन्यं कमपि पुरुषं ददर्श अन्तःपुरवासिनी भूत्वा । तया स्वप्ने कोऽपि महानुभावः दृष्टः । तथ्यमयं पूर्वजन्मनि समधिगत संस्कार भावना विशेषः एव ।

सुवर्णरेखा — केचन पूर्वसंस्कार विशेषः इति न जानन्ति, किन्तु यत्

किमपि वृत्त इति मन्यते। केचन अवितर्कित पूर्वाऽपरविषयाः आकाशवाणी भूत्वा प्रतिगृहं गत्वा अप्रस्तुत प्रशंसा कुर्वन्ति जगति।

चित्रलेखा — ते मूर्खा इति मन्ये यतः।

असंस्कारवतां लोके। कथं संस्कारभावना।
जायते, तथ्यमेवास्ति। पुनर्जन्म धरातले॥

असूर्य पश्यायैषा कथं दिव्यपुरुषं अपश्यत् स्वप्ने। विचार्यमाणे सर्वमाश्चर्य भवति।

सुवर्णरेखा — भवत्या उषायाः स्वप्नानुगुण्यं चित्रनिर्माणं कृतमिति मे मतिः।

चित्रलेखा — यथा तया कथितं तद्वदेव प्रतिकृतिः विलिखिता।

सुवर्णरेखा — तथा यदि स्यात् तस्याः कामनाः परिपूर्णा भविष्यति। अधुना अहं उषायाः सकाशं गत्वा तस्याः प्रकृतिः कथं विद्यते इति विचारयेयं। भवती चित्रवाहिन्या सुस्मितया चित्रैः साकं उपासदनं समागच्छ। (इति गच्छति)

चित्रलेखा — (सर्वं चित्राणि एकत्र एकैकोपरि एकं निक्षिप्य हस्तप्रक्षाल्नं कर्तुं अन्तः प्रविशति)

सुस्मिता — देवि चित्रलेखे, इति आह्वयन्ती प्रविशति सुस्मिता, गच्छति च चित्र फलकाना समीपं)

चित्रलेखा — (प्रविश्य) हञ्जे सुस्मिते। त्वं समये प्रत्यागतासि। (इति वस्त्रखण्डेन हस्तौ मार्जयन्ती) त्वं अधुना सर्व चित्र चयं व्यवस्थितं रूपा निक्षिप। अधुना सर्वाणि चित्रफलकानि नेयानि उषा सदनं। एहि आवां गच्छावः [इति निष्क्रान्तौ]

[यवनिका पतति]

* * *

चतुर्थ दृश्यम्

(उषा सुवर्णरेखे सत्पन्यौ स्त)

सुवर्णरेखा — कथं विद्यते ते मानसिक बाधा।

उषा — तथैव विद्यते यथापूर्वं। नापशमिता बाधा। पदे पदे तदेव स्वप्न-चित्र समक्ष भवति।

सुवर्णरेखा — चित्रलेखा सुन्दर चित्राणि विलिखितवती आसीत्। अहं सर्वाणि चित्राणि अपश्यम्। ते अतीव सुन्दराणि मनोहराणि। त्वं तानि द्रक्ष्यसि।

(तत प्रविशति सुस्मिता चित्रफलकै)

सुस्मिता — अयि देवि सुवर्णरेखे चित्रलेखा चित्राणि विलिख्य मा आदिदेश अत्र फलकानि स्थापयितु। अपिच सा अनुपदमेव अत्रागमिष्यति।

सुवर्णरेखा — हा सुष्ठुकृतं भवत्या तत्र निक्षिप्य गम्यताम्।

सुस्मिता — तथैव। (इति निक्षिप्य गच्छति)

(तत प्रविशति चित्रलेखा)

चित्रलेखा — सखी उषे! कथ विद्यते ते मानसिक प्रवृत्ति।

उषा — सखि! मानसिक व्याधे नास्त्यौषधं लोके।

चित्रलेखा — अस्त्यौषधं अह दास्यामि ते।

सुवर्णरेखा — सत्य चित्रलेखा मानसिक व्याधि तज्ञा, चिकित्सका च मास्तु ते चिन्ता।

चित्रलेखा — उषे। अह तव व्याधि उपशमनार्थं अनेक औषध प्रक्रिया विधाय त्वत्सकाश मानीतास्मि पश्य। (इति चित्रबन्धनं विसृज्य एकैक चित्र तस्यै दर्शयितु प्रयतते) पश्यैतत् चित्र यदि ते मनानुरुप उत नहि। (इति एकं चित्र दर्शयति)

उषा — (दृष्ट्वा) एतन्नहि। (इति हस्तेन निराकरोति तत् चित्र)

चित्रलेखा — (नक चित्राणि दर्शयति)

उषा — एतानि सर्वाणि अननुकूलानि मे बाधा निवारणाय। (इति असतुष्टि प्रदर्शयति)

चित्रलेखा — सखि इमौ पश्य। (इति रामकृष्णौ दर्शयति)

उषा — (तौ दृष्ट्वा) एतौ पूज्यपादौ।

चित्रलेखा — एव पश्य। (इति प्रद्युम्न दर्शयति)

उषा — [दृष्ट्वा लज्जा भवति]

चित्रलेखा — उषे निमर्थमेव लज्जिता भवसि। एव पश्य। [इति अनिरुद्ध दर्शयति]

उषा — [ह्रिया अवाङमुखी भवति कथयति]

सोसावत्मनि सलग्न । मधुराधर दशक ।
त्यक्त्वा मा वृजिनारण्ये। गत स्वप्ने महीपति ।

[चित्रलेखा सुवर्णरेखा च परस्परं विलोकय साभिप्राय हसत]

चित्रलेखा — सखि उषे ! अह अनुपदमेव द्वारका गत्वा अनिरुद्ध यावे नात्रानयेयम्। भवती मा विचारयतु। त्वयासाक सुवर्णरेखा अवस्थास्यति।

उषा — सखि ! त्व मे प्रियसखी मनश्चित्रलेखा भवसि खलु।

चित्रलेखा — आवा चित्रसुवर्णे तव सख्यौ। [इति ता प्रसान्त्वयित्वा गच्छति]

[यवनिका पतति]

* * *

पंचमं दृश्यम्

[द्वारका नगरी तत्र सौधे अनिरुद्धः नन्दसारणसाम्बैः सार्कं द्यूतं खेलन् आस्ते।]

अनिरुद्धः — [अक्षान् कुरुयति] ओ पट्। एकं द्वे त्रीणि चत्वारि पञ्च पट् ! [इति अक्षं चालयति]

सारणः — अरे साम्ब ! पश्य अहं पञ्च दर्शयेयं। [इति अक्षान् कुरुयति] अहह साम्ब एकं द्वे त्रीणि चत्वारि पञ्च। [इति अक्षं चालयति]

नन्दः — [अक्षान् हस्ते चालयित्वा कुरुयति] यत् भणितं तत् जातं। [इति एकं द्वे इति अक्षं चालयति)

साम्बः — पश्य अहं चत्वारि दर्शयेयम्। (इति अक्षान् कुरुयति) एकं द्वे त्रीणि चत्वारि इति उक्त्वा। अक्षं चालयति)

अनिरुद्धः — (अक्षान् गृहीत्वा वेगेन हस्ते चालयति)

(ततः प्रविशति दौवारिकः)

दौवारिकः — (प्रविश्य) अयि देव ! चित्रलेखा नाग कन्यका तत्र भवतः दिदृक्षया द्वारि तिष्ठति।

अनिरुद्धः — अनुपदं प्रवेशय ताम्।

दौवारिकः — यथाज्ञापयति देवः। (इति प्रणम्य गच्छति)

अनिरुद्धः — अरे नंदसारणिसाम्बाः गच्छथ यूयं सर्वे। (सर्वे गच्छन्ति)

(ततः प्रविशति चित्रलेखा)

चित्रलेखा — अयि अनिरुद्ध देव ! शत प्रणामाः (इति नमस्करोति)

अनिरुद्ध — हो नमस्काराः। एहि सुन्दरि। कासित्वं।

चित्रलेखा — अहं चित्रलेखा। बाणस्य मन्त्रिणः कुम्भाण्डस्य पुत्री।

अनिरुद्धः — किमर्थमागतासि।

चित्रलेखा — कार्यमेकं साधयितुं समागतास्मि।

अनिरुद्ध — उपविशतु तत्र भवती।

चित्रलेखा — (उपविशति)

अनिरुद्ध — किं तत् करणीयं विद्यते निवेदय। अहं ते कार्यं साधयिष्यामि।

चित्रलेखा — अहं अतीव तुष्टास्मि।

अनिरुद्ध — चित्रलेखे त्वां दृष्ट्वा मे मनः आनन्द पारवश्यतां प्राप्नोति। कारणं नाहं जाने।

एकाकिनी त्वं खलु यौवनेऽसि। मत्तः प्रिये किं तव कार्यमस्ति।
वदस्व नूनं प्रियमाचरेयं। निर्भीक भावेन विशाललोचने।

चित्रलेखा — अयि भो न ते युक्तं मां सम्बोधितुं विशाललोचने इति।

अनिरुद्ध — कोऽयं अत्र दोषः।

चित्रलेखा — अदृष्टपूर्वां मां परिचित इव कथं एवं सम्बोधयसि।

अनिरुद्ध — सौन्दर्योपासकानां जगति सौन्दर्यवत्यः हृदयग्राहिकाः भवन्ति तत्र दोषो न कार्यः।

चित्रलेखा — भ्रमया भ्रमरो मा भवतु।

अनिरुद्ध — भवती भ्रमरी भूत्वा अत्रागतासि।

चित्रलेखा — भवान् अत्यन्तं सरसः अस्ति। शृणु।

यत्र ते हृदयं लग्नं। कामिनी यत्र चुम्बिता।
तत्रैव यानं योग्यं ते। सा ते हृदयसुन्दरी॥

अनिरुद्ध — चित्रलेखे। किं त्वं कथां कल्पयसि ते कविता सौन्दर्येण।

चित्रलेखा — अलं आश्चर्याभिनयेन।

अनिरुद्ध — भामिनि किमर्थमेवं कथयसि।

कुत्राऽहं कामिनी कुत्र। चुम्बनं तु विशेषतः।
किमेवं सर्वतो भ्रान्ति। प्रकल्पयसि सुन्दरि॥

मम सकाशे अमत्यस्य स्थान नहि।

चित्रलेखा — प्रभो अनिरुद्ध ! मयि क्रुद्धो मा भव।

पुरुषाः निर्भयं कृत्वा। कृत्याऽकृत्यमनारतं।
अज्ञाता इव शान्त्या ते। प्रवदन्तिच नीतयः॥

अनिरुद्धः — सुन्दरि चित्रलेखे। भवती भावोद्वेगेन किंवा किंवा प्रजल्पन्ती मा विमोहयसि।

चित्रलेखा — भवत कृत्य समालोच्य यथाविधा भणामि।

अनिरुद्धः — किमपराद्धं मया।

चित्रलेखा — कथयामि शृणु।

उषा नाम सखी स्वप्ने। चुम्बिता भवता भृश।
साचासील्लग्न चित्ता च। त्वयि भूप विचारय॥

अनिरुद्ध — (आश्चर्येण) मया उषानाम कन्या स्वप्ने चुम्बिता। इद आश्चर्याणा परमायतनम्। (इति उच्चैः हसति)

चित्रलेखा — देव ! सत्य ब्रवीमि। अत्र हसितस्य कारणं न विद्यते। अय आलोचनात्मकाश भवति।

अनिरुद्ध — चित्रलेखे। विचारणीया वराणिस्थिम्। अयं मन्निवेश परमानन्दस्याद्युत्तम नमावेश भवति।

सा धन्या सुन्दरी लोके। या स्वप्ने चुम्बिता प्रियं।
अनाज्ञातेन भूपेन। तदेतत्परमं सुखम्॥

चित्रलेखा — कथनीयं बहु विद्यते शृणोतु भवान्।

अनिरुद्ध. — कल्पनायं यत् चिन्तते ते तत् आसान्तं कथय।

चित्रलेखा — सा निद्राया उत्थाय कोऽसि क्वासि, क गतोऽसि इति निर्लज्जया अरोदीत्। भवानेव मम सख्याः तादृशावस्था कारक। तस्मात् त्वयाऽपराद्ध मम मरणं। अपराध परिहारार्थं समेतु भो इति मदीया विज्ञप्तिरियम्।

अनिरुद्ध — चित्रलेखे! सा मया अदृष्ट पूर्वा। कथमहमागमिष्यामि।

चित्रलेखा — देव! सा त्वां स्वप्ने ददर्श। तस्या सखी अहं त्वां पश्यामि भवानपि तां अधुना द्रक्ष्यति।

अनिरुद्ध — उषाया स्वप्नसुन्दरोऽहं इति भवती कथं जानाति।

चित्रलेखा — भो शृणु।

उषा त्वां वर्णयामास। त्वदीयं रूपसम्पदं।
तदुचितमनुसृत्यैव। चित्रं ते लिखितं मया॥

अनिरुद्ध — चित्रलेखे। मे हृदयं सत्यं रसनिस्तुलं भवति। इयं घटना परमानन्ददायिना भवति। एतावत्पर्यन्तं ईदृशी घटना मया न श्रुता। विचार्यमाणे इयं बहु रसनिर्भरा भवति।

कविता वनिता चैव। स्वातन्त्र्येण विनिसृते।
रसाधिक्यं प्रकुर्वाते। काव्यं हृदयमेवच॥

चित्रलेखा — अनिरुद्ध! त्वमेव उषा पति एहि मया सार्धं। अपिच युवयो समागम स्वप्न मनात परम्परयिषाय। प्रभो शोणित पुरं निर्भयमहं मम योग विद्यया त्वां नेष्यामि तत्र प्रियाया सकाशम्।

अनिरुद्ध — चित्रलेखे! शृणु।

यदि कन्या विनाऽयासं। वशं याति सलक्षणा।
यथेच्छमनु भोक्तव्या। सत्यं रसिक लक्षणम्॥

चित्रलेखा — अयमेव आदर्शपूर्णं दाम्पत्यभाव।

अनिरुद्धः — अयि सुन्दरि। आगच्छेरम् मार्गमादिशतु भवती।

चित्रलेखा — मार्गमादिशाम्यहं। प्रथमतः भवता किं कर्तव्यं तत् भवान् शृणोतु।

अनिरुद्धः — कथयतु भवती।

चित्रलेखा — प्रभो अहं गृहस्यान्तर्भागं गत्वा तस्यै उषायै कथयेय यत् वृत्तं तदुदन्तजातं सर्वमपि. भवान् बहिः तत्रैव स्थित्वा, यदा उषा एकाकी भूत्वा, विरहवेदना असहन्ती त्वां निन्दंती रोदितुं प्रारभते. तदा यथासंदर्भं प्रविशतु।

अनिरुद्धः — साधि मा चित्रलेखे।

चित्रलेखा — मे यत्नः फलोन्मुखः भवति। धन्योस्म्यहं। भवान् मामनुसरतु। (इति द्वावपि गच्छतः)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(उषा एकान्ते उपविश्य अनिरुद्धस्य चित्रफलकं गृहीत्वा गायन्ती आस्ते)

(भीमपलास रागे)

आयाता मधुर मधु यामिनी। मुग्ध वधूजन जीवनदायिनी।
मलयानिल चन्चल गामिनी। मधुमय जीवित वसन्त नामिनी॥ १

चिरयति मे जीवन वसन्त दाता। अभिनव यौवन मद संभारिता।
रसमय प्रियतम पदसंगीता। वल्लभ प्रतिकृति दर्शन रमिता॥ २

निन्दति स्वान्तं रन्जित सन्ध्यारागं। शतथा मन्जुल गन्धिल कुसुम परागं।
मधुरं गायति प्रियतम मोहन रागं। प्रथयति लोके प्रेम लतानुरागम्॥ ३

पराभृत विरुतं कुरुते हृदयं। पतिविरहित जनमनुरागमयं।
कर्षति चापं मुन्चति शर निचयं। अबलाजन हृदयमदय मदनोऽयम्॥ ४

(गीतान्ते प्रविशति चित्रलेखा)

उषा — चित्रलेखा विलोक्य सन्तोषेण) सखि चित्रलेखे त्वमागतोऽसि! सखि किं सः दृष्ट ।

चित्रलेखा — (उषायाः हस्तौ गृहीत्वा सानन्दं) सखि उषे सः दृष्टः।

उषा — सखि सः किमवदत्।

चित्रलेखा — न किञ्चिदप्यकथयत्।

उषा — न किमप्यकथयत्।

चित्रलेखा — सः उदन्तमेनत् श्रुत्वा क्रुद्धो बभूव।

उषा — किमर्थं क्रुद्ध ।

चित्रलेखा — भवती तस्मै अधरं पानमेव दत्तवतीति।

उषा — सः कथं जानाति अधरं पानं दत्तं मया इति।

चित्रलेखा — सोऽपि स्वप्ने त्वामपश्यत्। (इति हसति)

उषा — त्वं असत्यं वदसि।

चित्रलेखा — नहि। मया परिहासपूर्वकं जल्पितं।

उषा — भवतु नाम। अधरपान दान विषये न मे दोषः विद्यते। अहं न किमपि जानामि तत एवं स्वप्ने सः मां दोर्भ्यां गाढमालिङ्गय बहुवारं अधरं निपीड्य चुचुम्ब इति।

चित्रलेखा — त्वदीय शरीर लावण्यमय सम्पत् बाहुबन्धने गर्भीकृत्य अनुसरिति मन्ये।

उषा — मम शरीर सम्पदानार्थे मानसमपि चोरयामास।

चित्रलेखा — (विहस्य) एतत् सर्वं नोक्तं भवत्या सविस्तरं।

उषा — तस्मै त्वया न विपुलीकृतोऽयं वृत्तान्तः?

चित्रलेखा — एतत् सर्वं अहं न जानामि। भवत्या नोक्तं सविस्तरम्?

उषा — तर्हि त्वं किमवोचः।

चित्रलेखा — मे सखी न केवलं स्वप्नसुन्दरी परन्तु सा सुरसुन्दरी तव हृदय सुन्दरी। भवता सा प्रत्यक्षी कर्तव्या इति ममाभिप्रायः इत्येवमुक्तं मया।

उषा — (सकुतूहलं) सः कीदृशः सखी।

चित्रलेखा — त्वया कथित वर्णनानुसारं विद्यते सः।

उषा — अपिच।

चित्रलेखा — उषे! अतीव सुन्दरोऽयम्।

उषा — (सकुतूहलं) ततस्ततः।

चित्रलेखा — व्यूढोरस्कः।

उषा — ततस्ततः।

चित्रलेखा — बलवान्।

उषा — हा ततस्ततः।

चित्रलेखा — महाभुजः। श्यामः। सः मया सार्धं किमपि किमपि भाषमाणः तस्थौ। कथं कालः व्यरंसीत् आवां न ज्ञातवन्तौ।

उषा — सखि त्वं मदर्थं अतीव मुदिताऽसि।

चित्रलेखा — परार्थं मर्दनं सुखतमं भवति। तस्य रूपं मनसः अपाकर्तुं अशक्यं भवति, यतः शृणु।

मधुर मधुर भाषी शब्दतत्त्वार्थ धीमान्।
मधुर गुण समेतो मन्मथो नैवचान्यः।
जलधर समकायः पूर्ण राशिव्य मूर्तिः।
सुहसित वदनेन्दुः सौम्यभावोऽनिरुद्धः॥

उषा — (सानन्दम्) हे सखि त्व मदर्थे बहु कष्ट भजसे।

चित्रलेखा — नास्ति मे कश्चिदपि क्लेश किन्तु तव कष्ट मे असह्य वेदनं भवति।

उषा — त्वं मम सखी खलु तस्मात् एव वदसि।

चित्रलेखा — सखि त्व अधुना वासक सज्जिका भूत्वा शयनमन्दिर केलीगृहं आत्मान च मुहुर्मुहु मण्डयन्ती काले निरीक्षस्व। स आगमिष्यति तेन सार्धं तव समागम भविष्यति। मा चिन्ता कुरु स सकाल त्वा समेष्यति। शुभयामिनी भवतु ते। अहं गच्छामि। इति गच्छति)

(तत प्रविशति सुवर्णरेखा)

सुवर्णरेखा — सखि उषे!

विचित्र पुष्पाणि मनोहराणि। सुगध माल्यानि च लेपनानि।
एलाश्च ताम्बूल लवङग पूगाः। समाहृताः पश्य नताङिग तुभ्यम्॥

सखि उषे। चित्रलेखा मा जगाद यत् अद्यैव त हृदयाधि देव अनिरुद्ध समागमिष्यति इति। तस्मात् भवता यथोचितं हावभाव विलास हासल्लिये त आमानन्द करोतु। सुख भूयात्। शुभ रात्रि। (इति धच्छति)

उषा — (एकान्ते शयने उपविश्य कामे विचरन्ता जोगिया रागे गायति)

गीतम्

एहि प्रिय। पाहि प्रिय।
स्मर सगर कामी। वनिताऽवनगामी॥

मधुराधर पाई। गाढाऽलिङगन दायी।
निरत सगमलग्ना। निभृत कामे मग्ना॥

मामलिङ्गय तोषय मदन। गाढ चुम्बतु सरोज वदन।
मम पृथुल नितम्ब भरेण। तारय काम सतोषेण॥

प्रिय। अहं बालक सज्जिकाऽभवम्। अहं प्रति क्षणं त्वदागमन निरीक्षन्ती केलीगृहं तथा आत्मानं च अलङ्कुर्वन्ती भवन्तमानेतुं सखीं प्रेषयम्। सखी भवतः सन्देश मानीय प्रतिनिवृत्ता किन्तु भवान् न समागतवान्। अहं विभावानुभावैः मथितान्त रङ्गिणी भवामि। न ते हृदयं यथा मम भवति तथा? प्रभो भवान् स्वप्ने दृष्टोऽस्ति। अह प्रत्यक्षं त्वा दिदृक्षामि। नतरं गाढं मा ते बाहुबन्धनदोलाया प्रमान्त्वय।

रात्रिं दिवं मे हृदयं त्वदीयं। रूपं च चेष्टां सततं व्यनवित।
सेहे न बाधां कुसुमायुधस्य। किमर्थमेवं प्रविलंबसे प्रिय॥

अपिच।

अङ्गनासु सदाऽनङ्गः। निर्दयः क्रूर सायकः।
रत्वा त्वया प्रियं चाहं। तर्पयिष्यामि मन्मथम्॥

प्रिय! आलस्ये अमृतमपि विषं भविष्यति। (इति शयनमन्दिरे शयने मदनरेखेव तनुलता निक्षिप्य विचारयन्ती आस्ते)

अनिरुद्धः — (एकस्मात् कोणात् प्रविश्य ता पश्यन्) (आत्मगतम्) युवतीना विलासाः कुमारस्थासु शरन्नयः इव रमणीयाः चित्ताकर्षका भवन्ति। अत्रैव स्थित्वा अहं निरीक्षे। (इति तत्रैव पश्यन् तिष्ठति)

उषा — (शरीरोत्सारण जृम्भणं च कृत्वा) अहो निरीक्षणमेतत् हृदयविदारक भवति। कुसुमायुधः क्रूरः भवति। प्रभो

गच्छाम्यहं काल कृतान्त गेहं। पृच्छाम्यहं त्वां तव पादपीठम्।
जीवामि नाहं भवता विना च। प्राणेश तुभ्यं शतधा नमांसि॥

(इति शयने इतस्तत लुठति)

अनिरुद्धः — (प्रविश्य)

आगतोऽस्मि प्रिये मास्तु । चिन्ता सौख्य विनाशिनी ।
इतः परं सदाऽनन्दे । तारयिष्यामि मा शुचः ॥

(इति तस्या समीप गत्वा) प्रिये ।

अन्योन्यालम्बनेनैव । जीवितं सरसं सदा ।
आधाराधेय रूपेण । सर्वं चलति मानिनि ॥

(इति ता आलिङ्गितुं गच्छति)

(यवनिका पतति)

* * *

॥ इन्द्राय-स्वाहा ॥

सर्वं भूतेषु तल्लीनं । सृष्टिस्थिति लयालयम् ।
सौरंमहः सदा भक्त्या । वन्दे चैतन्यकं महत् ॥

(नान्यन्ते)

सूत्रधारः — तत्र भवन्तः रसिकाः कलाभिमानिनः अद्य वयं इन्द्राय-स्वाहा नाम नाटकं प्रदर्शयितुं समुत्सुकास्मः।

नटी — (प्रविश्य) आर्य ! नाटक प्रदर्शनार्थं रङ्गमञ्चः यथोचितं यथोक्तं समलङ्कृतः विद्यते । समारम्भोयं उपक्रम्यताम् ।

सूत्रधारः — तिष्ठतावत् किञ्चित् कालं ।

नटी — किमर्थं विलम्ब्यते ।

सूत्रधारः — प्रथमतः कविपरिचयः कार्यः ।

नटी — सविस्तरं कथय ।

सूत्रधारः — अयं कविः सर्वतोमुख साहित्यसृष्टिं विधाय विंशतितम शताब्दे गीर्वाणभारती प्रजाभारती चक्रे ।

नटी — कथमयं प्राचीन कथावस्तु केवलं विलिखितवान् ।

सूत्रधारः — अस्ति कारणम् । यतः ।

प्राचीनं शाश्वतं सत्यं । नवीनं हृदयङ्गमम् ।
ततः प्राच्य कथावस्तु । नावीन्ये रचितं प्रियम् ॥

नटी — अयं कविः प्राचीननवीनसङ्गमं कृतवान् किं ?

सूत्रधार — अय प्रात्रान नवान साम्प्रदाय मेळन सतुल्य नात । अग भारतीय परम्पराक मस्कृत भाषाभिमानी च ।

नटी — अस्मिन् सासस्र त्रिशतितमे गता दे पत्रपत्र स्थितनारविन्दरवि चारन यारयन् गाराणगाणासवारना नान अय करि । तस्मादह वह प्रमुदितास्मि। कर्तव्यमा स्मरता देव ।

सूत्रधार — रसिकान् प्रतापयितु किश्चित् गीयत म् ।

नटी — आग । एन्त् गायनस्य स्थान भवति ।

सूत्रधार — हम। त्व न नानासि। अयमव याम्य कार यत प्रयूर पवनान्कुरा मन्द मन्द प्रवहन्ति।

नटी — अधुना मूगपत्र कण प्रसुप्त आस्त। तस्मात् अय कार याय नहि । मत्यगानन तस्य निद्राभङग भावष्यति ।

सूत्रधार — प्रिये अयमेव पवित्रकार यत कणस्य पिता दासचन्द्र ममतरग स्थाविप्रित लार्क भवितु समायाति।

नटी — हा सत्यमेव। क विषयमुद्दिश्य केन रागेण गातव्यम्?

सूत्रधार — भूपाल रागे कण प्रबोधयन्ता सूर स्तुव ता गायस्व।

नटी — श्रृण्वन्तु भवन्त ।

निद्रोत्थिता सर्वदिशश्च सूर्य । विलोक्य सप्ताश्व रथोपरिस्थम् ।
महोज्ज्वलं तस्य हिरण्यरश्मि । प्रक्षालिता भान्ति तनुप्रकाश ॥

सूत्रधार — अहो ते कविता सौन्दर्य गान माधुर्य च अपरूप अद्वितीयम् भवत ।

नटी — आम। सूर्य क्षिप्र विमपति गगनमण्डल एहि वर्णायतु मन्नो भवत। (इति गच्छत)

(नेपथ्याया कण स्वपित मग तस्य पार्श्वनिवी तिष्ठति)

कण — (मनभ्रम त्याग अक्षिणा प्रमाय) कोऽसि भवान्।

सूर्यः — अहं आदित्योऽस्मि।

कर्णः — (सहसोत्थाय) भगवन् ज्योतिषाम्पते अभिवादयेऽहम्। (इति नमस्करोति। उपविष्टुं पीठं ददाति सूर्यः उपविशति)

नमस्ते देवदेवेश। कर्मसाक्षी त्रयीतनो।
किमर्थमागतोसित्वं। नाकलोकात् प्रियं भण॥

सूर्य. — (विहस्य अपि कुशलं ते।

कर्ण. — अयि तेजस्विन्। आरोग्यक्षेम कल्याण कारकेण भवता सर्व लोकोऽयं चाल्यते पालनं क्रियते। अनामयं किमुत मद्विषये।

सूर्य — कर्ण! त्वं न जानासि ममागमन कारणम्।

कर्ण. — भगवन्। महोजसा युष्मादृशाना भावना, अस्मादृशाना लौकिकाना कथमनुमेया भवति)

सूर्यः — हृद्गत भावना प्रकटयितुमेव समागतोऽस्मि।

कर्णः — अहं सन्नद्धोऽस्मि कथयतु भवान्।

सूर्यः — कर्ण। शृणु ते जन्मरहस्यम्।

कर्णः — जन्म सहजं भवति। रहस्यं किं विद्यतेऽत्र।

सूर्यः — अस्ति।

कर्णः — लौकिकाना अविदितं अलौकिकाना विदितं भवति।

सूर्यः — कर्ण शृणु, त्वं मे सुतः असि।

कर्णः — अहं, कथं तव सुतः, महाभाग।

सूर्यः —, कर्ण! सौहृदादहं ब्रवीमि शृणु।

कर्णः — अवहितोऽस्मि भगवन्।

सूर्यः — एकदा दुर्वासाः कुन्तिभोज गृहं समायातः।

कर्णः — परिव्राजकाना अयं सहजः।

सूर्यः — भोजकन्या कुन्ती दुर्वासं मुनिं भक्त्या पूजयामास।

कर्णः — भगिनीयाना विशेषेण स्त्रीणां मुनिपूजनं योग्यः। ततस्ततः।

सूर्यः — स मुनिः तुष्टः तस्यै सूर्यमन्त्रं उपदिष्टवान्।

कर्णः — साधुकृतम्। ततस्ततः।

सूर्यः — गङ्गायां स्नास्यन्ती कुन्तीकन्या चापल्यात् अरुणं गभस्तिबिम्बं प्रार्थयामास। तेन मन्त्रोच्चारणेन अहं तस्याः सकाशं समागतः आसम्।

कर्णः — ततस्ततः।

सूर्यः — तदा तस्यै पुत्रदानमकरवम्। स एव पुत्रः त्वं मदीयः।

कर्णः — भगवन्। त्वदीय वदनारविन्दात् निसृतां छन्दोमयीं वाणीं श्रुत्वा मे महदाश्चर्यम्।

सूर्यः — सर्वमेतत् सत्यम्। तस्मात् त्वं कानीनः।

कर्णः — भगवन्। ज्ञातमधुना मया मे जन्मवृत्तान्तविशेषः। अधुनात्रागमन प्रयोजनं किम्।

सूर्यः — शृणु। पुत्रप्रेम्णा कथयामि।

कर्णः — निवेदयतु भवान्।

सूर्यः — शक्रः त्वां वञ्चयितुं समागमिष्यति।

कर्णः — मां वञ्चयितुं? मां वञ्चयित्वा शक्रः किं प्राप्स्यति।

सूर्यः — शृणु!

उपयास्यति शक्रस्त्वां। पाण्डवानां हितेप्सया।
ब्राह्मणच्छद्मना प्राप्तुं। भवतः कर्णकुण्डलौ॥

कर्णः — शक्रः मां याचितुं कर्णकुण्डलौ आगच्छति?

सूर्यः — हां शक्रः।

कर्णः — अहो मे भाग्यम्।

सूर्यः — तथा मावद त्व न जानासि।

कर्णः — एतत् मे भाग्य जानामि।

सूर्यः — एतत् ते भाग्य नहि।

कर्णः — कथ नहि

सूर्य. — एतत् ते दौर्भाग्य अस्ति।

कर्णः — कथम्।

सूर्य. — कर्ण। ते दौर्बल्य त्वं न जानासि।

कर्ण. — किं तत् दौर्बल्यम्।

सूर्य· — त्व तव दानगुणेन मृत्यु क्रीणासि

कर्णः — तत् कथम्।

सूर्य· — शृणु।

तवशीलं विदितं सर्वैः। याचसे नत्वं कदापि च।
किन्तु त्वं भिक्षितः सद्भिः। ददास्येव सदा प्रियम्॥

एवविध त्वा ज्ञात्वा, स्वय पाकशासनः
कुण्डलार्थाय कवच चैव भिक्षितु आगन्ता।

कर्ण — यदि एतत् सत्य भवति तर्हि।

धन्योऽस्मि जातः खलु भूतलेस्मिन्। सान्तत्य दानेन महोसुराणाम्।
क्रीणामि सत्यं बहुपुण्य राशि। अतः प्रियं किं भवतीह देव॥

भगवन् लोके याचन दान च सहजातौ। तौ अन्योन्याश्रयौ भवतः।

सूर्यः — तस्मादह वच्मि त्वया तस्मै प्रयाचनाय कुण्डले न देये।

कर्ण. — किमस्ति दोष· अत्र।

सूर्यः — विद्यतेऽत्र दोपः। तात्त कुण्डलार्थं ब्रुवन्। अन्यैः बहुविधैः वित्तैः त्वा शक्रः विमोहयिष्यति। त्वचा सः निवार्यः।

कर्ण – ततस्तत ।

सूर्य – रत्नैः स्त्रीभि स्तथागोभिः । बहुधैः सकलैर्धनैः ।
कुण्डलेप्सुः समायाति । कर्ण त्वां मघवा ध्रुवम् ॥

कर्ण – ततस्तत ।

सूर्य – यदि दास्यसि कर्ण त्वं । सहजे कुण्डले शुभे ।
क्षीणायुः सपदंगत्वा । मृत्योर्वशमवाप्स्यसि ॥

कर्ण – आश्चर्यमेतत् ।

सूर्य – कर्ण कवच कुण्डलाश्या समायुक्त त्व रणे अरीणा अवध्यः भविष्यसि । मम वच विद्धि ।

कर्ण – किं कर्तव्यम् ।

सूर्य – तस्यात् कर्ण ते जीवितम् प्रिय चेत् तत् जीवित त्वया रक्ष्यम् ।

कर्ण – भगवन् सूर्य । अहृ ते प्रिय अस्मि । किन्तु अस्मात् व्रतात् न निवार्य अह । इद मे भाग्य जानामि ।

अत परं नास्ति वृहत्तमं भुवि । यतः स्वयं सो मघवाभ्युपेत्य मां ।
लघुश्च भूत्वा मम सन्निधौ प्रियं । नतो ह्रिया वस्तुचयं प्रयाचते ॥

सूर्य – पुत्र, एव मा भण ।

कर्ण – भगवन् अनेन जीवितेन लोके कीर्ति वृणोमि ।

सूर्य – कीर्तिमान् लोके किं अश्नुते ।

कर्ण – भगवन् । कीर्तिमान् स्वर्गं अश्नुते । हीनकीर्ति नश्यति । कीर्ति मातृवत् लोके पुरुष सजीवयति । नरस्य कीर्ति. आयु । कीर्तिः परलोके पुरुषस्य परायण भवति ।

सूर्य – कीर्त्या ते किं भवति ।

कर्ण – कीर्तिः आयुर्विवर्धिनी भवति । तस्मादह शरीरजे ब्राह्मणेश्य

दत्वा शाश्वतीं कीर्ति प्राप्स्यामि ।

जित्वा परान् गर्वपरान् प्रकामं । हुत्वा शरीरं परवीरयुद्धे ।
प्राप्स्यामि लोके विमलां प्रसिद्धिं । आचन्द्र तारार्कमनन्य कीर्तिम् ॥

जीवितेनापि मे कीर्तिः रक्ष्या । तत् मे व्रतं विद्धि । अहं मघवते भिक्षां दत्वा देवलोके परां गतिं गमिष्यामि ।

सूर्यः — (स्मितंकृत्वा) कर्ण । कीर्तिः पुरुषस्य जीवित साध्वी भवति । मृतस्य कीर्त्या किं कार्यम् । मृतः कीर्ति न जानीते । जीवन् कीर्ति नसमश्नुते । मृतस्य मर्त्यस्य कीर्तिः गतायुषः माला इव भाति ।

कर्तव्यः परमो धर्मः । धर्मान्नान्योऽस्ति भूतले ।
कानीन त्वं विजानीहि । काकीर्तिः किन्तु शाश्वतम् ॥

कर्ण. — भगवन् त्वं मां विलोभयसि भवदीय मायावादेन.।

सूर्य. — कर्ण न विलोभयामि । किन्तु सत्यं कथयामि ।

कर्णः — अहमपि सत्यं कथयामि मार्ताण्ड ।

सूर्यः — कन्यकाजात । अत्र विद्यते किञ्चित् देवनिर्मितम् । देवगृह्यं त्वया ज्ञातुं नशक्यं । तस्मात् ते गुह्यं नाख्यामि । तत् भवान् काले वेत्स्यति ।

कर्णः — भगवन् । भवान् सर्वशक्तिमान् । किं एवं ब्रवीति ।

सूर्य. — महाद्युते । त्वं कुण्डलाभ्यां शोभसे । भिक्षिते वज्रपाणौ ते कुण्डलौ न दातव्यौ । कर्ण, पुरन्दरस्य वृद्धिं त्वं अपनुद ।

कर्णः — एवं करणं न मे शक्यं भवति ।

सूर्यः — त्वं नित्यं सव्यसाचिना स्पर्धसे । इह युधि शूरः सव्यसाची त्वया समेष्यति ।

कर्णः — युधि कवच कुण्डलैः किं प्रयोजनम् ।

सूर्य. — कवच कुण्डलैः किं प्रयोजनं इति ब्रूते श्रृणु ।

कुण्डलान्वित वीर त्वा । इन्द्रोवा फल्गुनोऽपिवा ।
नशक्तो युधि जेतु च । तस्मात् देयौ नते सुत ॥

मे हित वाक्यान्यतानि त्व श्रृणु ।

कर्ण – तिग्माशो । मा त्व रक्षितु प्रयतसे । नकापि भीति विद्यते मे ।

रणेऽर्जुन विजेष्यामि । भीतिर्नास्ति ममाहवात् ।
बिभ्येहृ अनृतान्नित्य । किन्तु मृत्योर्नहि प्रभो ।

सूर्य – भवान अरीन कथ जष्यति ।

कर्ण – भवान न जानाति । ममास्ति खलु महत अस्त्रवल यत उगात्त द्रोणात् जामदग्न्याच्च । इद्र अनजानोहि सुरश्रष्ठ । भिक्षते वज्रपाणो आत्मन जोवितमपि दद्या इद ममव्रतम् ।

सूर्य – कर्ण । त्व मम वाक्य तृणोकरोपि । तत सवथा सत्य भाति । यत ।

सप्राप्ते मृत्यु कालेतु । बुद्धिनाशो भविष्यति ।
हितमप्यहित भाति । मित्र शत्रुर्भवत्यहो ॥

तात ! यदि वज्रिण कुण्डले ददासि त्व युद्ध अर्जुनेन अवश्य विनाश प्रापित भविष्यसि । तदथमेव दानव सूदन ते कुण्डले जिहीर्षति । यदि त्व कुण्डले वम दास्यसि तर्हि अमित्र निबर्हिणी शक्ति अमोघा म देहीति पुरदर अभ्यर्थय । एन उपाय त कथयाम्यहम् ।

कर्ण – साधूक्त भवता भगवन् ।

सूर्य – एतादृशेन भावेन । यदि त्व कर्णकुण्डले ।
दद्या शक्राय युद्धेऽस्मिन् । तया शत्रून् हनिष्यसि ॥

कर्ण – अभिवादय गभस्तिमान ।

सूर्य – भद्र ते भवतु । (इति गच्छति)

कर्ण – (आत्मगतम्) इन्द्राय कवचकुण्डलानि दत्वा तस्मात् शक्ति प्राप्य तया अर्जुन हनिष्यामि (इतिगच्छति)

(यवनिकापतति)

द्वितीयं दृश्यम्

(एकाकी शय्यायां उपविश्य आत्मगतम्)

कर्णः — अहो लोकान्धकारः भगवान् सूर्यः पुत्रप्रेम्णा मे समक्षं समागत्य सर्वं सविस्तरं उपदिष्टवान्। धर्मस्तु बलवत्तरः। देशप्रतिष्ठा गौरवञ्च धर्मे प्रतिष्ठितौ। यदि महारथिनः धर्मभ्रष्टं कुर्युः तर्हि भव्यं भारतं अस्मान् विनिन्दिष्यति। तत् अयोग्यं भवति। जय मरणं वा कारः किन्तु देशप्रतिष्ठा शाश्वती भवति। स्वार्थाय देशगौरवं नाशयितुं अहमसमर्थः। धर्माद्भिन्नं न कर्तव्यं इति कृत निश्चयोऽहं। त्यागेन यशस्वी भवेयम्। त्यागेन अनश्वररूपा कीर्ति लभेयम्। क कोऽत्र भोः। (इति आह्वयति)

प्रतीहारी — (शस्त्रपाणिः प्रविश्य) अहमस्मि आज्ञापयतु महाराज। (इति नतमस्तकः भवति)

कर्णः — मे सारथि शल्य आह्वय।

प्रतीहारी — यथाज्ञापयति भवान्। (इति नत्वा गच्छति ततः प्रविशति शल्यः)

शल्यः — महाराज नमामि। (इति नमस्करोति)

कर्णः — एहि सारथे। उपविश। (इति पीठं ददाति। शल्यः उपविशति पीठे)

शल्यः — महाराज ? को विशेषः विद्यते, अद्य प्रभाते केवल आहूतोऽस्मि।

कर्णः — अस्ति विशेष।

शल्यः — कथयतु।

कर्णः — शृणु।

शल्यः — अवहितोऽस्मि।

कर्णः — अद्य प्रभाते अधुना भगवान् सूर्यः मे समक्षं समागत्य जन्मरहस्यं कथयित्वा गतवान्।

शल्यः — अप्यस्ति जन्मविशेषः ?

कर्ण — अस्ति।

शल्य — महापुरुषास्सर्वे विशेष जन्मान ।

कर्ण — सत्यमेव सर्वोऽपि जानाति जन्मनाऽहं कवचकुण्डलैः समन्वित इति।

शल्य — सर्वोऽपि जानाति।

कर्ण — कवचकुण्डलौ मम जीवन रक्षकौ इति सूर्येण प्रबोधित ।

शल्य — विषयमेनं श्रुत्वा मे महदानन्द भवति यत भवान् शस्त्रास्त्र सम्पत् परिभूषित , अपिच जीवन रक्षके कवचकुण्डलै परिपूर्ण इति।

कर्ण — सत्य ब्रवीति भवान्। जामदग्न्यात् बहु शस्त्रसम्पद प्राप्तोऽस्मि। द्रोणाचार्य शिष्यत्वे बहु शस्त्रसम्पद प्राप्तवानस्मि।

शल्य — भवान् अधुना पाण्डव जेता भविष्यति।

कर्ण — नास्ति सशयलेश । अहं त्वदीय सारथ्येन मम शस्त्रास्त्र बलेन अमूभ्य कवचकुण्डल अवश्य पाण्डव जेता भविष्यामि।

शल्य — वयं भद्राणि द्रक्ष्याम ।

कर्ण — अह मे आप्त मित्राय सुयोधनचक्रवर्तिने समस्त धरावलय जित्वा उपायनमिव दास्यामि।

शल्य — महाराज! प्रफुल्लितेयं भावना। भवता मनोरथसिद्धि अवश्य भविता। कुरुवृद्ध पितामह तथा शरतल्पगत अभूत्। गुरु द्रोण तथा व्यापादित। एतावत्पर्यंतं महाभारत युद्धे पञ्चदश दिवसा व्यतीता भीष्मद्रोण सेनाधिपत्ये। तद नन्तर याग्य सेनाधिपति भवानेव।

कर्ण — शल्य। तव सारथ्येन मम शस्त्रास्त्र सम्पदा यत् भीष्मद्रोणाभ्या न साधित तदह साधयिष्यामि।

शल्य — भवान् अवश्य साधयिष्यति।

कर्ण — मे मित्र सुयोधन समस्त धरातलस्य शासक भविष्यति। मद्भाग्य नन्तर म अनुकूल समय सम्प्राप्त ।

शल्यः — अवश्यं भवान् पाण्डवजेता भविता।

कर्णः — अहं एतावत्पर्यन्त मम त्यागेन दानेन लोकप्रसिद्धः अभवम्। इतः परं अयं कर्ण. अर्जुन जेता इति प्रख्याति प्राप्स्यति।

शल्य. — भवत' वदनारविन्दात् प्रसृतं वाक्चयं श्रुत्वा अहं प्रफुल्लितः भवामि।

कर्णः — अत्र विद्यते किञ्चित् अधर्मप्रवृत्तिः।

शल्यः — केयं प्रवृत्ति.।

कर्णः — मदीय शस्त्रास्त्रबलं कवचकुण्डलानि विलोक्य शक्रः ईर्ष्यायुतः भूत्वा ब्राह्मणरूपे अभ्यर्थयितुं आगमिष्यति। त्वं तस्मै मायच्छ इति च जगाद भगवान् सूर्यः।

शल्य. — भवान् मा यच्छतु।

कर्ण. — तत् कथं भविष्यति। यदि सः आगत्य ब्राह्मणवेषे मामभ्यर्थयति अवश्य दातव्यं अस्ति।

शल्यः — अहं वच्मि, भवान् विना च कवचकुण्डलानि अन्यत् दास्यमीति प्रार्थयतु।

कर्णः — तथा कथन कर्णस्य शोभा नावहति।

शल्यः — असत्य भाषण पापं न भवति।

कर्णः — तथा मावद।

शल्यः — प्राणावसान समये असत्यभाषणं पाप न भवति इति शास्त्र प्रमाणम्।

कर्णः — स्वार्थाय असत्यभाषणं पापमेव भवति।

शल्यः — राजतन्त्रे पापकर्म किं पुण्यकर्म किम्।

कर्ण. — स्वार्थाय साधयित्वा जना. चिरजीविनः भविष्यति किम्।

शल्य. — नहि। किन्तु अन्ततः सर्वमपि शून्यं भवति।

कर्ण. — तस्मात् अकीर्तिकरं कर्तुं नोत्सहे।

शल्य — का कीर्ति । का अकीर्ति । द्वावपि दिवारात्र रूपौ । अत्रैवं आभासा केवलं । द्वावपि वस्तुत अभिन्नौ ।

कर्ण — शल्य त्व न जानासि धर्म । युद्ध अधर्म अयोग्य क्षत्रियस्य ।

शल्य — तर्हि भवान् कवचकुण्डलानि दित्सति ।

कर्ण — यदि वृत्र ब्राह्मणरूपे आगत्य मे कवचकुण्डलानि अर्थ्यापयते, तर्हि प्रत्याम्नायं अन्यत् दातुं प्रयतिष्ये । यदि हठेन कवच कुण्डलानि पृ छति तर्हि तानि तस्म दत्वा तस्मात् अमोघा शक्ति प्राप्स्यामि ।

शल्य — तथा यदि क्रियते तर्हि पर्यवसान सुखमयं भवति । अधुना भवान् कौरवसेना समुद्रवेला परिपालन महामहीधर अस्ति ।

कर्ण — (सगर्व) भवान् रथं सज्जीकुरुष्व । गच्छ । अहं सन्नद्धाभूत्वा आगच्छामि ।

शल्य — नमस्ते महाराज । शुभं भूयात् । (इति गच्छति)

कर्ण — (आत्मगतम्) अह अधुना कौरवसेना समुद्रवेला परिपालन महामहीधर नरपति । मदीय सेनाधिपत्ये महाभारत संग्राम कर्तव्य इत परम् । यदि प्रथमत अर्जुन जेष्यामि तर्हि महाभारत युद्धं अवसित प्राय भविष्यति । भवतु धर्मस्तु अत्यत्तर । यत् भाव्य तत् भवति । कालाय तस्मै नम । (इति गच्छति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(युद्ध सरम्भ भवति । पणवपटहकाहळशङ्खाना नाद। दिगन्तराळ बधिरयन्ति । तत प्रविशति सारथिना शल्येन सहित महारथी कर्ण । अश्वाना खुरनादा शल्यस्य अश्वचोदन कण्ठरावा श्रूयन्ते)

कर्णः – शल्य ! यत्र अर्जुनः तत्र मे रथ स्थापय ।

शल्यः – यथाज्ञापति भवान् ।

(नेपथ्ये)

(भवान् भिक्षा ददातु) (इति ब्राह्मणकण्ठ स्वरः श्रूयते)

कर्णः – कथमत्र संग्राममूर्ध्नि याचकस्याविर्भावः ।

ब्राह्मण. – (नेपथ्ये) महत्तरा भिक्षायाचे ।

कर्णः – शल्य ! यत्र अर्जुन. अस्ति तत्र मे रथ स्थापय ।

शल्यः – यथाज्ञापयति भवान् ।

(ततः प्रविशति ब्राह्मणः)

ब्राह्मण – अयि दानकर्ण महत्तराभिक्षायाचे ।

कर्णः – अयिभो. महाब्राह्मण स्वागत ते ।

ब्राह्मणः – ते कीर्ति आचन्द्र तारार्कं तिष्ठेत् ।

कर्णः – (आत्मगत) कथमयं चिरंजीव इति न वदति । किमेपक्ष्यते भवता ।

ब्राह्मण. – कर्ण ! भवतः याचका किमपेक्षन्ते । (कर्णः रथादवतरति)

कर्ण. – नमो भूदेवताय ब्राह्मणाय । स्वागत ते ।

ब्राह्मणः – किं स्वागत कथयति भवान्, ददानि इतिकथय ।

कर्ण. – महा ब्राह्मण ! किं ददानि ते ।

ब्राह्मणः – ब्राह्मणाय किं देयं इति मा विचारय ।

कर्ण – हिरण्य कण्ठधः ।

ब्राह्मणः – नहि ।

कर्ण. – प्रमदाः ।

ब्राह्मण. – कथ प्रमदा. ।

कर्णः – ग्रामान् ।

ब्राह्मण – नाह् याचे ग्रामान्।

कर्ण – नोचेत् गोकुलानि।

ब्राह्मण – एते ब्राह्मणस्य नोपयुक्ता ।

कर्ण – किं ददानि ते निश्शङ्क कथय।

ब्राम्हण – प्रष्टु मे संकोच भवति।

कर्ण – ब्राह्मण तत्रायमागत्य तत्रभाण्ड गोपनेन किं प्रयोजनम।

ब्राम्हण – दाता याचक हृदयम् ज्ञात्वा यदि ददाति महानानन्द भवति।

कर्ण – किं ददानि मे प्राणान।

ब्राम्हण – शान्त पाप। (कर्णौ पिधाय)

कर्ण – गृहाण दास्यामि।

ब्राम्हण – नहि। नहि।

कर्ण – भूखण्ड ददानि

ब्राम्हण – (त्वरया) हा देहि। (किञ्चित् विचाय) मास्तु। मास्तु।

कर्ण – रत्नखचित हेमाभरणानि ददानि।

ब्राम्हण – नहि।

ब्राम्हण – **देहि मह्य समुत्पाटच। कुण्डले सहजे तव।**
तदास्व सत्यवान् भूया.। ते कीर्तिः चन्द्रिका भवेत्॥

कर्ण – विप्र। ते कामना महत्तमा अनूह्याच भाति।

ब्राम्हण – भवान् दाता। अह् प्रति गृहीता। दान समय ते हस्त उपरि, ममहस्त अथ भवति। तत् ते गौरवास्पद भवति।

कर्ण – विप्र। ते वम सकुण्डल नदास्यामि तुभ्य अवनिं प्रमदा गाश्च दास्यामि।

ब्राम्हणः – विशां पते ! अन्तरेण सहजवर्म कुण्डले नह्यन्यत् प्रवृणोऽमि ।

शल्यः – राजन् अयं ब्राह्मणः नहि । अत्याशापूरितः महाब्राह्मणः ।

कर्णः – तथा मावद ।

शल्यः – सत्य ब्रवीमि । असतुष्टो द्विजोनष्टः ।

ब्राह्मणः – अहं महाब्राह्मणः । मदीया कामना महती भवति ।

कर्णः – (विहस्य) विप्र सहजं वर्म मे कुण्डलेच अमृतोद्भवे । तेनाह अवध्योऽस्मि। ततः नैतत जहाम्यहं। तस्मात् ब्राह्मण, मत्सकाशात् त्व विशाल राज्यं प्रतिगृह्णीष्व । यतः ।

कुण्डलाभ्यां विमुक्तोऽहं। तेजोहीनो भवामि च।
गमनीयो भविष्यामि। शत्रूणामाहवे द्विज ॥

ब्राम्हणः – भवान् महादाता । दानशूरः इति त्वामहं यशोयुतं समागतोऽस्मि । यदि भवान् दित्सति यत् याचित तत् संगृह्य गच्छेय । नोचेत् भवन्त कलङ्किन विधाय प्रतिविवृत्तः भवेयम् ।

(इति अर्थवृतः गच्छति)

कर्णः – (विस्मित्य) देवेश तिष्ठ ।

ब्राम्हण – (कर्णाभिमुखआगत्य) धन्योऽस्मि भूपते ।

कर्णः – देवेश त्व मया विदितोऽसिप्रागेव ।

ब्राम्हणः – अह कथ विदितोऽस्मि भवता ।

कर्ण. – भगवान् कर्मसाक्षा मवमकथयत् ।

ब्राम्हणः – भवान् ज्ञातपूर्वोऽस्ति तस्मात् दातु उद्युक्तो भव ।

कर्ण. – महाब्राह्मण । वृथा वर.मया दातुं न शक्यः भवति । भवान् देवेश्वरः साक्षात् । त्वयावरः देयः। भवान् अन्येषा भूताना अपि ईश्वर. भूतकृत् ।

ब्राम्हण — भवान् मा सम्यक् जानाति ।

कर्ण — यदि शतक्रतवे दास्यामि, तर्हि मे शतक्रतु फल भविष्यति, यत् अन्येषा न भवति ।

ददामि तुभ्य मम वर्म कुण्डले । ऋते प्रदानान्नहि विद्यते परं ।
महीतल नश्यति कालपर्ययात् । विभान्ति दत्तानि चिरं हुतानि च ॥

देव ! कुण्डले कवचं यदि दास्यामि वध्यता उपयास्यामि । मत विनिमयेन कुण्डले वर्मच हरस्व ।

ब्राम्हण — कर्ण ! तवान्तिक आगच्छता मया पूर्वमेव रवे विदितं आसीत् सर्व । मे नर वर्जयित्वा यथेच्छया प्रवृणीष्व ।

कर्ण — धन्योऽस्मि ब्राह्मण । देवेश ।

गृहाण कर्णात् देवेश । कुण्डले वर्म एवच ।
शत्रुघ्नीं शक्तिमेका मे । देहि दिव्याममोघिनीम् ॥

ब्राम्हण — (विचिन्त्य मुहूर्त) शरीरज वम कुण्डले च मे प्रयच्छस्व । भवान् शक्ति गृह्णातु । शृणु ।

अमोघा शतशः शत्रून् । हत्वा मे पाणिमेष्यति ।
रिपुमेक निहत्याजि । मामेव सहसा प्रियम् ॥

शल्य — सूतपुत्र ! त्वरयति भवान् । द्विवारं चिन्तय कार्यारम्भे । सहजाते वम कुण्डले मा यच्छतु । शत्रु निबर्हण अति क्लेशप्राय भवति ।

कण — शल्य, जानासि खलु मम सान्निध्ये शस्त्रास्त्र संपत्ति विद्यतेऽति ।

ब्राम्हण — कण ! ते अमोघा मे शक्ति यच्छामि । (इति यच्छति)

कण — तिष्ठ देवेश ! प्रथमत मसकाशात् कवचकुण्डले गृहाण । अनतर ते शक्ति मे प्रयच्छ । (इति खड्गेन कवचं निच्छेद्य कवचकुण्डले समुत्कृत्य) इन्द्राय स्वाहा ! इन्द्रायेद न मम । (इति यच्छति)

ब्राम्हण — अहं सन्तुष्टाऽस्मि (इति गृह्णाति, शक्तिं प्रयच्छति)

कर्ण — महाब्राह्मण देवेश अनुगृहीताऽस्मि ।

ब्राम्हण — (विहसन् गच्छति)

कर्ण — शल्य ! यत्र अर्जुन तिष्ठति तत्र मे रथं नय। मे कवचकुण्डल प्रदत्तं भारताहव यज्ञे। तस्मात् इन्द्रात् मे यज्ञफलमिव शक्ति नामक अस्त्र प्राप्त मासीत्। रथं चोदय यत्र अर्जुन स्तत तत्र।

शल्य — यथाऽज्ञापयति देव । (इति रथं चोदयति)

(यवनिका पतति)

* * *

।। धनुर्भङ्गम् ।।

श्रीरामादर्शदाम्पत्य । सान्तत्य भारतावनौ ।
धर्मार्थकाममोक्षाळि । दद्यात्कीर्तिंच शाश्वतीम् ।।

(नान्द्यन्ते)

सूत्रधार — अयि कुटुम्बिनि ! हञ्जे कुटुम्बिनि ! किं अवसितमण्डनाऽसि?

नटी — (नेपथ्ये) आर्य ! अलङ्करोम्यात्मानम् । भवान् किञ्चित्-काल तिष्ठतु ।

सूत्रधार — हञ्जे वला अतिक्रान्ता क्षिप्रमेहि । स्वात्मन अलङ्करण विना नान्यदस्ति नारीणा जगति । एता अलङ्करणमये, स्वात्मान आदर्शे विलोक्य विविध चष्टादिक कुर्वन्त्य मर्कटायन्ते । (उद्वेगन) हञ्जे ! कुटुम्बिनि !

नटी — (कर्णाभरण अलकुर्वन्ती) एषास्मि भो (इति प्रविशति)

सूत्रधार — तरुणि इत पश्य । अद्य धनुर्भङ्ग, नाम नाटक प्रदर्शयितु भारतीय परम्परानुयायिभि आज्ञप्तोऽस्मि । तस्य कृते ते सहायमपेक्ष्यते ।

नटी — आर्य ! नाटक प्रदर्शन सर्वदा मम सहाय भविष्यति ।

सूत्रधार — प्रिये भवदीय सहकारेण प्रमुदितो ऽस्मि ।

नटी — किं मया कर्तव्य आज्ञापयतु भवान् ।

सूत्रधार — भवती सगीतराज्ञी । प्रथमत वसतराग वसतऋतुमुद्दिश्य गायस्व यत सामाजिका रसिकमनस्का भूत्वा नाटक दर्शनोन्मुखा भविष्यति

नटी — विचित्र पुष्पाभरणा धरित्री । हरीतचीरावसन दधाना ।
पिकस्वरेणामधुर लपन्ती । चैतन्यवन्त कुरुते प्रपञ्चम् ।।

सूत्रधार — प्रिये सुष्टुगीत भवत्या । भवदीय वसन्त रागण न केवल वसन्त वसन्तीकृत किन्तु प्रक्षका अपि वसन्तीकृता

नटी — अनुग्रहीताऽस्मि । आर्य ! कवि परिचय श्रोतुमिच्छामि ।

सूत्रधार — परोक्षित्नाटकचक्र कर्ता परीक्षित शर्मा अय महाकवि । अय गीर्वाण प्रपञ्चे प्रथितयशा । किंबहुना ।

सस्कृतिर्जीवन यस्य । सस्कृत श्वसन सदा ।
अभूत्तस्य ध्रुव जन्म । साथक्य मेदिनीतले ॥

नटी — आर्य अन्यथा आधुनिकाना कवीना नाटकानि विहाय,- अस्यकवे नाटक प्रदशने कोविशष ।

सूत्रधार — अय प्रतिभाशाली । अय जन्मना कवि । पश्य ।

द्राक्षागुळुच्छ स्वादिष्ट । हृदयाह्लादक परम् ।
अन्तर्बहिश्च तत्सर्व । कवित्व रसनिभरम् ॥

नटी — अय आधुनिक कवि मणिमालाया पर नायकायते । (आकण्य) अयि भो युवतीना हसित प्रलापा श्रूयन्ते कास्ता ?

सूत्रधार — (आकणनमभिनीय) एता युवत्य सीतया सहिता कन्दुक क्रीडाथं इत एव आगच्छन्ति । एहिगच्छाव । (इति निष्क्रान्तौ)

(तत हुमन्त्य सीता मञ्जुला वकुळा चम्पा प्रविशन्ति)

वकुळा — सीते त्व अत्र आग्नयमूले तिष्ठ । (इति सीता निर्दिशति सीता गत्वा तथैव तिष्ठति)

चम्पा — सखि वकुळ ! अह कुत्र तिष्ठयम ?

मन्जुला — चम्पे ! त्व नऋतिमूले तिष्ठ ।

वकुळा — मञ्जुला कथनानुसार त्व नैऋति मूले तिष्ठ ।

(चम्पा गत्वा तथैव तिष्ठति)

मन्जुला — सखि वकुळे ! अहं कुत्र तिष्ठेयम् !

वकुळा — त्व वायव्यामूले तिष्ठ ।

(मन्जुला तथा करोति)

चम्पा — वकुळे ! त्व ईशान्यामूले तिष्ठ

वकुळा — त्वदीरित सत्यमेव परिशेषन्यायेन अह तथैवकरिष्यामि

(इति तथाकरोति)

सीता — सख्यः वय चतस्रः दिकपालकाना सहधर्मचारिण्यः इव-तिष्ठामः

वकुळा — वय मर्त्यलोकीया तथा न भविष्याम ।

मन्जुला — सखि ! स्थितस्यगति· चिन्तनीया ।

वकुळा— हा सत्यमेव । श्रुणुत कन्दुक ममहस्ते विद्यते । महा, या रोचते तस्यै कन्दुक अस्यामि । सा कन्दुक गृहीत्वा तस्यै या रोचते तस्याः सकाश अस्यति । एव सर्वैरपि तथैव कर्तव्य अव्यवधानेन ।

(इति वकुळा कन्दुक सीता प्रति अस्यति)

(कन्दुक गृहीत्वा मजुला प्रति अस्यति)

(तथा सर्वा. खेलनपराः भवन्ति)

(निमेषद्वयानन्तर यदा कन्दुक सीतायाः हस्ते भवति तदा)

सीता — सख्यः ! वय एकैकशः हस्तेन भूमि कन्दुक ताडन खेलनं कुर्मः ।

सर्वा — (तथैव) सीता हस्तेन भूमिकन्दुकताडनोत्पतन खेलन कुर्वन्ती आस्ते ।

चम्पा — हुळे ! वकुळे ! खेलनपरा सीता पश्य एपातन्वी, खेलने सुरसुन्दरीव नवीनशोभा तनोति ।

वकुळा — सत्यमेव खेलनसमये अस्या हावभाव विलास लास्यादिक पुरुषायित मग्न नाकविलासिनीव दिदृक्षूणा बुद्धि जनयति ।

मन्जुला — अन्यदाश्चर्यपश्य ! सीता परित पवित्रा काष्ठभिरव्या चक्रभमण करोति ।

वकुळा — एषा अयोनिजाखलु, सर्वत्र चालने हसने, भणने दिव्यत्वमेवाभासते ।

सीता — सख्य पश्यन्तु भवत्य अह कियत्काल क्रीडासक्ताऽभवम् इति ।

चम्पा — सीते ! वयमपि तदेव भणाम ।

वकुळा — अस्माभि यद्दृश्यते यद्अनुभूयते तदेव वय भणाम. ।

मन्जुला — सहजसौन्दर्यमुद्दिश्य यत्किमपि भाणितु वय स्वतन्त्रा ।

सीता — भवन्त्य वक्रोक्तिभि मा तुदन्ति ।

चम्पा — सीते तुदन्ति इति मावद । स्तुवन्ति इति कथय ।

वकुळा — वय असत्य न भणाम । किन्तु सत्यकथने काबाधा ।

मन्जुला — सरसगोष्टी अन्तरेण नान्या सन्तोषदायिनी भवति ।

सीता — सख्य इत पश्यन्तु ।

एषात्र कन्दुकक्रीडा । चित्तवृत्ति निरोधका ।
आह्लादं तनुते स्वान्ते । श्रमयोऽप्यहत्त तन्द्रिता ॥

वकुळा — सखि ! सत्यश्लोकित भवत्या ।

मन्जुला — वकुळे ! सीता मुग्धापि भावगोपने प्रौढा भाति ।

चम्पा — विलासिनीना भावगोपन सहजमण्डन भवति ।

वकुळा — सख्य । पश्यन्तु भवत्य ।

कन्दुकक्रीडया तन्वीं । प्रविचालित कुण्डला ।
पुरुषायितमग्नाङ्गीं । रासिवये प्लाविनीं प्रियाम् ॥

सीता — सख्य ! अहं परिश्रान्ता अनया कन्दुकक्रीडया । अधुनावय उपविश्य कन्दुकक्रीडा खेलिष्याम ।

सर्वा —(तथैव इति उपविश्य कन्दुकक्रीडा खेलन्ति)

सीता — (सकोप) कन्दुक वकुळाप्रति अस्यति ।

वकुळा — सखि ! सीते ! भवती मयि क्रुध्यसि । तस्मात् वेगेन कन्दुक मा ताडयितुमिव अस्यसि ।

सीता — वकुळे ! तथा मया नकृतम् ।

(इति हसति)

वकुळा — (कन्दुकु सीता अस्यति । स कन्दुक गच्छति तत्र विद्यमान धनुष्पेटिकामधोऽध प्रविशति ।)

सीता — वकुळे कन्दुक पेटिकाया निकटगत । अहं त कन्दुकमानेतु गच्छामि ।

(इति गच्छति)

चम्पा — सीत धनुष्पेटिकासमीप त्व मागच्छ ।

सीता — त्व मा किमर्थं निवारयसि ।

चम्पा — सीते ! इम धनुष्पेटिका बहुभारवती । तस्या स्पर्शनमपि ते नयोग्यम् ।

सीता — सखि ! एतत् शिवधनु कथ स्पर्शयोग्य न भवति ।

वकुळा — सीते ! त्व शिरीषमृद्वङ्गी इद ते स्प्रष्टु न योग्यमिति ।

सीता — सखि ! अहार्यनिश्चयाहम्, अवश्य कन्दुक आनयेयम् ।

(इति धनुष्पेटिकासमीप गच्छति शकट द्वाभ्या हस्ताभ्या अपसारयति कन्दुक आनयति)

सर्वा — आहो (इति साश्चर्यं गण्डस्थले हस्तान्दगुलि निधाय आश्चर्य मुद्रामभिनयन्ति)

वकुळा — सीते त्व शक्तिस्वरूपिणी ।

(इति तस्या हस्तौ गृहीत्वा)

गीतम् (कार्फी रागे)

सखि सत्य त्व भागवती
भवति च नून वेदवती
नूत सुमति तवभर्ता
भविता कोऽयं भणकर्ता ॥ सखि

(इति सीता विसृजति)

मन्जुला — सखि ! सीते (इति तस्याः हस्तौ गृहीत्वा)

गीतम् (सोहिना)

भवसि च रूपे अवला
नून कर्मणि सबला
लोके भवती मातुला
सीते भवसि च प्रिय हला ॥ सखि

(इति सीता विसृजति)

चम्पा — सीते (इति तस्या हस्तौ गृहीत्वा)

गीतम् (दुर्गा राग)

कात्व भण पिकवाणि
श्रावय किंचित् गीर्वाणि
कदा भविता त्व कल्याणि
माविस्मर किसलय पाणि ॥ सखि

(इति सीता विसृजति)

(सीता मध्ये सस्थाप्य सर्वा. सख्यः मण्डलाकार कुर्वन्ति ।
आनुनासिक्य स्वरे भ्रम्भरगुञ्जनं, शब्दोत्पादन कुर्वन्त्यः सविलासं,
चक्रभ्रमण कुर्वन्त्य सन्ति ।)

(यवनिका पतति)

*   *   *

द्वितीयं दृश्यम्

जनकः, पुरोहितः, शतानन्दः, मन्त्री च स्वीय आसनेषु अलङ्कृताः सन्ति ।

जनक — *मन्त्रिन् एतत् मम महत् आश्चर्यं भवति, यत् मे कन्या* मीता अत्यत भारभूत शिवधनुश्शकट अचालयत् इति ।

शतानन्द — माबाला लौकिका नहि । केवल दैवाश संभूता इति मन्ये ।

जनक — सत्य इय म नन्दिनी अयोनिजा । सवशक्ति सपन्ना । तस्मात् पुरुषश्रेष्ठः वर द्रष्टव्यः अस्ति ।

मन्त्री — युक्तमेव राज्ञा गान्धर्वविधिना विवाह ।

शतानन्द — राजन् । स्वयवर विवाह योग्य ।

जनक — वयमपि तमेव भावयाम ।

मन्त्री — तर्हि स्वयवरार्थं प्रकटी कुर्वन्तु ।

जनक — तमेवकर्तु व्यवसितावयम् ।

मन्त्री — स्वयवरे पणन किं विद्यते ।

जनक — पणन शिवधनु अस्ति । शृण्वन्तु ।

य.करोति धनुर्भंङगम् । उद्यम्यैतन्महाबल ।
त वृणीते सती सीता । पुरुष दैव सन्निभम् ।।

मन्त्री — अस्मिन कर्मणि निरता बहव राजान सन्ति । ते सर्वेऽपि स्वयवरार्थं समागमिष्यन्ति ।

जनक — शैव धनु न सर्वोऽपी भङक्ष्यति ।

शतानन्द — य कोपि दैवाश सभूत शक्त भविष्यति ।

जनक — मे जानकी अयोनिजा दैवाश सभूता तस्मात् स्वयवराथ पणनरूपेण राजान समाहूयन्त ।

मन्त्री — शुभस्य शोघ्र अह श्व घोषणार्थं घोषकान प्रषयिष्य ग्राम ग्राम नगर नगरम ।

शतानन्द — आय ! आलस्य अमृत विष । तस्मात् अद्यैव घोषकान् घोषणार्थं प्रपयतु भवान् ।

मन्त्री — भवद्भि यत निगदित तत योग्यम इति मन्य । अह अद्यैव कारययम् ।

जनक — क कोऽत्रभो ।

प्रतीहारी — (प्रविश्य) अयमस्मिभो ।

जनक — अरे लेखनतज्ञ प्रवेशय ।

प्रतीहारी — यथाज्ञापयति देव ।

(इति नमस्कृत्य गच्छति)

लेखक — (प्रविश्य) नमासि महाराज ।

(इति नमस्करोति)

जनक — अयि लेखक ! सीतास्वयवरार्थं त्व घोपणापत्रमेक ससिद्धंकुरु ।

लेखकः — महाराज ! केकेविपयाः उल्लेखनीयाः सन्ति आज्ञापयन्तु भवन्तः ।

जनक — महामात्य ! भवान् सविस्तर कथयतु ।

मन्त्री — भोः लेखक ! श्रृणोतु भवान् । य शिवधनुर्भङ्गम् करिष्यति तस्मै जनक महाराजस्य दुहिता सीता जीवनसहभागिनी रूपेण प्रदीयते इति घोपणापत्र विलिख्य तत्घोपयितु नगर नगर ग्राम ग्राम घोपकान् प्रेपयतु ।

लेखकः — अवहितोऽस्मि (इति नमस्कृत्य गच्छति)

जनकः — महामात्य स्वयवरार्थं सर्वसन्नाह करोतु भवान् ।

शतानन्द — महाराज ! विवाहसमये चतुर्वेद पारगान् ब्राह्मणान् दशग्रन्थि ब्राह्मणान् आशीर्वचनार्थं सभावनार्थं निमन्त्रणादिक प्रेपयेय ।

जनकः — भवद्भिः यत् कर्तव्य तत् सर्व कुर्वन्तुभवन्तः ।

(नेपथ्ये घटारावः)

मन्त्री — महाराज ! घण्टारावः श्रूयते ।

जनकः — कः कोऽत्रभोः ।

प्रतीहारी — (प्रविश्य) अहमस्मि भोः ।

जनकः — मार्गदर्शी भव । इति उत्तिष्ठति । (सर्वेऽपि उत्तिष्ठन्ति)

प्रतीहारी — यथाज्ञापयतिदेव. । इतः इतो देवः ।

(सर्वे तमनुसरन्ति)

(यवनिका पतति)

□ □ □ □

तृतीयं दृश्यम्

(कल्याणिरागे शहनाई भवति)

। मञ्जुला वकुळा चम्पा प्रविशन्ति ।

मन्जुला — वकुळे सीता स्वयवरार्थ अस्माभि स्वय सर्वसन्नाहा करणीया सन्ति ।

वकुळा — हा जानाम्यहं । सर्व सुगन्धिळकुसुमनिचय विलूय आनीतास्मि ।

मन्जुला — चम्पे ! त्व कर्पूरमिश्रितचन्दन ससिद्ध कुरु । अहं गन्धिलजल झरीपात्रषु प्रपूर्य हरिद्राकुङ्कुम चूर्णादिक, नागवल्लीदळयुक्त मुक्ताचूर्ण क्रमुकादिक विविधपात्रषु निक्षिपेयम् । अहं धूपादिकेन सर्वमपि कल्याणमण्डप गन्धायितकुर्याम् । (इति सर्वसन्नाह कुर्वन्ती आस्ते ।)

(ततः प्रविशति सीता)

मन्जुला — सीते एहि । त्रिपादिका पीठोऽपरि उपविशतु तत्रभवती ।

सीता — (लज्जया उपविशति)

मन्जुला — सीते वय त्वा स्वयवरार्थं अलङ्कर्तुं उद्युक्ता । तत्रभवती प्रशान्तभावेन अत्र उपविश ।

सोता — सख्य ! मम स्वयवरे तत्रभवत्य दिवारात्र कृतश्रमा भवन्ति

चम्पा — सोते । अस्मद्भ्य एतत् मण्डनादिक पुन भवत्या कदा भविष्यति ।

सीता — स्वयवरानन्तर अस्माक मेलन न भवति किम् ?

मन्जुला — कथ भविष्यति । अनुरूपेण वरेण ते मेलन भवति । तदा वय का ।

सीता — युष्मान् अहं कथं विस्मरिष्यामि ।

चम्पा — मञ्जुले ! सर्वालङ्करणभूषिता सीता द्रष्टुं वः नेत्राणि अपर्याप्तानि भवन्ति ।

वकुळा — एतैः नेत्रैः सीताभिन्न द्रष्टुं वयमशक्नुम ।

सीता — यूयं मामुद्दिश्य अतिशयोक्ति कुर्वन्ति ।

चम्पा — स्वीय सौन्दर्यमाधुर्यं स्वयं नकापि जानाति ।

वकुळा — परे केवल जानन्ति वस्तुसौन्दर्यं, नकदापि वस्तु ।

मञ्जुला — (आदर्शमानीय सीतायै ददाति) सीता आदर्शे सौन्दर्यं चित्रीकरोति ।

चम्पा — मञ्जुले ! सीता आत्मन. विम्ब आदर्शे कथं पश्यतिवा निरीक्षस्व ।

मञ्जुला — एषा स्व प्रतिविम्ब आदर्शे विलोक्य तन्मयता प्राप्नोति । सत्यं एषा मूर्तीकृत त्रिलोक सौन्दर्यमिव प्रतिभाति :

(ततः प्रविशति वेत्रवती)

वेत्रवती — अयि सख्यः ! यदि सीता अवसितमण्डना भवति तर्हि स्वयंवर मण्डपमानीतव्या इति जनकमहाराजस्यादेशः । (इति नमति)

सीता — हञ्जे ! सीता अवसितमण्डना अस्ति । अधुनैवागच्छति इति राज्ञे निवेदय ।

वेत्रवती — यथाज्ञापयति देवी ।

(इति गच्छति)

मञ्जुला — सखि सीते !

श्रुत्वा त्वां भुवि वीरमण्डलमहो
सौन्दर्यराशिः प्रिया ।

वकुळा — अपिच

सीता नान्यतुला विभाति धरणीसौन्दर्यमूर्तीकृता ।

चम्पा — तस्मात ।

इत्येव सुविचार्य वारणरथाश्वैश्चारुशोभायुतम ॥

सर्वा —प्राप्नोत्येव वरीतुमत्र महिते सीते नुते भुसुते ।

सीता — (लज्जया हस्ते विद्यमानपुष्पमालया सर्वा ताडयन्ती विनीगता ।)

(सर्वा अपि हसन्त्य सीतामनुसरन्ति)

(यवनिका पतति)

* * *

चतुर्थ दृश्यम्

राजा जनक शतानन्देन साथ धनुभङ्ग दशनाय उपविष्ट अस्ति, तत्रपार्श्वे धनुष्पेटिका वतते । अङगदेशीयोराजा, वङगदेशीयोराजा, काश्मीराधिपतिश्च, उपविष्टा सन्ति ॥

(वाचक क्रमश एकक राजान नाम्ना आह्वयति ते सर्वे आगत्य धनुर्भंङग-कर्तुं असफला भूत्वा निर्गच्छन्ति ।)

वाचक — अङगदेशीया सकलारि समर्दना सिंहवला अनलोनाम राजान आगच्छन्ति ।

(राजा उत्थाय बाहू प्रसार्य भुजास्फालनकृत्वा धनु. उन्नमितु प्रयतते अन्तत. अध पतति, लज्जित· निर्गच्छति)

वाचक· — वङ्गदेशीया अष्ठैश्वर्यभूपिता धनुर्विद्यापारगता आदित्य महाराजा ।

(उत्थाय बाहूप्रसार्य पादौप्रसार्य श्मश्रु समार्ज्य वामहस्तेन उन्नमितु प्रयतते, द्वाभ्या हस्ताभ्या उद्धर्तु असमर्थ भूत्वा निर्गत)

वाचक — गजरथतुरग चमूनाथा काश्मीराधिपा समरनाथा । (सगवमागत्य धनु उद्धरति । धनुर्भारेण कम्पित धनुस्त्यक्त्वा निर्गच्छति)

जनक — (चिन्ताक्रान्त) शतानन्द किमिदमाश्चर्य एकोऽपि वीर धनुरुद्यमितु समर्थो न जात ।

शतानन्द — तथा माकथयन्तु । वीरमण्डल एतावत्पर्यन्त अत्र नागतमिति म प्रतिभाति ।

जनक — तथा यदिस्यात् सीता अविवाहिता भविता किम् ?

शतानन्द — तथा नभवति ।

जनक — अस्मिन् विषये विचार कर्तव्य एव । धनुरिद अपसारित सीतया । लोके सीतापक्ष्या पुरुषेषु अबला सति किम् ?

शतानन्द — महाराज । सीता अयोनिजा दैवाश सभूता । अस्मिन् कर्मणि अवश्य दैवाश सभूता भविष्यन्ति .

जनक — एतावत्पर्यन्त नकोपि दैवाश सभूतो समागत ।

शतानन्द — राजन् ।

सृष्टया सर्वं यथायोग्य । संवद्ध भाति सर्वदा ।
तत्रास्ति योजको देवः । मास्तु त्र्चिन्ता कदापि भोः ॥

जनक — शतानन्द । सृष्टिकर्ता देव । किंतु योजक अन्य भवति यनकेनापि निमित्तन ।

शतानन्द — साधूक्त भवद्भि । अवश्य तत्र भविता सयोजक ।

जनक — लोके सर्वदा योजक दुलभ भवति ।

शतानन्द — राजन न विचार क्तव्य । योजक भविष्यति सर्वं यथोचित मङगलान्त भविष्यति । -

जनक — अधुना माध्यान्हिकाअनुष्ठान निवर्त्य पुन साय स्वयवराथ सभा उदघाटयिष्याम ।

शतानन्द — तथैव राजन ! किंतु मेमनसि एतादृशी भावना विद्युतायते ।

जनक — कीदृशी ते भावना ।

शतान्नद–सायकाले शान्तवातानुकूले । सन्ध्यारागे दिव्यगोधूलिरम्ये।
नूनभव्य तद्धनुभङगमेतत् । भाव्य राजन् श्रूयतावच्मिसत्यम ।

जनक — तत्रभवन्त शतानन्दा भवतावचन सत्य भविता नकोण्यत्रसदेह ।

शतानन्द — राजन गच्छाव एहि ।

(इति निष्कान्तौ)

(यवनिका पतति)

□ □ □ □

पंचमं दृश्यम्

(तत प्रविशति जनक शतानन्देनसम,
जनक सिंहासने उपविशनि शतानन्द विद्यमानपीठ उपविशति)

जनकः — शतानन्द ! भवता ज्योतिष्यानुसार सन्ध्यासमये सर्वं भविता ।

शतानन्दः — भविष्यतीति मे भावना । यत.

भविष्यमाणं जगति प्रजानां । छायानुरूपेण सदा चकास्ति ।
तपस्विनां तत्रभवत्यजस्रं । सचित्ररूपं बहुधासमक्षम् ।

(तत प्रविशति दौवारिकः)

दौवारिक — महाराज कुशिकनन्दनः बालाभ्या सहित युष्मान् द्रष्टु द्वारि तिष्ठति ।

जनक. — क्षिप्र प्रवेशय ।

दौवारिक — यथाऽऽज्ञापयति देव । (इति गच्छति)

शतानन्द — अय तपोधनः बालाभ्या समागत । कौतौ बालौ ?

जनक. — पश्याम ।

(तत प्रविशति रामलक्ष्मणाभ्या कुशिकनन्दन ।)

कुशिकनन्दन — महाराज ! परिपूर्ण मनोरथो भवतु भवान् ।

जनक — (उत्थाय) नमामि भूयासि कुशिकनन्दनाय । अत्रोऽपविशन्तु भवन्त सशिष्याः ।

(इति पार्श्वस्थ आसनानि दर्शयति)

कुशिनन्दन — (सशिष्यः तत्र यथानिर्दिष्ठ उपविशति)

जनक. — कुशिकनन्दन ! कथ भवान् अत्राऽऽगतोऽस्ति ।

महान्तः सततं लोके । नैव यान्ति निकेतनं ।
परेषां यदि यास्यन्ति । तत्रस्यात्कारणं ध्रुवम् ।

कुशिकनन्दन — (विहस्य) निर्वर्तितसत्रः क्षिप्र अत्राऽऽगच्छामि ।

शतानन्द — कौतौ तापसकुमारौ ।

कुशिकनन्दन — एतौ तापसकुमारौ नहि ।

जनक — कावेतौ ।

कुशिकनन्दन — इमौ दशरथ तनयौ ।

जनक — एतौ राजपुत्रौ ?

वर्चिष्मन्तौ प्रियावेतौ । काषायाम्बरधारिणौ ।
राजपुत्रौ विराजेते । पावकाऽवृत सामिधौ ।

शतानन्द — एतौ भवतःसार्थं कथ ?

कुशिकनन्दन —

एतौच बालौ बहुवीर्यवन्तौ । सुबाहुमारीच निशाचरादीन् ।
निहत्य पूतं मम यज्ञकार्यं । ररक्षतुर्दानव घोरसङ्कटात् ॥

अहं अनयो साहाय्येन अवसित सत्रोऽस्मि ।

जनक — किं नाम धारिणौ ?

कुशिकनन्दन — अयं नील मेघशाम रामः । अयं लक्ष्मण (इति द्वावपि पर्शयति)

शतानन्द — (विकसितवदन) साधु महामुने साधु । कुमारयो नामश्रवणानन्तर तयो शौर्यश्रवणानन्तर जनकमहाराजस्य भावना सर्वा पल्लविता भवन्ति ।

जनक — कथं तत्र भवन्त अत्राऽगतवन्त. ।

कुशिकनन्दन — (विहस्य) अवसित सत्रेमयि कापि घोषणा मे कर्णपथ प्राप्ता । तदर्थं शिष्याभ्या अत्र समागतोऽस्मि । ता घोषणाप्रति सविस्तर कथयन्तु भवन्त ।

जनक —(सहर्षं)पूज्यातिथय किंचित्काल विश्रान्तिसुख मनु भवन्तु।

कुशिकनन्दनः — तपस्विना विश्रान्ति-कृत ।

जनक — तथायदि शृण्वन्तु घोषणा । देवरात इति रव्यात महीपतिः आसीत् । अथ न्यास तस्य ।

कौशिक — ततस्तत ।

जनक — दक्षयज्ञवधे क्रुद्धं रुद्र देवा प्रसारयन् । रुद्र प्रीत अभूत् । तदातस्य धनु न्यास आसीत् अस्मदीय पूर्वजानागृहे।

कुशिकनन्दन — ततस्तत ।

जनक — इयकथा धनुष ।

कुशिकनन्दन — एषाकन्या कदासभूता ।

जनक — एषाकन्या अयोनिजा ।

कुशिकनन्दन — आश्चर्यं । निवेदयन्तु सविस्तरम् ।

जनक — क्षेत्र कृषत मे इय कन्या लब्धा । तस्मात् सीता नाम्न बभूव ।

कुशिकनन्दन — ततस्तत ।

जनक — इय वीर्यपराक्रमशुल्का ।

कुशिकनन्दन — ततस्तत ।

जनक — अस्मिन् विषये धनुर्ग्रहणमपि दुष्कर जात वीर्यवताम् ।

दर्शयिष्यामि रम्यंतत् । धनुर्मम महामुने ।
कुर्याद्यदि धनुर्भङगं । तस्मै सीता प्रदीयते ॥

(इति उत्थाय धनु दर्शयति, विश्वमित्ररामलक्ष्मणा पश्यन्ति)

जनकः — श्व. धनुर्भङ्गार्थं बहव राजान समागमिष्यन्ति । तत्र महासभा भविष्यति । यूय अतीव श्रान्ता. विश्रान्तिसुखमनुभवत ।

कुशिकनन्दन. — वय अतीव प्रहृष्टास्म ।

(उत्थाय नमस्कुर्वन्ति गच्छन्तिच)

(जनकशतानन्दौ उत्थायगच्छत)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(वेदिकामध्ये जनक शतानन्द पुरोहिता ऽउपविशन्ति । एकत्र पार्श्वे सीता तस्या सख्य पुष्पाक्षतमहित पुष्पहारनीराजनपात्रं उपविष्ठा सन्ति। अन्यत्र पार्श्वे विश्वामित्ररामलक्ष्मणा उपविष्ठा । जनकस्य पुरस्तात् किंचित् दूरे धनुष्पेटिका स्थापिता विद्यते । वाचक रङ्गस्थलस्य एकस्या दिशाया स्थित्वा नामानिवाचयति)

वाचक -- आन्ध्रदेशात् चतुरङ्ग वलसम्राट् चन्द्रचूडमहाराजा ।

(महाराज शनै धनुरुन्नमितु अशक्त भूमौ पतति, उत्थाय गच्छति) महाराष्टदेशीय दुर्गाधिप रमाकान्तमहाराजा । (आगत्य धनुरुद्यम्य अशक्त भूमौपतति, उत्थाय गच्छति)

राजस्थानीया महाराजा सग्रामकेसरा॰ । (उत्थाय धनुरुद्यम्य भूमौपतति)

जनक -- (चिन्ताकुल) बत नकोऽपिशक्त धनुरुन्निमितु ।

शतानन्दन -- इद महदाश्चर्यं विद्यते ।

जनक -- अवला सीता धनुष्पेटिका अचालयत् नकेवल धनु ! सीनापेक्षया लोके दुर्बला पुरुषेषु विद्यन्त इति ज्ञात मधुना ।

मन्ये तस्मात् वीरहीन । भारत भाति सर्वथा ।
यतोऽग्र वीरपुत्रस्य । नाविर्भावः कृतः प्रियः ॥

कुशिनन्दन: -- (रामलक्ष्मणौ पश्यति)

लक्ष्मणः -- (उत्थाय) अयि महाराज रघुवंशे जीवति सति तथा-कथनं योग्यं न भवति ।

रामः — (उत्थाय) सोदर लक्ष्मण उपविश शान्ति भज ।

लक्ष्मणः — महाराज !

विशाले रघुवंशेऽस्मिन् । भ्राजंति प्रियभारते ।
वीरहीनं कथं भाति । भारतं वद भूपते ॥

कुशिकनन्दन: — कुमार रामचन्द्र ।

राम — (उत्तिष्ठति)

वाचक: — अयोध्याधिपतेः दशरथस्य पुत्रः श्रीरामचन्द्र: ।

रामः -- (कुशिकनन्दन नमस्करोति ।)

कुशिकनन्दनः — कल्याणमस्तु ।

राम: — (धनुस्सकाशगत्वा प्रदक्षिणीकृत्य धनु नमस्करोति)

जनक. — (शतानन्देन सार्थं) इय विनयान्विताना तेजस्विना परम्परागतप्रवृत्ति· । एतादृशी पद्धति: नावलोकिता इत पूर्वमस्माभि:

राम — (वामहस्तेन धनुरुद्यम्य दक्षिणहस्तेन ज्यावल्ली आकर्णान्त आकृष्य धानुर्भङ्ग करोति)

(सर्वे सहर्ष करतलध्वनि कुर्वन्ति पुष्पवृष्टि: पतति)

जनकः — (सहर्ष उत्थाय) अयिभो: विश्वामित्र महर्षे वय भवता उपकृतास्मः । मे कन्यायाः अनुरूपोऽयवर: । साक्षात् अय विष्णो· अवतारः । इय लक्ष्मीसमाना श्रीरामचन्द्रस्य सहधर्मचारिणी भविष्यति ।

कुशिकनन्दन. — जनक महाराज! अय देव निर्णीतः विवाह: । यत: ।

तेजस्येवहि सजात । मेलन तेजसा भुवि ।
प्रदानादान कार्येषु । भ्राजते पात्रता भृशम् ।

मनकं — वय प्रसन्नात्मान एव आशास्महे ।

दरहसितविलासैर्जानकी क्ष्मातनूजा ।
करतलगतरम्या रागकल्हारमाला ।
विसृजतु रतिभावा रामभद्रस्यकण्ठे ।
विलसतु भुविनित्य चन्द्रिका चन्द्रसाम्या ॥

सीता — (अपथा रामभद्रस्यकण्ठ पुष्पमाला निक्षिपति)

(सर्वे विविधपुष्पाणि अक्षतान्श्च विकिरन्ति)

(भैरवी राग मङगलवाद्यानि श्रूयन्ते)

(यवनिका पतति)

* * *

।। भीष्म-प्रतिज्ञा ।।

ब्रह्मज्ञान नितान्त चिन्तनरतं स्तोमीह विद्यामलं।
ध्यानात्त प्रणवादि वेदपठने स्वान्तं परं तोषितम्।
संध्यावन्दन वीतिहोत्रसवन प्राप्ताधिकश्रीयुतं ।
नित्यं सक्रमवर्तनावळिरतं श्रीब्रह्मचर्याश्रमम् ।।

नान्द्यन्ते

सूत्रधार — हञ्जे ! हञ्जे ! त्वरस्व त्वरस्व (अनागच्छन्तीं विलोक्य) वत विलम्बनं भवति। लोके विद्यमान जनश्रुतिः तथ्या भवति।

स्त्रियोहि नाम लोकेस्मिन्। प्रसिद्धाः मन्द वर्तने।
स्वयं ता नविजानन्ति। ज्ञातुं नेच्छन्ति जीवने ।।

नटी — (प्रविश्य) किं भवान् स्त्रीलोकं टीका करोति। स्त्रीलोकमुद्दिश्य टीका कर्तुं ते अधिकारः नास्ति। ताः शक्ति स्वरूपिण्यः। सर्वं कर्तुं समर्थाः। पुरुषेभ्यः ते न्यूनाः न भवन्ति। (इति सक्रोधं वदति)

सूत्रधारः — अहो न भणामि। शान्ता भवतु भवती। अहं किं कथयामि तत् शृणु।

नटी — हा श्रावय।

सूत्रधारः — हञ्जे ! अद्य भीष्म-प्रतिज्ञा नाम नाटकं प्रयोक्तुं उद्युक्तास्मः।

नटी — भोः ! भवान् कालपरिवर्तना विलोक्यापि सर्वदा प्राचीन नाटकानि प्रदर्शयति, न मे रोचते तत्।

सूत्रधारः — सर्वकर्मणः मूलकारण भवति।

नटी — किमत्र कारणं विद्यते इति मे प्रश्नः।

सूत्रधार — आधुनिक नाटकानि तत्कालीन विषयेण सहितानि कतिपय दिवसेषु रङ्गमञ्चेषु प्रदर्श्यन्ते नटनासक्त सामाजिके । किन्तु तानि नाटकानि कदापि शाश्वतत्व न भजन्ते। तानि सर्वाणि मघानक्षत्र जनित्वा पूर्वाया म्रियन्ते। प्राचीन नाटकानि सत्यधर्मे प्रतिष्ठितानि सर्वदा रसेन नवनवोन्मेषता भजन्ते। तस्मात् कारणात् प्राचीन नाटकानि प्रदर्शयितु समु सुकोऽस्मि।

प्राचीन सुस्थिर लोके। नवीन चञ्चल सदा।
तत्वान्वेषण लोकस्य। प्राचीन शाश्वत भवेत् ॥

नटी — केचन प्राचीन भावुकान् विमर्शयन्ति निन्दन्ति च।

सूत्रधार — भवतु नाम, भिन्न रुचिर्हि लोक । मह्य यत् रोचते, योग्य भासते तदह करिष्यामि।

निन्दन्तु मा प्रजा नित्य। प्राचीने लग्नमानस।
प्राचीन दर्शयाम्यत्र। प्राचीने रचयामि च ॥

नटी भवान् नव समाजे वर्तमानोऽपि, प्राचीन साम्प्रदायवादी भवति।

सूत्रधार — अह प्राचीनवादी। लोके सामाजिकाना एत् नवीन नवीनमिव भासते, तत् सर्व मम प्राचीनमिव भासते यत ।

बालाना प्रकृतिस्सर्वा। नवीना भासते प्रिया।
प्राचीना सा विभात्येव। तत्वज्ञाना विशेषत ॥

नटी — सम्यक् समर्थनेन प्रतिपादित भवदीय आशय । काऽय कवि ।

सूत्रधार — गीर्वाणाम्भ भाषाप्रवीण महाकाव सस्कृत भाषा प्रचारक पण्डित् परीक्षित् शर्मा।

नटी — किमय गीर्वाणसाहित्य प्रथितयशा ।

सूत्रधार — स्वयमेवाय प्रथितयशा । अय ललित गीतालहरी यशोधरा महाकाव्य (विंशति सर्गात्मक) अक्षय गीत रामायण (सप्तपदा) इत्यादिक श्रव्य काव्यचय आपच सप्तविंशति नाटकात्मक परीक्षिन्नाटकचक्र नाम दृश्य काव्य च विलिख्य विंशतितम शताब्दे गीर्वाणवाणी अवाकिरत् भूमण्डले।

नटी — अहं पर्युत्सुका भवामि पात्रग्रहणे।

सूत्रधारः — (आकर्ण्य) स्यन्दनस्य स्निग्ध गम्भीर निर्घोषः श्रूयते। (इतस्ततः पश्यन्) सत्यमेव राजा शन्तनुः यमुनातीरे विहर्तु समायाति सारथिद्वितीयः। एहि गच्छावः। (इति निष्क्रान्तौ)

(रथादवतीर्य, ततः प्रविशति शन्तनुः)

(यमुना नद्याः तीरे विचरन् शन्तनुः पुलकितगात्रः एवं मनुते)

शन्तनुः — (दृष्ट्वा) इयं यमुना। अस्याः जलं कामिनी लोचन कज्जलमिव श्यामलं भवति। अयं भगवतः श्रीकृष्णस्य रहः केळीना अनुकूलः प्रदेशः अभवत्। राधा-माधवयोः रस स्यन्दिनीभिः केळीकथाभिः इयं परिपूर्णा। अस्याः नद्याः तीरे सर्वोऽपि जन्तुः शृङ्गार रसेन परिप्लावितान्तरङगः भवति। इयं नदी प्रेमवाहिनी। सर्वेषां पापक्षाळनेन इयं श्यामलता प्राप्तवती। अत्र सर्वत्र भूरुहाः बल्लर्यश्च पुष्पभारे स्वनताः। ताः पुष्पवत्यः संजाताः इति मत्वा त्रपाभरेण नितान्त नामिताः भवन्ति।

अहो एतेषां पुष्पाणां गन्धः प्राक्तन संस्कारदीन् उद्बोधयन् परिमलेन नासापुटं परम सुखदं करोति। चेत. अमन्दानन्द संभरितं वर्तते। अत्र कलकण्ठमदकीर कलकलध्वनय श्रुतिपुटं सुखावहं कुर्वन्ति। अयं मन्दसमीरः विचित्र गतिभिः भावनापूर्ण चेतः शरीरंच पुलकितं करोति। चित्रमेतत् हरिणाः विश्रम्भयुताः व्यवहरन्ति। इदं स्थानं आनन्दाना आयतनं भवति।

अचेतनं यदुद्भूतं। भ्राजते रसनिस्तुलं।
चैतन्य विषये वक्तुं। नैव शब्दा भवन्ति मे॥

(अन्यत्र दृष्ट्वा) इतः आलिकुलसंकुलाकलित सरोजकुडमलाना पङक्तयः सरस्सु विराजन्ते। इयं भूमिः शरचन्द्र चन्द्रिकासु पर्वतायित सिकतेपु सर्वदा स्वच्छन्दाच्छ समीरणमालिकाभिः समलंकृतः पवित्रतायाः स्थान भवति। भवतु अहं अस्या नद्यां पाणिपादं प्रक्षाळ्य पानीयं पिबेयम्। (इति नमति)

(सत्यवती यानपत्रे उपविश्य गायन्ती आस्ते)

गीतम् (पीलु रागे)

मदन नव मदन ॥ ध्रु ॥

नवयौवन हृदयविमोहन । यौवत हृदय प्रशासन ।
सतत सरस विचालन । सुन्दर दर्शन मन्जुल भावन ॥ १

मधुर मधुर ते हसन । मधुर मधुर ते भणन ।
मधुर विरहे तपन । मधुर ते सस्मरणम् ॥ २

तव भावन जनित सुखोऽय । जनयति शतवर्षसुख ।
कोऽपि न पश्यति तव वदन । यौवतहृदय बहुतुदनम् ॥ ३

शन्तनु — (आकर्ण्य, पार्श्वाय पात्वा) कुतोऽत्र गीत समुत्पत्ति (समन्तत विलोक्य) अहो अत्राय परिसर मधुर गन्धावृत चेत उन्मादयति । अय पुष्पलता लताया गन्ध भवति । अय गन्ध अथ गानविशेष नाशा पुट श्रवणेन्द्रिय च उन्मादीकृत्य मन सन्तोष पारवश्यता प्रापयति । भवतु गत्वा पश्यामि । (इति कतिचित् पदानि गत्वा, आत्मगतम्) अहो केयं सौन्दर्यमयमूर्ति । एषा मम एव भासते ।

किमेषा गलिता नाकात् । रम्भा काञ्ची गुणाकृता ।
उतस्रस्ता जलेजाना । मन्दाकिन्याश्च मालिका ॥

अस्या दर्शनानुपदमेव लाडगकसुख मा प्रयति तया भाषितु । (इति कतिचित् पदानि गत्वा) यानपात्रे आसीना एषा मम एव प्रतिभाति ।

जलेऽस्मिन् यान पात्रे सा । तन्वीनीलोत्पलाक्षिणी ।
उपविष्टाऽस्ति तूणीरे । मारबाण इव स्वयम् ॥

एषा मा स्वाय सौन्दर्येण शनै शनै निकट समाकर्षति । भवतु पृच्छामि ता किंचित् । (समीप गत्वा) तरुणि ! काऽसि ? किमर्थं एकाकिना अत्राऽवस्थिताऽसि ।

सत्ययती — (ससम्भ्रम उत्थाय) काऽसि त्व एकान्त यामिनीं युवतीं विद कि पृच्छसि ?

शन्तनुः — युवती ! अहं राजा। मम नाम शन्तनुः।

सत्यवती — (उत्थाय) भवान् राजा इति मया श्रुतं। नमामि महाराज।

शन्तनुः — किं त्वया अधुना गीतम्?

सत्यवती — हा अधुना मया गीतम्। गानं सम्यक् न जानाम्यहम्।

शन्तनुः — त्वं गानं सम्यक् जानासि। ते गानं अतीव सुन्दर अस्ति। तव गीतेन समाकृष्टोऽहं अत्रागच्छम्।

सत्यवती — (लज्जिता) गानं सर्वं प्राणिभ्यः अत्यन्त रोचते।

शन्तनुः — गानं सर्वं प्राणिभ्यः न रोचकं भवति, किन्तु अल्पसङ्ख्याकेभ्यः रोचकं भवति।

सत्यवती — सत्यमेव। किन्तु गान देवदत्तं भवति।

शन्तनुः — भवत्या सम्यगुक्तं। त्वं एकाकिनी अत्र किमर्थं उपविष्टाऽसि।

सत्यवती — अयं मे तात विनियोगः।

शन्तनुः — तव पितुः नाम किम्?

सत्यवती — मम पितुः नाम दाशराजः।

शन्तनुः — त्वया अत्र किं क्रियते?

सत्यवती — याताऽयात जनसौकर्यार्थं धर्मेण तरीं चालयामि। अयं मम पितुः आदेशः।

शन्तनुः — तव पिता त्वा अस्मिन् कर्मणि नियोजितः।

सत्यवती — हा मा अस्मिन् कर्मणि नियोजितवान् मे पिता।

शन्तनुः — शिरीषमृदुङ्गी भवती क्व तरीतारणं क्व। शृणु तन्वि।

> **मुग्धे सरस तन्वङ्गि। जले ललित पद्मिनि।**
> **व्याकिरन्त्यसि गन्धंते। भावनारूप शालिनि॥**

युवति। ते यौवन मादकता ते रूप लावण्य तव विलासादिक ते शरीर धर्म गन्धानिलश्च मा बहुधा उन्मादयन्ति। अहं त्वा चकमे त्वं मे भार्या भवितुमर्हसि।

सत्यवती — महाराज मे पिता दाशकुलाना राजा। तस्य आज्ञयाविना अत्र पत्रचालनमपि न भवति। तस्या आज्ञा अस्माकं सर्वथा शिरोधार्या भवति।

शन्तनु — सुन्दरि ! अहमस्य लोकस्य राजा। अहं किं ब्रवीमि तत् त्व शृणु। इदं कर्म तवानुचितं। त्वं त्वदीय रूपलावण्यादिभि राज्ञा भविता। शृणु मद्वाक्य, त्वं मे जीवन सहभागिनी भव। स्वर्गसुखमनुभव।

सत्यवती — राजन् ! नाहमस्मिन् विषये वक्तु शक्ताऽस्मि। (इति लज्जा अभिनयति)

शन्तनु — अहो त्वं लज्जावती जाता। त्वं परमरमणीया भाससे लज्जाया।

लज्जा भूषित तन्वङ्गी। भ्राजते हृदयङ्गमा।
कुड्मलैः पल्लवैर्युक्ता। पुष्पवल्लीव मञ्जुला॥

अहं तव सौन्दर्येण स्वात्मानं विस्मृत्य तव नामापि प्रष्टु विस्मृत। अधुना त्वं कथय ते नाम किम्।

सत्यवती — मम नाम सत्यवती।

शन्तनु अहो परम रमणीय भवति सर्वं।

त्वयाऽऽकृष्ट मनोभाव। शरीरेणास्मि साम्प्रतम्।
भ्रान्तिर्भवति तन्वङ्गि। पाणिग्रहणमस्तु नौ।

त्वदीय सत्त्वमपि मे सुन्दर भवति तत् मे चित्त च तुदति। ते पिता कुत्र वसति।

सत्यवती — अत्रैव अस्या नद्या तटे पर्णकुटीरे वसति।

शन्तनु — रमणि ! त्वं सर्वदा मे कामोन्माद कारयित्री भासि।

मधुरं बहु पुष्पेषु। भ्रमरोऽयं निपीय च।
मधु पातुं समायातः। सहकारं प्रियं प्रिये॥

सुन्दरि, मया लोके बहूव्य तरुण्य दृष्टपूर्वा आसन् किन्तु त्वत्समाना नाद्यपर्यन्तं अवलोकिता।

सत्यवती — महाराज !

भाषितं ते प्रभो जाने । नाहं किमपि लज्जया ।
किन्तु जानामि कंदर्पं । मदधीन मदालसा ।।

शन्तनु — अहो अमृततुल्य ते भाषणम् । सत्यवति त्व तत्र गृहस्य मार्ग मादेशय ।

सत्यवती — (उत्तिष्ठति) एहि प्रभो इत इत । (इति मार्गमादिशति)

शन्तनु — तामनुसरन् (आत्मगतम्)

कान्ता प्रिया मन्मथराज्य राज्ञी । प्रशास्ति मां भूतलराज्य भूपं ।
कामान्धकारेण परीतचित्तः । भजामि ता मोहन मन्त्रमुग्धः ।।

(इति गच्छति)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(दाशराज गृह । दाशराज मित्रैस्सार्धं गायन् गायन् जाल संयोजयति)

गीतम् (मालकौंस रागे)

दाशराज — आयाहिरे ! आयाहिरे ! आयाहिरे !
विहायसे सराग रश्मि चन्द्रमा
तनोति सान्द्र रोचि मजु चन्द्रिका
सिन्धुराव घोषिता रोदसी कन्दरा
यान्तु यानपात्र चालकास्सधीवरा ।।

अनुचरा — याहिरे याहिरे याहिरे याहि ॥

दाशराज. — चन्द्रहास मज्जिता तामसी प्रिया
सर्वदेह कान्ति पुंज मञ्जुवल्गुना
निश्चला विभासते तारालोचना
यान्तु यानपात्र चालकास्सधीवराः ॥

अनुचराः — याहिरे याहिरे याहिरे याहि ॥

दाशराज — तन्तुजाल जाल वेत्रयष्टि वेल्लितरः
कामिनी विलास रासकेलि लोलुपाः
वीरपान घूर्णमान मानसोर्मिकाः
यान्तु यानपात्र चालकास्सधीवराः ॥

अनुचरा· — याहिरे याहिरे याहिरे याहि ॥

दाशराज· — आयाहिरे आयाहिरे आयाहिरे ॥

मीनग्राहकः — महाराज श्रुतोस्म्यहं यत् भवता कन्यायाः विवाहः अस्मिन् वसन्तर्तौ कर्तुमिच्छति· भवान् इति।

दाशराज· — प्रयत्ना विधीयन्ते वसन्तर्तौ कर्तुं। किन्तु अनुरूप वरप्राप्तिः एतावत्पर्यन्तं न जाता।

नौचालकः — वरान्वेषणं कुत. भोः। अनुरूपोवरः कन्यायाः पादसन्निधिं समागमिष्यति। मा ते चिन्ता भवतु।

दाशराज — सम्यक् भणितं त्वया। किन्तु मानव प्रयत्नः कर्तव्य खलुः।

मीनग्राहक — वय निमित्त मात्राः। सर्वं देवनिर्णयानुसारेण भविष्यति। कुत्र लिखितं अस्ते न कोपि जानाति।

नौचालकः — यदि समयः अनुरूपः भवति सर्वं विनायासेन भविष्यति।

दाशराजः — हा वयं समय निरीक्षकाः। यदा समनस्य कल्याणस्य च समयाविर्भावः भवति तदा विनावरोधं द्वयं भवति।

नौचालकः — अधुना भवत पुत्री नौचालने तज्ञा अस्ति।

दाशराजः — अयं अस्मदीय साम्प्रदायः यत् बालिका-बालकौ नावं चालयितुं समर्थौ भवतः तौ कुटुम्बचालने योग्य तज्ञौ भवत· इति।

मीनग्राहक. — अर्थात् भवतः कन्या सत्यवती अधुना कुटुम्बमपि सौख्येन चालयितु शक्ता भविष्यति।

दाशराजः — हा! सत्यमेव। सा कुटुम्ब चालयितुं शक्ता भविष्यति।

नौचालक — राजवंशजाना अनुरूपेण गान्धर्वविवाहेन विवाह· कर्तव्य.।

दाशराज· — वय राजानः। तथैव करिष्यामः। तस्मात् ता नौचालने यातायातजननदीतारणे नियुक्तावानस्मि। यदि य· कोऽपि सुन्दरः युवा तस्या· दृष्टिपथं गमिष्यति तर्हि तयोः प्रेमविर्भावः भविष्यति तदा अस्मदीय प्रयत्न सुलभतम भविष्यति इति बुद्ध्या सर्वं समालोच्य मया कृतम्।

नौचालक. — राजवंशजाना राजवंशजाः योग्याः भवन्ति न चान्ये। यदि प्रेम अन्य वर्गैः भविष्यति चेत् तत् प्रेम जीवनसौख्ये अन्तराय कारक भविष्यति, तस्मात् विवाहे समानधर्म. भवितव्यः।

मीनग्राहक. — अन्नपानविषये यदि समानता स्यात् तर्हि विवाह येनकेनापि योग्यः भवति। असमानता अन्नपान विहारेषु भवति।

दाशराजः — मया निश्चितं यदि कन्यायाः विवाह· राजवंशजेः निश्चितः भवति तर्हि विवाहः कर्तव्य नोचेत् नहि।

मीनग्राहक· — यदि कन्याया· प्रेम अन्यैर्भवति चेत् विवाहः न भवति किम्?

दाशराज. — त विवाहं नाहमङगी करोमि। अहं साम्प्रदायानुवादी। लोकाः मा निन्दन्तु। नाहं अस्मात् पथः एकपदं अपि चलामि।

(तत. प्रविशति शन्तनुद्वितीया सत्यवती)

सत्यवती — पित· नमामि। अह आगतास्मि।

दाशराज· — (शिरः उन्नमय्य शन्तनु द्वितीया ता विलोक्य) बाले कोऽयं पुरुष·।

सत्यवती — (लज्जिता निर्गच्छति गृहस्यान्त)

शन्तनु — दाशराजा अह कथयामि कोऽह शृणु। अह राजा शन्तनु ।

दाशराज — अयि सुहृदौ यूवा गच्छतात्। (इति आदिशति, तौ गच्छत) (ससभ्रम उत्थाय विनीत बद्धाञ्जलि) अहो भवन्त महाराजान । दरिद्रस्य मम गेह समागता । धन्योऽस्मि महाराज। इद मे भाग्यम्। उपविष्टुमपि मम गृहे आसनादिक पीठादिकमपिनास्ति। (इति सभ्रमेण एक दारुफलक आनीय उपविष्टु स्थापयति)

शन्तनु — (दारु फलकोपरि उपविशति)

दाशराज – (तिष्ठन्) महाराज। यदह काकेन सन्दिष्टोऽस्मि तर्हि भवत चरणसन्निधिमागत्य निवासितोऽस्मि। किमर्थं भवन्त बहु कष्टेन आगतवन्त । मत्त क सहायमपेक्ष्यते।

शन्तनु — दाशराज ! त्वमपि उपविश।

दाशराज — (उपविशति एकस्मिन् दारुफलके)

शन्तनु — इद मम कर्म। तस्मात् स्वय अह आगतोऽस्मि।

दाशराज — कर्म भवदीय उत ममाकीन भवतु नाम अहमेव तत्र सन्निधि माहूतव्य ।

शन्तनु — एतत् मम कार्यं तस्मात् ममागमन योग्य भवति ।

दाशराज — अनुगृहीतोऽस्मि। मया कि कर्तव्य मियते आज्ञापयन्तु भवन्त ।

शन्तनु — दाशराज अह त्वा एक प्रष्टु समागतोऽस्मि।

दाशराज — भवन्त राजान देशपालका महापुरुषा वय अल्पा दरिद्रा । अस्मत्त भवद्भ्य किमपेक्षणीय मियते कथयन्तु भवन्त ।

शन्तनु — अहं भवत कन्या परिणेतु इच्छामि।

दाशराज — (ससभ्रमम्) अहो भवद्भि किमुदीर्यते।

शन्तनु — अह सत्य मनसा कथयामि।

दाशराज — महाराज एतत् म मे स्वाप्निक भाति।

शन्तनु — एतत् सर्वं सत्य तथ्य भवति न स्वाप्निकम्।

दाशराज — महाराज! आवयो समागम न योग्य स असाम्प्रदायक।

शन्तनु — कथ भवान् ब्रवीति।

दाशराज | अय तु साम्प्रदाय।

शन्तनु — जानाम्यह तथापि पृच्छामि।

दाशराज — महाराज त्रिदशालय क शृगाल क। द्वयोर्मध्ये महदन्तर विद्यते।

शन्तनु — यदि त्व मम कामना पूरयसिचेत् अन्तर नैव भवति।

दाशराज — एषा वरवर्णिना जातमात्रैव योग्य वराय दातव्या इति।

शन्तनु — का त भावना।

दाशराज — "समानशील व्यसनषु सख्य।" कलहस्य सम्बन्धस्य, स्नहस्य च अर्हता समानता च आवश्यके नाचेत् ते न शोभन्ते।

शन्तनु — दाशराज! समानता असमानता च निर्धारका वय मानवा एव। यत्र रत्न विद्यत तत् धराधिपाना ग्राह्य भवति। अय साम्प्रदाय अहमपि साम्प्रदायमनुसृत्य कन्यारत्नमिद ग्रहातुमिच्छामि।

दाशराज — कन्यारत्न विषये परम्परा एव न विद्यतेऽति मे भावना।

शन्तनु — रत्नहारितु पार्थिव। तस्मात् कन्या रत्नहारिन मम प्रार्थना भवान् अङ्गीकरोतु।

दाशराज — महाराज! स्वार्थाय व्यक्तिश भवतश नियमा मा भवन्तु।

शन्तनु — आहा राजानौ! आवयो समानशीलता विद्यत।

दाशराज — राजन्। भवान् स्वार्थाय न्यायास अर्मत नहि। अह मत्स्य राजा। भवान् मर्त्य राजा। अत्र महदन्तर विद्यत। अत्र समानता नास्ति।

शन्तनु — भगवत सृष्ट्या तस्य दृष्ट्या वय सर्व मानवा समाना।

दाशराज — महाराज! राजान बहुपत्नीका अत मम कन्या तुभ्य दास्यामि।

शन्तनु — भवान् जानाति यत् राज्ञा बहुपत्नीकत्व शास्त्रसम्मतामति।

दाशराजः — बहु पत्नीकस्य राज्ञः का धर्मपत्नी भवितुमर्हति।

शन्तनुः — आदौ परिणीता धर्मपत्नी भवति।

दाशराजः — तस्मात् अहं मम कन्या तुभ्यं न दातुमिच्छामि।

शन्तनुः — धर्मपत्नी विनियोगेन भवितुमर्हति।

दाशराजः — तथा यदि स्यात् भवान् एनां धर्मपत्नीं, मत्तः प्रार्थितः सत्येन समयं करोतु मम।

शन्तनुः — अहं कर्तुं व्यवसितः। किमिति।

दाशराजः — महाराज। कन्या इमा ते प्रदद्या त्वत्समः मे वरः जातु न भविष्यति।

शन्तनुः — किमपेक्ष्यते भवता पृच्छतु।

दाशराजः — महाराज धर्मपत्नीव एना स्वीकृत्य अस्या यः पुत्रः जायते सः राजा भविता। तवानन्तरं नान्यः कश्चन अभिषेक्तव्यः भवति। तथा यदि विधीयते अहं दित्सामि कन्यामेनाम्।

शन्तनुः — दाशराज ! अवाञ्छनीयं याचितं भवता।

दाशराजः — महाराज ! अहं पक्कण निवासी। भवान् स्वयं मत्सकाशं कन्यार्थं समागतः अस्ति। मयाचोक्तं समान शीलता नास्तीति। अनंतरं यदि कन्यायाः द्रोहः भविष्यति चेत् कथम् ? तस्मात् दीर्घ दृष्ट्या एवं मया पृष्टोस्ति भवान्।

शन्तनुः — (*निर्विण्णः, व्यथया*) अहो दाशराज ! अयाच्यं याचितं भवता। दाशराज मे शिरोवेदना भवति गृहं गन्तु मे मनः इच्छति। (इत्युत्थाय गच्छति)

दाशराजः — अहो किं कृतं मया। (इति मस्तकन्यस्तहस्तः चिन्ताक्रान्तः भवति।

(यवनिका पतति)

तृतीयं दृश्यम्

(ततः प्रविशति देवव्रतः वृद्धामात्यश्च, देवव्रतः एकस्मिन् पीठे उपविशति, वृद्धामात्यः तस्य पुरतः बद्धहस्तः तिष्ठति)

देवव्रतः — अमात्यवर्य ! मे पिता ह्यः प्रभृति एकान्ते निवसन् चिन्तयन् आस्ते तत्र कारणं किमिति मे प्रश्नः ।

अमात्यः — देव ! अहमपि तदेव चिन्तयामि। किन्तु महाराजानां स्थिति मुद्दिश्य प्रष्टुं अहं अशक्तः अभवम्।

देवव्रतः — पिता न केनापि सवध विना मौनेन कालं यापयति।

अमात्यः — ममापि कारणं दृष्टिपथं नायाति।

देवव्रतः — इतः पूर्वं अथात् दिनद्वयात्प्राक् पिता सन्तोषेण यमुनातीरं सचारार्थं जगाम।

अमात्यः — जानाम्यहम्।

देवव्रतः — तदा ते अत्युत्साहिनः अदृश्यन्त।

अमात्यः — अधुना यमुनातीरसचारेण बहु परिश्रान्ता जाता इति ममाभिप्राय ।

देवव्रतः — परिश्रान्ताः उत्साहिनः दृश्यन्ते। ततः एषा चिन्ता यमुनातीरं सचारेण सजाता नहि।

अमात्यः — तर्हि कस्मात् कारणात् उत्पन्ना इयं स्थितिः (इति चिन्तयति)

देवव्रतः — अमात्यवर्य ! भवन्तः अनुभवज्ञाः सर्वमपि जानन्ति किन्तु हृद्गताभिप्रायं सत्वरं न प्रकटयन्ति।

अमात्यः — तथाभवद् युवराज। इयं परिश्रान्तेन समुद्भूता वेदना भवति न त्वन्या।

देवव्रतः — पितृपादानामवस्था मे समक्षं दृश्यते।

परिश्रान्तेन जाता न। मन्ये पितृ विचारणा।
पिण्डीकृत्यास्य चित्तं तु। दहतीवाऽस्ति वेदना ॥

अमात्य — तनय ममैव पितु समीप गत्वा तद्वेदनाया कारण पृच्छ।

देवव्रत — अमात्यवर्य! अह तस्य पुरत बाल। त कदापि वैयक्तिक विषय मे न कथयन्ति तस्मात् अमात्यवर्या अनुभवज्ञा भवन्त पितर पृच्छन्तु।

अमात्य — वय तेषा समक्ष गत्वा प्रष्टु सकाचमनस्का भवाम। तस्मात्

मूर्धाभिषिक्त गत्वा त्व। आपृच्छस्व पर सुत।
नान्य शक्तो तथा गन्तु। प्रजाना पितर स्वयम्॥

देवव्रत — अमात्यवर्य मया सार्धं भवानप्यागच्छतु।

अमात्य — तत्र मे प्रवेश अनुचित तनय।

देवव्रत — कथ भवता प्रवेश अनुचित कथयन्तु भवन्त।

अमात्य — तनय! यदि कौटुम्बिक विषय स्यात् स विषय पुत्रपर्यन्त याग्य भवति। कौटुम्बिक जीवन रहस्यमय जायते। लोकोक्ति विद्यते खलु कौटुम्बिक जीवन रहस्यमय भवितव्यम् इति। तस्मात् भवता एकाकिना तत्रागमन औचित्य विद्यते।

देवव्रत — भवन्त अनुभवज्ञा। भवदुक्तिमनुसृत्य अहमवगच्छयम्।

अमात्य — भवान् अधुना गच्छतु।

देवव्रत — भवता वचनेन अह प्रबुद्धित अभवम्। अह अधुनैव गच्छामि। (इति गच्छति)

अमात्य (निश्वस्य गच्छति)

(यवनिका पतति)

* * *

चतुर्थ दृश्यम्

(शय्याया उपविश्य राजा शन्तनु चिन्तयति)

शन्तनु — (आत्मगतम्) अहो कि तस्या नो दया।। एक दृष्ट्वा तर्न

मदनः मा विवशं चकार। कथमहं बाधामिमा सहिष्यामि। दाशराजः हिरण्याक्षवरान् पप्रच्छ। अहं कथं दातुं शक्तः। विद्यते खलु मे पुत्रः देवव्रतः।

तं विहाय सत्यवत्याः पुत्रं कथमहं कुर्यां राजानं। अहो मे हृदयं कामेन तप्तं भवति। बुद्धिस्तु चिन्तास्पदा विचेष्टते। अहं मे मनोगताभिप्रायं कस्मै वक्ष्यामि। लोकः मां पितरं विरहेन दूयमानमानसं विलोक्य विनिन्दिष्यति। चोरस्य वृश्चिका दंशनमिव सर्वं सोढ्वा प्रवर्तितव्यम्। अहो मे राज्ञः स्थितिः एवं संजाता। सानितान्तं मे दृष्टिपथं समायाति। मां प्रेरयति परिरम्भसुखाय। यदि वृद्धामात्यादयः ज्ञास्यन्ति मे स्थितिं मा गतथा मनसि निंदिष्यन्ति। अहं लोके हास्यस्पदस्थानं भजिष्यामि। मे पुत्रः देवव्रतः विवाहयोग्यकालपक्षः राजते। तं विहाय अहं सत्यवत्या विवाहं कर्तुं प्रयते। केयं मम स्थितिः। कथमेषा अवटना घटिता। किमत्र कारणम्। सर्वस्यापि कारणं भवत्येव। विना च कारणं अपिच ईश्वरेच्छा न पत्रमपि चलति। मे हृदयं प्रतिक्षणं सत्यवती सौन्दर्यदर्शनजन्य काममावनाया अपूर्वजनित वासनाया प्रति क्षणं संलग्नं परिदूयते। अहं ता कथं विस्मरिष्यामि। सा प्रतिक्षणं मा हावभाव पराकष्ठता प्रापयति। परं गतथा दग्धोऽहं अनया कामनया। विरहानलसंदग्धमानसं तदा तदा तदीय रूपाविष्कारेण आनन्दे क्रीडते च।

स्मारं स्मारं चपलनयनां तां तपत्यन्तरात्मा।
वारं वारं त्यजति मदनो निष्ठुरं पञ्चबाणान्।
दर्शं दर्शं हिमकरमुखीं कम्र वक्षोज तन्वीं।
श्रावं श्रावं सरस वचनं मे मनः क्रीडते हि॥

हा अहो बत। (इति शय्याया परिदूयमान मानसः आस्ते। ततः प्रविशति द्वारपालकः लम्बकर्णः)

लम्बकर्णः — (प्रविश्य नमस्कृत्य) महाराज राजकुमारः देवव्रतः द्वारि तिष्ठति भवतः द्रष्टुम्।

शन्तनुः — (आत्मगतम्) देवव्रतः मा द्रष्टुं द्वारि तिष्ठति। लम्बकर्ण तं प्रवेशय। (इति आज्ञापयति)

लम्बकर्णः -- यथाज्ञापयति देव.। (इति गच्छति)

(तत प्रविशति देवव्रत)

देवव्रत — नमासि पित । (इति नमस्करोति)

शन्तनु — चिरजीव कुमार। किमत्र कारण विद्यते तव प्रवेशस्य।

देवव्रत — पित महत् कारण विद्यते।

शन्तनु — एहि उपविश अस्मिन् पीठ (इति पीठ दर्शयति)

देवव्रत — (पाठ उपविशति)

शन्तनु — किं कारण विद्यते कथय अधुना।

देवव्रत — अयि पितृ चरणा भवन्त दिनद्वयाप्रभृति अतीव दूयमान मानसा दृश्यन्ते। का हेतु विद्यते इति सकल राजस्थान मनसि दूयत।

शन्तनु — सकल राजस्थान चिन्तयति मामुद्दिश्य ?

देवव्रत — हा सकल राजस्थान चिन्तयति अपि च भवत कारण प्रष्टु त्रस्ता भवति। तस्मात् भवत परितापस्य कारण ज्ञातु। वृद्धामात्या मा प्रेषितवन्त ।

शन्तनु — न कोऽपि विशेष विद्यते तनय। शरीर धर्म परिवतत। नात्र चिन्ताकाया।

देवव्रत — भवता ताप शरीर धर्मात् जात नहि। किन्तु बौद्धिकमिति समस्त कर्मचराणा अनुमेय ।

शन्तनु — अनुमेय निराधार ।

देवव्रत — भवन्त दिनद्वयात् प्राक् यमुनातीर सचारार्थं गतवन्त । तदा अतिशय सताप भरिता अदृश्यन्त। यमुनातीर सचार समाप्यानन्तर गृहमागताना भवता वदनमण्डल चिन्ता राहुग्रस्तमिव चा दृष्टि सर्वेषा अभिप्राय ।

शन्तनु — तनय यमुनातीर सचारण बहुपरिश्रान्त अभवम्। सम्प्रति शरीर मिममभिभावयत व्यथया।

देवव्रत — भवन्त अपहृदयोद्गार कथयन्ति।

शन्तनु — तनय तवगरत मम अपहृदयोद्गारण प्रयोजनम् किम्।

देवव्रत म ण्व ममापि प्रश्न ।

शन्तनुः — त्वं मम पुत्रोऽसि अत्र गोपनीयं न किमपि विद्यते गच्छ।

देवव्रतः — जनक ! भवता क्षेमकारिणः परिचर्यां कर्तुं बहवः परिचारिकाः वर्तन्ते. किमर्थमेकान्ते चिन्तनम्।

शन्तनुः — वत्स त्वं सर्वं राजास्थान मुखात् मा प्रष्टुं समागतोऽसि तस्मात् अहं कथयामि शृणु।

देवव्रतः — अवहितोऽस्मि पितः।

शन्तनुः — त्वं एक एव ममापत्यम्। महति कुले शतपुत्रापेक्ष्या एकः सुपुत्रः अलं। नाहं भूयः दारान् विवाहितुमुत्सहे। वत्स त्वं च शूरः। युद्धे ते निधनं मा भूयात्। यदि भविष्यति। (कर्णेपिधाय) शान्तं पापं शान्तं पापम्। अहं सर्वदा संशयात्मा भवामि। अयमेव व्यथायाः हेतुः। एकपुत्रत्वं अनपत्यता इति धर्मवादिनः कथयन्ति। तस्मादहं संशयमापन्नः त्वा चिन्तयामि। एतदेव कारणं नान्यत् विद्यते तात।

देवव्रतः — पितः : विदितं मया भवतः व्यथायाः हेतुः।

शन्तनुः — त्वं न चिन्ताधीनो भव। त्वं योद्धा वीरोऽसि।

देवव्रतः — अहं चिन्ताधीनो न भवेयम्। किन्तु भवन्तः शान्त चित्तेन स्वपन्तु। विश्रान्तिसुखमनुभवन्तु सर्वं साधु भविष्यति। मा गन्तुमाज्ञापयन्तु भवन्तः।

शन्तनुः — कुमार त्वं ससुखं निश्चिन्तया व्यवहर। मा ते चिन्ता मा प्रति। त्वं गच्छ।

देवव्रतः — नमस्ते पितः। (इति नमस्कृत्य गच्छति)

शन्तनुः — अयं विदित वृत्तान्तः इति मन्ये। अयं यदि सत्यं जानाति तर्हि अवश्यं मे मनोरथ पूरणाय प्रयतिष्यति। अयं कार्यसाधकः। योद्धा। त्यागी च। अधुना किं कुर्यां। विवाहयोग्य कुमारेण सहितोऽपि नैकवनिता परिवेष्टितोऽपि राजा पुनर्विवाहाय प्रयतते इति यदि लोकः जानाति मा अवश्यं परोक्षे टीका करिष्यति। यदि एतत् योग्यं मम ? उत न योग्यम्। किन्तु विना सत्यवतीचिन्ता अहं मृतीभावं प्राप्तुं अशक्तः। एकत्र लोकापवादः अन्यत्र मनस्तापः। मे स्थितिः अधुना सर्वतः प्राण हारिणी भवति। पुरतः वापी पश्चात् पल्वलम्। कुत्र गच्छेयं कथं गच्छेयम् किं

कुर्याम्। अहं शतधा चिन्ताक्रान्तः। भवतु सर्वस्य मूलकारकः कर्ता च सर्वेश्वरः। तस्याज्ञयाविना पिपीलिकापि न दंशति। सर्वत्र कार्यस्य सर्वथा कारणं वर्तते। नहि विचारणीयं सर्वं सुखान्तं भविष्यति। निद्रा मां वृणोति। निद्रया व्यपगतचिन्तः भविष्यामि। यतः।

निद्रापरं स्थावर जंगमानां। सौख्याय हेतुर्भवतीहलोके।
योऽयं प्रयासं भजते च निद्रां। विनैव शान्तरससुखो प्रबुद्धः॥

(इति शय्यायां लुटति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(देवव्रतः विचारयन् हस्तौपृष्ठत बद्ध्वा इतस्ततः चरन् किञ्चित्कालानन्तरं उपविश्य वैद्युतभावनया सुप्रकाशित बुद्धिविशेषः करतलध्वनिं कृत्वा) कः कोऽत्र भोः। (इति आह्वयति।

प्रतीहारी — (प्रविश्य) अहमस्मि देवः। (इति नमस्करोति)

देवव्रतः — पितुः रथसारथिं प्रवेशय।

प्रतीहारी — यथाज्ञापयति देवः। (इति नमस्कृत्य गच्छति)

(ततः प्रविशति सूतः)

सूतः — (नमस्कृत्य) देव देवव्रत किमर्थमहमाहूतः)

देवव्रतः — सूत भवान् पितृसमानः अत्रोपविशतु।

सूतः — (नमस्कृत्य उपविशति)

देवव्रतः — सूत, त्वं, मे पिता शन्तनुमहाराजा च दिनद्वयात्प्राक् कुत्र गतवन्तौ।

सूतः — आवां यमुनातीरं गतवन्तौ।

देवव्रतः — यमुनातीरे कुत्र।

सूतः — यमुनातीरे पक्कण समीपम्।

देवव्रतः — यमुनातीरः सुन्दरः खलु।

सूतः — यमुनातीरः सुन्दरः।

देवव्रतः — पक्कण प्रदेशः अति सुन्दरः इति मन्ये।

सूतः — हा सत्यमेव सः प्रदेशः सुन्दरः। तत्र सर्वेऽपि वृक्षाः पुष्पफल संभारिताः वर्तन्ते। कोकिलादीना आलापाः श्रवणपुटं तर्पयिष्यन्ति।

देवव्रतः — तस्य पक्कणस्य समीपे किं दृष्टं पित्रा।

सूतः — देव तत्र पित्रा सकलं वनं दृष्टं। अपि च तत्र यमुनानद्या याताऽयातान् तारयितुं विद्यमाना यानपात्रसहिता एका युवतिः दृष्टा आसीत्।

देवव्रतः — (आत्मगतम्) एका युवतिः दृष्टा सा का? (सूतेन सार्धं) सूत दृष्टा युवति. का?

सूतः — सा दाशराजस्य पुत्री।

देवव्रतः — दाशराजा क. ?

सूतः — सः तस्य पक्कणस्य राजा।

देवव्रतः — सा कन्या तस्य दुहिता किम्?

सूतः — हा तस्य दुहिता।

देवव्रतः — सा कीदृशी।

सूतः — सा अतीव सुन्दरी।

देवव्रतः — त्वया यथा दृष्टं तथा वर्णय।

सूतः — तां वर्णयितुमहं अशक्तः।

देवव्रतः — स्वल्पवचनैः ता वर्णय।

सूतः — सा त्रिलोकसुन्दरी। तादृश सौन्दर्यवती पक्कणालये कथं जाता

इति मम शङ्का भवान। तथापि स्वभावात्तया प्रकर्ति करिष्यामि।

अस्ति काञ्चन समान वल्गुना। बहिर्बर्ह निभ चारुकेशिका।
मन्दचालन विलोलनितम्बा। बाहुमूलरुचि दीपितस्तनी॥

देवव्रत — सा मम समक्ष त्वया साकारिता। निदितोऽस्मि सर्वं। आपच तत्र कि कृत कि कि वृत्तम्। सर्वं निवेदय।

सूत — देव, राजा ता दृष्ट्वा तयासाक भाषितवान्।

देवव्रत — कि भाषितवान्।

सूत — मया तत् सत्र न श्रुतम्।

देवव्रत — तत।

सूत — किंतु राजा ता तेन सार्धं परिणेतु चक्मे।

देवव्रत — तत।

सूत तत सा नाहं स्व उन्वृत्तमगम्यामि। अहं राजापि पित सम्मण आस्म इत्युक्तवता।

देवव्रत सावृत्त। ततस्तत।

सूत — ता पद पद स्वनाया भजित इयेष।

देवव्रत — तत।

सूत — सा अन्तत राज्ञासार्धं गृह गतवता।

देवव्रत — कि त्वमपि तया सार्धं तस्या गृह गतोऽसि?

सूत — अहमपि तावनमगम्।

देवव्रत ततस्तत।

सूत — शन्तनमहाराना स्वाय भार नागराजाय प्रश्न चकार।

देवव्रत मा त्रूम तत।

सूत — नागराजा एक वर याचितवान्

देवव्रत — किमिति।

सूत — महाराज भवान् पुत्रवानस्ति। ते पुत्र राज्यस्य उत्तराधिकारी भविष्यति। तस्मात् अहं भवन्तं एव याचे यत् भवान् सत्यवत्या आत्मनाय राज्यं दास्यति तर्हि सत्यवती विवाहं भवता साकं भविष्यतीति। नोचेत् नहि। इत्युक्तवान्।

देवव्रत — अतीव सुन्दरम्। ततस्ततः।

सूत — महाराजा तदीय कामना नाङ्गीचकार।

देवव्रत — तदा प्रभृति पिता एव आस्ते किम्।

सूत — अहमपि एवं मन्ये।

देवव्रत — सारथे त्वं मे समादरणीयाऽसि यत सविस्तरं यथावृत्तं उक्तवानसि। साधुकृतं बहु उपकृतं च भवता।

सूत — न किञ्चिदपि विद्यतेऽत्र दोषः मम कथने। यथावृत्तं भवता पृष्टं अवोचम्। मा भयात् कष्टं मे इति इयन्तं भवन्तं याचे। (इति नमस्करोति)

देवव्रत — सूत त्वं मे पितृ समानः। अहं त्वयि बद्धानुकम्पः तत्र न किमपि कष्टं भवति। त्वं निश्चिन्ततया कालं यापय।

सूत — अनुगृहीतोऽस्मि देव!

देवव्रत — सूत त्वं सत्वरं अधुनैव वृद्धपुरोहितैः मया सार्धं दाशराजागृहमागच्छ। तत्र किं करणीयं मया आज्ञाप्यते।

सूत — अवहितोऽस्मि देव। (इति नमस्कृत्य गच्छति)

देवव्रत — (ईषत् चिन्ताक्रान्तः विचार्य) अहं स्वयमेव पितृकामना पूरयेयम्। (इति गच्छति)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(देवव्रत वृद्धे क्षत्रियै सहित दाशराजसमीप आगच्छति)

दाशराज — (आगतान् सर्वान् विलोक्य, उत्थाय) तत्र भवन्त क। कस्मात् प्रदेशात् किमर्थं आगता निवेदय तु।

देवव्रत — अयि दाशराज अह शन्तनुमहाराजस्य पुत्र । मम नाम देवव्रत ।

दाशराज — युवराज इद आसन उपविशतु। (इति दारुफलक ददाति।

देवव्रत — दाशराज अह स्थित्वा भणिष्यामि। मास्तुते प्रयास आसनदाने।

दाशराज — कथ भवन्त हठात् आगतवन्त अत्र।

देवव्रत — दाशराज ! अह ते पुत्रिका सत्यवती मातर विधाय नेतु समागतोऽस्मि।

दाशराज — सर्वमेतत् आश्चर्यं प्रतिभाति मे युवराज। भवत पिता धर्मज्ञ ता बाहु शक्त भवति। पुरा मया बहव राजान प्रत्याख्याता। अह च कन्याया पिता। तस्मात् वचनाय इद ब्रवीमि। ममात्र कोऽपि सशय न विद्यते, किन्तु लोकव्यवहार मनुसृत्य प्रवर्तितव्य। अत्र बलवत् सपत्नता दोष पश्यामि। यदि त्वयि क्रुद्धे सति नातु कोऽपि चिर न जीवेत्। दानाऽऽदान एतत् नानाहि त्वम्।

देवव्रत — दाशराज ! अह सत्या भूमिपालाना समक्ष ब्रवीमि शृणु।

दाशराज — मया यत् पृष्ठ तत् विषयमुद्दिश्य प्रस्तावना करोतु भवान्।

देवव्रत — शृणु दाशराज। पुत्र य अस्या जनिष्यति स एव राजा भवि ष्यति। अयि भो नराधिपा राज्य पूर्वमेव मया त्यक्त। अपत्यहेतो अद्य विनिश्चय करिष्य। दाशराज अद्य प्रभृति मे ब्रह्मचर्य भविष्यति। दाशराज ! शृणु।

> **अस्या पुत्रस्तु राज्यार्हः । भविता नास्ति कश्चन ।**
> **ब्रह्मचारी सदैवस्या । प्रतिज्ञेय शृणु प्रियम् ।।**

दाशराज — (श्रुत्वा तस्य ब्रह्मचर्य प्रतिज्ञा) देव अह तव पितु कन्या ददामि। (इति ददाति)

देवव्रतः — दाशराज त्वदीय कर्मणा अहं संतुष्टोऽस्मि। अहं मे मातरं नमामि (इति नमस्करोति) मातः एहि अस्मिन् रथे उपविश। (इति सत्यवत्या पुरोहितैश्च सहितः गच्छति)

दाशराजः — (आत्मगतम्) अहो किमेतत् आश्चर्यम्। युवा देवव्रतः पित्रे स्वीय सौख्यं विहाय भीकर प्रतिज्ञया भीष्मः जातः। अयं महापुरुषः चरित्र प्रसिद्धः भविष्यति। (इति आनन्देन गच्छति)

(यवनिका पतति)

* * *

सप्तमं दृश्यम्

(शन्तनुः शय्यायां उपविश्य चिन्तयति)

शन्तनुः — हा सत्यवती खलु अपरूप सौन्दर्यवती। एक दृष्टिपातेन सा मम हृदयराज्ञी संजाता।

इयमास्ते प्रिया लोके। सौन्दर्य वरवर्णिनी।
संलग्ना सततं चित्ते। मदीये कामवागुरे॥

(ततः प्रविशति प्रतीहारी)

प्रतीहारी — *(नमस्कृत्य) अयि महाराज द्वारि कुमारः देवव्रतः मन्त्रि* पुरोहितैः भवन्तं द्रष्टुं तिष्ठति।

शन्तनुः — प्रवेशय सर्वान्।

प्रतीहारी — यथाज्ञापयति देवः। (इति नमस्कृत्य गच्छति)

देवव्रतः — (प्रविश्य) पितः नमामि।

शन्तनु — चिरजीव कुमार। किमत्र कारण विद्यते तव प्रवेशस्य।

देवव्रत — (करतल ध्वनि ददाति) तत प्रविशन्ति सत्यवती वृद्ध पुरोहितामात्या ।

शन्तनु — किमेतत् सर्वं सुत।

देवव्रत — पित , इय भवत पत्नी मे माता सत्यवती। (इति दर्शयति)

शन्तनु — (आश्चर्येण) तनय किमेतत् कृतम्। (इति शय्याया उ याय देवव्रतस्य हस्तौ गृह्णाति)

देवव्रत — जनक भवद्र यत् रोचते तत् मया सभक्तिक कृतम्।

शन्तनु — कथकृत सर्वमेतत् भवता।

देवव्रत — अह भवत चिन्ताजड वदन प्रवीक्ष्य तदनुसार सर्व विषय समालोच्य भवत कामना प्रकार सर्वमन्त्रिपुरोहिताना समक्ष अह ब्रह्मचारी भवेय इति दाशराजाय प्रतिज्ञावचन दत्वा मातर सत्यवतीमानयम्। (इति नमस्करोति)

शन्तनु — कुमार दुष्कर अपिच। भीषण कर्म त्वया कृत, तस्मात् त्व अद्य प्रभृति लोक भीष्म इति नाम्ना प्रख्यात भविष्यसि। तव अस्य कर्मण अह त स्वच्छन्द मरणाय वर ददामि। तवेच्छानुसार ते मरण भवति न त्वन्यथा।

अद्य प्रभृति लोकेऽस्मिन्। भविष्यसि पर सुत।
ब्रह्मचर्येण भीष्माख्य। स्वच्छन्दमरणे रतः॥

(इति सत्यवतीं स्वसकाश नीत्वा तयासहित तस्मै आशी ददाति)

देवव्रत – धन्योऽह (इति नमस्करोति)

(सत्यवतीशन्तनुभीष्मादीना उपरि पुष्पाक्षता पतन्ति। शहनायी इत्यादि मङ्गलनिस्वना भवन्ति)

(यवनिका पतति)

* * *

॥ सावित्री ॥

सावित्री सूर्यसुषमा दद्याच्छक्ति धियं श्रियम् ।
सततं शुष्यमाणेभ्यः जीवनं च महीतले ॥

नान्द्यन्ते

सूत्रधार. — प्रिये चारुशीले ! इतः समेहि ।

नटी — एषाऽस्मि । को विशेषः ।

सूत्रधार· — पश्य ।

विभावरी शरच्चन्द्र-चन्द्रिका सागरे परम् ।
स्नात्वाम्बराभूषितासौ शारदेव विराजते ॥

नटी — कल्पनाविलासनम् इद प्रियं भाति ।

सूत्रधार. — अद्य अस्मिन् शरदृतौ कार्तिक-पौर्णमास्यां भारतीय-स्त्रीणां कीदृशी शक्तिः विद्यते इति दर्शयितुम् अपि च स्त्रियः सर्व-शक्ति-सपन्नाः पुरुषेभ्यः समधिकतर समाननीयाः इति प्राचीन-परम्परागत भावना प्रमाणीकृत-मृत्यु सावित्री-नाटकरूपेण प्रदर्शयितु समुत्सुकोऽस्मि । विषयेऽस्मिन् कस्ते अभिप्राय. ।

नटी — अय प्रपञ्च. पुरुष-प्रकृति-विलसितः । सहजतया स्त्री-पुरुषयो· समानता केवल जन्मतः सक्रामति । स्त्रियः पुरुषाणाम् अपेक्षया अधिकतरं समाननीयाः इत्येषा भावना सहजा नहि किंतु समानतया द्रष्टव्या इति मे मनीषा । अपि च, कोऽयं कविः ? किं तस्याभिधानम् ?

सूत्रधार — अस्य कवेर्नाम परीक्षित् शर्मा । अयं गीर्वाणान्ध्रभाषा प्रवीणः कलाभिमानी महाकविश्च ।

नटी — प्रशंसनीयः अस्य प्रयत्नः यतः भारत-जीवन-शक्ति-भूता सुरभारती विस्मृत्य सर्वे भारतीयाः अर्थ-सग्रहणे सुखानुभवे च निरतर लोलुपाः भान्ति । किंतु अय कविः कालप्रवाहस्य प्रतिकूलो भूत्वा सुखार्थि-

भावनां सत्यज्य साधारण-जीवनं कुर्वन् सुरभारत्यां विलिखति। किमेतद् आश्चर्यम् ? अयं भारत-सांप्रदायाभिलाषी देशभक्त: इव आभाति।

सूत्रधार. — अयं ललित-गीता-लहरी इति गेय-काव्यं यशोधरा-महाकाव्य च विरचितवान् सुरभारत्याम्।

नटी — अस्य भाषाभिमान: भाषाभिनिवेशश्च प्रशसनीयौ।

सूत्रधार: — प्रिये देवतार्चन-घण्टारव: श्रूयते। सावित्री मृत्युंजयम् अर्चयन्ती आस्ते। एहि गच्छाव:।

(इति निष्क्रान्तौ)

(तत. सावित्री मृत्युंजयम् अर्चयन्ती मङ्गलारतिं विदधती गायति)

गीतम् (कानडा रागे)

जय जय जय गौरीरमण !
भक्तजनावलि-संकट-हरण ! जय जय ॥ध्रु.॥
पटुतर-भव-भय निरत-विदूरण !
उडुपति-रेखा पन्नग-भूषण !
सतत-भयंकर-मृत्युनिरासन !
कैलासाचल-शिखर-सुखासन ॥ जय जय १
पतित-जनावलि-निरत-विरञ्जन
अहित-जनावलि-सतत-विभञ्जन
पापौघाखिल-जलद प्रभञ्जन
सत्य-नयापार-सज्जन-रञ्जन ॥ जय जय २
संध्या-ताण्डव-मधु-भीकर-रूप
सकल-धरातल-नेत्रायुध-भूप
त्रिगुणात्मक-काल-नियन्ता
धर्मारक्षण-भीकर-कालं हन्ता ॥ जय जय ३

(इति आर्रातं नेत्राञ्जन करोति। अन्तत: नमस्करोति।)

सावित्री — (सविषादम्) प्रभो पशुपते। अद्य सत्यवत: स: दिवस: समायात:। त्वमेव रक्षकोऽसि। मृत्युंजयोऽसि। मया सभक्तिकं यद् आचर-

णीयं तत् सर्वं यथाविधि कृतम् । अन्यथा शरणं नास्ति त्वमेव शरणं मम । (इति नमस्करोति)

(ततः प्रविशति सत्यवान्)

सत्यवान् — (आगत्य आरतिं नेत्राञ्जनं कृत्वा नमस्करोति) प्रिये ! सावित्रि अतितप्राऽयम् आरम्भः । इदं व्रतं त्रिसूणां वसतीनां परम-दुश्चरं भवति । विरम । न युक्तं ते ।

सावित्री — प्रिय ! मयि संतापः न कार्यः । अहम् इदं व्रतं पारयिष्यामि ।

सत्यवान् — व्रतं भिन्धि इति वक्तुं न शक्तः । किंतु पारयस्वेति वक्तुं सुकरमेव ।

सावित्री — (मनसि) अयं विचारणीयः दिवसः ।

सत्यवान् — प्रिये व्रतं यथोपदिष्टं पारितं त्वया । संप्राप्तः आहार-कालः । भुज्यताम् ।

सावित्री — प्रिय ! आदित्ये अस्तगते भोक्तव्यम् इति मम हृदि संकल्पः । एवमेव मया समयश्च कृतः ।

सत्यवान् — यथा रोचते ते, तथैव कुरु ।

सावित्री — भवत्कृते सर्वमहं विदधामि नाथ !

सत्यवान् — अधुना गन्तव्यं वनं समिदाहरणाय ।

(इति पार्श्वस्थितं परशुम् आदाय सत्यवान् वनं प्रस्थितः भवति)

सावित्री — प्रिय ! अद्याहं व्रतलग्नास्मि । त्वयाद्य वनं न गन्तव्यम् ।

सत्यवान् — समिदाहरणार्थम् अद्यैव गन्तव्यम् ।

सावित्री — प्रिय ! एकाकी त्वं गन्तुं नार्हसि । त्वया सह आगमिष्याम्यहम् ।

सत्यवान् — प्रिये ! त्वमपि मया सह वनं जिगमिषसि । न कदापि त्वया वनं गतम् । पन्थाः दुःखः भवति । भवती व्रतोपवासक्षामासि । कथं पद्भ्यां गमिष्यसि ? स्त्रियः पुष्पहाराः नहि, कण्ठे गृहीत्वा भ्रमितुम् । जगति स्त्रीभिः प्रयाणमालस्यं भवति । अहं इतो गत्वाऽनुपदमेव आगमिष्यामि ।

सावित्री — प्रिय ! सत्य यदुक्त भवता। एतावत्-पर्यन्त नापश्य वनम्। अद्यैव द्रष्टुं प्रारभे। उपवासात् मे ग्लानिर्न भवति। न परिश्रम। अहं गमने कृतोत्साहा मा निषिध्य न गमिष्यसि। अहं त्वया सार्धं फलान्याहर्तुम् इच्छामि। अहं किंचिदून-संवत्सरात् आश्रमात् न निष्क्रान्तास्मि।

सत्यवान् — प्रिये ! सुव्रते ! त्वं व्रत-लग्नासि। अपि च वने क्रूरेभ्य. सत्त्वेभ्य भीतिर्भवति। स्त्रियासार्धं प्रयाणम् अतिक्लेशद दुःखद भवति। नार्हसि तत्रागन्तुम् विरम तव निश्चयात्।

सावित्री — प्रिय ! जगत् सर्वं पुरुष-प्रकृति विलसितम्। तस्मात् यत्र यत्र पुरुष तत्र तत्र स्त्री। सर्वदा पुरुष-प्रकृत्यो· समागमः अनिष्टापत्ति नाशक भवति। भवति कौतूहल परं मे कुसुमित वन द्रष्टुम्। सर्वथा ते साहाय्य करिष्यामि।

सत्यवान् — सावित्री यथाभिलाषित भवतु। सज्जीभव गच्छाव·।

सावित्री — प्रिय ! अनुगृहीतास्मि। (इति तेन सार्धं प्रस्थिता)

* * *

द्वितीयं दृश्यम्

(सर्वमपि कान्तार विविध-मृगं निर्झर-परिवृत-पर्वतै. तटाकैः नदीभि. विहगमै चित्रितमिव भाति)

सत्यवान् — देवि सावित्रि ? शनै शनैः पदविन्यास कुरु। अत्र सर्वोऽपि मार्गं कण्टकाकीर्ण. भवति।

सावित्री — प्रिय ? दृष्टैव विचारामि। तव सान्निध्ये कण्टकावृत. मार्गः पुष्पाकीर्ण इव प्रतिभाति। सर्वमिद कानन गन्धिलित भाति।

सत्यवान् — देवि ? अयं मार्ग. तरु-गुल्म-लता-परीतः वर्तते। मे हस्तम् अवलम्ब्य प्रविचल। (इति हस्त ददाति)

सावित्री — प्रिय ! तव हस्तावलम्बनेन गहनं संसारं तरिष्यामि।

सत्यवान् — प्रिये ! अत्र पश्य !

विचित्राणि वनान्यत्र रमणीयानि सर्वतः।
मयूरगण-नृत्यानि पश्य त्वं विपुलेक्षणे ॥

अस्मिन् वने कोकिलाना मधुरालापाः तव कण्ठस्वरोपमिताः श्रूयन्ते।

सावित्री — अत्र पश्यतु भवान् एताः निर्झरिण्यः।

मधुर-सलिल-वाह्यः प्रांशु-शैलाग्र पाताः
तरल-हसित-फेनाः कङ्कणैः सज्जिताङगाः ॥
त्रिदिवमधरयन्त्यश्चारुरम्भादिरामाः।
धरणिवसनभावैराविशन्तीव भान्ति ॥

सत्यवान् — सावित्रि ! भवत्याः कल्पनेयम् असामान्या अन्येषाम् अनूह्या च। अत्र पश्य देवि,

हरिणाः वायु-वेगेन धावमानाः परं भिया।
प्लवन्ते मधुरं शून्ये पश्य त्वं हरिणेक्षणे ॥

एते हरिणाः नयन-चाञ्चल्यमपहृत्य पलायमानाः इव दृश्यन्ते समीक्षस्व।

सावित्री — (विहस्य) प्रिय ! एते काकनदाः सलिले सलीलम् अहिण्डमाना। प्रियाभिसाक नेत्रोत्सवं संजनयन्ति। मन्दवातेरितानि कुवलयदलानि आवां विलोक्य समुत्सुकानीव डोलायन्ते।

सत्यवान् — देवि ! सत्यमेव त्वदीया कल्पना। इतः पश्य। इदं सरोवरम्। अस्मिन् नव कल्हाराः नवारविन्दाः अभिनव-कुवलयानि विराजन्ते। मधुपानार्थं तव कुन्तलोपमिताः भ्रमराः मञ्जु गुञ्जन्तः इतस्ततः धावन्ति मालिका-रूपेण। प्रिये इतः पश्य।

नद्यः पुण्यप्रवाहश्च पुष्पितान् भूरुहोत्तमान्।
मधुरं पश्य सावित्रि नेत्रोत्सवमिदं सरः ॥

अपि च नद्य सवेग स्वप्रिय समुद्रम आलिङ्गितु कङ्कणस्वनं धावन्ति। अय नगन्द्र महोन्नत महापुरुष इव तिष्ठति। विस्फारित लोचना समालोकय।

सावित्री — प्रिय ! पश्यामि सर्वाणि नदी-जलानि सवत यथोद्दिष्टानि अत्र भवता। सर्वाण्येतानि दश दर्श मे चेत रसालवाल भवति।

सत्यवान् — प्रिय !

विचित्र-शोभा तरु-वल्लरीणा तनोति सर्वत्र मनोज्ञवर्ण-।
शोभाम् अनिन्द्या प्रविलोकितु च पर्याप्तमासीन्नहि नेत्र-युग्मम् ॥

अपि च रसालवाला एते रसाला काव्यात्मवत निगूढ विराजन्ते। इत पश्य इद दाडिमीफल शून्ये योग-पुरुषवत् शं र्पासन कुर्वत सुफलता प्राप्त्यर्थं तपति। (इति तर्जन्या दर्शयति)

सावित्री — नाथ, इद शान्तम् अरण्य विद्यते। सर्वमप्यतत् विधात्रा विचित्रितम। इद सौन्दर्याणाम आयतनम्। अनन वनदेवता दर्शनेनैव म मनोरथ फलति।

सत्यवान — प्रिये ! सत्यमिद वन मनोरथान साकार करोति। यत

रम्या विशाला प्रकृति विलोक्य रुग्णावृताऽशान्तिमवाप्नुवन्ति।
इय सदा सर्व-कलाभिरामा रसार्द्र-चित्त वितनोति नूनम ॥

अत्र पश्य कामैकरूपिणी मृगी प्रम्णा मृग शृङ्गण कण्डूयत। सर्वत्र गहन भाव पर कामायते प्रिय। इत कारण्डव चक्रवाका तटाकसलिले मज्जनोन्मज्जन कुर्वन्त आरमन्ति। (सावित्री विलोक्य) देवि किमर्थं दूयमान मानसा विचारयसि ? उक्त खलु मया कुसुम-कोमल-कोमलाङ्गीना कण्टकवृत पाषाण प्रस्तर निम्नोन्नत-प्रदेशषु चलनम् अतीव दु खद भविष्यतीति। त्वया तत न श्रुतम।

सावित्री — न कोऽपि विचार विद्यते नाथ। भवदीय सन्तापानन्द पारवश्यता विलोक्य एतावत्काल भवान न किमपि उक्तवानासीत मे। कथ भवद हृदय रसात्मकता गूढ निक्षिप्य मौनन जोपमासीत् भवान इति चिन्तयामि।

सत्यवान् — प्रिये ! मा विचारय। अत्र पश्य। अयं शमी वृक्षः। शमी शमयते पापम् इति लोकोक्तिः। अग्निरन्तर्हितोऽस्मिन् राजते। अस्य वृक्षस्य समिधः परमपवित्राः आह्वनाय। ताः मत्परशुना खण्डयित्वा आनयेयम्। त्वम् अत्रैव तिष्ठ:। (इति गत्वा पार्श्वे विद्यमान शमीवृक्षं परशुना छिनत्ति। दक्षिण-हस्त-तर्जन्या ललाटोद्भूत घर्मजाल समार्जयन् बाधा-शब्द करोति) प्रिये ! अनेन व्यायामेन मे शिरसि वेदना सजाता। (इति शनैश्शनैः चलितुम् अशक्य इव चलन् तत्रैव परशु विसृज्य सावित्री गच्छति) देवि ! अनेन व्यायामेन शिरसि वेदना जाता। हृदय दूयते। आत्मानम् अस्वस्थमिव लक्षये। शिर. शूलैः विद्धः इव भाति। अह स्वप्तुम् इच्छामि। स्थातु मे शक्तिर्नास्ति। सीदन्ति मम गात्राणि।

सावित्री — प्रिय। एहि अत्र तव शिर· मे उत्सङ्गे निक्षिप्य स्वपस्व। (इति तस्य शिरः उत्सङ्गे निक्षिप्य उपविशति। चिन्ताक्रान्ता शून्ये पश्यति अश्रु स्रवन्ती)

(तत· प्रविशति पाशहस्तः आदित्य-समतेजः यम.)

सावित्री — प्रभो त्वा दैवतम् अभिजानामि। एतत् तव शरीरम् अमानुषम्। त्व देवेश इति मन्ये। ब्रूहि किं चिकीर्षसि ? कस्त्वम् ?

यम· — सावित्रि, त्व पतिव्रताऽसि। तपसाऽन्वितासि। तस्मात् त्वयाभिभाषे। माम् आर्या. यम. इति ब्रुवन्ति।

भर्ता ते सत्यवान् एषः क्षीणायुः पुण्यजीवनः।
नयामि तमहं बध्वा तदिदं मे चिकीर्षितम् ॥

सावित्री — भगवन् ! तव दूता मानवान् नेतुम् आगच्छन्ति इति लोके कथयन्ति। भवान् स्वय कस्मात् समागतवान् अस्ति ? वदतु प्रभो।

यम — सावित्री। अयं सत्यवान् धर्मवान्, रूपवान्, सद्गुणसागरः मत्पुरुषैर्नेतुम् अय नहि। तस्माद् एन नेतु स्वयमागतोऽस्मि (इति अङ्गुष्ठमात्रपुरुष पाशैर्बध्नाति) गच्छाम्यहम्। (इति यमः गच्छति) (दुःखार्ता सावित्री यमम् अनुगच्छति)

* * *

तृतीयं दृश्यम्

सावित्री — देवेश तिष्ठ। अत्र भवता प्रोक्तम् 'अयं सत्यवान् धर्मवान् रूपवान' इति किमर्थं अस्य प्राणान् नयसि। (इति विलपति)

यम — सावित्रि किमर्थं विलपसि। जन्मति मरणम् अवश्यमेव जन्तो। किमिति मधा कुरुष विलम्बम्? कुरुष्वापरकर्म।

सावित्री — देवेश। किं प्रयोजनं सत्त्व-धर्म-रूपादिगुणैः।

यम — (विहस्य) एते गुणाः केवलं महापुरुषगुणाः। महापुरुषा अपि पञ्चत्वं प्राप्नुवन्ति। सावित्रि। किं वृथालापैः प्रयोजनम्। निवर्तस्व और्ध्वदेहिकं कुरुष्व।

सावित्री — प्रभो, कुत्र गच्छयम अहम् एकाकिनी। कथं गच्छेयं विसृज्य पतिम् एनम्।

> **नीयते यत्र मे भर्ता स्वयं यत्रैव गच्छति।**
> **गन्तव्यं च मया तत्र धर्मोऽयं च सनातनः॥**

यम — सावित्रि, आमरणमन्योन्यमनुगमनं सहवासश्च कर्तव्यं। इति लोकरीति। मरणानन्तरं शरीरधारिणाम् अनुगमनम् असम्भवम्।

सावित्री — यमराट। अहं ममात्मना तमनुगच्छेयम्। बन्धनम् एतत् अच्छेद्य समर्पति। अहं पतिव्रताऽस्मि।

यम — अनेन शरीरेण त्वं नागन्तुमर्हसि। निवर्तस्व सावित्रि।

सावित्री — प्रभो परेतराट्। तपसा, भक्त्या, भर्तुः स्नेहात् व्रतेन च तव प्रसादेन मे गतिः न प्रतिहता भवेत्।

यम — सावित्रि। मेऽत्र स्थातुं समयो नास्ति। अतीव विलम्ब भवति। सत्वरं मया गन्तव्यं, निवर्तस्व। (इति गर्जति)

सावित्री — प्रभो, मैत्रं साप्तपदमाहुः बुधाः। मित्रतां पुरस्कृत्य किंचिद् वक्ष्यामि तत् शृणु। सर्वेषामपि धर्मं प्रधानं इति सन्तः कथयन्ति। तस्माद् धर्मम् आचार।

यम — सावित्रि! तव अनया गिरा अतीव तुष्टोस्मि। निवर्तस्व।

ते वाणी स्वराक्षर-व्यञ्जन-करुण-रस-हेतु-युक्ता। वर वृणीष्व। विनास्य जीवित ददानि ते।

सावित्री — प्रभो! तव प्रसादात् मे श्वशुर लब्ध-चक्षु. बलवान् भवेत्।

यम — आनन्दिते! ददानि तेऽह वर यथ भिलषितम्। निवर्तस्व। न ते श्रमो भवेत्।

सावित्री — मे भर्तुसमीपत श्रम कुत.। यत्र पति नेष्यसि तत्र म गति।

यम — सावित्रि! यद् इद बुध-वुद्धि-वर्धन वचन त्वयोक्त तत् मनोऽनुकूल हिताश्रय पुन सत्यव्रत-जीवित विना, द्वितीय वर वरयस्व भामिनि।

सावित्री — मे श्वशुर हृत राज्य लभतु द्वितीय वर वरयामि।

यम — स्वयमेव नचिरात राज्य प्रतिपत्स्यते। निवर्तस्व ते श्रमो न भवेत्।

सावित्री — शमन! मे न कोऽपि श्रम। मम पृथिवीपति. अनपत्य पिता भवेत्। पितु पुत्रशत तथौरस भवत्। कुलस्य सतानकर च यद् भवेत् तत् तृतीयमेतत वरयामि ते वरम्।

यम — पतिव्रते! त्व दूर पथ समागतासि। ते पितु कुलस्य सतानकर सुवर्चस सुताना शत भवतु। निवर्तस्व।

सावित्री — प्रभो न दूरमेतत्। मम भर्तुः सन्निधो मे मन अस्ति मयोच्यमान भूय शृणु।

विश्वासो जायते तत्र सौहृदं यत्र विद्यते।
विश्वासं कुरुते तस्मात् जनः सत्सु विशेषतः॥

यम — अङ्गने! उदाहृत ते वचन मया न श्रुत त्वदृते। तस्मात् तुष्टोऽस्मि। विनाऽस्य जीवित वर चतुर्थं वरयस्व गच्छ।

सावित्री — समवर्ति ! ममात्मजस्य सत्यव्रत औरसस्य बल-वीर्य शालिना कुलद्वह सुताना शत भवेत् इति चतुर्थं वर वरयामि।

यम — अबले !

शतं सुताना बल-वीर्य-शालिना तवाबले प्रीतिकर भविष्यति।
नृपात्मजे ते न परिश्रमोऽस्तु दूर निवर्तस्व पथस्त्वमागता॥

सावित्री — यम ! सन्त सूर्यं सत्यन नयन्ति। भूमि तपसा धारयन्ति। भूत भव्यस्य ते गतिकारका भवन्ति।

यम — सव-मङ्गले !

सुपद महर्थवन्त मनोनुकूल धर्म सहित यथा भाषस तथा त्वयि म भक्ति उत्तमा भाति। तस्मात पतिव्रते अप्रतिम वर वृणीष्व।

सावित्री — प्रभो !

भतार विना सुख, दिव, श्रिय च न कामय। भर्तृहीना जीवितु न व्यवसामि। दयान्तरङ्ग ! शतपुत्रता मम त्वयैव दत्ता। मे पति ह्रीयते। तस्मात सत्यवान अय जीवतु इति वर वृण। तव वचन सत्य भविष्यति।

यम भद्र !

भर्ता तेऽय मया मुक्त यास्यतामिह शोभने।
वाक्यैर्धर्मार्थ-सभूतैस् तोषितोऽह त्वया भुवि॥

त सव मङ्गलानि भवन्तु। (इति यम प्रतिनिवृत्त)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(सावित्री प्रतिनिवृत्य भर्तारम् उपसृत्य उपगृह्य च उत्सङ्गे शिर: *आरोप्य भूमावुपशति*)

सावित्री — प्रिय, उत्तिष्ठ। किं चिरं स्वपिसि। अपगत-श्रम: न भूतोऽसि ? (इति हस्तेन शिर: स्पृशति)

सत्यवान् — प्रिये सुप्तोऽस्म्यहो। सुचिर नावबोधित:। किमर्थं पुरुषोऽसौ शयान मा चकर्ष।

सावित्री — प्रिय। किं त्वं स्वप्नं दृष्टवानसि ? उत सत्य ब्रवीषि ?

सत्यवान् — देवि। मम नाम सत्यवान्। सत्य ब्रवीमि। एष: स्वप्न: नहि। अतिभीकर स्पृहणीय-रूपिण पुरुष सूर्य-प्रभा-भास्कर श्यामाकृतिं समक्षम् अपश्यम्।

सावित्री — पुरुषर्षभ, ममाङ्के सुचिरं त्व प्रसुप्तोऽसि। स: प्रजासयमन: यम: देव:। स: महाभाग: गत:। विगाढा शर्वरी पश्य।

सत्यवान् — देवि, सुमध्यमे। त्वया सह फलाहारार्थं निष्क्रान्त:। काष्ठ पाटयत मे शिरस: रुजाऽभवत्। शिरोभिताप सतप्त: चिरमशक्नुवन् तवोत्सङ्गे प्रसुप्तोऽस्मि। जानाम्यहं सर्वम। त्वया उपगूढस्य मे मन. निद्रापहृतम्। तत. अपश्य तमोघोर पुरुष महौजसम्। देवि यदि त्व जानासि, किं तद् ब्रूहि मे। दृष्ट: यदि स्वप्न: ? नोचेत् सत्यमेव तत्।

सावित्री — अनघ। श्व: ते सर्व यथावृत्तम् आख्यास्यामि। उत्तिष्ठ। भद्रं पितरौ ते पश्य। रजनी विगाढा। दिवाकर: निवृत्त:। नक्तचरा: चरन्ति। मृगा: विचरन्ति। दक्षिणस्या दिशि उग्रा: शिवा: घोर विरुवन्ति। मे मन: कम्पते।

सत्यवान् — देवि। इद वन घनेन तमसावृतम्। पन्थान न विज्ञास्याव:। न शक्ष्याव: गन्तुम्।

सावित्री — नाथ। श्व. प्रभाते गच्छाव:। इह वसाव:। यदि रुचित वनमिद ते, क्षपाम् एका यापयाव:।

सत्यवान् — सावित्रि। मे शिरोबाधा निवृत्ता। मेऽङ्गानि स्वस्थानि लक्ष्यन्ते। अधुना माता पितृभ्यां मिलितुमिच्छामि अत्रैक क्षणम् अपि न स्थास्यामि। माता वृद्धा। पिता वृद्ध। अहमेव तयो यष्टि। यदि तौ माम् पश्यन्तौ कामवस्था गमिष्यत। मातापितृभ्यां विना नाहं जीवितुमुत्सहे। तौ द्वौ मया भर्तव्यौ। तयो प्रिय कर्तव्यमिति जानामि सावित्रि। पित्रो दर्शनं कामये। गच्छाव आश्रमान्तिकम्।

सावित्री — (उत्थाय केशान् सयम्य पति बाहुभ्याम् उत्थापयति। सत्यवान उत्थाय पाणिना अङ्गानि प्रमृज्य सर्वा दिश समवलोकयति) प्रिय। श्व फलानि आहरिष्यसि? ते योगक्षेमार्थम्। एत ते परशुम अहं नेष्यामि। (इति परशु गृहीत्वा पुन भर्तु सकाशमागत्य वामस्कन्धे भर्तु बाहु निक्षिप्य दक्षिणेन त परिष्वज्य प्रस्थिता)

सत्यवान् — देवि। अहं स्वस्थोऽस्मि। बलवानस्मि। उभौ पितरौ दिदृक्षु अस्मि। (इति प्रस्थितौ)

(यवनिका पतति)



॥ काव्यावतरणम् ॥

यस्तं पुरा नारददर्शनेन । निर्मुक्तपापस्तपसा पुनीतः ।
वाल्मीकिनाम्ना प्रथितोलिलेख । रामायणं विश्वकविं नमामि ॥

नान्द्यन्ते

सूत्रधारः — (नेपथ्याभिमुखं विलोक्य) आर्ये इतस्तावत् ।

नटी — (प्रविश्य) आर्य, इयमस्मि । निवेद्यतां किं करणीयं विद्यते मम ।

सूत्रधारः — हञ्जे ! अत्र परिषदियं गुणग्राहिणी विभाति । अयन्तु शरत्काल. । किञ्चित् गीयतां रसिकमनोरञ्जनाय ।

नटी — गायनस्य निदानमिदानीं किं विद्यते ।

सूत्रधारः — हञ्जे, कारणं विना नाहं कथयामि किमपि । शृणु, वयं काव्यावतरणं नाम नाटकं प्रयोक्तुं अभिलाषामः ।

नटी — आर्य, प्रथमत. कविपरिचयं विधाय अनन्तरं नाटकप्रयोग कर्तव्यः ।

सूत्रधारः — जानाम्यहं सर्वं । शृणु । अयं कवि. गीर्वाणान्ध्रभाषा प्रवीणः । दक्षिण गीतालहर्याः, यशोधरा महाकाव्यस्य अपिच अक्षयगीत रामायणस्य प्रणेता । तस्याभिधानं परीक्षित् शर्मा ।

नटी — सर्वमपि श्रोतुं परमानन्ददायकं प्रतिभाति मे । कस्मिन् रागे, कं विषयमुद्दिश्य गातव्यं आदिशतु भवान् ।

सूत्रधार. — प्रिये, पूर्णचन्द्रिकारागे शारदामुद्दिश्य गीयतामिति मे आदेशः ।

नटी — श्रूयतां पूर्णचन्द्रिका शारदम् ।

शारदा भाति विश्वेऽस्मिन् । प्रसन्नगुण माधुरी ।
यथाऽदिकवि छन्देषु । दृश्यमानेव दिव्यता ॥

सूत्रधार — (करतल ध्वनि कृत्वा) यथासदर्भं सम्यक् गीत भवत्या। (मुखमुन्नमय्य श्रवणमभिनीय) आर्ये पश्य, अत्र छात्राणा वेदघोष सश्रूयते। अस्मदीय गानेन, सल्लापेन च तेषा मनाविकार मा भूयात्। एहि निश्शब्दगत्या आवा गच्छाव । (इति निश्शब्दगत्या शनै शनै ग च्छत)

(मध्ये गुरु , अर्धचन्द्राकारेण शिष्याश्च उपविष्टा सन्ति। ते सर्वे गुरुणा प्रोक्त मन्त्र द्विवार उच्चरन्ति। गुरु नेत्रे निमील्य कथयति)

गुरु — अग्निमाळे पुरोहित (इति कथयति)

सर्वेबाला — (एक स्वरेण तन्मत्र अनुवदन्ति)

गुरु — यज्ञस्य देवमृत्विजम् ।

सर्वेबाला — (एक स्वरेण अनुवदन्ति)

गुरु — होतार रत्नधातमम् ।

सर्वेबाला — (अनुवदन्ति)

(रत्नाकर तदर्धचन्द्राकारमण्डलात् शनै शनै चोर इव निश्शब्दगत्या निर्गच्छति)

गुरु — (नेत्रे उद्घाट्य) अरे छात्रा मन्त्रमेन कण्ठपाठ कृत्वा श्व पुन मा निवदयन्तु। (इत्युक्त्वा सर्वान् निर्निमेष दृष्ट्या विलोक्य) अयि बाला रत्नाकर कुत्र गत ?

बाला — (परस्पर अन्योन्यावलोकन कृत्वा निश्शब्द मूकीभावेन आसन्)

गुरु - रत्नाकर कुत्र गत कथयन्तु। (इति तान् वेत्रेण भर्त्सयति)

बाला — (भीता) वय न जानामह।

गुरु — यूय जानीथ किन्तु न कथयथ। (इत्युक्त्वा तान् दण्डेन ताडयितु नाटयति)

बाला — अयि भो तत्र भवान् मा ताडयतु अस्मान्। वयं कथयिष्याम। (इति अन्योन्यं पश्यन्ति)

कनिष्ठ — (भात्या) गुरो अयं रत्नाकर। (इति अर्धोक्त्या विरमति)

गुरु — किमर्थं विरमसि कथय पूर्णं।

कनिष्ठ — (मवान् बालान् विलोक्य भीत भीत) गुरो अयं रत्नाकार अधुना अस्मान्मागात् मार्जाल इव दुद्राव। (इति हस्तेन दर्शयति)

गुरु —बत अयं सस्कारवता पुत्र। अयं शिक्षणाचोर जात। बुद्धि कर्मानुसारिणी। गुरु भा तृणाकृत्य ममनयया मिरीचिकाचूर्णं विकार्य मार्जाल इव पलायित। अयं साधुमार्गगामी न कदापि भविष्यति। अयं दुर्जन इव परिणत। प्रायेण बाल्ये केवल गुणा प्रफुल्लन्ति जगति प्राणिना। अयं दुष्ट सहवास कराति। मद्य मासादिक भुङ्क्ते। दाव्यति अक्षशालासु। पिबति पानशालासु। अयं वैदिक साम्प्रदायस्य धूमकेतुरिव जात। (इति पृष्ठभागे वद्धहस्त हस्तौ बद्ध्वा इतस्तत द्विवार चलन् छीं छीं शब्द करोति)

कनिष्ठ — गुरो अयं भिटवर्गं सह निवसन् अकार्यं करोति इति जना कथयन्ति।

गुरु — किं कथयसि र त्व ? (कर्णौ पिधाय) अश्रवणीय श्रुत मया। यूयं सर्वे गच्छथ गेह। (इति तान् हस्त सज्ञया निदिशति, सर्वे छात्रा उत्थाय) नमामि भो। (इति नमस्कृत्य गच्छन्ति)

(गुरु चिन्ताक्रान्त वृक्षमूले उपविश्य एव स्वगत वदति)

अयं सामपाजिपुत्र। तौ दम्पती मे सकाश बाल सस्कारार्थं, वेद पठनार्थं प्रेषितवन्तौ। तौ दम्पता न जानीत अयं दुष्टमार्गगामी इति। अयं मत्सकाशात् निर्गत। अहं ताभ्या किं निवेदयेय। अहं अवश्य अप्रतिष्ठा भजामि। अहो बत (इति विचारयन् आस्ते।

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(तमसा नदातीर तत्र पौरा आगत्य पानादिक नयन्ति)

गिरिजन — (स्नात्वा ललाटे भस्म धारण विधाय एकत्रोऽपविश्य सूयनम स्कारान् कुर्वन् सूर्यं प्रार्थयति)

हरिजन — (स्नात्वा शुचिर्भूत्वा) भो लोकबान्धव अंशुमालिन् त्वमेव प्रत्यक्ष ब्रह्मासि। (इति अर्घ्यं दत्वा नमस्करोति)

क्षेत्रपालकौ — (परस्पर भाषमाणौ प्रविशत)

समीर — अरे सुहृद, सोमयाजिपुत्र रत्नाकर ह्य पान्थान् भर्त्सयित्वा, तेभ्य वस्तुचय अपकृष्य तान् ताडयित्वा पलायित इति सर्व ग्राम मुक्तकण्ठ घोषयति।

प्रभाकर — अरे समीर त्व किं वदसि सोमयाजि वैदिक , अग्नि इव पवित्र । तस्य वश सर्व वदमार्गदर्शितजीवने रत । तस्य पुत्र एव करोति किं ? श्रुतेनेन मे परमाश्चर्यं भवति। नत किं कष्टमापतित सोमयाजि कुटुम्बस्य।

समीर — मित्र, बाल्ये सहवास उत्तम यदि भवेत् सर्वोऽपि उत्तम भविष्यति। सहवासेन गुणा दोषाश्च सञ्चयन्त। किन्तु न जानमना। तव कथन मे अङ्गीकार्य भवति। मयापि श्रुत किन्तु इदमित्थ इति वक्तु अशक्त भवामि। यदि सोमयाजी श्रोष्यति पुनरस्य वक्रमार्गगमन स लोकमिम सत्यक्ष्यति।

प्रभाकर — तत् सत्यमेव। स निष्ठावान् ब्राह्मण ब्राह्मण लौकिक व्यवहाराय प्राधान्य न ददाति। यदि ब्राह्मण लौकिक व्यवहाराय प्राधान्य दत्वा वर्तते स ब्राह्मण नहि, किन्तु पशुप्राय भवति।

समीर — सत्य य लौकिकव्यवहाराय प्राधान्य न ददाति स एव ब्राह्मण । अब्राह्मणा सर्वेऽपि लौकिक व्यवहारकर्दम निमग्ना जगत् शाश्वतमिति मत्वा कृत्या कृत्य स्वार्थाय कुर्वति।

प्रभाकर — अय विप्र कट्टर वैदिक । लौकिक व्यवहार गर्हति। तस्मात् स द्रव्य तस्मात् विप्र अनन्त त्रियाति।

समीरः — सः वेदपुरुषः। ब्राह्मीमय मूर्तिः। मूर्तीभूत भारतीय संस्कृतिः। यदि सः पुत्रस्य कथा श्रोष्यति तर्हि सुवर्ण शलाक इव तापेन द्रविष्यति। अयमेव अस्मदीय ग्राम रक्षकः। अयं अनवरत वैदिक मन्त्रोच्चारणैः ईतिबाधाभ्यः सर्वान् रक्षयति। अयं सत्यं पुरोहितः। तस्य सर्वं शुभं भूयात् इति मदीया भावना। वत मानवः कथं जगति परिवर्तते। (इति चिन्ताक्रान्तः अधोमुखः भाति)

प्रभाकरः — अरे समीर पश्य सोमयाजी स्नानार्थं इतः एव आगच्छति। तस्मै. पुत्रकस्य दशा कथयिष्यावः। एहि आवां अत्र तिष्ठावः। (इति तस्य हस्तमवलम्ब्य एकस्मिन् मूले तिष्ठत.।

(नेपथ्ये मन्त्रोच्चारणं भवति)

सोमयाजी — यच्चकिञ्चिज्जगत्सर्वं दृश्यते श्रूयतेऽपिवा अन्तर्बहिश्च तत्सर्वं व्याप्यनारायणास्थितः।

प्रभाकरः — समीर, सोमयाजी समायाति, आवां गत्वा तस्य पुत्रस्य वर्तनादिकं तस्मै निवेदयावः यदि आवां तथा न कुर्वः तस्य द्रोहकारिणौ भवेव।

(ततः प्रविशति सोमयाजी)

प्रभाकर-समीरौ — आवां भोः अभिवादयावहे। (इति नमस्कुरुतः)

सोमयाजी — शुभं भूयात्। (इति आशीर्वादान् प्रयच्छति) किं मित्रे अपि कुशलिनौ भवन्तौ?

प्रभाकरः — भवता सत्कामनया परमेश्वरकृपया आवां नहिकेवलं, किन्तु सर्वे जनाःसमुखं सन्ति। किन्तु........ (इत्यर्धोक्त्या)

सोमयाजी — कथयतु भवान्।

प्रभाकरः — श्रुत्वा तत्र भवान् क्रुद्धो माभूयात् इति आवयोः प्रार्थना।

सोमयाजी — कथयतु निश्शङ्कम्।

समीरः — तत्र भवता सुतः रत्नाकर. दुष्टवर्गैः सहवासं कुर्वन् गर्हितं शिष्टजननिन्दितं कर्म करोति।

प्रभाकरः — अयि वेदमण्डित। हा. रत्नाकरः पथिकान् ताडयित्वा तेभ्यः

वस्तुचयं चोरयित्वा दुधाव। स सुतरां असन्मार्गगामी बभूव। तत्र भवान् बालकमेनं यत्नात् सन्मार्गगामिनं करोतु इति आवयोः विज्ञप्तिः ।

सोमयाजी — (निर्विण्णः पाण्डुतागतवदनमण्डलः) अयि भो मित्रे ! त्वमौ अहं अतीव कृतज्ञः भवतोः । तथैव करिष्यामि। भवन्तौ देशक्षेमकल्याणार्थं प्रयतमानौ पौरौ। अवश्यमहं भवदुदारितं यथायोग्यं अनुवर्तिष्ये। (इति गच्छति)

समीर — आवां सदिच्छया अकरवाव। तत्र न कापि स्वार्थभावना विद्यते कस्यापि। एहि गच्छाव । (इति गच्छतः)

(यवनिका पतति)

गुणवती — अपिच।

सोमयाजी — बहु श्रुतं मया। शृणु। सः निर्दयं पान्थान् व्यापाद्य तेभ्यः धनादिकं अपहृत्य अकृत्यानि विश्वास्यन् वंगगौरवं नाशयति।

गुणवती — इति भवान् कथयति।

सोमयाजी — नाहं कथयामि लोकः कुक्कुटो भूत्वा विरौति मुक्तकण्ठं. तत् श्रोतुं मे दुर्भरं भवति।

गुणवती — केनोक्तं, कथ, कदा, कुत्र श्रुतम्।

सोमयाजी — अद्य तममार्तीर मयि गच्छतिसति ग्रामीणाः सज्जनाः परस्परं भाषमाणाः मा विलोक्य मत्सकाशं समेत्य सविस्तरं अकथयन्।

गुणवती — तदा किं कृतं भवता ?

सोमयाजी — तदा शान्तमत्या श्रुत मया।

गुणवती — ततः।

सोमयाजी — तच्छ्रवणेन मम शिरः अधोमुखं बभूव।

गुणवती — ततः।

सोमयाजी — सर्वमपि मे शरीरं रक्तौष्णित्वयेन अग्नौ पतित समिदोपमं बभूव।

गुणवती — लोकः काकोभूत्वा यत्किमपि रटति तत् अस्माभिः न श्रोतव्यम्।

सोमयाजी — लोकापवादः विना च कारणं न भवति। सर्वस्यापि कारणं आस्ते।

गुणवती — अयि भोः। कैयाचन जगति न किमपि कार्यं भवति, विना च परगृह छिद्रान्वेषणं, सज्जन-जनजीवन कज्जलीकरणं च।

सोमयाजी — तथामास्तु जनालिमुद्दिश्य यतः।

वेदोपबृंहित नितान्त पवित्र धर्म।
धर्मोपजीवित लसत्तर देशभावं।
भावानुवर्धित जनालि सुवाक्य जालं।
श्रुत्वा मदीय हृदयं विशदं विभाति॥

वस्तुचयं चोरयित्वा दुधाव। स सुतरां असन्मार्गगामी बभूव। तत्र भवान् बालकं योग्य पद्धत्यां सन्मार्गं गामिनं करोतु इति आवयोः विज्ञप्तिः।

सोमयाजी — (निर्विण्णः पाण्डुतागत-वदनमण्डलः) अयि भोः मित्रोत्तमौ अहं अतीव कृतज्ञः भवतोः। तथैव करिष्यामि। भवन्तौ देशक्षेमकल्याणार्थं प्रयतवन्तौ पौरौ। अवश्यमहं भवदुदीरितं यथायोग्यं अनुवर्तिष्ये। (इति गच्छति)

समीरः — आवां सदिच्छया अकरवाव। तत्र न कापि स्वार्थभावना विद्यते कस्यापि। एहि गच्छावः। (इति गच्छतः)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(सोमयाजिगृहम् : सोमयाजी यज्ञोपवीतेन शरीरं कण्डूयमानः पत्न्यामाकं भाषते, तस्य पत्नी गुणवती तण्डुलान् विचिन्वन्ती उपविशति)

सोमयाजी — हञ्जे गुणवति तव पुत्रः रत्नाकरः यथाविधि उपनीतः।

गुणवती — हा उपनीतः अधुना सा प्रसक्तिः कुतः।

सोमयाजी — कुतः ? तव नेत्रोन्मीलनाय करोमि।

गुणवती — मम नेत्रोन्मीलनाय उत आवयोः नेत्रोन्मीलनाय। कथयतु भवान्।

सोमयाजी — सः गुरुकुले प्रेषितः शिक्षणाय।

गुणवती — हा प्रेषितः। ततः।

सोमयाजी — किन्तु सः गुरुं तिरस्कृत्य भिल्ल वर्गैस्सह शबरालयेषु आहिण्डमानः मत्स्यमांसादिकं भक्षयन् सुरापानं कुर्वन् आरण्यको भूत्वा कितवो भूत्वा दीव्यन् भ्रष्टः संजातः।

गुणवती — अपिच।

सोमयाजी — बहु श्रुतं मया। श्रृणु। सः निर्दयं पान्थान् व्यापाद्य तेभ्यः धनादिकं अपहृत्य अकृत्यानि विश्वस्यन् वंशगौरवं नाशयति।

गुणवती — इति भवान् कथयति।

सोमयाजी — नाहं कथयामि लोकः कुक्कुटो भूत्वा विरौति मुक्तकण्ठं, तत् श्रोतुं मे दुर्भरं भवति।

गुणवती — केनोक्तं, कथं, कदा, कुत्र श्रुतम्।

सोमयाजी — अद्य तमसार्तीरे मयि गच्छतिमति ग्रामीणा सज्जना, परस्परं भाषमाणाः मा विलोक्य मत्सकाशं समेत्य सविस्तरं अकथयन्।

गुणवती — तदा किं कृतं भवता ?

सोमयाजी — तदा शान्तमन्या श्रुतं मया।

गुणवती — ततः।

सोमयाजी — तच्छ्रवणेन मम शिरः अधोमुखं बभूव।

गुणवती — ततः।

सोमयाजी — सर्वमपि मे शरीरं रक्तौष्णिक्येन अग्नौ पतित ममिदोपमं बभूव।

गुणवती — लोकः काकोभूत्वा यत्किमपि रटति तत् अस्माभिः न श्रोतव्यम्।

सोमयाजी — लोकापवादः विना च कारणं न भवति। सर्वस्यापि कारणं आस्ते।

गुणवती — अयि भोः। केनापि जगति न किमपि कार्यं भवति, विना च परगृह छिद्रान्वेषणं, सज्जन-जनजीवन कज्जलीकरणं च।

सोमयाजी — तथामावद जनालिमुद्दिश्य यतः।

> **वेदोपबृंहित नितान्त पवित्र धर्मं।**
> **धर्मोपजीवित लसत्तर देशभावं।**
> **भावानुवर्धित जनालि सुवाक्य जालं।**
> **श्रुत्वा मदीय हृदयं विशदं विभाति॥**

(तस्या मकाश आगय) कथ न श्रातव्य। त्व कुमार जीवित नाशन करोपि पुत्रप्रेम्णा। पुष्परागखचित सुवर्णाङ्गुलीयक मदीयगृह अन्तर्हित बभूव। तत् गृह कथ अन्तर्हित भविष्यति।

गुणवती — भवता तत्र पीठापरि न्यसित भूषकै मुष्णात इतिमन्ये। नाचेत् क ग्रहिष्यति स्वगृहे।

सोमयाजी — क ग्रहिष्यति विद्यते खलु गाहग्रह गृहे स एव मूषक नत मूषक।

गुणवती — तथा मा वदत। राक नखमात्र विद्यमान शिखरीकृत्य कथ यति यत् किमपि तत् न श्रोतव्यम्। श्रृ गाऽपि अपश्रृतरिव अश्रुतमिव नटितव्यम्।

सोमयाजी — हुम त्व सुतप्रम्ना कुमारोपरि मक्षिकापातनमपि न सहसे तस्मात् अस्तव्यस्त भाषसे। तत् सर्व तव शाभत। नतु मम।

गुणवती — अह कि कुर्या। अह अनेकथा सुत अनार्यसङ्गमात् निवार यितु प्रायतम्। किन्तु स दिने दिने अवम सनात। स कालक्रमेण साधुमार्गगामी भविष्यतीति अनक स्वप्नान् अपश्यम्। किन्तु सर्व दिवास्वप्ना जाता। (इति रादिति)

सोमयाजी — रादि उच्चे रोदि। स्त्रिय रादनन जयन्ति लाकम् (हस्तचालन क्षेपे अभिनयन्)।

मञ्जुवाग्विभव भावचयेन। हावभाव दरहास भरेण।
लोकमेवहि सदा वनिताश्च। रोदनायुध बलेन जयन्ति॥

अपेहि मम सम्मुखात्। 'अनार्यसङ्गमात् वर निराधोऽपि मम महारम्भ''। कुलगौरव भस्मचये पतित। देशगौरव कलमित। एव न कदापि समालाचितम्।

गुणवती — (चिन्ताक्रान्त मनसा) एषा मन्द भागिनी नवमासायासखद अनुभूय असूत पुत्रम्। भवद्भि साम्प्रदायानुसार नामकरणादिक वैदिकपद्धत्या विरचितम्। अन्तत सर्व एव परिणतम्। अत्र आवयो दाष न विद्यते। ''विनाशकाले विपरीत बुद्धि'' इति आर्योक्ति सत्य प्रतिभाति।

सोमयाजी — भुवि सकल नतत प्रजनम क्रमानुसार विचारनान्त। पितर नमहत्तर न तु धिषणा नागर।

गुणवती — ज्ञानदातार गुरु तिरस्कृत्य भिल्लवर्गै साकं पलायित । किं दारुण मध्यवर्तित कुमारेण।

सोमयाजी — तस्मात् शास्त्राणि कथयन्ति एक पुत्र मास्तु किन्तु पितरौ बहुपुत्रकौ भवितव्यौ इति। यदि एक पुत्र स वक्रमार्गगामी भवेत् तर्हि वंशगौरव देशगौरवश्च नष्टौ भविष्यत । यदि अनेक पुत्रा भविष्यन्ति तेषु एक वंशगौरवकार देशोन्नत्य कारकश्च भविष्यति। तस्मात् सर्वं साधु विचिन्त्य पूर्वजै कथितम्। ते परमार्थ दर्शका । तेभ्य नमोवाक प्रशास्महे। (इति हस्तावुद्यम्य नमस्करोति)

गुणवती — एक रत्नाकर वंशोन्नति देशोन्नति च कल्पयिष्यतीति वैद्युतायमाना विचारधारा तिरोहिता जाता। यत कर्तुमेक उद्यता दैवमन्यत् विदधाति। अपत्यान्तरमपि नास्त्यावयो । आवा सर्वथा अपत्यहानौ जातौ।

सोमयाजी — तस्मात् धर्मवादिन एक पुत्रत्व अनपत्यत्व इति आहु । चक्षुरेकस्य पुत्रेकस्य अस्तित्वेऽपि नास्तित्वमिति प्राहु । चक्षुर्नाशे तनोर्नाश पुत्रनाशे कुलक्षय इति। अपि च अग्निहोत्र त्रयीविद्या सतानमपिचाक्षयम् इति धर्मशास्त्र। बलीयसी केवलमीश्वरेच्छा। (इति मञ्चे उपविशति)

गुणवती — (तस्य सकाशमागत्य) मा कुरुत विचार । यत भवितव्य तत् भविष्यति।

सोमयाजी — त्वं किमस्ति ते मातृभावना ? यदि मातृभावना तवास्ति त्व एव न भाषसे।

गुणवती — स्त्रीषु दोषमारोपयन्ति पुरुषा । ते बाधा व्यक्तीकरिष्यन्ति पद जाल । नगति सत्रांसा मातृणा वात्सल्य भवत्येव। संस्कृतज्ञै वेदवेदाङ्गविद्भि भवद्भि न श्रुत किं ? कुपुत्रो जायेत क्वचिदपि कुमाता न भवति। (इति अन्त गच्छति)

सोमयाजी — (शान्तभावेन पठति)

भद्र कर्णेभि शृणु यामदेवा
भद्र पश्येमाक्षभिर्यजत्रा
स्थिर रङ्गै स्तुष्टु वागु स्स्तनूभि
(इति पठन् आस्ते)

(यवनिका पतति) * * *

तृतीयं दृश्यम्

(भिल्लाः मद्यं पीत्वा नृत्यन्ति। तेषां दक्षिणहस्तेषु पानपात्राणि विद्यन्ते। वामहस्तेषु आयुधाः विद्यन्ते। ते किञ्चित् सुरां निपीय गायन्ति नृत्यन्ति च)

सुधीरः — पहाडी रागे गीतं गायते।

चन्द्रिका सुहासिनी चचार यौवने
चन्द्रमाश्चिरं जहासपुष्करे ३

चित्तमेव मद्यपान रागरञ्जितं रे
सर्वमेव घूर्णितं विभाति साम्प्रतं रे १

गच्च गच्छ जहि जहि मार्ग गामिनम्
विचर प्रहर निर्दयं पान्थ मण्डलम् २

विहर कुरुरे सर्वदा सौख्य जीवनम्
जहाहि रे दयार्द्र मानसं च निर्दयम् ३

(रत्नाकरः बहिरागत्य मण्डलात् इतस्ततः दत्तदृष्टिः एकत्र एकत्रित दृष्टिः वदनानिल वेणुना शब्दं करोति। तत् श्रुत्वा सर्वे तेन सार्धं धावन्ति)

(द्वौ भिल्लौ तत्रैवस्थित्वा पिबन्तौ भाषन्तौस्थः)

रक्तगन्धः — अरे वसागन्ध (इति तस्य समीपं गत्वा) अयं रत्नाकरः अस्मात् भिल्लवर्गात् अपेक्षया स्वयं हनन कर्मणि, घातुककृत्य करणे सिद्धहस्तः। अयं अतीव कठोरः निर्दयश्च। हननकर्मणि यत् संपाद्यते तत् सर्वं स एव गृह्णाति। अन्येभ्यः न किञ्चिदपि ददाति।

वसागन्धः — अरे रक्तगन्ध। तदेवाहमपि चिन्तयामि। एनं अस्मात् वर्गात् निष्कास्य सर्वमपि वयमेव अनुभोक्ष्यामः इति अस्मदीय यूथकाना संभवना।

रक्तगन्धः — सर्वस्यापिकर्मणः समयः भवति। समयं प्रतीक्ष्य प्रवर्तनीयं भवति। तं अस्मात् प्रदेशात् निष्कास्यामः समयं निरीक्ष्य।

वसागन्धः — अरे वक्तुं सुकरमिदं, कर्तुं दुष्करं भवति। अयं अतीव बल-

संपन्नः क्रूरः यदि सः ज्ञास्यति अस्मदीयभावना तर्हि अस्मान्सर्वान् मत्कुणान् इव पादाङ्गुष्ठेन नाशयिष्यति।

रक्तगन्धः — एतत् कर्म अन्य वस्यैः विचार्य सावधानतया करिष्यावः।

वसागन्धः — अन्येवयस्याः अशने अग्रेसराः किन्तु न हनने। इदानीं रत्नाकरस्य करुणया द्विवारं उदरपूरं खादावः। यदि सः गमिष्यति तर्हि क्षुद्बाधया आवां अन्नेन मरिष्यावः। एतादृशी विचारणा अयोग्या आवयोः।

रक्तगन्धः — जानामि सर्वं। किन्तु प्रसङ्गवशात् तदा तदा अप्रस्तुत प्रसङ्गापि करणीया भवति।

वसागन्धः — अरे अयं विषयः 'अधरमवर्तार्थं न गन्तव्यः। यदि विषयः अधरमवतरति तर्हि पृथिवी उल्लङ्घयिष्यति। आवां निन्दापात्रौ भविष्यावः। अनन्तरं तेन यमसदनं प्रापितवन्तौ भवेव।

रक्तगन्धः — अरे अयं आवयोः स्वविषयः। सर्वः सर्वथा स्वार्थं समीहते।

वसागन्धः — अरे सर्वेऽपि तमनुसरन्। एहि आवामपि गच्छावः। भाषणेन किं प्रयोजनं भवति। भाषणेन क्षुधोपशान्तिः भवति किं? विरम भाषणं तमनुसराव एहि।

रक्तगन्धः — ते सर्वे बहुदूरं गताः अधुना आवां तान् अनुसर्तुं अशक्ताः भवेव।

वसागन्धः — यदि तान् नानुसराव अद्य उपवासः भविष्यति आवयोः।

रक्तगन्धः — आवां उच्छिष्ट खादकौ। यदि आवां न गच्छावः उत गच्छावः सर्वदा अस्माकं उच्छिष्ट एव लभिष्यति तस्मात् गमनं नार्थः।

वसागन्धः — न गम्यते आवाभ्यां तर्हि उच्छिष्टमपि लब्धुं दुष्करं भविष्यति। तदुच्छिष्टं वायसमशकादिभिः भुज्यते नावशेषम्।

रक्तगन्धः — अरे त्वं लौकिकोसि। अत्यन्त व्यवहारी असि। तवोक्तिमनुसृत्य गमनं वरं भवति मे। गच्छ तानेव अनुसरिष्यावः। (इति गच्छतः)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(अरण्ये दुर्गमस्थानं तत्र पार्श्वतः पादमार्गः विद्यते तस्मात् मार्गात् उत्तरेण न्यग्रोधतरुः विद्यते तत्र हस्ते दृढं लगुडं गृहीत्वा रत्नाकरः न्यग्रोधतरोः मूले अन्तर्हितः उपविशति)

(ततः प्रविशति नारदः)

(नारदः दक्षिणहस्तेनालङ्कृतः वीणादण्डः वामहस्तेनालङ्कृतः तालद्वयः पीताम्बरधारी नारायण नारायण इति कथयन् प्रविशति)

नारदः — हरिनारायण हरिनारायण हरिनारायण।

रत्नाकरः — (नारदस्य पुरतः आगत्य दण्डहस्तौ उद्यम्य तं प्रहर्तुं उद्युक्तो भवति।

नारदः — (तं दृष्ट्वा) नारायण नारायण इति कथयति)

(रत्नाकरस्य हस्ताभ्यां स्रस्तः दण्डः भूमौ पतति)

नारदः — अयि तात कोऽसि त्वं। किमर्थमेवं करोषि ?

रत्नाकरः — अरे सन्यासिन् कोऽसि त्वं प्रष्टुं अपि च मां निरोद्धुं। समस्तं त्वत्सकाशे विद्यमानं सर्वं मम हस्ते नार्पयसि चेत् तव मरणमेव भविष्यति मम हस्ते।

नारदः नारायण तात किमर्थमेवं करोषि ?

रत्नाकरः — अरे कोऽसि त्वं मां प्रष्टुं पदे पदे ?

नारदः — तात शृणु, मम वचनं अनन्तरं मत्समीपे विद्यमानं सर्वं वस्तु च गृहाण।

रत्नाकरः — किं तत् वचनं श्रावय।

नारदः — तात नरहिंसां किमर्थं करोषि ? कोऽहेतुः विशदं तथा वक्तुं।

रत्नाकरः — अरे गायक। मम उदरपोषणार्थं अपि च मम भार्यासुतार्थं अहं सर्वं करोमि, करिष्यामि च। त्वमपि गायको भूत्वा इतस्ततः भिक्षार्थं चरसि तव कुटुम्बपोषणार्थम्

नारदः — तव कुटुम्ब पोषणार्थं त्वमेवं करोषि ?

रत्नाकरः — हां मे पत्नी मे प्रियतमा। सर्वथा सा संरक्षणीया मया। तस्य कृते सर्वमहं करोमि।

नारदः — बाल शृणु। त्वं अत्यन्त घोरकृत्यं समाचरसि। तेन कृत्येन त्वं पाप भजसे।

रत्नाकरः — (विहस्य) पापः ? सः कः ? अहं कदापि न दृष्टवानस्मि तं। कथं विद्यते सः पापः मा कथय। तमपि मारयित्वा तस्य समीपात् सर्वं चोरयित्वा सानन्दं सुखमनुभविष्यामि।

नारदः — सः अनुभूयते। किन्तु नहि दृश्यते।

रत्नाकरः — सः मया नानुभूयते।

नारदः — सः अत्र नानुभूयते।

रत्नाकरः — सः कुत्र अनुभूयते।

नारदः — यमलोके।

रत्नाकरः — सः कुत्रास्ति।

नारदः — सः अन्धकारे निलीनः वर्तते। सः न कस्यापि दृष्टिपथमायाति।

रत्नाकरः — अरे सन्यासिन्। त्वं मम हस्तात् पलायितुं प्रयतसे। तत् त्वं कर्तुं नार्हसि। अदृश्यमान विषयमुद्दिश्य न विचारः कर्तव्यः। प्रयच्छ त्वत्सकाशे विद्यमानं संपद्व्ययम्। (इति सपरुषं सः वदति)

नारदः — अदृष्टविषयः सर्वेण न ज्ञायते।

रत्नाकरः — तव वचने किमपि सत्यं न विद्यते। त्वं सर्वमपि कल्पयसि।

नारदः — वयं सर्वमपि प्रत्यक्षं द्रष्टुं अशक्नुम.।

रत्नाकरः — यदि प्रत्यक्षं न दृश्यते तर्हि तत् असत्यं भवति।

नारदः — सर्वोऽपि अनुमानेन द्रष्टव्यः भवति।

रत्नाकरः — एतत् सर्वं मया नापेक्ष्यते। सौख्यमय जीवनमेव ममापेक्ष्यते।

नारद — इद सौख्यमय जीवनं नहि। नरकप्राय जीवनं भवति।

रत्नाकरः — कोऽयं नरक (इति हसति)

नारदः — बाल तव नाम किं ?

रत्नाकरः — मम नाम रत्नाकरः।

नारदः — बाल रत्नाकर। शृणु अहं अत्रैव तिष्ठामि त्वं सत्वरं तव गृहं गत्वा तव प्रिया पत्नीं पृच्छ, यथा सा त्वया दत्तवस्तुच्चयात् अर्धं गृह्णाति, तथा त्वदीय पापसंचयात् अर्धं प्रहिष्यति किं ? विषयमेवं त्व तव पत्न्या विचार्य, प्रतिनिवृत्य मे निवेदय। तदा सर्वमहं मत्सकाशे विद्यमानं ते दास्यामि।

रत्नाकर — अरे गायक त्वं कपट नाटकं करोषि। त्वं मत्तः पलायितु मिच्छसि। त्वं तथा कर्तुं नार्हसि। तव मे हस्ते मरणमिति लिखितमासीत्।

नारद — त्व मा मारय। किन्तु प्रथमतः तव पत्नीं विचार्य समागच्छ।

रत्नाकरः — (किञ्चित् विचार्य) अत्रैव तिष्ठ। अहं अधुनैवाऽगच्छेयं मम पत्नीं विचार्य)

नारद — (तत्रैवोपविशति)

रत्नाकर — (तं पश्यन् पृष्ठतः चलति)

नारद. — (नारायण नारायण नारायण इति कथयति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(निशावसान समय भिल्लिनी स्वद्रावा गृह गृहन्ती स्वपिति)

(नेपथ्ये कपाटं नादयन्) हले हले कपाट उद्घाटय, उत्तिष्ठ।

भिल्लिनी — (तनुं प्रसारयन्ती हस्ते उद्यम्य, मुखं विस्तृत्य जृम्भां करोति)

रत्नाकरः — हञ्जे दयिते त्वया सार्कं किञ्चित् भाषणीयं विद्यते, कवाट-मुद्घाटय।

भिल्लिनी — अरे गच्छ गच्छ। मया सार्कं प्रभाते भाषणीयं किं विद्यते। सुप्तुं त्वं समयं न ददासि रे।

रत्नाकरः — प्रिये। अस्ति कश्चित् वागविशेषः।

भिल्लिनी — कोऽयं वागविशेषः।

रत्नाकरः — त्वं प्रथमतः कवाटं उद्घाटय। अनंतरं कथयिष्यामि।

भिल्लिनी — ननु! (उत्थाय गत्वा कवाटं उद्घाटयति)

रत्नाकरः — प्रिये त्वं मम प्रश्नस्य उत्तरं देहि। (इति अन्तः प्रविशति)

भिल्लिनी — प्रातरेव प्रश्नाना उत्तरं, किमेतत् चित्रं। प्रातः किञ्चित् पललाशनं अनन्तरं कवोष्णं रुधिरपानं कर्तव्यं भवति। अद्य दिवसः प्रश्नोत्तर दिवसः किम्।

रत्नाकरः — दयिते अहं अद्य बहुपरिश्रान्तः जातः। (इति मञ्चोऽपरि उपविशति) किं मे प्रश्नस्य प्रत्युत्तरं दास्यसि।

भिल्लिनी — अरे एतावत्पर्यन्त अद्यावधि न कोऽपि प्रश्नः पृष्टः। भवतुनाम विचारय कोऽय त प्रश्नः।

रत्नाकरः — प्रिये यत् मया त्वाद्य आनीयते तस्मिन् अर्धं त्वं अनुभुङ्क्ष्व।

भिल्लिनी — अर्धं नहि सर्वमपि अहमेव भक्षयामि सुखमनुभवामि च।

रत्नाकरः — त्वं मदानीत वस्तुचयात् अर्धं उत तृतीयांशंवा अनुभवासि।

भिल्लिनी — हा अनुभवामि। आवयोः समानशीलता विद्यते। आवा सर्वं यथायोग्यं अर्धार्धं अनुभवावः। स एव पतिपत्नी भावः।

रत्नाकरः — तथा यदि स्यात्, मयाकृत पापे अपि अर्धभाग ग्रहिष्यसि किं त्वं।

भिल्लिनी — (छ छ छ इति कथयति) त्वत्कृत पापे अर्धभागः उत, लेशः अपि मम, नानुभवते। पापी पाप अनुभवति नतन्यः।

रत्नाकर — मदानात खाद्य त्व अनुभवसि ।

भिल्लिनी — हा अनुभवामि ससुख निवसामि।

रत्नाकर — तस्मात् तत् कृते य पाप कृत तस्मिन् पापे अपि त्वया सह भागिनी भवितव्या।

भिल्लिनी — त्व पथिकान् मारयित्वा तेभ्य धन अपहृत्य मह्य ददासीति नाह जाने। त्व मा पोषयितु तथा करोषि। त्वया आनीत तत् अह खादामि। मम नास्ति कोपि सम्बन्ध पाप विषये यथा तवास्ति।

रत्नाकर — सुतरा नास्ति कि।

भिल्लिनी — सुतरा नास्ति। स्वय कृत पाप स्वयमेव भुङ्क्ते नन एक तदन्यथा न भवति। स पाप अन्ये न कदापि भुज्यते।

रत्नाकर — प्रिये दुष्कर्म कृत मया। अहं प्रभा आनाय सर्वं तुभ्यमेव ददामि। त्व अधुना वदसि मत्कृत पापे त्व सहभागिनी न भविता। धिक् ससार प्रति। (द्रुतमुत्थाय चिन्ताग्रस्त नारद प्रति धावति)

भिल्लिनी — अय पापपुण्य विचक्षणा न जानाति। अय सुतरा मूर्ख। एतत् सर्वं मम किमर्थं। सम्यक् भोजन गाढनिद्रा मम अत्यन्त रोचते। (इति गत्वा पुन स्वपिति)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

नारद (नत्वा प्रविशति)

(तत प्रविशति रत्नाकर)

रत्नाकर — अयि भो गायक मा रक्षस्व। (इति नारद पादयो पतति)

नारद — (तं हस्ताभ्या उन्नमय्य) कि उक्तं तव पत्न्या ।

रत्नाकरः — अयि भोः गायक त्वं मे ज्ञानमादिशः । अधुना मे नयनद्वयं उन्मीलितं । अहं अधुना कि करवाणि । पत्नी जगाद पापात् अर्धं उत न किञ्चित् अपि तयानुभुज्यते इति । अहमेव संसार लम्पटो भूत्वा दृश्यमान मुह्यमानं च सत्यमिति प्रमत्तः अकृत्यमकरवम् । मम पापपरिहारो नास्ति । अधुना अवगतोऽस्मि कः पापः । (इति मुक्तकण्ठं रोदिति)

नारदः -- बाल मारोदि । अस्ति पापपरिहारः ।

रत्नाकरः —कथं मे पापपरिहारः भविष्यति ।

नारदः — अस्ति मार्गविशेषः ।

रत्नाकरः — शाधि मा भगवन् ।

नारदः — एहि बाल मत्सकाशं ।

रत्नाकरः — स्वाविन् अहं पापी अस्पृश्यः वन्यजीवी च ।

नारदः — तथा मावद रत्नाकर । सर्वं जगत् विष्णुमयं । सर्वं तस्य विलसनमेव । वयं सर्वे तस्य कृतिनः । नात्र चिन्ता कार्या । सर्वं जगति स्पृश्यमेव भवति । अस्पृश्य न किमपि विद्यते ।

रत्नाकरः — प्रभो त्वं कोऽसि । तव नाम कि ।

नारदः — अहं नारदः । अहं त्रिलोक संचारी । एहि मत्सकाशं, ते राम मन्त्रोपदेशं करिष्यामि ।

रत्नाकरः - (तस्य सकाशं आयाति)

नारद. — (कर्णे राम इति कथयति) बाल त्वं अत्रैव वटवृक्षच्छायाया उपविश्य एकाग्रनिष्ठया मन्त्रोच्चारणं कुरु । (इति स्थानं दर्शयति)

रत्नाकरः — (तथैवोपविश्य रामः रामः इति जपन्नास्ते)

नारदः — (नारायण इति कथयन् गच्छति)

(यवनिका पतति)

* * *

सप्तमं दृश्यम्

(ततः प्रविशति काषायाम्बरधारी रुद्राक्षमालालंकृतः भस्मचर्चित शरीरः भारद्वाजः)

भारद्वाजः — (आत्मगतम्) वत बहु वर्षेभ्यः अहं अत्रैव आत्मज्ञानार्थं तपामि। किन्तु आत्मज्ञानं एतावत्पर्यन्तं अप्राप्तोऽहम्। मे जीवने आटविक जीवनं स्थिरमिव भासते। विना च आत्मज्ञानं जीवनं सत्यं आटविक जीवनमेव भवति। मन विद्यते कश्चिद्हृदयेभावनाज्ञानं। तदनुसारेण शीघ्र लेखनमपि कर्तु समर्थोस्मि। अहं उक्तलेखनं भावनापेक्षया शीघ्रतरं लिखिष्यामि। तत् मे जन्मतः संक्रामितम्। मानवः सर्वशक्ति संपन्नोऽपि ज्ञानी अपि विना च गुरूपदेशः, गुरोः सन्मार्गादिशः किमपि कर्तुं अशक्तो भवति। सर्वत्र गुरुत्वमावश्यकं भवति। विना च गुरूपदेशः विद्या अपत्रमः भवति। आशैशवादहं अत्रैव तमसा नदीतीरे निवसामि। तमसा नदीतीरप्रभावेन मयि नकापि परिवर्तना जाता। मे अज्ञानं एतावत्पर्यन्तं अद्यावधि न तिरोभूतम्। यदि यः कश्चन् गुरुः सरस्वतीचरण चारणचक्रवर्ती मम उपलब्धः भवति तर्हि मे कामना सफला भविष्यति। अहं मे जीवितान्तं तस्य सेवा कुर्याम्। यदि सः कविः भविष्यति तर्हि तस्य कवितारसमास्वाद्य अहं परब्रह्माणं ज्ञास्यामि। अत्र अधुना सर्वे निशाचराः, रक्तपचा.। पल्लाशना सन्ति। अहमेकः एव कन्दमूल पर्णाशिनीः। न कोऽपि धन्य-जीवि राजतेऽत्र। कर्णाकर्णिकया श्रुतमया अत्र कोऽपि सज्जनः तपस्यन् आस्ते इति। तस्य सन्निधि गत्वा आत्मज्ञानार्जन परः भविष्यामि। एकदा मा त्रिलोक संचारी नारदः अवादीत् यत् त्वं वाल्मीकेः शिष्य भविता इति। एतावत्पर्यन्तं कुत्र विद्यते स वाल्मीकि नाहं जाने। (इति इतस्ततः तूष्णीं चरन् किञ्चित् आकर्ण्य) किमेतत् अत्रैव न्यग्रोध वृक्षान् अधोऽधः किञ्चित् चञ्चत् चञ्चरीक झंकारतुलित नादरम्य राम राम इति अव्यक्त मधुरः शब्दविशेषः श्रूयते। अहं तत्रैव गच्छेय। एतादृश संदर्भ विशेषः मया न कदापि अनुभूतः। सत्यमेतत् यत् मङ्गलानि नानुमेयानि भवन्ति, किन्तु त्वक्षण फलद्योतकानि भवन्तीति। भवतु मा बुद्धिः प्रचोदयति तत् स्थानं गन्तु। अधुना तत्रैव गच्छेयमहम्। ओं शनो मित्रस्य वरुण. शनो भवत्वर्यमा। शंन इन्द्रो बृहस्पतिः। (इति पठन् गच्छति)

(यवनिका पतति)

अष्टमं दृश्यम्

(न्यग्रोध वृक्षं अधोधः स्थलं सर्वमपि पर्णाविलं वर्तते अपि च महान् वल्मीकः विराजते)

(ततः प्रविशति नारदः)

नारदः — (वल्मीकं विलोक्य) नारायण नारायण। (इति जपति)

वाल्मीकिः — (मनसि) श्रुतपूर्वोयं वाग्विशेषः ध्वनि विशेषश्च। (इति वल्मीकात् उत्थाय नमस्करोति नारदम्) त्रिलोक संचारिन् नारद। महापुरुषाणा दर्शनेन असंभाव्यमपि संभाव्य भवति। किमत्रागमन कारणं। महानुभावाः विना च कारणं गृहं ना गच्छन्ति। महात्मन् निवेदय कि कारणाणि ते।

नारदः — रत्नाकर श्रृणु कि करणीयं वियते ते। यतः तपस्यतः तवोपरि वल्मीकं संजात ततः अद्य प्रभृति त्वं वाल्मीकिः इति नाम्ना आहूयसे। त्वया महापुरुष जीवित मुद्दिश्य महत् काव्यं विरचनीयं वियते। तत्काव्यं जगति अदिकाव्यं भविष्यति। तदा त्वदीय काव्यावतरणं विलोक्य तत् काव्यं पाठ पाठं सर्व जगत् मुग्धं भविष्यति। तस्मात् काव्यलेखने कृतप्रयत्नो भव।

वाल्मीकिः — अयि भो नारद। साम्प्रतं लोके गुणवान् वीर्यवान् कः अस्ति निवेद्यता।

नारदः — श्रृणु वाल्मीके। इक्ष्वाकुवश प्रभवः रामोनाम जनैश्रुतः। सर्व शास्त्रार्थ तत्वज्ञः स्मृतिमान् प्रतिभावान् सराम सर्वलोकप्रियश्च। तं महापुरुषं उद्दिश्य काव्यं विलिख।

वाल्मीकिः — धन्योऽस्मि नारद धन्योस्मि। इति नमस्करोति)

नारदः — नारायण नारायण। (इति गच्छति)

(ततः प्रविशति भरद्वाजः)

भरद्वाजः — गुरवे नमः। (इति नमस्करोति)

वाल्मीकिः — कोऽसित्वम् !

भरद्वाजः — अयि मुने अहं भवता शिष्यः !

वाल्मीकिः — तव नाम किम् ?

भरद्वाजः — मम नाम भारद्वाजः ।

वाल्मीकिः — त्वं कुत्र निवससि ?

भरद्वाजः — अस्मिन् अरण्ये अहं निवसामि ।

वाल्मीकि — त्वं मम सन्निधिं कथं आगतोऽसि ।

भरद्वाजः — भवता समागमः मे भविष्यतीति त्रिलोक संचारी नारदः अवादीत् । तस्मात् अहं भवता शिष्यः भवितुं समागतोस्मि ।

वाल्मीकिः — सर्वं शुभप्रदं संजातम् । अद्य प्रभृति त्वं मे शिष्यः ।

भरद्वाज — शाधि मा गुरो ।

वाल्मीकिः — भरद्वाज तमसातीरं स्नातुं गम्यते मामनुसर ।

भरद्वाजः — एषोस्मि देव ।

वाल्मीकिः — भरद्वाज पश्येहं अकर्दमं तीर्थं तमसातीरं रमणीयं, प्रसन्नाम्बु यथा सन्मनुष्यमनः ।

भरद्वाजः — अहो अतीव सुन्दरा प्रकृतिरामणीयकता ।

वाल्मीकिः — तात भरद्वाज, न्यस्यतां कलशः दीयतां वल्कलं मम, उत्तमं तमसा तीर्थमिदं अवगाहिष्ये ।

भरद्वाज — गृह्यतां इदं वल्कलं ।

वाल्मीकिः — (आदाय वल्कलं शिष्यहस्तात् आसमन्तात् व्यापृतं वनं पश्यति क्रौञ्चयोः चारु निश्वसनं शृणोति) भरद्वाज् शृणु । पतत्रिणः स्वैरं विहरन्तः कूजन्तः गर्वमपि तमसातीरं नादब्रह्मावृतं कुर्वन्ति ।

भरद्वाजः — गुरो प्रकृति सौन्दर्यानुभावः सर्वथा जन्तूनां न भवति ।

वाल्मीकिः — (अत्रान्तरे क्रौञ्चवधं विलोक्य भूमौ पतितं पतत्रिणं विलोक्य मृतं च गत्वा) कोयं दुरात्मा मनुजपशुः यः पतत्रिणं मारितः धिग् तं । (इति चिन्तया)

मा निषाद प्रतिष्ठां त्वमगमः शाश्वतीस्समाः।
यत् क्रौञ्चमिथुनादेकं अवधीः काममोहितम् ॥

(इति उच्चैः गात्वा स्तब्ध) भरद्वाज कि व्याहृतं मया शोकार्तेन विचिन्तय।

भारद्वाजः — गुरो सम्यगुदीरितं तत्र भवता।

वाल्मीकिः — पादबद्धोक्षरसमः। तन्त्रीलय समन्वितः।
शोकार्तस्य प्रवृत्तो मे। श्लोको भवतु नान्यथा॥

एहि स्नानार्थं गच्छाव.। (इति गच्छत॰)

(यवनिका पतति)

* * *

नवमं दृश्यम्

(वाल्मीकिः ध्यानेस्थित स्वीय आश्रमे। भरद्वाज. तत्रैव पार्श्वे भूर्जपत्राणि गृहीत्वा उपविष्टः)

वाल्मीकिः — (नेत्रे उन्मील्य) तात भरद्वाज शृणु। श्वेत दुकूलधारी ब्रह्मा मे भावनाया समागतः।

भरद्वाज॰ — ततस्तत॰।

वाल्मीकिः — अहं सहसोत्थाय प्राञ्जलि ब्रह्मन् अभिवादये उपविशतु भवान् इति पीठमयच्छम्।

भरद्वाज — तत्र भवन्त॰ धन्यजीविन यत ब्रह्माण अपश्यन्। ततस्तत॰।

वाल्मीकिः — सः पीठोपरि उपाविशत्। अहं अर्घ्य'पाद्यै. त अपूजयम्।

भरद्वाजः — साधुकृत भवद्भि ततस्तत।

वाल्मीकि — स मा अवोचत् अयि मुने त्वमपि उपविश। इति आसन दर्शयामास।

भरद्वाज — ततस्तत ।

वाल्मीकि — अह तेन दर्शित आसने उपाविशम्।

भरद्वाज — ततस्तत ।

वाल्मीकि — तदा मया प्रोक्त ब्रह्मन् तमसातीरे एकेन व्याधेन एक क्रौञ्च व्यापादित ।

भरद्वाज — यत् वृत्त तत् प्रोक्त भवद्भि । ततस्तत ।

वाल्मीकि — ब्रह्मन्, करुणान्तरात्मना मया व्यथितेन।

मानिषाद प्रतिष्ठा त्वमगम. शाश्वतीस्समाः।
यत् क्रौञ्चमिथुनादेक अवधी. काममोहितम्॥

इति।

भरद्वाज — साधु समुदीरित भवद्भि ।

वाल्मीकि — ब्रह्मा श्रुत्वा विहस्य मुनिपुङ्गव श्लोक एव त्वया बद्ध नात्र काया विचारणा। भवान् रामायण विलिखतु इति मा आशी पूर्वक जगाद।

भरद्वाज — ततस्तत ।

वाल्मीकि —तदाह आनन्देन विनमित शिर । नेत्रे निमील्य प्रणाम माचरम्। अत्रान्तरे तस्मिन् एव क्षणे स । ब्रह्मा तिरोदधे॥

भरद्वाज — गुरो चतुर्मुखस्य भावना पूरयन्तु भवन्त ।

वाल्मीकि — अह अधुनैव कविता कथयेय। त्व सावधानचित्तेन मदुक्ति अनुपदमेव विलिख।

भरद्वाज — मे कामना अद्य सफला भविष्यति गुरो। अह तथैव विलिखि ष्यामि। कथयन्तु भवन्त ।

वाल्मीकिः — (नेत्रे निमील्य)

तपस्स्वाध्याय निरतं । तपस्वी वाग्विदांवरम् ।
नारदं परिपप्रच्छ । वाल्मीकिर्मुनिपुङ्गवम् ।।

भरद्वाजः — (एकाग्रचित्तेन लिखति)

वाल्मीकिः — यावत् स्थास्यन्ति गिरयः सरितश्च महीतले ।
तावद्रामायणकथा लोकेषु प्रचरिष्यति ।।

भरद्वाजः — (एकाग्रचित्तेन लिखति)

(यवनिका पतति)



॥ परीक्षिन्नाटकचक्रम् ॥

३. ऐतिहासिक–नाटकानुक्रमणिका

समर्पणम्

२. कैलासवासिभ्यां मे ज्येष्ठभ्रातृभ्यां ओगेटि देवहूती-हनुमच्छास्त्री दम्पतीभ्यां भक्त्या समर्पितमिदं षडैतिहासिकनाटकरुद्राक्षमालाचक्रम् ॥

॥ रक्षाबन्धनम् ॥

श्रावणी पौर्णिमा दिव्या रक्षाबन्धन रूपिणी ।
देशे समन्वयता भाव जनयित्री विराजताम् ॥

(कुमुदिनी कुर्च्या उपविश्य टबलापरि विद्यमान कर्गज पत्रेषु किमपि लिखन्ती आस्ते, टेबुलापरि उभय पार्श्वत अनेकानि पुस्तकानि शिखरी भूतानि राजन्ते)

(तत प्रविशति कादम्बरी)

कादम्बरी — सखि कुमुदिनि सुप्रभ त ते । (इति नमस्करोति)

कुमुदिनी — (उन्नमित शिरस्का) अहो कादम्बरी ! नमस्ते सुप्रभ त। सखि अन्त प्रविश ।

कादम्बरी — (अन्त प्रविशति, तत्र पार्श्वे विद्यमान कुर्च्या उपविशति)

कुमुदिनी — सखि ! कादम्बरी प्रभाते कथ मे गृह समागतासि ।

कादम्बरी — हुञ्ज, अस्ति कश्चित् वाग्विशेष ।

कुमुदिनी — कोऽय वाग्विशेष ?

कादम्बरी — अद्याह विद्यालय नागच्छामि।

कुमुदिनी — ता वार्ता कथयितु समागतासि किं ?

कादम्बरी — हा ता वार्ता कथयितु समागतास्मि ।

कुमुदिनी — का हेतु विद्यते।

कादम्बरी — अद्य अस्मद गृहे वय सर्वे नाटक द्रष्ट गच्छाम. ।

कुमुदिनी — सर्वं कुटुम्ब गच्छति किम् ?

कादम्बरी — हा सर्वं कुटुम्ब गच्छति।

कुमुदिनी — कुत्र कस्मिन नाट्यगृहे नाटक भविष्यति ?

कादम्बरी — अत्रैव सान्निध्ये विद्यमान नाट्यगृहे भविष्यति।

कुमुदिनी — नाटकस्य नाम किं ?

कादम्बरी — नाटकस्य नाम रक्षाबन्धनम्।

कुमुदिनी — श्रावण पौर्णिमाया रक्षाबन्धनमहोत्सवे, अपिच नारिकेळ पौर्णिमाया रक्षाबन्धन नाम नाटक प्रयोक्ष्यते। सर्वथा साधु औचित्य पूर्ण भासते।

कादम्बरी — अत्यन्त सुन्दर नाटक इति जनश्रुति ।

कुमुदिनी — कस्या भाषाया प्रयोक्ष्यते नाटकमेतत्।

कादम्बरी — सस्कृत भाषायाम्।

कुमुदिनी मस्कृत भाषाया रक्षाबन्धन नाम नाटकम्।

कादम्बरी — हा रक्षाबन्धन नाम नाटकम्।

कुमुदिनी — कोऽय कवि ।

कादम्बरी — परीक्षित् शर्मा नाम कवि ।

कुमुदिनी — अहो! गीर्वाण भाषा प्रपञ्चे विख्यातोऽय कवि ।

कादम्बरी — अय कवि विंश शतके शताब्दे सस्कृत भाषाया ललित गीत लहरी नाम गद्यकाव्य, विंशति सर्गात्मक यशोधरा नाम महाकाव्य, अभय गीतरामायण अपिच सप्तविंशति सख्यापरिमित नाटकचक्र च विलिखितवान। अस्य कवे गीर्वाण गद्यचक्रवर्तीति नामान्तरमपि विद्यते। परीक्षिन्नाटकचक्रात् गृहीतमेतत रक्षाबन्धन नाम नाटक।

कुमुदिनी — एतान्नाटक पौराणिक किम् ?

कादम्बरी — पौराणिक नहि, किन्तु चारित्र्यात्मकम् नाटकम्।

कुमुदिनी — ममापि द्रष्टु नाटकमेतत् इच्छा भवति। भवत्या सार्धं अहमपि आगच्छेयम्।

कादम्बरी — मम अतीव परमानन्दः यत् त्वमपि शाला अगत्वा मया सार्धं नाटकं द्रष्टुं समागच्छसि इति। पाठशालागमनादपि नाटकप्रेक्षणमेव वरं भवति सर्वथा, आधुनिकेषु दिवसेषु। एहि गच्छाव। (इति निष्क्रान्तौ)

(यवनिका पतति)

(एकस्मिन् उद्याने रजनी-सखीभिः गायन्ती नृत्यन्ती आस्ते)

गीतम् (मालकौंस रागे)

एहि एहि चन्द्र भो मा विलम्ब हे चन्द्र भो
उदय शिखर हिण्डमान चारु चन्द्र भो
यामिनी चुम्बनेन रागि चन्द्र भो १

तारकालिकेलिलोल पाण्डु चन्द्र भो
विभावरी कर्णकुण्डलायमान पूर्ण चन्द्र भो
कुमुद कामिनी विलास लोलमत्त चन्द्र भो
गगनसरसि क्रीडमान राजचन्द्र भो २

तावकीन रश्मिरूप रूपका वयम्
मधुर भाव हास ललित लासिका वयम्
हावभाव मधुर नटन शिक्षित वयम्
चतुर वृत्त गान चरण पाटवा वयम् ३

सान्ध्यराग चित्रिता कपोल पालिका
मधुर हसन कुसुम पुञ्ज चित्र भूषिता
शारदाभ्र शुभ्र वसन चारु मण्डिता
भूतले नितान्त ललित हसन जीविताः ४

अनङ्ग रङ्ग विविध चारु बन्ध पाटवा
ईक्षणेन तरुण हृदय भावग्राहिकाः
मन्दयान चित्त जात भाव चालका
भावसूत निचय दान पुण्य लम्बिता ५

रजनी — अत्र पुरुषोत्तमः राजा अस्ति। सः सत्यमेव पुरुषोत्तमः। तं जेतुं हरिणापि हरेणापि न शक्यते।

अलक्ष्येन्द्रः — तरुणि, त्वं तथा मावद। त्वं न जानासि मम भुज पराक्रमं।

रजनी — अहं जानामि ते भुजपराक्रमं।

अलक्ष्येन्द्रः — भवती कथं जानाति मे भुजपराक्रमं।

रजनी — प्रथम दर्शनेनैव सर्वमपि अवगतं मे। ते रूपमेव तव महिमानं व्याचष्टे।

अलक्ष्येन्द्रः — (किंचित् तस्याः समीपं आगत्य) अहं सर्वं धरित्रीं जेतुमिच्छामि। किन्तु भवती मां जेतुं इच्छति। प्रथमदर्शनेनैव मां अवगतासि भवति।

रजनी — हां सत्यमेव अहं त्वां जेष्यामि। अहं त्वां कामये।

अलक्ष्येन्द्र — अहमपि त्वां कामये। भवती अयस्कान्तोऽस्ति। अहं अयोमयः।

रजनी — एहि मत्सकाशं देहि गाढालिङ्गनम्।

अलक्ष्येन्द्रः — मा त्वरस्व ते गाढालिङ्गनं दास्यामि। प्रथमतः त्वं कथय मम हस्ते अस्य राज्ञः पराजयः कथं भविष्यति।

रजनी — (किंचित् विचकिता) तत् कथयितुमहं असमर्थास्मि।

अलक्ष्येन्द्र—तथा यदि, अहमपि गाढालिङ्गनं दातुं असमर्थः। आवयोः प्रेम निष्फलं भविष्यति।

रजनी — तथा यदि भवति, अहं समालोच्य ते सहायं करिष्यामि।

रजनी — तथैव भवतु। भारत देशं स्वाधीनानन्तर अहं भारतस्य राजा त्वं राज्ञीच भवितारौ।

अलक्ष्येन्द्रः — समयमनुसृत्य यथा योग्यं सर्वमहं करिष्ये।

अलक्ष्यन्द्रः — भारतवर्षे कति प्रदेशाः वर्तन्ते साकल्येन निवेदय। तत्र सर्वेऽपि राजानः पराक्रमिनः राजन्ते किम्?

(गायन समय प्रविशति अलक्षयेन्द्र)

अलक्ष्येन्द्र — (रजनी दृष्ट्वा आत्मगतम्) कैषा भलोक सुन्दरी? किमेषा स्वर्गादवततार उत नाकलोकात् अविर्भूता ? गायन पद्धति गन्धव गानोपयिता। भवतुनाम तस्याः समीप गत्वा तामेव पृच्छेयम्। (इति गत्वा) अयि सुन्दरि कासि त्वम् ?

रजनी — (ससम्भ्रम) अह पारसीया भारतवर्षे निवसामि। (सखी विलोक्य) मख्य यूय गच्छथ। (सर्वा सख्य गच्छन्ति) अयि भ भवन क ऽस्ति ?

अलक्ष्येन्द्र — अह ग्रास् देशीय । सर्वं भतलय जिगीषामि। ग्रीम देशादारभ्य मार्गमध्य विद्यमान सव राज्य मण्डलानि विजित्य अधुना भारत वर्षे विन्ध प्रान्तमागतोऽहम।

रजनी — भव न जगज्जता भवितुमिच्छति।

अलक्ष्ये द्र — हा सत्यमेव इच्छामि

रजनी — तर्हि भारतवर्ष किमथमागताऽसि।

अलक्ष्येन्द्र — अय भारतवप भूतलस्वग । अत्र सर्वं शास्त्राणि वृद्धि गतानीति श्राव श्राव भारतवर्ष प्रयुध्य स्वायन्त कर्तु नमागतोऽस्मि।

रजनी — (विहस्य) कि भारतवर्षं भगान् जिगीषति।

अलक्ष्ये द्र — तरुणि अत्र हसितस्य कारण किं विद्यते? हा सत्यमेव ह भारतवर्षं जतुमिच्छामि।

रजनी — तत असाध्य भवति ते इति हसामि।

अलक्ष्येन्द्र — तरु ण मम अजेय भतले न किमपि विद्यते।

रजनी — त्व अत्याशावान मा भव। अय देश सवथा शक्तिसपन्न।

अलक्ष्यन्द्र — अत्र कोऽय राजा।

रजनी — भारतवर्षे बहव राजान सन्ति।

अलक्ष्यन्द्र — अत्र सिन्धुनदो प्रान्ते पजाव प्रदेश कोऽय राजा इति मे प्रश्न

रजनी — अत्र पुरुषोत्तमः राजा अस्ति। स. सत्यमेव पुरुषोत्तमः। त जेतु हरिणापि हरेणापि न शक्यते।

अलक्ष्येन्द्र. — तरुणि, त्व तथा मावद। त्वं न जानासि मम भुज पराक्रम।

रजनी — अह जानामि ते भुजपराक्रम।८

अलक्ष्येन्द्र· — भवती कथ जानाति मे भुजपराक्रम।

रजनी — प्रथम दर्शनेनैव सर्वमपि अवगत मे। ते रूपमेव तव महिमानं व्याचष्टे।

अलक्ष्येन्द्रः — (किंचित् तस्या· समीप आगत्य) अह सर्व ध रत्री जेतुमिच्छामि। किन्तु भवती मा जेतु इच्छति। प्रथमदर्शनेनैव मा अवगतासि भवति।

रजनी — हा सत्यमेव अह त्वा जेष्यामि। अह त्वा कामये।

अलक्ष्येन्द्र — अहमपि त्वा कामये। भवती अयस्कान्तोऽस्ति। अह अयोमय.।

रजनी — एहि मत्सकाश देहि गाढालिङ्गनम्।

अलक्ष्येन्द्रः — मा त्वरस्व ते गाढालिङ्गन दास्यामि। प्रथमतः त्व कथय मम हस्ते अस्य राज्ञः पराजयः कथ भविष्यति।

रजनी — (किंचित् विचकिता) तत कथयितुमहं असमर्थास्मि।

अलक्ष्येन्द्र—तथा यदि, *अहमपि गाढालिङ्गन दातु असमर्थः*। आवयोः प्रेम निष्फल भविष्यति।

रजनी — तथा यदि भवति, अह समालोच्य ते सहाय करिष्यामि।

रजनी — *तथैव भवतु। भारत देश स्वाधीनानतर अह भारतस्य* राजा त्व राज्ञीच भवितारौ।

अलक्ष्येन्द्र. — समयमनुसृत्य यथा योग्य सर्वमह करिष्ये।

अलक्ष्यन्द्र· — भारतवर्षे कति प्रदेशा. वर्तन्ते साकल्येन निवेदय। तत्र सर्वेऽपि राजान. पराक्रमिनः राजन्ते किम् ?

रजनी — भारतवर्षं प्रति त्वं किमपि मावद। तुभ्यं यद् रोचते तत् कुरुष्व। नाहं समर्था भारतमुद्दिश्य कथयितुं। इयं भूमिः पटपञ्चाति प्रदेशैः सकीर्णा सुबद्धा प्रतिभाति। इयं अष्टैश्वर्याणां आकरः। अत्र राजानः सहस्रभानुप्रतीकाः। अहं त्वां चकमे। तस्मात् त्वदर्थं यत् मया आचरणीयं विद्यते तदेव कर्तुं शक्ताऽस्मि।

अलक्ष्येन्द्र — सत्यं त्वं मे जीवनदात्री प्रेयसी सजाता। (इति तस्याः स्कन्धोपरि हस्तौ निक्षिप्य किंचित् स्वसमीपं गृहीत्वा) प्रयसि तदेवाल। त्वं सर्वथा मम सहायं कुरु तदैव ते मम गाढालिङ्गनं उपायनमिव दास्यामि। पुनः समागमनाय पुनः दर्शनाय शुभरजनी भूयात्। (इति निर्गच्छति)

रजनी — तवेयं रजनी शुभं कुर्यात्। (इति तं हस्तसंज्ञया प्रेषयति)

(इति द्वावपि गच्छतः)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(आरस्तुः सिंहासने उपविशति ततः प्रविशति अलक्ष्येन्द्रः)

अलक्ष्येन्द्र — (प्रविश्य नमस्करोति ग्रीसदेशीयपद्धत्या)

आरस्तु — विजयी भव। (इति हस्तमुद्यम्य आशिषं ददाति)

अलक्ष्येन्द्र — गुरो, अहं अद्य प्रभृति पुनः जैत्रयात्रार्थं जिगमिषामि।

आरस्तु — त्वं जगज्जेता नूनं भविता।

अलक्ष्येन्द्र — भवतां आशीर्वचनबलेन अहं अवश्यं जगज्जेता भविता।

आरस्तु — आशिषः सन्त्येव। किन्तु मानसिकनिग्रहः अपेक्षितव्यः।

अलक्ष्येन्द्रः — भवता आशय· क. उपदिशन्तु ।

आरस्तु — पुरुषः यदि जितेन्द्रिय. भवति तर्हि स· सर्वशक्तिमान् भविष्यति ।

अलक्ष्येन्द्रः — ततः ।

आरस्तु — शृणु । पुरुप अजय घटोपमः ।

अलक्ष्येन्द्र — तत. ।

आरस्तु — अङ्गना अग्निः ।

अलक्ष्येन्द्र. — तत ।

आरस्तु — द्वयो सन्निहितसवन्ध· मा भूयात् ।

अलक्ष्येन्द्र —यदि भवेत् ।

आरस्तु — सृष्टिकर्तापि स्वीय सृष्टया पुत्रिकायामपि कामुकः इव प्रवर्तिष्यति

अलक्ष्येन्द्र. — तथा भविष्यति किम् ?

आरस्तु — अरे वत्स त्व न जानासि । स्त्रीशक्तिः पुरुप वलहीन करोति जगति ।

अलक्ष्येन्द्र — गुरो स्त्रीपुरुप सयोगादेव सृष्टि भवति ।

आरस्तु — तत् सत्यमेव । किन्तु जयज्जेतॄणा स्त्रीसहवास अयोग्यः इति मे आदेश ।

अलक्ष्येन्द्र· — तत ।

आरस्तु — यदि पुरुप स्त्रीलपटो भवति तर्हि स. निर्बलः भविष्यति । तदा सः योद्धा भवितु नार्हति । स निर्वीर्यः भविष्यति । निर्वीर्य सकलव्याधयः त परिवेष्टन्ति ।

अलक्ष्येन्द्रः — कि कर्तव्य मया आदिशन्तु भवन्त· ।

आरस्तु — कुत्रापि स्त्रीसम्बन्धः मा भूयात् तव जैत्रयात्रायाम् ।

रजनी — भारतवर्षं प्रति त्वं किमपि मावद । तुभ्य यद रोचते तत् कुरुष्व। नाह समर्था भारतमुद्दिश्य कथयितु। इय भूमि षटपञ्चति प्रदेशै सकीर्णा सुबद्धा प्रतिभाति। इय अष्टैश्वर्याणा आकर । अत्र राजान सहस्र भानु प्रतीका । अह त्वा चकमे। तस्मात त्वदथ यत् मया आचरणीय विद्यते तदेव कर्तु शक्ताऽस्मि।

जलक्षयेन्द्र — सत्य त्व मे जीवनदात्री प्रेयसी सजाता। (इति तस्मा स्कन्धोपरि हस्तौनिक्षिप्य किंचित् स्वसमीप गृहीत्वा) प्रयसि तदेवाल। त्व सर्वथा मम सहाय कुरु तदेव ते मम गाढालिङ्गन उपायनमिव दास्यामि। पुन समागमनाय, पुन दर्शनाय शुभरजनी भूयात। (इति निर्गच्छति)

रजनी — तवैव रजनी शुभ कुर्यात्। (इति त हस्तसज्ञया प्रपयति)

(इति द्वावपि गच्छत)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(आरस्तु सिंहासन उपविशति तत प्रविशति अलक्षयन्द्र)

अलक्षयेन्द्र — (प्रविश्य नमस्करोति ग्रीसदशीय पद्धत्या)

आरस्तु — विजयी भव। (इति हस्तमुद्यम्य आशिष ददाति)

जलक्षयेन्द्र — गुरो, अह अद्य प्रभृति पुन जैत्रयात्रार्थं निर्गमिष्यामि।

आरस्तु — त्व जगज्जेता नून भविता।

अलक्षयेन्द्र—भवता आशीर्वादनबलेन अह अवश्य जगज्जेता भविता।

आरस्तु — आशिष सत्यव। किन्तु मानसिक निग्रह अपेक्षितव्य ।

अलक्ष्येन्द्रः — भवता आशय. कः उपदिशन्तु।

आरस्तु — पुरुषः यदि जितेन्द्रिय. भवति तर्हि स सर्वशक्तिमान् भविष्यति।

अलक्ष्येन्द्र. — ततः।

आरस्तु — शृणु। पुरुष. अज्य घटोपमः।

अलक्ष्येन्द्र — ततः।

आरस्तु — अङ्गना अग्नि·।

अलक्ष्येन्द्र — तत.।

आरस्तु — द्वयो· सन्निहितसबन्धः मा भूयात्।

अलक्ष्येन्द्रः — यदि भवेत्।

आरस्तु — सृष्टिकर्तापि स्वीय सृष्टया पुत्रिकायामपि कामुकः इव प्रवर्तिष्यति

अलक्ष्येन्द्र. — तथा भविष्यति किम् ?

आरस्तु — अरे वत्स त्व न जानासि। स्त्रीशक्तिः पुरुष बलहीन करोति जगति।

अलक्ष्येन्द्र — गुरो स्त्रीपुरुष सयोगादेव सृष्टि· भवति।

आरस्तु — तत् सत्यमेव। किन्तु जगज्जेतृणा स्त्रीसहवास अयोग्यः इति मे आदेश।

अलक्ष्येन्द्रः — तत।

आरस्तु — यदि पुरुष. स्त्रीलम्पटो भवति तर्हि सः निर्बलः भविष्यति। तदा सः योद्धा भवितु नार्हति। स निर्वीर्य भविष्यति। निर्वीर्यं सकल-व्याधय. त परिवेष्टन्ति।

अलक्ष्येन्द्रः — किं कर्तव्य मया आदिशन्तु भवन्त·।

आरस्तु — कुत्रापि स्त्रीसम्बन्ध मा भूयात् तव जैत्रयात्रायाम्।

अलक्ष्येन्द्र — एतादृशी भावना असहजा भवति। यत जगति सर्वं स्त्रीपुरुष शक्तिसमुदभूतम।

आरस्तु — निग्रहा, जना, क्षणिक सुखासक्त मा भूयात। स सवदा शाश्वत सुखाय प्रयतनीय भवति।

अलक्ष्येन्द्र — स्त्रीलोलुपत्व अलक्ष्यन्द्राणा पतनकारण भवतीति भवता अभिप्राय ।

आरस्तु — हा सत्यमेव। जितेन्द्रियत्वेन जता वलसम्पन्न बुद्धिमान् भविष्यति। राज्य काङिक्षणा कान्तानसरण अयोग्य भवति।

अलक्ष्येन्द्र — राजकीयषु कामिन्य सहायभता भविष्यन्ति।

आरस्तु — ता केवल राज्यपतनस्यापि कारण भवति।

अलक्ष्येन्द्र — अधुना मया किं कर्तव्य आदिशन्तु भवन्त ।

आरस्तु — स्त्रीसम्बन्ध पुरुषस्य अनावश्यक । स सबन्ध असहज ।

अलक्ष्येन्द्र — सव प्राणिना कामना भवति खलु।

आरस्तु भवति चेत जातु केवल सभोग कतव्य ।

अलक्ष्येन्द्र — यदि स असतृप्त भवति तेन सम्भोगन किं कर्तव्यम्?

आरस्तु — जगति ऋतुचक्रमनुसृत्य सभोग कर्तव्य ।

अलक्ष्येन्द्र — तदापि स असतृप्त भवति चेत।

आरस्तु — स्मशाने अग्नि परिकल्प्य रमण योग्य भवति।

अलक्ष्येन्द्र — मरणमेव योग्य इति भवता अभिप्राय किम ?

आरस्तु — हा अयमेव मे अभिप्राय

अलक्ष्येन्द्र — शृङगार वीररसयो अत्यन्त सन्निहित सबन्ध विद्यते खलु जगति।

आरस्तु — भवतु नाम। तत्स्यार्थ अथ। यावदपेक्ष्यते तावदेव अनुभोक्तव्य । किंतु मा लोलुपत्व लपटत्व च भूयात इति मे निदेश ।

अलक्ष्येन्द्र — प्रभो उन्मीलित मे लोचनद्वयम्। अहं अधुना जैत्र यात्रार्थं गच्छामि। पुन कदा प्रत्यागच्छेय नाहं जाने। आशिष दीयन्ताम्। (इति प्रत्यालीढ पाद भवति)

आरस्तु — वत्स निरामय जैत्रयात्रा सफलो कुरुष्व। (इति हस्त-मुद्यम्य आशीर्वादान् ददाति)

अलक्ष्येन्द्र — (गच्छति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(नेपथ्य)

काश्मीर गीतम् (पहाडी रागे)

पुलकितगात्र भारतपुत्र शृणु रे। निर्मल पावन चरित काश्मीरम्।
स्मर रे नित्य शीर्षक भूतम्। भव्य भारत नन्दनवन काश्मीरम्॥ ध्रु

कुङ्कुम चन्दन कुन्दन चम्पक। कुडमल मञ्जुल मन्दार काश्मीरम।
भारतयोषा शीर्षक सिन्दूरम्। विद्या केन्द्र नन्दनवन काश्मीरम॥ १

श्यामल शाद्वल कोमल पल्लव। भासारञ्जित वासवचाप काश्मीरम्।
सुस्वर पाठन बहुविध सकुल। निगत पावन वेदालाप काश्मीरम्॥ २

कोकिल कूजन केकी केका नर्तन। चञ्चल वम्भर झंकार काश्मीरम्।
निर्झर शीतल शीकर सिञ्चित। मल्ली सूनस्मेर काश्मीरम्॥ ३

अम्बर चुम्बि हिमाचल शृङ्गक ।
सन्ध्या नर्तन पशुपति ताण्डव घोषण पूतं काश्मीरम् ।
निर्जरमण्डल भूतल कल्पित
ऋतुगण चित्रित सुखमय देश काश्मीरम् ॥ ४

(अम्भिराजस्य स्वसा तारा विचारयन्ती मञ्चे उपविष्टा अस्ति । तत प्रविशति अम्भि राजा सहर्षम्)

अम्भी — स्वस कि श्रुत त्वया ?

तारा — कि श्रवणीय विद्यते ?

अम्भी — विद्यते महत् श्रवणीयम् ।

तारा — कथय ।

अम्भी — ग्रीस्देशात् अलक्ष्येन्द्रोनाम महाप्रतापवान् योद्धा समागत ।

तारा — (आश्चर्येण) ग्रीस्देशात् योद्धा समागत ।

अम्भी — हा ग्रीस् देशात् । स अतीव बल पराक्रमोपेत ।

तारा — स किमर्थमागत भारतवर्षम् ।

अम्भी — योद्धु समागत ।

तारा — केन सार्धम् ।

अम्भी — पुरुपोत्तमचक्रवर्तीना सार्धम् ।

तारा — (विचकिता) किमर्थम्)

अम्भी — भारत जेतुम् ।

तारा — भारत जेतुम् ?

अम्भी — हा सर्वभारत जेतु समागत ।

तारा — स कथ भारत जेष्यति ।

अम्भी — युद्धन ।

तारा — तस्य भारत अजय्य भवति ।

अम्भी — कथ तस्य अजय्य भवति। स योद्धा। ग्रीसदेशादारभ्य भारतपर्यन्त विद्यमान सर्व देशान् विजित्य अधुना पेषावर्पर्यन्त समागत ।

तारा — अहो (साशङ्कम्) सोऽय वृत्तान्त तव कर्णपथ कथ समागत ।

अम्भी — अह स्वय तेन सार्धं सल्लापमकरवम् ।

तारा — तेन सार्धं त्व किमर्थं भाषणमकरो ।

अम्भी — स्वस त्व न जानासि वर्तमान परिस्थितिमुद्दिश्य।

तारा — वर्तमान परिस्थितिमुद्दिश्य त्व किं जानासि कथय।

अम्भी — भगिनि, अलक्ष्येन्द्र महायोद्धा, अय अवश्य विनायास पुरुषोत्तम चक्रवर्तिन जेष्यति।

तारा — ततस्तत ।

अम्भी — सव भारत स स्वीय करिष्यति।

तारा — अहो ततस्तत ।

अम्भी — अस्य विशाल भारत देशस्य प्रशासनाय स अलक्ष्येन्द्र मा नियुज्य स्वदेश तिरोगमन करिष्यति ।

तारा — ततस्तत ।

अम्भी — तदाह भारत चक्रवर्ती भवेयम् । त्व मे स्वसा, तदा येनकेनापि महाराजेन विवाहिता सर्वभोगाननुभोक्ष्यसि इति मदीया भावना अस्ति।

तारा — त्व शतृणासाक हस्तमेलन विधाय देशद्रोह कर्तुमीहसे। तत् अयोग्य अयुक्त च भारतीयाना। त्व यदि शत्रुव्यूहे पतिष्यसि तर्हि पुन ते जीवन असभव भविष्यति। तस्मात् स्वार्थाय त्व तथा मा व्यवहर। राजा पुरुषोत्तम सत्य पुरुषोत्तम । स एव भारत देशरक्षक भवति, न अस्मादृशा क्षुद्रजन्तव भवितुमर्हन्ति। तस्मात् त्व तादृश वातहर्म्यं निर्माण विसृज। यत् ते कर्तव्य विद्यते तदेव त्व कुरु।

अम्भी — स्वस नाह काङ्क्ष त्वदीय नीतय । त्व न जानासि राजनीतिम्।

तारा — अरे सहोदर, त्व अत्याशा पूरितोऽसि। त्व न किमपि कर्तुं समर्थो भवसि। तस्मात त्व देशद्रोह कतु व्यवसितोऽसि। भ्रात देशद्रोहापेक्षया आत्महत्या परमोत्तमा। तस्मात त्व उत्तमा स्थिति भजस्व।

अम्भी — कासि त्व मम निश्चयात मा चालयितु ?

तारा — अह ते स्वसा देशभक्ता, पुरुषोत्तमस्य पादरजोऽवग्राहिनी।

अम्भी — त्व मे स्वसा भूत्वा मम विद्रोह चिकीर्षसि।

तारा — अरे महान्त योद्धार गता, महाराजान निर्गता, महा चक्रवर्तिन पञ्चत्व गता किन्तु भारत अखण्डित भाति पूववत्, देवतेय भूमि। इय निजरा। एतस्य भारतस्य कदापि नाशन न भवति। परदेशात समागता शत्रव न किमपि करिष्यन्ति भारतम्। किन्तु स्वार्थपरायणा त्वादृशा अन्तश्शत्रव मिलित्वा भारत स्मशान कर्त प्रयतन्ते। तस्मात अह त्वा नीतिमुपदिशामि।

अम्भी — न मे रोचते तव बोधना।

तारा — सोदर त्व ऋग्णोऽस्मि। ऋग्ण बाधितस्ना ओषध हितकर रुचिकर न भवति। किन्तु वैद्यस्य आदेशन स्वास्त्यै अवश्य ग्राह्य भवति।

अम्भी — शृणु तारे। अह योदधा राजपुत्र। नीतिज्ञ धर्मवेत्ता। जानाम्यह सामदान भद दण्डोपायान। तस्मात कारणात अलक्षयन्द्रण साक मिलित्वा सर्वं भारतीय चरित तस्म निवेद्य तस्म उपकार विधाय भारते महाराजा भवितुमिच्छामि। अधुना विद्यमान पद्मव्यूहे त्व अत्र स्थातु नार्हसि। अपेहि त्व अस्मात गहात् इद ते योग्य न भवति। (इति ता भत्सयति)

तारा — एतावत्पयन्त त्व मे सहादर असि। अधुना त्व दुरोदरोऽसि त्व मा तव गृहात निष्कामितु समर्थोऽसि, न किन्तु भारत राष्ट्रात। अह मपद गत्वा पुरुषोत्तमचरण सान्निध्य निवसिष्यामि। शृणु यदि त्व जष्यसि अस्मिन् व्यूहे, उत अह जष्यामि पश्ययम।(इति चाल स्वीय वस्मादिक ग्रन्थि विधाय स्वीय कक्षाया निक्षिप्य रोषण निगच्छति)

अम्भिः — अधुना मम अन्तरायः निर्गतः। अवश्यं अलक्ष्येन्द्रेण साकं अहं निवसेयं। अहं भाविभारतचक्रवर्ती। (इति श्मश्रूसमार्ज्यं अट्टहास विधाय निर्गच्छति)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(पुरुषोत्तमसभा, पुरुषोत्तमः सिंहासने उपविष्टः अस्ति, अमात्यः पार्श्वभागे उपविष्ठः भवति)

पुरुषोत्तमः — अयि अमात्य, किं हिमाचल प्रदेशीयाः काश्मीरीयाः पेषावरदेशीयाः राज्यपालने सुख निवसन्ति ?

अमात्य —हा महाराज। सर्वे ससुख निवसन्तीति वार्ताः समायान्ति। पेषावरप्रान्तीयः राजा अम्भि प्रजाभ्य सहकार न ददातीति वार्ताहराः कथयन्ति।

पुरुषोत्तमः — अपि च शृत मया भवता वदनारविन्दात् यत् ग्रीस् देशात् अलक्ष्येन्द्रः इति कश्चन योद्धा वसुधातलं जेतु समागतः इति तेन साकं हस्तमेलन अम्भिना कृतमिति।

अमात्य. — देव तस्मात् अयं राजा अम्भिः अस्माभिः निगृहीतव्यः इति। मया एतदपि शृत यत् तत्र अस्मदीय पालना भवितव्या इति च प्रजाना आग्रहः।

पुरुषोत्तम. — तेन साकं विरोधः अधुना युद्धाय कारण भविष्यति। तस्मै पेषावरप्रान्तः अतीव रोचते इति कृत्वा अपिच अय विश्वसनीयः इति च मत्वा तं तत्रैव प्राहिणम्।

अमात्य — महाराज सः एषु दिवसेषु अविश्वासपात्र' भवति तस्मात् त पदच्युत कर्तव्यमिति मे विज्ञप्ति ।

पुरुषोत्तम — अमात्यशेखर, जानामि ते अभिप्रायम। किन्तु सर्वस्यापि समयसीमा विद्यते। समय विलोक्य सर्वमपि साधु समाचरणीय इति भवन्त जानन्त्येव।

अमात्य — अस्मिन् विषये विचारणीय अश न कोऽपि विद्यते। यत भवदभ्य रोचते तत् अनुपदमेव कुर्वन्तु भवन्त ।

(तत प्रविशति वार्ताहर)

वार्ताहर — (नामित पूर्वकाय नमस्कृत्य) महाराज पेषावर प्रदेशीयराजा अम्भि' ग्रीस देशादागतस्य अलक्ष्येन्द्रस्य सहायार्थं अकरणीय, अवचनीय कथयतीति तेन सार्धं भारत जेतु प्रयतते इति किंवदन्ती प्रचलति।

पुरुषोत्तम — त्व गच्छ।

वार्ताहर — नमासि (इति नामितपूवकाय अर्धवृत निर्गच्छति)

पुरुषोत्तम — अमात्यवर्य शत्रु महान्तोऽपि न भापयन्ति। अय एकदा मे आप्तमित्र अभूत। अधुना शत्रु सजात' देशद्रोहार्थ। अय मित्रद्रोही जात। मित्रद्रोह प्रथम सोपान देशविनाशाय।

अमात्य — महाराज, तत् सत्य यदुदीरितम। पदधराणा मित्र द्रोहे देशद्रोह इति तरतम भावना न विद्यते। ते स्वार्थाय अनाचरणीयमपि स्ववशनाशन कर्तुमपि पूर्वापरसन्दर्भं न विचारयन्ति। ते पदधारणाय स्वीय पुत्रमपि घ्नन्ति।

पुरुषोत्तम — मित्रद्रोहापेक्षया देशद्रोहापेक्षया च तादृशाना अनुपद मरणमेव योग्य भवति। शत्रु जगज्जिगीपया समागत । तमुद्दिश्य न किमपि निवेदयमास मह्य,सराजा अम्भि । तेन साक मन्त्रयित्वा भारत जिगीषति।

अमात्य — अधुना यदि अलक्ष्यन्द्र अम्भिसहायेन भारत जेतु अन्त प्रविशत तदा किं कर्तव्यम ।

पुरुषोत्तमः — अमात्यवर्य भवानपि एवं वदति। भवतां भाषणं श्रुत्वा मम आश्चर्यं भवति।

अमात्यः — प्रभो, सः न किमपि करिष्यति, जानाम्यहम्। किन्तु जयापजयौ निर्णेतु कष्टं भवति। सर्वं दैवाधीन इति वदामि।

पुरुषोत्तमः — अमात्य "दैवं विहाय कुरु पौरुषमात्म शक्त्या" शृणु महामात्य, अधुना अहं कथयामि। एकः अलक्ष्येन्द्रः नहि, अलक्ष्येन्द्राणां सहस्रमपि भारतं न किमपि करिष्यति, यावत्पर्यन्तं पुरुषोत्तमः जीवन् आस्ते तावत्पर्यन्तं। ततः चिन्ता न कार्या। यदि सः मां जित्वा अन्तः प्रविशेत् अन्ये चक्रवर्तिनः तं जीवन्तं समाधिं करिष्यन्ति। भारतराष्ट्रं सुलभगृहीतं न भवति परेषाम्।

अमात्यः — महाराज प्रागेव युद्धाय सर्वसन्नाहान् कृत्वा यं स यत्र स्थापनीय, तं तं तत्र संस्थाप्य, सर्वमपि सुव्यवस्थायां विराजमानं विलोक्य भवद्भ्यः निवेदयितुं समागतोऽस्मि।

पुरुषोत्तमः — सर्वं सैन्यं जागृदवस्थायां वर्तनीयमिति नदीप्रदेशाः, पर्वतप्रदेशाश्च सहस्राक्षित्वेन द्रष्टव्याः इति समादिशतु सर्वान् भवान्। गजरथतुरगपदातीनां चमूः जागृदवस्थायां स्थातव्या इतिआदिशतु भवान्।

(ततः प्रविशति वार्ताहरः)

वार्ताहरः — महाराज अलक्ष्येन्द्रस्य सेनानी भवतः द्रष्टुं द्वारि तिष्ठति। तेनेदं सन्देशपत्रं दत्तम्। (इति पत्रं अमात्याय ददाति)

अमात्यः — पत्रं गृह्णाति)

पुरुषोत्तमः — अमात्यवर्य पत्रं वाचयतु।

अमात्यः — (पत्रं प्रसार्य पठति)

परमपवित्र भारतवर्षे विराजमानाः गौरवनीय अपिच माननीय सिन्धुप्रान्तपालकाः पुरुषोत्तमराजानः भवता समस्त सन्मङ्गलानि भवन्तु इत्यहं ग्रीस देशादागतः अलक्ष्येन्द्रनामकः वार्तयामि। अहं भारतवर्षं द्रष्टुं समागतोऽस्मि : दुर्दैववशात् अहं भवतः द्रष्टुं अशक्तः अभवम्। अयं सेनानी

मम स्थानापन्न भवति। अय सेनानी मन्मुखेन भवत दिदृक्षति। भवन्त तस्मै यथा सदर्भं मार्गदर्शन करिष्यन्तीति आशासे।

एव
यौदधा अलक्षयेन्द्र ।

पुरुषोत्तम — ओ विदित सर्वं। अरे वार्ताहर, द्वारि विद्यमान सेनापति अन्त प्रवेशय।

वार्ताहर — यथाज्ञापयति देव। (इति अर्धवृत निर्गच्छति)

(तत प्रविशति सेपापतिरूपेण अलक्षयन्द्र, तत नमस्करोति राजान ग्रीस् देशीयपद्धत्या)

पुरुषोत्तम — अयि अलक्षयन्द्र सेनापते भवतामह स्वागत व्याहरामि।

सेनानी — महाराज धन्यवादान वितरामि। (इति दक्षस्थित्या कथयति)

पुरुषोत्तम — सेनापते भवत राजा, भारतवष किमर्थमागत।

सेनानी — राजन् अस्मदीय राजा अलक्षयेन्द्र भारत द्रष्टु समागत।

पुरुषोत्तम — भारत द्रष्टु समागत उत जेतु समागत।

सेनानी — (चकितो भूत्वा) द्रष्टुमेव समागत।

पुरुषोत्तम — अय मे महान् सतोष यत बहादूरात् भारतदेश श्राव श्राव द्रष्टु समागत इति। सर्वस्यापि सर्व द्रष्ट अधिकार विद्यते जगति।

सेनानी — भवता भारत दर्शनेन मे राज्ञ महान आनन्द सजात।

पुरुषोत्तम — अय भारतवर्षं सर्वेषा वस्तु सग्रहालय जात। अय देश सर्वेषा धर्मशाला भवति।

सेनानी — भारतीया धर्मपरायणा सौहार्दकाङ्क्षिणश्च इति सर्वेषा ज्ञातोऽय वृत्तान्त।

पुरुषोत्तम — तथति मत्वा सर्वे परदेशीया भारतीयान स्वार्थाय समुपयुञ्जन्ति।

सेनानी — भारतीयाः वचनपरिपालनार्थं प्राणानपि त्यक्ष्यन्ति। तेषा एतादृशी परम्परा विद्यते।

पुरुषोत्तमः — भारतीयाः अतिथिसत्कारे निरताः इति मत्वा परदेशीयाः अस्य देशस्य सुवर्णरजतरत्नादीन् स्वदेशं नेतुं प्रयतन्ते। भारतीय धर्मं नाशनं विधाय भारतीयान् निर्बलान् विदधातुं प्रयतन्ते परदेशीयाः।

सेनानी — भारत चक्रवर्तिनां भाषणं अलक्ष्येन्द्राणां अवमानस्पदं भवति।

पुरुषोत्तमः — वयं जानीमः अत्र समक्षं सेनापतिं नहि किन्तु स्वयं सेनापतिरूपे विद्यमानान् अलक्ष्येन्द्रान् पश्यामः इति।

सेनानी — (साश्चर्यं) महाराज कथं भवन्तः जानन्ति।

पुरुषोत्तमः — (विहस्य) भारतीयाः सुनिशित प्रज्ञावन्तः। ते चारेक्षणाः सन्ति। अस्माक क्रौर्यं नास्ति। किन्तु पराक्रमः विद्यते। भारतीयाः परेषा जृम्भणेन तेषा उदरस्थं सर्वं जानन्ति।

सेनानी — भवता कुशाग्र बुद्धिः अस्मान् आश्चर्य पारवश्यान् चक्रे। (इति कृत्रिम श्मश्रू अपनयति)

पुरुषोत्तमः — भवन्तः अस्मान् न वञ्चयिष्यन्ति। अत्र युष्माकं न कापि भीतिः विद्यते, युष्मान् प्रापयितुं अस्मदीया सेना सहायं करिष्यति।

सेनानी — भारतीयाः शत्रुमपि मित्रवत् पश्यन्ति।

पुरुषोत्तमः — सः तेषां जन्मतः सङ्क्रामित भावः। गच्छतु भवान्।

सेनानी — महाराज आवयोः समागमः कदा कुत्र पुनः भविष्यति।

पुरुषोत्तमः — आवयोः समागमः पुनः रणाङ्गणे भविष्यति।

सेनानी — (ग्रीस् देशीय पद्धत्या प्रत्यालीढपादः नमस्कृत्य निर्गच्छति)

पुरुषोत्तमः — (घण्टां नादयति, ततः प्रविशतः भटौ, तौ कथयति राजा) सेनापतिरूपे समागतं अलक्ष्येन्द्र अतिथिं ओदकान्तं संप्रेष्य समागच्छताम्।

भटौ — (नामितपूर्वकायौ अर्थवृतौ अलक्ष्येन्द्रेण साकं गच्छत)

पुरुषोत्तमः — (निश्वस्य विचारयन् इतस्ततः चरति हस्तौ पार्श्वं भागे बध्वा)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(उद्यानवाटिकाया रजनी अलक्ष्येन्द्रश्च)

अलक्ष्येन्द्र — रजनि त्वामेवाह दिवारात्र चिन्तयामि। भवती भुजलताभ्या मा आलिङ्गन करोतु।

रजनी — तमाल वृक्षोऽपमित त्वा अह मम भुजलताभ्या यथा सुख आलिङ्गन करिष्यामि। (इति तस्य सकाश गच्छति)

अलक्ष्येन्द्र — रजनि, स्तब्ध। किं त्व मम सहाय करिष्यसि ?

रजनी — कीदृशोऽय सहाय विद्यते।

अलक्ष्येन्द्र — भवती पुरुषोत्तमस्य राजनीतिचतुरता तस्य सक्षमाधिकारता मे कथयतु, यस्मादह सुखेन युद्धे जित भविष्यामि।

रजनी — नाह जाने तस्य सक्षमपालनत्व, किंतु अह त एव विचारयिष्यामि।

अलक्ष्येन्द्र — (सकौतुकम्) कासा ते विचारधारा।

रजनी — अस्या श्रावण पौर्णिमास्या रक्षाबन्धन महोत्सव भविष्यति।

अलक्ष्येन्द्र — कोवा तस्य अर्थ ।

रजनी — शृणु, यदा तस्या पौर्णिमास्या स्वसा सोदरस्य हस्ते रक्षाबन्धन करोति तदा सोदरस्य कर्तव्य भगिनी सरक्षण, तस्या अभिलाषा पूरण च इति भारतीय साम्प्रदाय ।

अलक्ष्येन्द्र — तस्मात् त्वया किं क्रियते।

रजनी — अह तस्मिन् दिवसे महाराजपुरुषोत्तमस्य समीप गत्वा तस्य हस्त रक्षाबन्धन विधाय अह त विचारयय, अयि भो अह अधुना ते स्वसा मम रक्षणा त्वया कर्तव्या इति।

अलक्ष्येन्द्र — ततस्तत ।

रजनी — तदा महाराज का ते कामना कथयस्व। अह अनुपद पूरयय इति मा विचारयिष्यति।

अलक्ष्येन्द्र — ततस्तत ।

रजनी — तदाहृ अलक्ष्यन्द्र कामयामीति, त भवान् युद्ध मार्जाहि इति राजान प्रक्ष्यामि। तदा स भारतीय परम्परानुयायी अवश्यमङ्गी करिष्यति मदीया कामना। तदा त्व त विजष्यसि।

अलक्ष्येन्द्र — साधु भावित त्वया एहि एक चुम्बन देहि। (इति शनै शन द्वावपि सन्निहितौ भवत)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(तारा-पुरुषोत्तमौ सलपन्तौ आस्ता, तारा वस्त्र ग्रन्थिनासह भूमौ उपविष्टा अस्ति। पुरुषोत्तम इतस्तत चलन् आलोचना पर आस्ते)

पुरुषोत्तम — पुत्रि तारे त्वया साधु समुदीरितम्। अवश्यं ते भ्राता युद्धे मरण प्राप्स्यति। त्वमेव जयशालिनी भविष्यसि। अस्मि सदृशाना अस्ति त्वात् भारत सर्वदा मह्कटे पतित भवति। देशद्रोहिणः अस्मदीय देशवासिन. एव। परा' यदा योध्दु समायान्ति तदा ते अस्मद्देशीयाना ऐक्यताभाव प्रजनयन्ति। तस्मात् तदा तदा पराणा चमूधाटी भारत हिताय हेतुः भवति।

तारा — महाराज अहमपि भवता सेनाया प्रविश्य सैनिकाना हितोपदेश कुर्यां, क्षत गात्राणा उपचारादिक करिष्ये। तादृशि कर्मणि मा आदिशन्तु भवन्त ।

पुरुषोत्तम — पुत्रि, अह सुप्रीतः सुप्रसन्नोऽस्मि, त्वदीय भावनाया। त्व कुत्रापि मा गच्छ। पुरुषोत्तमे जीवतिसति नारीणा युद्ध प्रवेश न भवति। ये पुरुषा वेषभूषादिभिः रथ्यासु हिण्डमाना सन्ति तान सर्वान् अह युद्धे आनेतु इच्छामि। किन्तु भावदृशीना भगिनीना युद्ध भूमि प्रवेश' मा भवतु। पुरुषाणा अभावे स्त्रीणा युद्धभूमि प्रवेश' अनिवार्य भवति, नत्वन्यथा। त्व अत्रैव ससुख अन्त पुरे निवस। अपिच करणीयानि अनेकानि सन्ति तानि कुरुष्व। गच्छ पुत्रि अन्त गच्छ। (तारा अन्तः गच्छति)

दौवारिक. — (प्रविश्य नमस्कृत्य) अयि महाराज कापि सुन्दरी रजनी नाम्नी भवन्त द्रष्टु द्वारि तिष्ठति।

पुरुषोत्तम — ता अनुपद प्रवेशय, गच्छ।

दौवारिक — यथाज्ञापयति देव । (इति नमस्कृत्य गच्छति)

(तत प्रविशति रजनी)

रजनी — (महाराज प्रणमामि। (इति यूनानि पद्धत्या प्रणमति)

पुरुषोत्तम — सुस्वागत भगिनी।

रजनी — (चकिता) धन्यास्मि महाराज।

पुरुषोत्तम' — काऽसि वासु।

रजनी — अह पारसीका अस्मि।

पुरुषोत्तम — त्वं नाम किम् ?

रजनी — मम नाम रजनी।

पुरुषोत्तमः — किमर्थमागतासि ?

रजनी — महाराजैस्साकं किञ्चित् भाषितुं समागतास्मि।

पुरुषोत्तमः — भाषस्व भगिनि।

रजनी — महाराज अद्य पौर्णिमायां रक्षाबन्धन सुमुहूर्तः भवति।

पुरुषोत्तमः — हां भवति।

रजनी — अस्मिन् दिव्य महोत्सवे अहं एकाकिनी निवसामि।

पुरुषोत्तमः — कथं त्वं एकाकिनी ?

रजनी — पितरौ स्त । किन्तु भ्रातरः न सन्ति।

पुरुषोत्तमः — भारतवर्षे सर्वेपि ते भ्रातरः एव।

रजनी — सर्वे भ्रातरः कामना पूरयितुं न शक्ताः।

पुरुषोत्तम — का ते कामना।

रजनी — अहं वः रक्षाबन्धन विदधातुं समुत्सुकास्मि।

पुरुषोत्तम — अवश्यं अहं मम भारत राष्ट्रे भ्रातृहीनायाः एकस्याः युवत्याः भ्राता भविष्यामि।

रजनी — भवन्तः राजानः मे भ्राता भवितुं उद्युक्ताः, का भवता विशाल भावना।

पुरुषोत्तमः — अहं प्रजारक्षकः। किं नाहं शक्तः भविष्यामि एकां युवती रक्षयितुं।

रजनी — भवन्तः नूनं पुरुषोत्तमाः। युष्मदीयं नाम सत्यं सार्थकं भवति।

पुरुषोत्तमः — एहि भगिनि रक्षां बधान। (इति दक्षिणं हस्तं प्रसारयति)

रजनी — (राज्ञः समीपमागत्य रक्षां बध्नाति)

पुरुषोत्तम· — भगिनि गृहाण इद सुवर्ण कङ्कणम्। (इति हस्तात् सुवर्ण कङ्कण अपनीय दित्सति)

रजनी — महाराज न मह्य रोचते धनकनकवाहन वस्तुचयम्।

पुरुषोत्तम — भगिनि किं ते रोचते।

रजनी — भवन्त सग्रामे भीमसदृशाः वः न कोऽपि जेष्यति। भवता समक्ष सर्वेऽपि मूषक प्रायाः भवन्ति।

पुरुषोत्तम· — कथनीय किं विद्यते अनुपद कथय।

रजनी — महाराज अह प्रष्टु भीताऽस्मि।

पुरुषोत्तम — महाराजाना तव भ्रातृणा समक्ष भीति कुतः। अनुपदमेव निस्सशय पृच्छ।

रजनी — महाराज, अलक्ष्येन्द्र मे भवितव्यः पति.। त सग्रामे भवान् रक्षतु। इमा भगिनी सौभाग्यवती करोतु इति मे अभ्यर्थना।

पुरुषोत्तम — भगिनि, एतादृशी ते कामना इति नाह जाने। अहं मम देश सुखाय स्नेह, दया, सौख्य च लोकस्य आराधनाय संत्यक्ष्यामि। अधुना त्वदीया कामना देशस्य अहिता भविष्यति। सर्वं देशः अन्याक्रान्त भविष्यति। अह कथ देश रक्षयिष्यामि।

रजनी — भवन्त राजान किमपि कर्तु सक्षयाः, अह इयन्त याचे मे सौभाग्यं रक्षन्तु इति।

पुरुषोत्तम — भगिनि मे मन द्विधा विभक्तम्। इत देशरक्षण, अन्यत भगिनी सरक्षणम्। देशरक्षण बलवत्तर भाति भगिनी रक्षणापेक्षया।

रजनी — अद्य रक्षाबन्धन सुमहूर्त। यदि एतस्य रक्षाबन्धन समयस्य मल्य नास्ति, तर्हि त्वा देशीया परम्परा नाशक मन्वते। देशे रक्षाबन्धन महोत्सव स्थगित भविष्यति।

पुरुषोत्तम — भगिनि, त्व मा विचारय अस्मिन् समये अह देश अपि च भगिनी त्वा रक्षिष्यामि। मा शुच गच्छ त्वम्।

रजनी — महाराज भवन्त. पुरुषोत्तमा:, भवता कीर्ति. आचन्द्र तारार्क भविष्यति सर्व प्रपञ्चे। अहं धन्यास्मि। (इति नमस्कृत्य गच्छति)

पुरुषोत्तम· — अहो विपदि विपद् सुखे सुख अनुसरत इति लोकोक्तिः सत्यमेव अत्र मया दृष्टम्। धर्मो रक्षति रक्षित·। (इति अन्तः गच्छति)

(यवनिका पतति)

* * *

सप्तमं दृश्यम्

(नेपथ्ये चमूचालन भवति। सैनिकाः संग्राम गेय गायन्ति)

गीतम् (भूपाली रागे)

जयत जयत जननीरक्षणदीक्षित भारतयोधाः
शात्रवभूमिजभञ्जन प्रलयप्रभञ्जन भारतवीरा· ॥ध्रु॥

परनगहृदयविदारण भीषणकुलिशाकृति योधा·
कुरुत कुरुत देश स्वर्गसमान भारतजननी पुत्रा· १

अरिजनदहन विरुपाक्षेक्षणकुहर धनञ्जयरुपा
समराङ्गण पावकतापन द्विगुणीकृतवर्णं सुवर्णाकारा· २

पुष्करावर्तक घनगर्जननिस्वन प्रतिरव विभीषिका:
प्रलयसन्ध्या निटलेक्षण ताण्डवपदघट्टन शब्दसमीरा· ३

आशुगवैरि सदाशन वासुकिपन्नग भीषणफूत्कारकारा:
परजनपन्नगखण्डन काञ्चनपक्षोल्लसितोद्धत गारुत्मतरुपा ४

महिषासुरमर्दिनि भयदकपर्दिनि करतल खरकरवालाकारा:
रणभुवि शत्रुध्वसनयाम्य भयङ्कर निर्दयकिङ्कर तुल्या ५

हरहर भभ घोषण जननीरञ्जन शात्रवभञ्जन निरता
स्मरहर पुरहर शङ्करकरतल राजित भव्यपिनाकाकारा ६

परिपन्थिसुमस्तक कन्दुक रुधिरार्णवखेलन चन्चलविक्रान्ता
आसेतुहिमाचल धरणीतल भावोद्वेगोद्वेल्लित कल्लोलाकारा ७

(गीतान्ते नैपथ्ये कल्लोल समरदुन्दिभिनादा भवन्ति, जहि, मारय, ताडय, पातय, शूलय इति शब्दा श्रूयन्ते बहुविध क्रन्दनं आक्रोशा श्रूयन्ते)

(पुरुषोत्तम सिंहासने उपविशति। मन्त्रिवर्य अन्ये राजान तत्रोप-विशन्ति । सायुध रक्षका शृङ्खलाबद्ध अलक्ष्यन्द्र आनीय पुरुषोत्तमस्य समक्ष स्थापयन्ति)

पुरुषोत्तम — अयि भटा जगज्जेतार अलक्ष्येन्द्र निश्शृङ्खल कुर्वन्तु। (भटा तथा कुर्वन्ति) यूय सर्वे गच्छथ। (सर्वे गच्छन्ति) बन्धो अलक्ष्येन्द्र उपविशतु भवान्। (इति आसन दर्शयति, अलक्ष्येन्द्र उपविशति)

अयि अलक्ष्येन्द्र भारत जेतु दुष्करमिति अधुना भवता अवगत स्यात् इति मे प्रश्न ।

अलक्ष्येन्द्र — महाराज पुरुषोत्तम, मे शक्ति अनन्ता, अह ग्रीस देशादारभ्य भारतपर्यन्त सर्वत्र जयलक्ष्मी समालिङ्गित अभवम्। किन्तु भारते तद् व्यतिरिक्त जातम्।

पुरुषोत्तम — अलक्ष्येन्द्र, भारतीया योद्धार, वीरा, शूरा, दया-न्तरङ्गाश्च। प्रथम कबळे मक्षिकापात आसीत्। भवान् मया निगृहीतोऽसि न मारितोऽसि जानासि किं अत्र हेतु क ।

अलक्ष्येन्द्र — भवान् मा मारयितु अशक्तो जात ।

पुरुषोत्तम — भवान् निगृहीतोऽपि निरस्त गर्वीन जात । अलक्ष्येन्द्र, त्व न जानासि तव रक्षणाय कारण किमिति।

अलक्ष्येन्द्र — भवान् कारण आरोपयति।

पुरुषोत्तम — भवता अहंभावेन भण्यत, किन्तु न वीरोचित रूपेण।

अलक्ष्येन्द्र — कारण किमिति भवता आरोप ।

पुरुषोत्तम — भवत प्रमिका रजनी मम सकाश आगत्य मम हस्ते रक्षावन्धन विधाय, भवन्त न हन्तु वरमभिलपितवती आसीत। अह दत्त-वचन अभवम्। पश्यद रक्षाबन्धनम्। (इति हस्तमुद्यम्य रक्षावन्धन दर्शयति)

अलक्ष्येन्द्र — एतस्मात् कारणात भवान मा न हतवानस्मि।

पुरुषोत्तम — हा सत्यमेव। भवान चिन्तयतु किमर्थं ग्रीस् देशात् अनागतवान् इति। वय न कदापि भारतदेश विहाय अन्यदेशाक्रमण उद्यता दत्तचित्ता अभवाम। किमर्थं एतादृशी भावना भारतीयतराणाम ? इद भारत जतु मुकर न भवति। मया त्व निर्जितोऽसि किंतु न मारितोऽसि। यदि त्व पुन मया सह योत्स्यसि, तव मरणमेव शरण्य भवति। यदि अह भवता निर्जित भवेयम् तदा भारताक्रमण ते असम्भव भविष्यति। सवत्र देश विक्रमसिहा राजान बहव सन्ति। ते सर्वेऽपि परवीर भयङ्करा। यदि त्व तैस्साक योद्धु प्रयतिष्यसे तर्हि तव अस्तित्वस्य सशय भविता। तस्मात भवान् अनुपदमव भारत सत्यज्य तव जन्मभूमि प्रति निवतस्व प्रियया रजन्यासा कम। मा भवतु अत्याशावान। अत्याशा विनाशाय कारण भवति।

अलक्ष्येन्द्र — महाराज पुरुषात्तम भवता स्नहेन महापुरुष लक्षण अद्य मया अवगतम। भारतदेश भूतलस्वग । भवान् देवेन्द्र । म गर्वभङ्ग सजात । मे कामना कुण्ठिता आसीत्। नाह निवसेयमत्र। मे अनुचर निहता अत्र महति सपराय। कि अनया जैत्रयात्रया प्रयोजनम। मम जीवन अद्यैव प्रथमत एक महापुरुष अपश्यम। भारतमिद महापुरुषाणा आयतनम। सत्यमेव एतादृश महापुरुषं सवत्र भारते भवितव्यम। मम भारते एक सुहृत विद्यते। एहि राजन् एहि मे सौहार्दं पूर्णमालिङ्गन ददातु भवान।

(इति हस्तौ प्रसारयति)

पुरुषोत्तम — (हस्तौ प्रसार्य आगत्य तमालिङ्गति) अलक्ष्यन्द्र भवान अधुना मे आप्तमित्र जात ।

अलक्ष्येन्द्र — महाराज शत्रु अपि भारतवर्षे स्वागत प्राप्नोति, परमानन्द च अनुभवति। अह मे मातृभूमि गत्वा भारत देशोत्कर्षा सर्वेभ्य जनभ्य कथारूपेण प्रवक्ष्यामि नमोव ।

पुरुषोत्तम — मे सुहृद अलक्ष्यन्द्र, तव समस्त सन्मङ्गलानि भवन्तु। सुखन ते वन्धुजन समागच्छतु भवान । (इति हस्तमुद्यम्य आशिष ददाति)

अलक्ष्येन्द्र — (तथैव हस्तमुद्यम्य प्रयाति)

(नपथ्य)

सर्वेऽत्र सुखित्र भन्तु सर्वे सन्तु निरामया ।
सर्वे भद्राणि पश्यन्तु। माकश्चित दु खिनो भवेत् ॥ ”

(यवनिका पतति)

* * *



।। वराह-मिहिरम् ।।

ज्ञानप्रभाभिः सततं ज्वलन्त । प्रजाक्रियालोकन विश्वनेत्रम् ।
प्रणोदिनं सुप्तजगत्समस्त । ज्योतिष्पति त मिहिर नमामि ।।

(नान्यन्ते)

चपा — (गेयमिद अव्यक्त शब्दे गुञ्जन कुर्वन्ती, आदर्श आत्मान विलोक्य अलङ्कुर्वन्ती आस्ते)

गीतम् (भैरवी रागे)

रमते केया वर्षा तरुणी
वर्षा सिञ्चित गात्री श्यामा
मल्याशानिल ज्वालित कामा
तटिदिव पीता चञ्चल रामा ।। ध्रु. ।।

(तत प्रविशति मल्लिका)

(मल्लिका विलोक्य) सखि नमस्त एहि उपविश । (इति आसन दर्शयति)

मल्लिका — (आसन उपविशति)

चपा — सखि मल्लिके अवसित मण्डनाऽस्मि । अनुपदमेवागच्छामि । किञ्चित्कालमुपविश । आवा मिलित्वा गच्छाव ।

मल्लिका — सखि चम्पे, अतिक्रान्तवेला भवति । एतावत्पर्यन्त त्व किं करोषि ?

चपा — सखि सर्वं समाप्तम् । हा कतिघण्टावादन समये नाटकप्रदर्शन भवति ।

मल्लिका — सप्त घण्टावादन समये भविष्यति ।

चंपा — किं प्रवेशशुल्कपत्राणि लब्धानि ?

मल्लिका — हा अग्रिमत्वेन लब्धानि।

चंपा — हसे मल्लिके, अहं विस्मृतवती, किं नाम नाटकस्य ?

मल्लिका — प्रयोक्ष्यमाणस्य नाटकस्य नाम वराहमिहिरम्।

चंपा — केन लिखितमिदम् ?

मल्लिका — प्रख्यात महाकविना पण्डित परीक्षित् शर्मणा विलिखितम्।

चंपा — गीर्वाणान्ध्र भाषा प्रवीणेन परीक्षित् शर्मणा विलिखितम्।

मल्लिका — हा, किं त्वं जानासि तं महाकविम्।

चंपा — नाहं जानामि। किन्तु तमुद्दिश्य श्रुतं मया।

मल्लिका — किं श्रुतं त्वया कथय।

चंपा — अयं महाकविः। अयं संस्कृतभाषाया ललित गीतलहरी इति गेय काव्यं, विंशति सर्गात्मक यशोधरा महाकाव्यं, अपि च अक्षय गीतरामायणं, सप्तविंशति नाटकचयेन भूषित परीक्षिन्नाटकचक्रं, अपि च प्रतापराणायनमहाकाव्यं च विलिखितवान्। अय गीर्वाणान्ध्रभाषा प्रवीणः।

मल्लिका — अयं सम्यक् गास्यति।

चंपा — विंशतितमे शताब्दे संस्कृतस्यकृते अय महत्कार्यं करोति।

मल्लिका — वेला अतिक्राम्यति सत्वरं अलंकृत मण्डनाभव।

चंपा — समाप्तम्। इद वराहमिहिरंनाम नाटकं चारित्रात्मकं किम् ?

मल्लिका — हा चारित्रात्मकम्। अस्मिन् नाटकचक्रे चतुर्दश पौराणिकानि, षट् चरित्रात्मकानि,सप्त सामाजिक नाटकानि सर्वाणि सप्तविंशति नक्षत्राणीव द्योतन्ते।

चंपा — अहो आश्चर्य। अयं कविराक्षसः इव प्रतिभाति मम।

मल्लिका — मया पठितानि अस्य कवेः सर्वाणि काव्यानि।

चंपा — सखि, वराहमिहिर नाटकमुद्दिश्य किञ्चित् संग्रहेण श्रावय।

मल्लिका — सखि, कथा यदि प्रथमतः एव कथयेयं तर्हि ते सम्यक् आस्वाद

योग्यं न भवतीति त्वया एकदा उक्तम्। तस्मात् त्वं प्रत्यक्षं नाटकं विलोक्य रसास्वादस्य सुखमनुभव।

चंपा — हा मम तादृशी स्थितिः वर्तते।

मल्लिका — सखि त्वं अतीव चिरयसि। आवयोः संभाषणमेव नाटकायते। सत्वरमेहि गच्छावः।

चंपा — सखि, समाप्तालङ्कारिणी अभवम्। त्वमपि किञ्चित् वदनमण्डले आदर्शे विलोक्य विदलित लोलालकान् सम्यक् विरचय।

मल्लिका — भवतु नाम। नाहमिच्छुका लोलकान् सम्यक् विरचयितुम्। आधुनिकेषु दिवसेषु लोलालकत्वमेव मधुमण्डनं भवति।

चंपा — भवती अतीव रसिका। एहि गच्छावः। (इति हस्त गोणीं गृहीत्वा गच्छतः)

(नेपथ्ये वैदिक मन्त्रोच्चारण भवति)

"शतमानं भवति शतायुः पुरुषः शतेन्द्रिय आयुष्येवेन्द्रिये प्रतितिष्ठति"

(ततः प्रविशति वेत्रहस्तः)

वेत्रहस्तः — सावधानम्। सावधानम्। अम्बरमणि तरणि किरण पुञ्ज समानाः, सकल विद्याप्रवीणाः, नवरत्न मण्डित महायशाः, संस्कृत कविमण्डल विनुत भूमण्डल महायशाः, विक्रमादित्य महाराजाः प्रविशन्ति। सावधानम्। सावधानम्।

(ततः प्रविशति राजा विक्रमादित्यः)

(विक्रमादित्यः सिंहासने उपविशति, एकस्मिन पार्श्वे अमात्यः, अन्यस्मिन् पार्श्वे पुरोहितः ज्योतिषश्च स्वीयासनेषु उपविशन्ति)

अमात्यः — (उत्थाय) महाराज सर्वग्रहाणा अनुकूलार्थं शान्तिपाठः कर्तव्यः इति मया प्रकल्पितः।

पुरोहितः — महाराज, अहं स्वयं समीपे स्थित्वा सकल ब्राह्मण्यं दश शान्ति पाठार्थं आदिशम्। सर्वमपि यथा शास्त्रं निर्वर्तितम्।

विक्रमादित्यः — अस्य पाठं पठितुं समादिष्टं किम्?

पुरोहित — महाराज, अरण पाठ विना अन्य पाठा निरर्थका भवन्ति। तस्मात् अरण पाठार्थं निष्णात वेदपाठकान् न्ययुजम्।

विक्रमादित्य — अयि विद्वद्वरेण्या , मन्त्रिवर्या , भवता आशीर्वाद बलेन, वेदमन्त्रोच्चारणेन, सकल नवग्रह पूजया च मे पन्थान निष्कण्टका भवन्तु इति अशास्महे।

पुरोहित — महाराज सर्वमपि सुखान्ते यथाभीष्ट अवश्य साधु भविता इति अहमपि भावयित्वा अनवरत वेदघोषार्थं घन जटा पदक्रमान्त वेदाध्यायिन आदिशम्।

अमात्य — महाराज मा विचारयन्तु सर्वमपि अस्माक अनुकूल भविष्यति। अवश्य पुत्रोदयवार्ता श्रोष्यन्ति।

विक्रमादित्य — अयि विप्रोत्तमा अस्मदीय वंशीय रघा पुत्र श्रीराम चन्द्रस्य पिता राजा दशरथ पुत्रसन्तानार्थं पुत्रकामेष्टि कारयामास। अन्तत वीतिहोत्र करुणया पुत्रकामेष्टिमाहात्म्येन पुत्ररत्ने समलङ्कृत आसीत्।

अमात्य — तद्वत् भवन्त अपि सर्व यथा शास्त्र कर्तव्य अनुष्ठितवन्त आसन्। मा विचारयन्तु।

पुरोहित — वेदविहितकर्म भवद्भि अनुष्ठितम्। सर्वं साधु भविष्यति। अवश्य पुत्रोदय भविष्यति। अत्र अस्मिन् विषये सशयलेशोऽपि नास्ति।

(सवेग चन्द्रिका प्रविशति)

चन्द्रिका — (नमस्कृत्य) महाराज राज्ञी छाया पुत्ररत्नमसूत । मातापुत्रौ सक्षेम स्त । (इति विनम्रा तिष्ठति)

सर्वे — (एककण्ठेन) परमानन्द भवति अस्माकम्।

अमात्य — महाराज अधुना अस्य राजस्य वारस अस्ति।

पुरोहित — भवन्त पुनाम नरकात् तारिता ।

ज्योतिषाचार्या — अस्मिन् राज्ये समस्त मङ्गलानि भवन्ति।

विक्रमादित्य — (आनन्देन) चन्द्रिका, साधु समुदारित भवत्या। अनया वार्तया सकल राज्यमपि पुलकित, पल्लवित च। अस्मदीय आनन्दस्य नावधि विद्यते। इद हार गृहाण। (इति स्वकण्ठात् हार विनीय तस्यै क्षिपति)

चन्द्रिका — (हारं गृहीत्वा) धन्यास्मि महाराज। (इति सानन्दं गच्छति)

विक्रमादित्यः — अमात्यवर्य, सर्वेभ्यः कर्मचरिभ्यः सकल उपायनानि, वस्त्रखण्डानि दुकूलानि, खाद्यपदार्थांश्च यथेच्छं वितरतु। भवान् गच्छतु।

अमात्यः — यथाऽऽज्ञापयति देवः। (इति गच्छति)

विक्रमादित्यः — अयि भोः पुरोहिताः भवन्तः, वेदपण्डितान्, संस्कृतज्ञान् पर्याप्त दक्षिणाभिः प्रतर्पयन्तु।

पुरोहितः — भवदीय आज्ञा अवश्यं परिपालयिष्ये। (इति गच्छति)

विक्रमादित्यः — (आनन्देन) कः कोऽत्र भोः।

वेत्रहस्तः — अयमस्मि भोः।

विक्रमादित्यः — मार्गमादिश।

वेत्रहस्तः — इतोइतः महाराज। (इति द्वावपि गच्छत.)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(मञ्जरी गृहं अलंकुर्वन्ती गानगुञ्जनं कुर्वन्ती, वालं डोलायन्ती आस्ते)

गीतम् (चक्रवाक रागे)

पश्य पश्य गगनयान बालचन्द्र भोः
मा पिधेहि शीतकिरण नीरदान्तरे ॥धृ.॥

मञ्जुवक्त्र स्पन्दमान फेनपुञ्ज शोभिनम्
खेलनेन निर्जित राजनीति राजकम्

पुरोहित — महाराज, अरुण पाठ विना अन्य पाठा निरर्थका भवन्ति। तस्मात् अरुण पाठार्थं निद्रारत वेदपाठकान् न्ययुजम्।

विक्रमादित्य — अयि विद्वद्वरेण्या, मन्त्रिवर्या, भवता आशीर्वाद बलेन, वेदमन्त्रोच्चारणेन, सकल नवग्रह पूजया च मे प्रयान निष्फण्टका भवतु इति अशास्महे।

पुरोहित — महाराज सर्वमपि सुखान्ते यथाभीष्ट अवश्य साधु भविता इति अहमपि भावयित्वा अनवरत वेदघोषार्थं घन जटा पदक्रमान्त वेदाध्यायिन आदिशम्।

अमात्य — महाराज मा विचारयन्तु सर्वमपि अस्माक अनुकूल भविष्यति। अवश्य पुत्रादयवार्ता श्राष्यन्ति।

विक्रमादित्य — अयि विप्रोत्तमा अस्मदीय वशीय रघो पुत्र श्रीराम चन्द्रस्य पिता राजा दशरथ पुत्रसन्तानार्थं पुत्रकामेष्टि कारयामास। अन्तत वीतिहोत्र करुणया पुत्रकामेष्टिमाहात्म्येन पुत्ररत्ने समलङ्कृत आसीत्।

अमात्य — तद्वत् भवन्त अपि सर्वे यथा शास्त्र कर्तव्य अनुष्ठितवन्त आसन्। मा विचारयन्तु।

पुरोहित — वेदविहितकर्म भवद्भि अनुष्ठितम्। सर्वं साधु भविष्यति। अवश्य पुत्रादय भविष्यति। अत्र अस्मिन् विषये सशयलेशापि नास्ति।

(सवेग चन्द्रिका प्रविशति)

चन्द्रिका — (नमस्कृत्य) महाराज राज्ञा जाया पुत्ररत्नमसूत । मातापुत्रौ सक्षेम स्त । (इति विनम्रा तिष्ठति)

सर्वे — (एककण्ठेन) परमानन्द भवति अस्माकम्।

अमात्य — महाराज अधुना अस्य राजस्य वारस अस्ति।

पुरोहित — भवन्त पुनाम नरकात् तारिता ।

ज्योतिषाचार्या — अस्मिन् राज्ये समस्त मङ्गलानि भवन्ति।

विक्रमादित्य — (आनन्देन) चन्द्रिका, साधु समुदारित भवत्या। अनया वार्तया सकल राज्यमपि पुलकित, पटित च। अस्मदीय आनन्दस्य नावधि विद्यत। इद हार गृहाण। (इति स्वकण्ठात् हार निनीय तस्यै क्षिपति)

चन्द्रिका — (हारं गृहीत्वा) धन्यास्मि महाराज। (इति सानन्दं गच्छति)

विक्रमादित्यः — अमात्यवर्य, सर्वेभ्यः कर्मचारिभ्यः सकल उपायनानि, वस्त्र-खण्डानि दुकूलानि, गायकगायकेभ्यश्च नयेच्छं वितरतु। भवान् गच्छतु।

अमात्यः — यथाऽऽज्ञापयति देवः। (इति गच्छति)

विक्रमादित्यः — अयि भोः पुरोहिताः भवन्तः, वेदपण्डितान्, संस्कृतज्ञान् यथोचित दक्षिणाभिः प्रतर्पयन्तु।

पुरोहितः — भवदीय आज्ञा अवश्यं परिपालयिष्ये। (इति गच्छति)

विक्रमादित्यः — (आनन्देन) कः कोऽत्र भोः।

वेत्रहस्तः — अस्मन्नि भोः।

विक्रमादित्यः — मार्गमादिश।

वेत्रहस्तः — इतोऽतः महाराज। (इति द्वावपि गच्छतः)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(मञ्जरी गृहं अलङ्कुर्वन्ती गानगुञ्जनं कुर्वन्ती, बालं डोलायन्ती आस्ते)

गीतम् (चक्रवाक रागे)

पश्य पश्य गगनयान बालचन्द्र भोः
मा पिबेहि शीतकिरण नीरदान्तरे   ॥नृ.॥

मन्जुवक्त्र स्पन्दमान फेनपुञ्ज शोभिनम्
खेलनेन निर्जितं राजनीति राजकम्

लोकनेन सर्व हृदय भावहरण पाटवम्
पश्य पश्य चन्द्र भोः बालभाव चञ्चलम् १

आनने नितान्त चलन काकपक्षकम्
पौरुषे धिक्कृत सकल राजवर्गकम्
मन्द हास शोभमान भारतीय गौरवम्
बालभाव निर्जितं बालचन्द्र कीर्तनम् २

डोलिका मृदुलपवन सौख्यशायिनम्
स्तन्यपान सक्तचित्त मधुर क्रन्दनम्
मातृहृदय भावशान्ति मलयचन्दनम्
गानमधुर भावमत्त सुसनन्दनम् ३

भूमिभस्म लसितदेह शैवबालकम्
हसित पुष्पराग लिप्त मृदुल रम्यदेहिनम्
मातृहृदय गहनभावनोर्मि राजहंसकम्
नयनकुमुद सम्वदान शीतकिरण भासुरम् ४

शिवप्रताप कृष्णराय पादचारिणम्
ईक्षणे नितान्तदीप्त भारतीय दृक्पथम्
आग्रहे कुमारभाव दर्शित कुमारकम्
पश्य भो भावि भरतराज्य शासकम् ५

पल्लवी — (गानं शृण्वन्ती शिरः कम्पनं कुर्वन्ती प्रविशति, गीतावसाने) साधु गीत मञ्जरि। (इति करतल ध्वनिं करोति)

मंजरी — हञ्जे पट्टवि ! कथं भवति हठात् आगतासि ?

पल्लवी — त्वमेव भावय कथ आगतास्मीति।

मजरी — (पल्लवीं नखशिखपर्यन्त विलोक्य) पट्टवकुङ्कुमपुष्पफलसहित पूजाभाजनेन कुत्रापि गच्छन्ती त्वं कथं अत्र अधुना समागतासि ?

पल्लवी — भवती सर्वदा अन्येषां कर्मणि दत्तदृष्टिः भवसि। किन्तु स्वकीय विषयमुद्दिश्य न किमपि भणामि।

मंजरी — पठसि, मया कतिवारं उक्तं, अन्यान् उत अन्याः न किमपि पृछ, विषय स्वीकरणे प्रयत्नशीली मा भवेति।

पल्लवी — हञ्जे, अधुना किं जातम्। एव विचारणे कोऽयं अपराधः मया कृतः।

मंजरी — अपराधः कृतः इति नाहं भणामि। किन्तु अन्ये किं कुर्वन्तीति ज्ञातुं यः प्रयत्नः क्रियते सः अयोग्यः, इति मे अभिप्रायः।

पल्लवी — भवतु। किमर्थं त्वं सम्यक् स्वात्मानं अलङ्कृत्य फलपुष्प संभार-वाहिनी असि।

मंजरी — (विहस्य) जगति स्त्रीणां अन्य स्त्रीणां सौन्दर्यादिकं अलङ्करणादिकं विलोक्य सहनं न भवति।

पल्लवी — सखि, कथं संभाषणं कर्तव्यं त्वमेव मा शाधि।

मंजरी — अधुना समयाभावात् नाहं वक्तुं समर्थास्मि यत्किमपि।

पल्लवी — किं भवती अतीव कार्यलग्नासि।

मंजरी — हा कार्यमग्नास्मि शृणु। विक्रमादित्य महाराजस्य पत्नी छाया पुत्रम सूतेति वार्ता सर्व लोक श्रवणेन्द्रियं गता। सर्वेऽपि सानंदं सोत्साहं नगरा अलंचक्रुः। नाहं जाने भवती कस्मिन् प्रपञ्चे वसतीति।

पल्लवी — किं कुर्यां गृहं विसृज्य अहं कुत्रापि नागच्छामि। कदापि न भाषयामि। तस्मात् किं वृत्त कथं वृत्तं इति विषय जिज्ञासा अधिका भवति।

मंजरी — जानामि ते चित्तवृत्तिम्। त्वं मयि कृत्था माभव।

पल्लवी — अधुना त्वं भण, किं भणितव्यम्।

मंजरी — तस्मात् बालकस्य नामकरणाख्यं कर्म अद्य भविता। तस्मात् तत् नेभवं द्रष्टुं प्रस्थितास्मि।

पल्लवी — अतीव परमानन्दो जात. पौराणाम्। सर्वोऽपि पौरः विक्रमादित्य राजामुद्दिश्येव चिन्तयन् आस्ते तदनन्तरं कोवा अस्य राजस्य राजा भविष्यतीति।

मंजरी — बहु कालानन्तरं सुवार्ता श्रुता सर्वैरपि।

पल्लवी — अहमपि त्वया साकं नामकरणाख्यं कर्म द्रष्टुं समागच्छेयम्।

मञ्जरी — त्वं एतावत्पर्यन्तं स्नानमपि न कृतासि। त्वया साकं गमनं मे विलम्बस्य हेतुः भविष्यति।

पल्लवी — त्वं यथार्थं कथितासि। त्वं प्रथमतः गच्छ, अहं सावकाशं आगच्छेयम्।

मंजरी — त्वमपि फलपुष्प उपायनैस्सहिता एहि।

पल्लवी — हा अवश्यं अहं स्नात्वा सज्जितवेषा त्वां मध्ये मार्गे मिलिष्ये, उत राजगृहे मिलिष्ये।

मंजरी — अहं गच्छामि।

पल्लवी — हा गच्छ। अहं मम कुटुम्बेन सार्धं आगच्छेयम्।

मजरी — नमस्ते। (इति निष्क्रान्ता)

(ततः प्रविशति चण्डवर्मा)

चण्डवर्मा — (सन्तोषम्) हञ्जे, किं श्रुतं त्वया यत् विक्रमादित्यराजस्य पत्नी छाया पुत्ररत्नमसूतेति।

पल्लवी — हा श्रुतं मया अधुनैव।

चण्डवर्मा — कथं श्रुतं, केन कथितम्।

पल्लवी — अधुना मे मैत्रिणी मञ्जरी समागता।

चण्डवर्मा — सा कुत्र गतवती अधुना।

पल्लवी — सा विक्रमादित्यस्य पुत्रस्य नामकरणाख्यं कर्म द्रष्टुं गतवती।

चण्डवर्मा — किं त्वया न गतं तया सार्धम्।

पल्लवी — न गतम्।

चण्डवर्मा — साधु कृतम् भवत्या।

पल्लवी — अहं गृहकर्मणि व्यापृतचित्ताऽस्मि। सर्वं विधाय गमने विलम्बो भविष्यति इति अहं तां अकथयम् त्वमेकाकी गच्छेति।

चण्डवर्मा — साधु कृतं भवता। हञ्जे श्रृणु। राजा विक्रमादित्यः पुत्रसंतानार्थं बहुविध यागान् विधाय वैदिक कर्मानुसारेण ब्राह्मणेभ्यः दक्षिणादिकं वितीर्य, सभक्तिकं सूर्यदेवं प्रार्थयामास। तस्मात् तस्य पुत्ररत्नमजायत इति लोकः कथयति।

पल्लवी — तत् सत्यमेव। प्राचीन परम्परालम्ब चेतसा सर्वं प्रार्थनया वेदकर्मानुष्ठानेन भवति।

चण्डवर्मा — देवभक्त्या असाध्यं साध्यं भविष्यति।

पल्लवी — तस्मात् अहं वच्मि। त्वं आस्तिको भव। वेदपूजको भव। प्राचीन संस्कृत्याः मान्यता देहि। यदि एवं क्रियते तर्हि वयमपि राजोपमाः भविष्यामः।

चण्डवर्मा — त्वं किं भावयसि यत् अहं नास्तिकः इति।

पल्लवी — नाहं तथा भावयामि। किन्तु अधिक श्रद्धा परम्पराश्च भविलभ्या इति केवल भावयामि।

चण्डवर्मा — साधु, अधुनैव आवामपि नामकरणाख्यं कर्म द्रष्टुं गच्छावः। त्वं सज्जी भव। (इति अन्तः प्रविशति)

पल्लवी — (डोलिका समीपं गत्वा, पुत्रं पश्यन्ती) कदा मम पुत्रः वर्धमानो भविष्यति। कदा देशे एकः राजा भविष्यति। कदा अस्माकं परमानन्दः भविष्यति। देव त्वमेव सर्वरक्षकोऽसि, तुभ्यं नमः। (इति नमस्करोति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(विक्रमादित्यराजः सिंहासने उपविशति, सर्वे ज्योतिषविद्या पण्डिताः स्वीय स्थानेषु उपविष्टाः सन्ति)

विक्रमादित्यः — अयि भोः ज्योतिषाचार्यवर्याः एतावत्पर्यन्त वैदिकपद्धत्या अन्नप्राशनपर्यन्तं सर्वसंस्काराः परिपूर्णं गताः।

प्रथम — महाराजाना वैदिकपद्धत्या कीदृशी गाढ भक्तिः विद्यते सा एभिः संस्कारकार्यकलापै· केवल ज्ञायते।

द्वितीय —राजानः देशसंस्कृति देशसाम्प्रदायं वैदिक धर्मप्रचारं च कारयन्ति। यदि महाराजानः अस्य धर्मस्यकृते अनवरत दीक्षया कर्म न कुर्यु· भारतीय संस्कृति· दिगंगता भवेत्।

तृतीय· — भारतदेशे संस्कृतिः राजश्रिता अजीवत्, जीवति, जीविष्यती च।

विक्रमादित्य· —नहि केवलं राज्ञा धर्म· संस्कृति रक्षणम्। संस्कृति रक्षणं सर्व भारतीयानाजन्म संक्रामित कर्तव्यं भवति। वेषभूषा· गच्छन्तु परिवर्तनाम्। पानशन विषये भवतु वैविध्य, किन्तु पञ्चदश कर्मणा संस्कार विशेषाः सर्वभारतीयैः अवश्यं परिपालनीया.। अयमेव भारतीयाना साम्प्रदाय। अयि भो· पण्डितवर्या· शृण्वन्तु भवन्त। मे चिरंजीविन. जन्मपत्रिका विलिख्य तस्य भविष्यत् च विलिख्य कथयन्तु भवन्त।

प्रथम — महाराज यदा पुत्रोदय संजात· तदा अनुपदमेव मया जन्मपत्रिका विलिखिता। ममाभिप्रायानुसारं इयं पत्रिका महाराज लक्षण समन्विता भाति।

द्वितीय — महाराज, मयापि बालकस्य जन्मपत्रिका विलिखिता। ममाभिप्रायानुसार अस्य जीवितं बहु चित्रितमिव प्रतिभाति।

तृतीय — मदीय भावनानुसारेण अय तुलालग्न संजात। तस्मात् न्यायेन राज्यं पालयिष्यति। किन्तु अंगारक बाधा विद्यते। तदर्थं शान्ति· करणीया इति मे प्रतिभाति।

प्रथम — शान्ति सर्वदा शुभसूचका भवति।

द्वितीय — अधिकस्य अधिकं फलम्।

तृतीयः — अयं बालः अल्पेवयसि युवराजा शासकश्च भविता।

विक्रमादित्यः — अयि भो ज्योतिषाचार्यवर्याः, एकजन्मपत्रिकाविषये सर्वथा मतानि भिन्नानि कथं भवन्ति।

(ततः प्रविशति दौवारिक.)

दौवारिकः — (नामित पूर्वकायः वेत्रमण्डित दक्षिणहस्त नमस्कृत्य) महाराज, द्वारि तिष्ठन्ति मिहिराचार्यवर्याः, तत्र भवता दर्शनाभिलाषी।

विक्रमादित्यः — अहो मे भाग्यम्। ज्योतिषाचार्यवर्याः मिहिर पण्डिताः द्वारि तिष्ठन्ति। विना आलस्यं तान् प्रवेशय।

दौवारिक. — यथाज्ञापयति देवः। (इति निर्गच्छति)

(ततः प्रविशति मिहिरः। सर्वे उत्तिष्ठन्ति मिहिराचार्याय स्वागतं व्याहरन्ति)

विक्रमादित्य — अयि मिहिर पण्डितवर्याः। नमोवाकं विदध्महे।

मिहिरः — स्वस्ति भवते। आचन्द्रतारार्कं ते कीर्तिः राजतु भूतले।

विक्रमादित्यः — उपविशतु भवान्। (इति आसनं दर्शयति।

मिहिरः — (आसने उपविशति) राजन् बहुकालानन्तरं सुतमुखकमल दर्शनसुखं भवता सम्प्राप्तं इति मे मनः निस्सीमानन्दं भजते।

विक्रमादित्य — तत्र भवता विदुषा आशीर्वाद बलोऽयम्।

प्रथमः — अवश्यं तत्र भवता आशीर्वादोऽयम्।

द्वितीयः — प्रथमतः भवद्भिः समुदीरितं यत् पुत्रदर्शनसुखमनुभविष्यति राजा इति।

तृतीयः — जगति सर्वं देवप्रेरणया महापुरुषणा आशीर्वाद बलेन च भवति।

विक्रमादित्यः — अत्र अस्माकं सुतस्य भविष्यत्कालमुदिश्य चर्चा समजनि।

मिहिरः — अधुना अयं शिशुः। अस्य भविष्यत्कालमुदिश्य चर्चाकृत.।

विक्रमादित्यः — भवता भाषणं मे अवगाहनं न भवति।

मिहिरः — शिशूना भविष्यत् कालमुदिश्य न द्रष्टव्यं इति शास्त्रप्रमाणं विद्यते।

विक्रमादित्यः — तत् प्रमाणं राज्ञा बाधकं न भवति।

मिहिरः — भवता प्रोक्तं अङ्गीकरोमि। किन्तु लोकनियमं अहं ब्रवीमि। शास्त्रात् साम्प्रदायः बलवत्तरः इति मे अभिप्रायः।

विक्रमादित्य — भवतु नाम। तत्र भवन्त कुमारस्य पत्रिका पश्यन्तु इति ममादेश ।

प्रथम — वालस्य पत्रिका महाराजलक्षणसमन्विता इति मया विचार्य भणितम्।

द्वितीय — वालस्य पत्रिका नष्टस्थानिष्ट समन्विता इति मया ससूचिता अस्मिन् विषये भवद्भि परिशील्य वक्तव्यमिति मे विज्ञप्ति ।

तृतीय — अयतु तुलालग्न सभूत । तस्मात् न्यायेन राज्य पालयिष्यति इति मया प्रार्थितम्।

मिहिर — अस्मिन् विषये मम वक्तव्य न किञ्चिदप्यस्ति।

विक्रमादित्य — भवन्त ज्योतिषाचार्यवर्या । तस्मात् युष्माभि यदुच्यते तत् अन्तिम वाक्य भवति। अयि भो मिहिराचार्या कथयन्तु बालकस्य भविष्यत् कथ भासते इति।

प्रथम — (उत्थाय पत्रिका मिहिराय ददाति, मिहिर गृह्णाति)

मिहिर — (उर्ध्व विलोक्य हस्ताङ्गुलीभि गणना विधाय) महाराज अय भवस्य महाराजलक्षणोपेत ।

प्रथम — महाराज, श्रुत भवद्भि यत् मया कथित तदेव कथ्यते मिहिराचार्य वर्यै । मम शास्त्रदृष्टि अकुण्ठिता भाति।

विक्रमादित्य — जानाम्यह यत् मे सभाया पण्डिता क्षुण्ण शास्त्राभ्यासवन्त इति।

तृतीय — मयाऽपि सुविचार्य उक्त अय तुलालग्न सभूत न्यायशास्त्रे दक्ष इति च।

विक्रमादित्य — सर्वैऽरपि किञ्चित् न्यूनाधिक्येन एकमत प्रतिपादितम्। तस्मात् अह युष्मादृशाना पण्डिताना मण्डलेन सप्तर्षिमण्डल इव विराजित राजमण्डल मिव विराज। (हठात् मिहिराचार्य विलोक्य) अयि मिहिराचार्यवर्य कि भवन्त विचारयन्ति। किमप्यधिक वक्तु उद्यता किम् ? विनावरोध कथयन्तु भवन्त ।

मिहिर — महाराज, अथ वा... (इति मौन अवलम्बते)

विक्रमादित्यः — कथयन्तु भवन्तः, अयं बालः भाग्यवानिति।

प्रथमः — मिहिराचार्याणा रसनाया शनिः वर्तते।

तृतीयः — तस्मात् मिहिराचार्याः भाषणे दरिद्राः भवन्ति।

विक्रमादित्यः — मिहिराचार्य कथयतु भवान्।

मिहिरः — अयं अल्पायुष्कः भवति।

विक्रमादित्यः — (आश्चर्येण) किं भण्यते भवद्भिः।

मिहिरः — सत्यं भण्यते महाराज। अयं पञ्चवयस्कः यदा भवति तदा वराहेण व्यापादितः भविष्यति, इति जन्मकुण्डली प्रत्यक्षं भणति।

विक्रमादित्यः — मिहिराचार्य। सम्यक् गणितं कृतं किम्? पुनः एकवारं गणयतु भवान्।

मिहिरः — महाराज, मे वाक्यं वेदवाक्य भवति। यथा मम मित्र भणति यत् मम रसनाया शनिः वर्तते इति तत् सत्यमेव। अहं न किमपि भणामि कदापि। यदि यत् किमपि भणामि आलोच्य भणामि। यदुच्यते तत् सत्यं भवति। मम वाक्सरणिः एतादृशी।

विक्रमादित्यः — मिहिराचार्यवर्य। भवान् भवदीय पाण्डित्येन दर्पितोऽस्ति। यत् एते कथयन्ति तत् नेति भवान् कथयति। स्वीय प्रतिभया भवदीय प्रतिमा स्थापयितुं भवन्तः कृत प्रयत्नाः भवन्ति। अधुना अवगतं मया। एते सर्वे जन्मपत्रिका साधु वर्तते इति कथयन्ति। भवान् स्वोपज्ञा प्रकटीकर्तुं बालः अल्पायुष्कः इति कथयति। अयं ते गर्वभावः। भवान् मम राज्ये स्थातु नार्हति अपेहि मम सम्मुखात्। राजमर्यादा न भवान् जानाति।

मिहिरः — महाराज, मह्यं क्रुध्यो मा भवतु भवान्। असत्य कथनेन किं मे भवति। यत् मया कथितं तत् सत्यं भविता।

विक्रमादित्यः — मिहिर, अहं सर्वेभ्यः पण्डितेभ्यः श्रेष्ठतमः पण्डितप्रकाण्डः इति कथयितु त्वं प्रयतसे इति जानाम्यहम्।

मिहिरः — कालक्रमेण मे ज्योतिषनिर्णयानुसारं न कोऽपि हानिः भवति, तदा भवन्त. मा निन्दन्तु इति अहं भणामि।

विक्रमादित्य — अनन्तर कथ अधुनैवाह निर्णयिष्यामि। अयि भो ज्योतिषाचार्यवर्या युष्मदीय प्रज्ञया आनन्दित अस्मि। अह सुफलार्हो क्षेत्रेन्दिरा, गृह सन सर्वेनु सहस्र दान करोमि। गच्छन्तु भवन्त। मिहिराचार्य भवता प्रतिपादित अस्माक अतिशय दु खदायक। अपिच त्रयाणा ज्योतिषचार्याणा अपेक्षया भवान् भवत धीचातुर्यं दर्शयितु पाण्डित्यगर्वेण अब्रवीत्। तस्मात् मे दान तव देशबहिष्कार एव।

मिहिर — (उत्थाय) महाराज मया सत्यमुदीरित ज्योतिषशास्त्रप्रमाणम्। स्वार्थाय न किमपि भणित मया। मे पाण्डित्य प्रकटनाय कृतमिति भवद्भि उदीरित तत् असगत असबद्धम्। भवता आज्ञा शिरोधर्या मया। किन्तु बहुकालानन्तर भवान् पश्चात्तापेन अशान्ति प्राप्य मम नाम ससमरन् मदर्थं दत्तजीवन सत्येन उन्मीलित लोचन भविष्यति।

विक्रमादित्य —मिहिर, भवान् पयोमुख विषकुम्भ। अपेहि मम सम्मुखात्। क कोऽत्र भो।

प्रतिहारी — (प्रविश्य) एषोऽस्मि देव। (इति नामित पूर्वकाय भवति)

विक्रमादित्य — मिहिर अस्मात् प्रदेशात् बहि निष्कासय।

मिहिर — महाराज शृणु मे अन्तिम वच। अह ब्राह्मण मे राज्याभिलाषा नास्ति। नाह मुखलोलुप अस्मि। अह वने तप्तु गच्छामि। यदि मम उपस्थिति आवश्यका भवति तर्हि मे वार्ता प्रेषयन्तु। शृणु महाराज। मे वचन असत्य न भवति। मे वाक्षु पवित्रताऽस्ति। तस्मात् मया यत् कथित तत् अवश्य भवतीति मे मति। स्वस्ति भवते।

विक्रमादित्य — अल स्वकुच मर्दनेन। अपसर। (इति उच्चै आदिशति)

(मिहिर प्रताहारिणा सार्धं निर्गच्छति)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(ग्रामे वटवृक्षस्य छायाया एकस्या वितर्दिकाया त्रयः ग्रामीणाः लवित्रयष्टि खनित्रैः युताः उपविश्य अन्योन्यं भाषयन्तः आसन्)

यष्टिकः — महाराजः अतीव धर्मात्मा। साम्प्रदायानुवादी। वेदब्राह्मण गोपरिपालकः। कथं मिहिराचार्यान् देशबहिष्कारं अकुर्वन् इति मे प्रश्नः।

लवित्रक. — ते देशरक्षकाः राजानः। तेषा निश्चयः अप्रतिहतः भवति। ते साधुमसाधुं। असाधुं साधुं कुर्वन्ति तेषा सिंहासन रक्षणाय। तस्मात् प्रोक्तं खलु स्मृति कर्तृभिः यत् राज्यान्ते नरकं ध्रुवम्। इति।

खनित्रकः — अस्मदीय प्राचीन स्मृति कर्तारः अनुभवज्ञाः सर्वमपि अनुभवपूर्वकं अवोचन्। वयमेव मूर्खाः पण्डितं मन्यमाना।

खनित्रक — वैदिक साम्प्रदायानुसारिणम्, ज्योतिषचार्येषु उत्तमं सत्यवादिनं विरागिण, भौतिक सुखानभिज्ञं मिहिराचार्यं, देश बहिष्कारमकरोत् राजा। तस्मात् ममापि संतापः भवति।

यष्टिकः — अस्मिन् विषये राज्ञामतिः अकरणीयकर्मणि प्रवर्तिता। ते मिहिराः शास्त्रप्रामाणं धृत्वा कुमारस्य भविष्यत् उक्तवन्तः न तु कापटयभावेन। अस्मिन् विषये क्रोधस्य स्थानमेव न भवति।

लवित्रक. — राजान. मत्सरग्रस्ताः। ते सर्वदा स्वार्थाय अकरणीय करिष्यन्ति। ते गोमुखव्याघ्राः भवन्ति। शृणु, बहुकालानन्तरं तेषा सुतमुखदर्शनानन्द. आसीत्। सर्वेऽपि ज्योतिषाचार्याः यथापत्रिका स्वीयमतं प्रपञ्चिताः आसन्। तद्वत् मिहिरोऽपि स्वीयमतं प्रकटी चकार। तस्य देशबहिष्कारः अयुक्तः इति सर्वेषामपि अभिप्रायः।

खनित्रकः — मिहिराचार्योऽपि स्वीय भावना विनाकापट्यभावं प्रकटी चकार। अय आचार्यः किञ्चित् अलौकिकः। परमानस भावनानभिज्ञः। मनसि यत् स्फुरितं तत सर्वं प्रकटीकृत्य, अकारणेन देशबहिष्कृत. आसीत्।

यष्टिकः — अन्ततः मम भावना एवमस्ति, राज्ञा सहसा कर्म कृतमिति।

पुत्रस्य मरणं भविता इति श्रुत्वा आत्मानं संयामितुं अशक्तो भूत्वा एवं दिदेश इति मे मतिः।

लवित्रकः — यदि राजा एवं करिष्यति तर्हि कोऽन्यः धर्मरक्षकः भविष्यति इति प्रश्नः।

खनित्रकः — राजा पश्चात्ततः तं मिहिरं पुनः समाह्वयिष्यतीति मे प्रतिभाति।

यष्टिकः — एवं भवितुं शक्यं भवति। किन्तु एकदा अवमानितः मिहिराचार्यः प्रत्यागमनं अङ्गीकरिष्यति किं इति अन्यः प्रश्नः।

लवित्रकः — मिहिरस्य प्रत्यागमनं अनुपदं न भविष्यति।

खनित्रकः — अधुना देशे वर्तमान परिस्थितयः सर्वेषामपि असौख्यदायकाः भवन्ति।

यष्टिकः — अस्मदीय भाषणं यः कोऽपि श्रुत्वा राज्ञे यदि निवेदयति तर्हि अस्माकमपि मिहिरस्थितिः भविष्यति।

लवित्रकः — अस्माकं मिहिरदशा न भवति।

खनित्रकः — तथ्यमेवोक्तं। अस्माकं मिहिरदशा न भवति। किन्तु यदि भविष्यति यत्किमपि तद् मरणमेव भविष्यति।

यष्टिकः — अस्मिन् विषये न निर्णेतारः भवाम.।

लवित्रकः — कालः एव निर्णायकः भविष्यति।

खनित्रकः — यत् भविष्यति तदेव भविष्यति। पिष्टपेषणं किमर्थम्? इतः परं अस्माकं भाषणं न योग्यं भवति। गच्छामः वयं कार्यकरणाय। गत जलसेतु बन्धनं किमर्थम्? उत्तिष्टन्तु, आगच्छन्तु, गमिष्यामः। (इत्युत्थाय उष्णीषबन्धनादिकं विधाय स्वीयस्वीय वस्तुचयं गृहीत्वा गच्छन्ति) अपि मित्रवर्याः एतत् विषयमुद्दिश्य न केनापि भाषणीयं विद्यते। नमास्मि। (सर्वेऽपि) नमास्मि। (इति गच्छन्ति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(विक्रमादित्यः सिंहासने उपविष्टः, मन्त्रि पुरोहितौः पार्श्वस्थ आसनयोः उपविष्टौ ।)

विक्रमादित्यः — अमात्य, अयं मे चिरंजीवः धनुंजयः समाप्तपञ्चवर्षीयः संजातः, अस्य अक्षराभ्यासः करणीयः अस्ति।

अमात्यः — हा सत्यमेव करणीयः विद्यते शुभमुहूर्ते।

विक्रमादित्यः — अमात्य, अद्य प्रभृति शुभदिवसाः, अशुभ दिवसाश्च न भवन्ति मे करणीयेषु समारम्भेषु। विश्वकर्मणः सृष्ट्या सर्वं मङ्गलात्मकं भाति मे।

अमात्यः — भवता उदीरितं सत्यमेव राजन्, किन्तु भारतीय साम्प्रदायस्तु शुभाऽशुभ कर्मपरीतः अस्ति। तस्मात् भवन्तः देशरक्षकाः, अस्मदीय परम्परानुयायिनः, ईदृशी भावना भवता न योग्या, शोभनः च भवति।

विक्रमादित्यः — न मे विद्यते विश्वासः अस्मिन् ज्योतिषे।

अमात्यः — महाराज, विश्वासः अस्तिवा नवा नायं विषयः। सर्वथा राजभिः महापुरुषैः, प्रजाभिः, परम्परा परिपालनीया रक्षणीयाच। वयं गमिष्यामः किन्तु परम्परा न भ्रष्टा भवति। अवश्यं ऋषीणा मार्गः आदेशश्च अङ्गीकार्यो भवतः राजन्। भवान् एकवारं स्मरत्व रघुवंशीयान्। एतावत्पर्यन्तं सर्वोऽपि लोकः तान् कीर्तयति।

विक्रमादित्यः — अमात्य, भवता भणित श्रुतम्। त्वमेव सर्वं कारय।

अमात्यः — अयि पुरोधसाः, धनुञ्जयाय अद्यैव अक्षराभ्यास कुर्वन्तु भवन्तः शुभवेलायाम्।

पुरोहितः — अमात्य अद्य षष्ठी। विद्यारम्भे शुभाषष्ठी। इति शास्त्रं। तस्मात् अद्यैव अक्षराभ्यासः भविष्यति।

अमात्यः — भवन्तः गत्वा सर्वं व्यवस्था कुर्वन्तु। राजानः समागमिष्यन्ति।

विक्रमादित्यः — अमात्य, मिहिरः अद्य मे मनसि प्रशान्तात्मा भूत्वा वने तपस्यन् इव चित्रितः प्रतिभाति।

अमात्यः — प्रभो अयं मिहिरः धर्मानुयायी, मोक्षकाङ्क्षी च।

विक्रमादित्यः — मिहिरस्य वाचि शक्तिः विद्यते किम्?

अमात्यः — अयं ज्योतिषशास्त्र पारंगतः। नाहं किमपि वक्तु समर्थः अस्मिन् विषये। किंतु अयं प्रभावशाली।

विक्रमादित्यः — अद्य बालस्य पञ्चवर्षाणि व्यतितानि भविष्यन्ति।

अमात्यः — मिहिराचार्येण सूचितं यत् तत् अवश्यं अस्माभिः सावधानतया अनुपालनीयम् विद्यते।

विक्रमादित्यः — अन्ये ज्योतिषाचार्याः बालमुद्दिश्य, तस्य भवितव्यमुद्दिश्य सम्यगवोचन् किन्तु मिहिरः स्वप्रज्ञा प्रदर्शयितुं अन्यथा अशुभं प्राकटयत्।

अमात्यः — महाराज तथा न भणितव्यम्। भवता एकपुत्रविषये एतादृशी कुशङ्का भवति। विचार्यमाणे, अन्ये ये पण्डिताः विद्यन्ते ते भवद्भ्यः धनकनकवाहन वस्तुचयं भूखण्डं च प्राप्तुं एवं अवोचन्। किन्तु अयं मिहिराचार्यः फलकाङ्क्षी नहि। सः ज्योतिष सिद्धान्त स्थापनार्थं केवलं जीवति इति मे मतिः।

विक्रमादियः — विचार्यमाणे तथैव ममापि प्रतिभाति।

अमात्य! — तस्मात् कुमार रक्षणे व्यवस्था कर्तव्या।

विक्रमादित्यः — अयं बालः कुत्रापि गन्तुं न क्षमः। वराहस्य नगरप्रवेशः असंभवः। कथं एनं वराहः हनिष्यति? तस्मात् मे शङ्का भवति तस्य ज्योतिषे।

अमात्यः — तस्मादेव ममापि शङ्का भवति। अवश्यं यत् किमपि भविष्यति। न वय वक्तुं शक्ष्यामः घटनाऽघटनामुद्दिश्य। पुरा राजा परीक्षित् एतादृशीमेवावस्थां अन्वभूत्। तस्मात् ब्राह्मण वचनं व्यर्थं न भवति। ब्राह्मणाना वाक्षु शक्तिः विद्यते। तस्मात् सावधानतया प्रवर्तितव्यं इति ममाभिप्रायः।

विक्रमादित्यः — भवता समुदीरितं सत्यमेव। किन्तु सर्वेषा ब्राह्मणाना वाक्षु शक्तिः न भवति।

अमात्यः — अहं विद्यमान परम्परामुद्दिश्य अवोचम्। अत्र किमपि अस्मिन् विषये अनिर्वचनीयं गोप्यं वर्तते इति मे प्रतिभाति। अयं सत्यवान्, निष्ठावान् पवित्रवान् ब्राह्मणः। तस्मात् अश्रद्धा न कर्तव्या इति ममाभिप्रायः।

विक्रमादित्य. — नास्मिन् विषये भीतिः विद्यते।

अमात्यः — शतथा रक्षणा कर्तव्या अस्माभिः। यदा कदापि यस्मिन् कस्मिन् समये वराहः पत्तनं प्रवेक्ष्यति।

विक्रमादित्यः — अमात्य, अद्य प्रभृति सकलराज्य रक्षकभटैः सावधाननया प्रवर्तितव्यमिति, राजधान्या हिंस्र जन्तूना प्रवेशः यथा न भवति तथा सर्वे उपायाः कर्तव्याः इति, जागृदवस्थाया सर्वमपि पत्तन स्थातव्यमिति घोषणा कारयन्तु भवन्तः।

अमात्य· — तथैव सर्वं कारयिष्यामि। अद्य प्रभृति कुमारं, प्रासादाग्रे चरमतले संस्थाप्य तं सर्वराजलक्षणचिन्हितेन वस्तुचयेन समलङ्कृत्य ध्वजस्तम्भमवः सिंहासने उपवेशयामः।

विक्रमादित्यः — तथैव कुर्वन्तु। (इत्युत्थाय गच्छति, अमात्यः अपि गच्छति)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(पल्लविनी गृहे कर्मकुर्वन्ती आस्ते, ततः प्रविशति चन्द्रिका)

चन्द्रिका — हञ्जे पल्लविनी किं श्रुत भवत्या?

पल्लविनी — किमिति।

चन्द्रिका — विक्रमादित्यपुत्रस्य धनुञ्जयस्य मरणमुद्दिश्य।

पल्लविनी — किं ब्रवीपित्वम्।

चन्द्रिका — सत्यं ब्रवीमि।

पल्लविनी — वत! कथं अल्पे वयसि मरणम्।

चन्द्रिकाः —- कथयामि शृणु।

पल्लविनी — अवहितास्मि। अमूलाग्र कथय।

चन्द्रिका — धनुजयजननानन्तर राजा विक्रमादित्य कुमारस्य जन्मपत्रिका द्रष्टु सर्वज्योतिषाचार्यान् आदिदेश। सर्वे ज्योतिषाचार्य पुत्रकस्य जन्मपत्रिका विलोक्य समीचीन साधु इति अब्रुवन्। किन्तु तेषा सिद्धान्त अनङगीकृत्य कुमारस्य मरण एकेन वराहेण पञ्चमेवयसि भविष्यतीति मिहिराचार्या उदघोषयन्।

पल्लविनी — बत, एव भविष्यति ? तत ।

चन्द्रिका तत विक्रमादित्य अतीव क्रुध मिहिराचार्यं देशात् बहिष्कृत वान्।

पल्लविनी — शान्त पापम्। मिहिराचार्येणा कष्टदशा सप्राप्ता।

चन्द्रिका — तदा मिहिराचार्या अयि भो महाराज मया यत् कथित तत् सत्य भविष्यति। अह भवदीय आज्ञा पालयिष्यामि। किन्तु शृण्वन्तु भवन्त , यदि मदीय सहायमपेक्ष्यते तर्हि मह्य वार्ता प्रेषयन्तु, अह अवश्य भवत समीपमागमिष्यामि। इति राज्ञे स्वस्ति वाचक उदगार्य वन गता ।

पल्लविनी — तदानी किमभूत्।

चन्द्रिका — तदानी राजा अतीव चिन्ताग्रस्त धनुञ्जयस्य रक्षणाय सर्व प्रयत्ना करणीया इति सकल सेन्य आदिदेश।

पल्लविनी — तदा ते किमकुर्वन्!

चन्द्रिका — तदा सर्व सैनिका त धनुञ्जय सौधोपरि चरमतले सवा सौख्य मयी व्यवस्था विधाय वराहलाञ्छननिराजितध्वजपट ध्वजस्तम्भे आविष्कृत्य, तस्य ध्वजस्य समीपे बाल सिहासने उपावशयम्।

पल्लविनी — इय कथा श्रोतु मा उत्सुकयति। तत ।

चन्द्रिका — एकदा सध्या समये हठात् समागतझञ्झावातेन स ध्वजस्तम्भ तास्त तस्मिन् सौधतले तत्रैव पपात। तेन प्रचण्डपतनेन स कुमार धनुजय मृत्व प्रापित । तदा ध्वजस्य वराह चिन्हित केतनपट तस्य बालकस्योपरि आच्छादितमभूत।

पल्लविनी — हा बत धनुजयस्य पञ्चत्व वार्ता श्रवणेन मे मानस दु खप्रपूर्ण भवति। बत अधुना विक्रमादित्य महाराज पुत्रविहिना जात । दैवनिर्णय न कोपि परिमार्ष्टुं शक्नोति।

चन्द्रिका — सर्वमपि धरण्या दैवनिर्णयेन भवति।

पल्लविनी — ततः किं जातम् कथय।

चन्द्रिका — विक्रमादित्यराजः बहुसंतप्तः पुत्रशोकेन विललाप।

पल्लविनी —पुत्रशोकः बहुसंतापकारकः खलु जगति सर्व प्राणिनाम्।

चन्द्रिका — तदनन्तरं किं जातम् श्रृणु।

पल्लविनी — किं जातं कथय।

चन्द्रिका — तदा राजा मिहिरं स्मरन् मिहिराचार्याणा प्रज्ञावैशिष्ट्यं कीर्तयन् महाब्राह्मणाय घोरं विधत्तं इति पदे पदे वदन् तं महाब्राह्मणं आह्वयितु इच्छुकः अभूत।

पल्लविनी—अधुना राज्ञः मानसं पुत्रमरणेन दुःखाक्रान्तं, मिहिरस्य निष्कासनेन सतप्तं च बभूव। तस्य मानसं अधुना द्विधा दुःखितं बभूव।

चन्द्रिका — अद्य अधुना शोकसभा भविष्यति। तस्मात् अहं तत्र गच्छामि। मध्ये मार्गे त्वा द्रष्टुं, एना वार्ता तव कर्णपुटे पातयितु समागतास्मि।

पल्लविनी — अहं आगन्तुं अशक्ताऽस्मि यतः मे कुमारस्य प्रकृतिः समीचीना न प्रतिभाति। चण्डवर्मानः तत्र गतवन्तः इति मन्ये। अपिच एतादृशी वार्ता श्रवणेन मे मानसं किञ्चित् व्यथाविलं आसीत्।

चन्द्रिका — विलम्बः संजातः अधुनाहं गच्छामि। नमस्ते पल्लविनि। (इति नमस्कृत्य गच्छाति)

पल्लविनी — आगच्छ पुनर्दर्शनाय। (इति अन्तः प्रविशति)

(यवनिका पतति)

*   *   *

सप्तमं दृश्यम्

(दुःख संतप्तः राजा इतस्ततः चरन् एकस्मिन् आसने उपविशति)

विक्रमादित्यः — बत न कोऽपि जानाति विधि वैपरीत्यम्। बहुकालानन्तरं पुत्रोत्पत्तिः। अनंतरं पुत्रस्य मरणं इत्येतत् सपद्सपदं जातम्। मिहिराचार्य, भवता प्रतिपादित सिद्धान्तः फलितः जातः। अहो ते बुद्धिविशेषः। वयं राजानः गर्वान्धाः मदेनमत्ताः तामसरजोगुणान्विताः। तत्र भवन्तः ब्राह्मणाः सत्वगुण सहिताः। यूयं प्रसन्नात्मानः भवन्ति। (*उत्थाय पार्श्वे विद्यमान घण्टां नादयति, गत्वा आसने उपविशति*)

प्रतीहारी — (प्रविश्य) अयमस्मि। (इति नामित पूर्वकायः भवति)

विक्रमादित्यः — अमात्यवर्यान् आह्वय।

प्रतीहारी — यथाऽज्ञापयति देवः। (इति गच्छति)

(ततः प्रविशति अमात्यः)

अमात्यः — नमामि महाराज। (इति नमस्करोति)

विक्रमादित्यः — अमात्यवर्य, मिहिरवचनं सत्यं बभूव। सः सत्यं भूदेवता अस्ति।

अमात्यः — महाराज। अयं वयसा कनिष्टः, किन्तु बुध्या गरिष्ठः। अथ तस्य वचांसि सत्यविलसितानि भान्ति।

विक्रमादित्यः — महामात्य, अयं कुमारः वराहेण मारितः भविष्यतीति तेन प्रोक्तम्। किन्तु वराहेण न मारित.। वराहचिह्नमुद्रित पताकध्वजशूलेन मारितः।

अमात्यः — महाराज अधुनापि भवतः शङ्का अस्ति किम् ?

विक्रमादित्य —शङ्का नहि। किन्तु वराहेण न मारितः किन्तु शूलेन मारितः।

अमात्यः — महाराज मिहिराचार्याणा ज्योतिष सिद्धान्तस्य कलङ्कमापादयितुं भवन्तः प्रयतन्ते किम् ?

विक्रमादित्यः — नाहं प्रयतामि। किन्तु गतं कथयामि।

अमात्यः —राजन् वयं कुमारस्य रक्षणोपायान् व्यरचयाम। तस्मात् *वराहस्य नगरप्रवेशः असम्भवः आसीत्।*

विक्रमादित्यः — येन केनापि रूपेण मृत्यु· संप्राप्त· ।

अमात्यः — जगति मरणमवश्यमेव जन्तोः । विचारेण नहि प्रयोजन विद्यते ।

विक्रमादित्य· — अमात्य, अहं पुत्रशोकेन प्रसतप्तमानसोऽपि मिहिराणा मेधाशक्त्या अत्यन्तचकितः सर्वदा तमेव चिन्तयामि।

अमात्य. — राजेन्द्र, तेजस्वी दूरस्थितोऽपि, सर्वदा दवीयान् प्रतिभाति। भगवान् मिहिर. अनेककोटिक्रोश दूरे विद्यमानोपि तेजस्विना गणनाया अत्यन्त सन्निहितत्वं भजते। सा एव तेजस्विना महिमा।

विक्रमादित्यः — अमात्यवर्य, अय ब्राह्मणः। पण्डित· महामेधावी। अय मम राज्ये, अपिच मम सभाया स्थातव्यः भवति। स· अधुना कुत्र विद्यते, किं कष्ट भजते वा, विचार्यमाणे मया असाधु कृतमिति भाति।

अमात्यः — जगति सर्वस्यापि अन्धकारपरीतजीवनं यदा कदापि जीवने भवत्येव।

विक्रमादित्यः — अय अधुना कुत्रास्ति इति भवता अभिप्रायः।

अमात्यः — श्रुत मया बदरिकाश्रमे तपतीति।

विक्रमादित्यः — तस्य मम राज्ये पुनः प्रवेशः कर्तव्यः इति समादिशतु।

अमात्यः — राजन् अधुनैव सेवकान् सम्प्रेष्य तमानेतुं आदिशतु।

विक्रमादित्यः — (घण्टा नादयति)

प्रतिहारी — (प्रविश्य) एषोऽस्मि देव। (इति नमस्करोति)

विक्रमादित्य· — सैन्याधिपतिं प्रवेशय।

प्रतिहारी — यथाज्ञापयति देव·। (इति नमस्कृत्य गच्छति)

(तत. प्रविशति सेनाधिपति·)

सेनाधिपति. — (प्रविश्य उरसि हस्त निक्षिप्य किञ्चित् अवनतशीर्ष· भूत्वा नमस्करोति)

विक्रमादित्य — अयि सेनापते शृणु, बदरिकाश्रमे तपस्यन्त मिहिराचार्यवर्यं प्रत्यानयतु भवान् इति मम आज्ञा।

सेनाधिपतिः — यथाज्ञापयति देवः। (इति गच्छति)

अमात्य — महाराजा भवन्त सुतमरणशोकेन अतीव ग्लापितमनस्का अभवन्। गत्वा भवन्त विश्रान्तिसुखमनुभवन्तु।

विक्रमादित्य — भवन्त अपि परिश्रान्ता। भवन्त अपि गच्छन्तु।
(इति उत्थाय अन्त प्रविशति, अमात्य अपि तमनुसरति)

(यवनिका पतति)

* * *

अष्टमं दृश्यम्

(विक्रमादित्य सिंहासने उपविशति, अमात्य पार्श्वे उपविशति, ज्योतिश्शास्त्र पारगता त्रय ब्राह्मणा पार्श्वे उपविशन्ति)

(तत प्रविशति भट)

भट — (प्रविश्य नमस्कृत्य) महाराज मिहिराचार्यवर्या आगता ते द्वारि तिष्ठन्ति।

विक्रमादित्य — अनुपद प्रवेशय।

भट — यथाज्ञापयति देव।

(तत प्रविशति मिहिर सर्वे उत्तिष्ठन्ति)

विक्रमादित्य — (तस्याभिमुख गत्वा तस्य हस्तौ गृहीत्वा विनमित गात्र) मिहिराचार्यवर्य एहि, (इति आनीय त पार्श्वे विद्यमानपीठोपरि उपवेशयति, सर्वे उपविशन्ति) मिहिराचार्य, (इति सगद्गद) कुमार दिवगत।

मिहिर — महाराज, मा विचारयतु भवान्। जगति सर्वथा जन्म कारण मनुष्यत्व भवति। तदनुसार ते जीवन्ति, म्रियन्ति च। अस्मिन् विषये श्रद्धा नदेया। जातस्यहि ध्रुवामृत्यु। जगति वृक्षस्य पुष्पाणि भवन्ति। तानि पुष्पाणि सर्वाणि शलाटव न भवन्ति। सर्वाणि शलाटव फलानि न भवन्ति। सर्वाणि फलानि नानु

भूयन्ते जनैः। इयं लोकपरिपाटिः। अत्र विचारः नहि कर्तव्यः। इयं रीतिः चर्वित चर्वणा भवति। नात्र चिन्ताहेतुः विद्यते।

विक्रमादित्यः — आचार्यवर्य वयं राजानः अरिषड्वर्गादिभिः जीवामः। युष्मादृशाः चिन्ताविहीनाः विरागिणः। वयं तु सुतरां लौकिकाः। अस्मादृशानां सर्वदा लोकविचारः एव। तस्मात् कारणात् वयं मलिनाः सञ्जाताः।

मिहिरः — महाराज तथा मा वक्तव्यम्। सर्वः सर्वं न भवति। सर्वेषां जीवन पद्धतिः विभिन्ना। नत्रा चिन्तायाः हेतुः विद्यते।

विक्रमादित्यः — मिहिराचार्याः, अहं क्षन्तव्योऽस्मि। भवन्तः ऋषिप्रायाः। सर्वमपि यूयं द्रक्ष्यथ समक्षं। तादृशी शक्तिः अस्माकं न विद्यते।

मिहिरः — राजेन्द्र, भवन्तः धीरोदात्त नायकाः। भवद्भिः विना देशः अराजकः भविष्यति। गतं गतमेव न स्मर्तव्यं। वयं भारत संस्कृति प्रेमिणः। वयं शास्त्र रक्षकाः, किन्तु न मारकाः भवेम।

विक्रमादित्यः — मिहिर अद्य मे मतिः विकसिता। अद्य प्रभृति भवान् मे सभा रत्नेषु नवमः भविता। भवता नाम अद्य प्रभृति वराहमिहिरः इति भविष्यति। भवन्तः मे कुमारस्य मृत्युः एकेन वराहेण भविष्यतीति सूचितवन्तः। ततः भवता नाम आगामिनि काले जगति सर्वेषां तत्रभवन्तः मम राज्ये विराजिताः ज्योतिषाचार्यवर्याः इति सुविदितं भविष्यति।

वराहमिहिरः — राजेन्द्र, सर्वं जगति सहकारेण अन्योन्याश्रयेण भासते। सर्वं वस्तु परस्पराधीनं भवति जगति। भवद्भिः वयं अस्माभिः भवन्तः अन्योन्याश्रयेण भारतीय इतिहासे चिरस्थानं अक्षरत्वं च भजिष्यामः। स्वस्ति भवते। (इति आशीर्वादान् ददाति)

विक्रमादित्यः — आचार्यवर्य युष्मभ्यं नमः। (इति नमस्करोति)

वराहमिहिरः — प्रचन्द्रमास्थिरतिं दीर्घमायुः।

(यवनिका पतति)

* * *

।। बिल्हणीयम् ।।

वन्दे प्रभाविनममुं सरसं महान्तं ।
संतानवज्जगति संततिमूलभूतम् ।
लावण्य शोभितमहर्निशसंगमात्त ।
सौन्दर्यपायिनमहं मधुयौवनाख्यम् ।।

(नान्द्यन्ते)

शशी — अयि भो समास्तारा अद्य वय काश्मीरपण्डित बिल्हणकवे जीवितमुद्दिश्यकृत नाटक बिल्हणीय प्रयोक्तु उद्यतास्म । तदर्थं मे जाया ज्योत्स्ना अस्मिन् नाटके यामिनी पात्रधारी भविष्यति ।

ज्योत्स्ना — (सवेग प्रविश्य) अरे प्रिय किमर्थं मम नाम सर्वेषा समक्ष घोषयसि । नाहमुक्ताऽस्मि यत्किमपि भवता नाटकमुद्दिश्य । किमेतत् नाटकम् ? कोऽत्र कवि ? सविस्तर कथय प्रथमत । अनन्तर यदि इच्छा भवेत तर्हि नटिष्यामि ।

शशी — अधुना कथयितुमेव अत्राऽगतोऽस्मि । कथयामि शृणु । अस्य नाटकस्य नाम बिल्हणीयम् । अस्य नाटकस्य कर्ता गीर्वाणान्ध्रभाषाप्रवीण कलाभिमानी महाकवि पण्डित परीक्षित् शर्मा ।

ज्योत्स्ना— अय महाकवि कथम् ?

शशी — अय यशोधरा महाकाव्यकर्ता । तस्मात् अय महाकवि ।

ज्योत्स्ना — कलाभिमानी कथम् ?

शशी — लघित गीता लहरी इति, अक्षय गीत रामायणमिति च गेयकाव्यद्वय लिलेख तस्मात् कलाभिमानी । अस्य गीर्वाणगेयचक्रवर्तीति नामान्तरमपि विद्यते ।

ज्योत्स्ना — पण्डित कथम ।

शशी — अय आबाल्य गीर्वाणान्ध्रभाषाद्वय कृतपरिश्रम । तयो भाषयो पदवीरश्च । अय विंशति सवत्सराणि शालासु गीर्वाणान्ध्राग्ल भाषा बोधयामास ।

ज्योत्स्ना — अधुना विदितास्मि । अह सान द अस्मिननाटके बहु रूपी भविष्यामि ।

शशी — प्रिय ज्योत्स्न अस्मिन वसन्तर्तौ किंचित् सगीतक श्रावय ।

ज्योत्स्ना प्रिय श्रृणु श्रावयामि ।

गीतम (वसन्त रागे)

अय सकुल जीवन सुखकर मधुर हसन्तम
गाय गाय वसन्त रागिणि ऋतुराज वसन्तम ॥ध्रु॥

शशि पिककीर मयूर मधव्रत निचय समाकुल सुषमाकान्तम
सकलाशावृत चटुल समीरण शीतल पूत सुग ध विभान्तम १

युवतीजन हृदयारविन्द मधुबिन्दु गुञ्जन चपल मिलिन्दम
मदनानल ज्योतिर्मय सूनपरागातिशयानन्तानन्दम २

धरणियुवतीरञ्जन प्रथमसमागम सतत बहुनिरसम
विकसित नीरज रागपराग विचर्चित मधुपरिमल हसितम ३

खगकुल कोकिल कूजन मद्दगलवाद्य सुनादावलि कलितम
भ्रम्भर गुञ्जन शब्दायित ऋतुगुणगण नामावलि लसितम ४

शशी — (आकर्ण्य) प्रिय ज्योत्स्न मदनाभिरामनृपते पुत्रिका यामिनी सगीतशाली गायन्ती आस्ते । एहि गच्छाव श्रोतुम । (इति उभौ गच्छत)

(सगीत शालाया मृदङ्ग मदल वीणा पणव वेणु इत्यादय सन्ति यामिनी वीणा वादयन्ती गायन्ता आस्ते। तस्या निकट देवी रति उपविश्य गान श्रृणोति)

गीतम् (भीमपलास रागे)

आयाता मधुर मधुमामिनी । मुग्धवधूजन जीवनदायिनी
मलयानिल चञ्चल गामिनी । मधुमय जीवित वसन्तभामिनी ॥ध्रु.॥

चिरयति मे जीवन वसन्तदाता । अभिनव यौवन मदसंभरिता
रसमय प्रियतम पदसंगीता । वल्लभ प्रतिकृति दर्शन रमिता १

निन्दति स्वान्तं रन्जित संध्यारागम् । शतथा मन्जुल गन्धिल कुसुमपरागम
मधुरं गायति प्रियतम मोहन रागम् । प्रथयति लोके प्रेम लतानुरागम् २

परभृतविरुतं कुरुते हृदयम् । पति विरहित जनमनुरागमयम्
कर्षति चापं मुन्चति शरनिचयम् । अबलाजन हृदयमदयमदनोऽयम् ३

रतिः — बाले यामिनि त्वं संगीत नाटचयोः गायिका अपिच अभिनेत्री संजातासि । सम्यक् गेयमिदं गीतं त्वया । अस्य गीतस्य अर्थः कः विस्तारय पुत्रि ।

यामिनी — मातः अहं संगीतं जानामि, नाट्यं जानामि, किन्तु अस्य गीतस्यार्थं न जाने ।

रतिः — अर्थं विना पठनं गानं च व्यर्थं भवति ।

यामिनी — जानामि मातः । नटने गायने च विना संस्कृत साहित्यस्य ज्ञानं तन्निष्टः रसः पराकाष्ठां न प्राप्नोति ।

रतिः — अर्थज्ञानं विना आनन्दः कथं भवति ।

यामिनी — न भवति । किन्तु केवल श्रवण दर्शनमात्रेण अर्धानन्दो भवति ।

रतिः — कस्येयं गीतिः ।

यामिनी — गीर्वाण गेयचक्रवर्तिनः गीतिरियमिति जगति प्रथा वर्तते ।

रतिः — योवा कोवा भवतु इयं गीतिका श्रवणानंदकरी केवलं नहि किन्तु अत्यन्तात्मानंदकारिणी भवति ।

यामिनी — जननि, मे संस्कृत साहित्याभ्यासे अत्यन्त आग्रह वर्तते। भवती पितर निवेद्य संस्कृत काव्यप्रपन्चपठने सुव्यवस्था कारय।

रति — बाले अहमपि तथैव भावयामि । संस्कृतज्ञानेन विना सर्वा कला निष्फला, सकला विद्या प्राणहीना भवन्ति। सर्व अभ्याससमुदाय संस्कृतात्माहीन निर्जीव भवति। संस्कृतज्ञानेन विना कलाभिमान विडम्बनाप्राय भवति।

रति — बाले त्व सर्वाङ्ग सुन्दरी। सत्य यामिनी इव राजसे। किन्तु यदि प्रमथचन्द्रस्य आविर्भाव भवेत तर्हि सर्व जीवित कलामय भवत्येव।

यामिनी — (अवहित्थया वीणा पार्श्वे निक्षिप्य उत्तिष्ठति)

रति — (हसन्ती) बाले कथ त्व लज्जावनताऽसि ?

(तत प्रविशति वेत्रवती)

वेत्रवती — तत्र भवति राज्ञि अभिवादयेऽहम्। (इति अभिवादन करोति) तत्रभवत्यो उपस्थितौ अपेक्ष्यते महाराजन।

रति — हन्जे, त्व गच्छ। आवा आगच्छाव ।

वेत्रवती — यथाज्ञापयति देवी। (इति नमस्कृत्य गच्छति)

रति — बाले यामिनि एहि गच्छाव । (इति यामिन्यासार्थं गच्छति)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(मदनाभिराम नृपति सिंहासन उपविष्ट परिचारिके वीजयत अमात्य किन्चित दूरे पार्श्वत आसने उपविष्ट)

मदन — अमात्य शखर, अद्य सवत्रापि देश घोषणा कर्तव्या।

अमात्य — कामुदिश्यघोषणाकर्तव्या निवेदयन्तु भवन्त ।

मदनः — अमात्य शेखर, सगीतनाटचाभिनिवेशिना युवतीना सस्कृत पाठयितु एकः काव्यालङ्कारज्ञः पण्डितः मनुपदमेव अपेक्ष्यते इति घोषणा कारयन्तु।

अमात्यः — महाराज कुमार्याः सस्कृताध्यापने काव्यालङ्करणज्ञस्य आवश्यकता कथ वर्तते। अस्मदीय राज्ये वहवः पण्डितोत्तमाः सन्ति। तेपु यः कश्चन नियुक्तः यदि भवेत् सर्वमपि सुव्यवस्त भवेत् इति मे अभिप्रायः।

मदन. — साधूक्त भवता। किन्तु अत्रस्याः पण्डिताः पण्डितं मन्यमानाः। ते अतीव छान्दसाः उत दाम्भिकाः, मोचेत् सर्वशास्त्राधीतारः नाह जाने।

अमात्यः — वहवः वैयाकरणा. वर्तन्ते।

मदनः — वैयाकरणा. कविताकन्यायाः जनकोपमाः भवन्ति। ते न जानन्ति कविता सौन्दर्यम्।

अमात्यः—विना च व्याकरण सस्कृताध्ययन कथ भविष्यति महाराज।

मदन — अमात्यवर्य जानामितत्। किन्तु कलाभिमानिना अधिक व्याकरण पाण्डित्य मा भवतु। तेषा तेन पाण्डित्येन उपयोग. नास्ति। कवितायाः भाषायश्च यावत् आवश्यकी तावत् केवल व्याकरण सम्यक् अध्ययनीय वर्तते।

अमात्य — तथा यदि भाति भवता ऊहाप्रपञ्चे, तर्हि तार्किकाः विद्यन्ते राज्ये। विना च व्याकरणतर्क शास्त्राध्ययन सस्कृतभाषाध्ययने पाटव न भवति।

मदन. — महामात्य, कलाभिमानिना तर्केण किं प्रयोजनं। तार्किकाः अलर्क समानाः। ते कविता कन्यायाः भ्रातृस्थानं भजन्ते।

अमात्यः — मदन भूपते, एवं यदि भवेत् तर्हि मीमासका. सन्ति राज्ये। मीमासाशास्त्र ज्ञानदायक भवति। तच्च शास्त्र सर्वशास्त्राणा आयतन भवति।

मदन — मन्त्रिवर्य, मीमासका. इहलोक सत्यज्य परलोक चिन्तका. भवन्ति। तस्मात् ते नपुसकप्रायाः इति केषाचन मतम्। तैः शास्त्रिभि कलाविदा, कलाभिज्ञानाना न किमपि प्रयोजन विद्यते।

अमात्य. — तर्हि काव्यालङ्कारालङ्कृताय पण्डिताय घोषणा कारयिष्यामि।

मदन — शीघ्र कारयन्तु घोषणाम्।

दौवारिक — (प्रविश्य) महाराज। बिल्हणोनाम कश्चन कविः काश्मीर देशात् समागत' द्वारि तिष्ठति तत्रभवत' द्रष्टुम्।

मदनः — अनुपद प्रावेशय त काश्मीर कविम्।

दौवारिक. — यथाज्ञापयति देवः। (इति प्रणम्य गच्छति)

मदन. — अमात्यवर्य, वय अभ्यागत विचारयिष्याम.। कोऽयमिति।

अमात्यः — काश्मीर देशात् समागत इत्यनेन ज्ञायते, अय काश्मीर देश सस्कृतपण्डितः कविश्च इति।

मदनः — पश्याम'।

(तत प्रविशति कविवेषे बिल्हण)

बिल्हण — (हस्तमुद्यम्य) स्वस्ति भवते।

विभाति लोके गगनं प्रशान्तं। मृगाङ्कभाभिः प्रिययामिनीषु।
किमत्र चित्रं तव राज्यपालने। दिवाऽनिशं कीर्तित चारुचन्द्रमाः॥

मदन — भो कविवर्य भवत कवितया वय प्रसन्नास्म। अत्रोऽप-विशन्तु भवन्त। (इति आसन दर्शयति)

अमात्य — कविपुङ्गव तत्र भवन्त काव्यालङ्करणज्ञा इति मे मनीषा।

बिल्हण — अयि अमात्य शेखर।

काव्यालङ्कार तज्ञोहं। कवितासौन्दर्यमोहितः।
राजाऽहं कविताराज्ये। मकुटेन विना भुवि॥

अमात्य — साधु कविवर्य। काश्मीरदेशात् भवन्तः अत्र आहूताः इव समागतवन्त कथ निवेदयन्तु।

विल्हणः — अमात्यवर्य ।

> विद्वानहं कविश्चैव । देशभक्तः कलाप्रियः ।
> ब्राह्मीकटाक्षपूतोऽहं । राष्ट्रालोकन तत्परः ।।

तस्मात् अस्मदीय पवित्र भारतवर्षं द्रष्टुं समुत्सुकः सकलधराधिप मण्डल मदनाभिरामनृपतिं च द्रष्टु समागतोऽस्मि ।

अमात्यः — कविवर्य, नाना नारी निष्फला लोकयात्रा इति शास्त्र प्रमाणं विद्यते । भवान् एकाकी कथ समागतोऽस्ति ।

विल्हणः — शास्त्रप्रमाण वर्तते । किन्तु अह एकाकी, ब्रह्मचारीच, तस्मादेव भारतवर्षं द्रष्टु समागतोऽस्मि ।

मदन· — भारतवर्ष दर्शनेन कोलाभः वर्तते ।

विल्हणः — महाराज, प्रत्येक देशभक्तस्य भरतराष्ट्र दर्शन योग्य भवति । सर्व भारतराष्ट्रदर्शनेन निखरा देशभक्तिः भवति जनस्य ।

मदन· — अयि भोः कविवर्याः भवन्त. अस्मिन् राज्ये कति दिवसाः स्थास्यन्ति ।

विल्हणः — महाराज वयं भ्रमराः इव इतस्ततः ज्ञानमधुसंचयनार्थं भ्रमामः । नाहं जाने कति दिवसाः अत्राहं स्थास्यामीति ।

मदनः — कविवर्य, भवान् कतिपय वत्पराणि अत्रैव अस्मदीय राज्ये स्थित्वा मम कुमार्यै काव्यालङ्कारशास्त्र पाठयन्तु इति अस्मदीय देशः ।

विल्हणः — महाराज अहं भवता आदेशं स्वीकृत्य शिक्षको भूत्वा सस्कृतभाषा काव्यालङ्कारशास्त्रंच अध्यापयेयम् ।

मदनः — मे कुमारी यामिनी संगीतनाट्ययो· निष्णाता तस्यै अध्यापनीय वर्तते ।

बिल्हण. — महाराज, मम कश्चित् नियम· विद्यते ।

मदनः — कोऽयं नियमः ?

बिल्हणः — अहं मम जीवने कुष्ठरोगिण न पश्येय इति ।

मदन — अस्मदीय देशे कुष्ठरोगिण नसन्ति ।

बिल्हण — "निरस्त कुष्ठरोगिण देश कुर्वन्त्विति मम विज्ञप्ति ।

मदन — मा विचारयन्तु भवन्त । सर्वं यथायोग्य कुर्याम् ।

अमात्य — महाराज, अम्बरमणि गगनमध्य आरोहति त्वर्यतां मध्यान्ह भोजनाय।

मदन — हा, अद्य सभा परिसमाप्ता। अमात्यवर्य बिल्हण महाकवय योग्य सुसज्जित वसति स्थाम प्रकल्पयन्तु। (इति निर्गच्छति)

(यवनिका पतति)

* * *

चतुर्थ दृश्यम्

(मदनाभिरामनृपति अमात्यश्च उपविष्टौ स्वीय स्थानयो)

मदन — अमात्य शखर अस्मदीय भाग्यवशात अस्माक अप्रयत्नन कुमार्या शिक्षणार्थं एक महाकवि अस्मदीय गह सप्राप्त । स्वय तीर्थक्षत्र यत् अवगाहनार्थं गम्यते, तदेव अस्मदीय समुख समागतम ।

अमात्य — सत्यमुदीरित भवद्भि । (इति शङ्कते)

मदन — किमपि भवदभि आशङ्कयते ।

अमात्य — महाराज, अय कवि , युवा , सुन्दर , पण्डित , अलकारशास्त्रज्ञ । यदि अय कुमार्या शिक्षक भवेत् तर्हि क्षत्रिय कुलस्य कलङ्को भविष्यतीति मया आशङ्कयते।

मदन — मन्त्रिवर्य, वय सुक्षत्रिया ते वाह्मणा कवय । गौतम धर्मसूत्रानुसार सलोम विलोम विवाह मा भूयात इति केवल अस्मदीय अभिप्राय ।

अमात्यः— महाराज, यामिनी तन्वी, श्यामा, संगीतनाट्यनिष्णाता। अस्मिन् संदर्भे गुरुशिष्य भावनापेक्षया प्रियप्रेयसीभावः शतधा स्पष्टं संदृश्यते।

मदनः — भवद्भिः प्रतिपादित सत्य प्रतिभाति मे।

अमात्यः — अत्र विद्यमानविषयाः एतादृशाः विद्यन्ते। यस्मिन् कस्मिन् क्षणे यत् किमपि भवितु शक्यं भवति।

मदनः — इब लोकरीतिः यत् संगीतेन जनः मोहितः भवति।

अमात्यः — (विहस्य) नाट्येन कामुकः भवति।

मदनः — साहित्येन रसिकः भवति।

अमात्य. — मानवः एकेन गर्वितः भवति।

मदनः — (विहस्य) किं वक्तव्यं समवायेन।

अमात्यः — तस्मात् अहं चिन्तयामि कमप्युपायम्।

मदन. — कोऽय उपायः।

अमात्यः — -अहं एव चिन्तयामि। कविः बिल्हण. कुष्ठशरीरिण न पश्यतीति तदीय भाषणेन अस्माक विदित मासीत्। तस्मात् वयं एक नाटक खेलिष्याम।

मदनः — किं तन्नाटक अमात्यवर्य।

अमात्य — महाराज श्रृण्वन्तु भवन्तः। यामिनी अक्षणाकाण न पश्यतीति वय जानीमः।

मदन. — हा सत्यम्। तस्मात्।

अमात्य — तस्मात् यामिन्यै, बिल्हणः अक्षणाकाण. इति, बिल्हणाय यामिनी कुष्ठरोगिणी इति वक्ष्यामः। तयोर्मध्ये पटमेक वध्वा विद्याभ्यासार्थं प्रारम्भ करिष्यामः इति मे बौद्धिक तरङ्गः प्रचोदयति माम्।

मदनः — अमात्यवर्यं, भवान् अत्यन्त बुद्धिशाली। अयं अद्भुतोपायः।

मदनः — अस्मदीय देशे कुष्ठरोगिणः नसन्ति ।

बिल्हणः — निरस्त कुष्ठरोगिणं देशं कुर्वन्त्विति मम विज्ञप्तिः ।

मदनः — मा विचारयन्तु भवन्तः । सर्वं यथायोग्यं कुर्याम् ।

अमात्यः — महाराज, अम्बरमणिः गगनमध्यं आरोहति त्वयंता मध्यान्ह भोजनाय ।

मदनः — हा, अद्य सभा परिसमाप्ता । अमात्यवर्यं बिल्हण महाकवये योग्यं सुसज्जितं वसति स्थानं प्रकल्पयन्तु । (इति निर्गच्छति)

(यवनिका पतति)

* * *

चतुर्थ दृश्यम्

(मदनाभिरामनृपतिः अमात्यश्च उपविष्टौ स्वीय स्थानयोः)

मदनः — अमात्य शेखर अस्मदीय भाग्यवशात् अस्माक अप्रयत्नेन कुमार्याः शिक्षणार्थं एकः महाकविः अस्मदीय गेहं संप्राप्तः । स्वय तीर्थक्षेत्र यत् अवगाहनार्थं गम्यते, तदेव अस्मदीय संमुखं समागतम् ।

अमात्यः — सत्यमुदीरित भवद्भिः । (इति शङ्कते)

मदनः — किमर्थं भवद्भिः आशङ्क्यते ।

अमात्यः — महाराज, अयं कविः, युवाः, सुन्दरः, पण्डितः, अलंकारशास्त्रज्ञः । यदि अय कुमार्याः शिक्षकः भवेत् तर्हि क्षत्रिय कुलस्य कलङ्को भविष्यतीति मया आशङ्क्यते ।

मदनः — मन्त्रिवर्य, वयं सुक्षत्रियाः । ते ब्राह्मणाः कवयः । गौतम धर्मसूत्रानुसार सलोम विलोम विवाहः मा भूयात् इति केवलं अस्मदीय अभिप्रायः ।

अमात्यः— महाराज, यामिनी तन्वी, श्यामा, संगीतनाट्यनिष्णाता। अस्मिन् संदर्भे गुरुशिष्य भावनापेक्ष्या प्रियप्रेयसीभावः शतधा स्पष्ट संदृश्यते।

मदनः — भवद्भि· प्रतिपादित सत्य प्रतिभाति मे।

अमात्यः — अत्र विद्यमानविषयाः एतादृशाः विद्यन्ते। यस्मिन् कस्मिन् क्षणे यत् किमपि भवित् शक्यं भवति।

मदनः — इदं लोकरीतिः यत् संगीतेन जनः मोहितः भवति।

अमात्यः — (विहस्य) नाट्येन कामुकः भवति।

मदनः — साहित्येन रसिकः भवति।

अमात्यः — मानव. एकेन गर्वितः भवति।

मदनः — (विहस्य) किं वक्तव्यं समवायेन।

अमात्यः — तस्मात् अहं चिन्तयामि कमप्युपायम्।

मदन — कोऽय उपायः।

अमात्यः — अहं एव चिन्तयामि। कविः विल्हण कुष्ठशरीरिण न पश्यतीति तदीय भाषणेन अस्माक विदित मासीत्। तस्मात् वयं एक नाटक खेलिष्याम·।

मदनः — किं तन्नाटक अमात्यवर्य।

अमात्य. — महाराज श्रृण्वन्तु भवन्तः। यामिनी अक्षणाकाण न पश्यतीति वय जानीमः।

मदन. — हा सत्यम्। तस्मात्।

अमात्य — तस्मात् यामिन्यै, विल्हणः अक्षणाकाण. इति, बिल्हणाय यामिनी कुष्ठरोगिणी इति वक्ष्यामः। तयोर्मध्ये पटमेक बद्ध्वा विद्याभ्यासार्थं प्रारम्भ करिष्यामः इति मे बौद्धिक तरङ्गः प्रचोदयति माम्।

मदनः — अमात्यवर्य, भवान् अत्यन्त बुद्धिशाली। अयं अद्भुतोपायः।

अमात्य — एषा यामिनी पटस्य इतः पठिष्यति, पटस्य ततः कवि बिल्हण अर्थ कथयिष्यति। कतिपयकालानन्तर यामिनी गीर्वाणकवयित्री भविष्यति।

मदन — इय कल्पना अभूतपूर्वा अपिचावश्य आचरणीया। एवमेव ताभ्या द्वाभ्या सूचयितव्यम्।

अमात्य — महाराज, शुभस्य शीघ्रम्। श्वः प्रभृति सस्कृत शिक्षणा प्रारभ्यते।

मदन — अमात्य भवान् गत्वा सर्व व्यवहार स्वय विलोक्य कारयतु। (इत्युत्थाय गच्छति)

अमात्य — तथव (इति राजान अनुसरति)

(यवनिका पतति)

* * *

चतुर्थ दृश्यम्

(पटस्य उभयत यामिनी बिल्हणो उपविष्टौ)

यामिनी — अयि गुरो अभिवादय। (इति नमस्करोति)

बिल्हण — कल्याणमस्तु, विदुषी भव। (इति हस्तमुद्यम्य आशिष दशाति) अयि तरुणि यामिनि, मङ्गलादीनि मङ्गलमध्यानि मङ्गलान्तानि शास्त्राणि प्रथन्ते। तस्मात् त्व प्रथमत देवप्रार्थना कुरु। अनतर पाठ प्रारभ्यते।

यामिनी — करोमि भो।

शुक्लांबरधरं विष्णुं। शशिवर्णं चतुर्भुजम्।
प्रसन्नवदनं ध्यायेत्। सर्वविघ्नोऽप शान्तये॥

बिल्हणः — दैवस्तोत्र सम्यक् कृत भवत्या। त्व रघुवश काव्ये प्रथम श्लोकं पठ।

यामिनी — वागर्थाविव संपृक्तौ। वागर्थः प्रतिपत्तये।
जगतः पितरौ वन्दे। पार्वती परमेश्वरौ॥

बिल्हण — कुमार सम्भवकाव्ये प्रथम श्लोक पठ।

यामिनी — अस्त्युत्तरस्यां दिशि देवतात्मा।
हिमालयो नाम नगाधिराजः।
पूर्वापरौ तोयनिधी विगाह्य।
स्थितः पृथिव्या इव मानदण्डः॥

बिल्हण. — अद्य एतावत्पर्यन्त विरम। त्वं गच्छ। सर्वं यत् कथित तत् कण्ठपाठ कुरु।

यामिनी — तथैव करिष्यामि गुरो। नमामि भो गच्छाम्यह। (इति गच्छति)

बिल्हण. — अहो इय शरच्चन्द्र चन्द्रिका। एषा रसिकान् डोलायमान मानसान् करोति। अहो चन्द्रमा, लोके सर्वासु भाषासु सर्वे कवयः भवन्त अनेक सहस्र वर्षेभ्य. वर्णयन्ति। तथापि न कोऽपि तृप्तः अभूत्। अह अधुना त्वा एव वर्णयामि।

अङ्कं केऽपि शशङ्किरे जलनिधेः पङ्कं परे मेनिरे।
सारङगं कतिचिच्च संजगदिरे भूच्छायमैच्छन् परे।
इन्दोयद्दलितेन्द्रनीलशकलश्यामं दरीदृश्यते।
तत्साऽन्द्रं निशि पीतमन्धतमसं कुक्षिस्थमाचक्ष्महे॥

(तत प्रविशति यामिनी किंचित् शृण्वन्ती)

यामिनी — (मनसि) अहो विल्हणकवे कण्ठगत स्वर इव प्रतिभाति। (आकर्ण्य) हा सत्य इद विल्हणकवे स्वर एव। इद गीत नहि। सर्वमपि श्लोकबद्ध भवति। अरे अय आकाश विराजमान चन्द्रमस विलोक्य कविता करोतीति मन्ये। इय अस्य कविता इव आभाति। अहो अस्य कवितायाः मधुरता अहो कण्ठगतस्वर माधुर्यता च। अय अन्ध खलु। अन्ध चन्द्रमस विलोक्य कथ कविता करिष्यति। अत्र विद्यते किंचित् अव्यक्त रहस्यम्। भवतु मे व्रतभङ्ग। अह एन कविपुङ्गव अवश्य पश्येयम्। (इति पट उन्नमय्य त पश्यति) अहो किमय मानव उत देव। कियान सुन्दर अय कवि। अय कवित्वमिव सुन्दर। अय अन्ध नहि। अय आकर्णन्ति विशाल लोचन। अय यामिनी रमण चन्द्रमा। अय सगीत साहित्य कलानिधि। लोक एन अन्ध इति कथयति। वत अह अस्य दर्शनानुपदमेव चित्तजन्यथाव्याधिना पीडिता भवामि। नाह सहे इमा बाधाम्। (इति गत्वा तस्य उत्सङ्ग पतति) महाकवे रक्षतु भवान।

विल्हण — अहो त्व यामिनी। त्व कुष्ठरोगिणी नहि। अहो इय लावण्यमूर्ति। इय सुवर्ण शलाका। यामिनी भवती सस्कृतसाहित्यस्य रस मूर्ति। त्व रसात्मा। अह त्वा मन्मथसाम्राज्यराज्ञी करिष्यामि। उत्तिष्ठ। (इति ता उत्थापयति)

यामिनी — अयि विल्हणकवे त्व मे जीवितम्। (इति तमालिङ्गति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(मदनाभिराम महीपति, तस्य पत्नी रति, अमात्यश्च उपविष्टा सर्वे विचारत्रस्ता विषण्णवदना भवन्ति)

मदन — अय विल्हण, कवि, पण्डित इति सानन्द स्वागत व्याहृतम्। कुमार्ये सस्कृतशिक्षणा सम्यक् भविष्यतीति परमोत्सुक अभवम्। किन्तु सर्वमपि भस्मचये विकिरित सुगन्धजलमिव जातम्। वश कलङ्कित वभूव।

अमात्य — प्रभो मानव एक चिन्तयति दैव अन्यत् विदधाति। प्रथमत अस्माभि सर्वं सुविचार्य सम्यक रचना कृता। सापि रचना वृथा सजाता। दैवशक्ति प्रबला चकास्ति।

रति — मन्त्रिवर्य, एतादृशद्रोहस्य प्रतिक्रिया अवश्य करणीया विद्यते। किं कर्तव्य, कथ कर्तव्य विचार्यताम्।

मदन — एतादृश कर्मण वध्यस्थाने बिल्हणस्य गळकृन्तनमेव शिक्षा योग्या भवति। कोऽत्र भो।

दौवारिक — (प्रविश्य) अहमस्मि भो।

मदन — हन्तकौ समाह्वय।

दौवारिक — यथाज्ञापयति देव। (इति निर्गच्छति)

(तत प्रविशत हन्तकौ)

हन्तकौ — (अधनामित शरीरौ) आज्ञापयन्तु भवन्त।

मदन — कुकवि राजद्रोहिण बिल्हण वध्यस्थान नीत्वा गळ निकृन्त्य तस्य मासवसादिक शृगालेभ्य श्वभ्य गृध्रवायसेभ्य विकिरताम्।

हन्तकौ — यथाज्ञापयति देव। (इति नमस्कृत्य गच्छत)

रति — महाराज भवता आदेश दयाविहिन भवन्त वहुवार विचार्य कुर्वन्तु।

मदन. — नियमविनियमौ सर्वेषां एकपद्धत्या भवतः। नात्र प्रतिसंहर भवति।

अमात्यः — महाराज, पुनर्विचार कुर्वन्तु भवन्तः

मदनः — ममाऽदेशे न लेशोऽपि प्रमादः विद्यते। (इत्युत्थाय वेगं गच्छति, अमात्यः रतिश्च गच्छतः)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(ततः प्रविशति बद्धहस्तः हन्तकाभ्यां आनीयमानः बिल्हणः)

प्रथमः — अरे राजद्रोहि चल रे चल।

द्वितीयः — अय कविः।

बिल्हणः — सत्यमेवाहं कविः। कविता करोमि शृणु।

> जीवने प्रेमसंपूर्णे। मधुरं मरणं सदा।
> एतादृशं प्रेमसौख्यं। सर्वेषां नेव जायते ॥

हे यामिनि त्वं मधुमयमासान् स्मारं स्मारं सुखमनुभव।

प्रथमः—अरे राजद्रोहि कुमार्याः नामोच्चारण मा कुरु। सत्वर चल।

बिल्हणः — मनोज्ञशिल्पां सततं हसन्तीं।
प्रियां सुसंगीतरतां स्मरामि।
नाट्यादि संमूर्छित चित्तसद्यां।
रसस्वरूपां प्रिययामिनीं ताम् ॥

द्वितीय — अरे कुकवे मोच्चर कुमार्यां नाम।

बिल्हण — चन्द्रमण्डल यामिनी कर्णकुण्डल।
वल्गु वल्गन कामिनी रम्यमण्डनम्।
रम्यभाषण भारती काव्यमण्डन।
दर्पणोऽपम यामिनी गण्डमण्डलम्॥

प्रथम — अयं कामिनो उन्मत्ता जात। अरे सर।

बिल्हण — सर्वं विशाले परिदृश्यमान।
धरातले नश्वरमेव भाति।
न जीवने सत्यमिहास्ति लोके।
प्रियाङगनासमजन्यसौख्यात्॥

द्वितीय — अरे त्वं राजद्रोही असि। त्वं कविता प्रपञ्चे निवसन वाह्य न जानासि। अधुना त्वं किं जानासि? कुत्रनीयसे इति।

बिल्हण — जीवामि नाहं सखि यामिनीं विना।
जानामि नाहं सुरत विना भुवि।
प्राप्नोमि सर्वं मम सौख्य मूलकम्।
जिघ्रामि तन्वङिग कलासुवासना॥

प्रथम — अस्य कविता उत्तरोत्तर सारभूयिष्ट भवति। भवतु श्रोष्याव, कियत् काल कविता करिष्यति।

बिल्हण — प्रिये मन्मथ क्रीडा रम्य। (यामिनो स्तोत्र करोति)

स्तोत्र (दुर्गा रागे गीयते)

हे यामिनी, चन्द्र बिम्बानन। हे कामिनी, पक्व बिम्बाधरे
हे मानिनि, भ्रमर लोलालके। हे भामिनि, मञ्जु मन्दस्मिते ध्रु

हे तापमहारिणि, सौख्य सदायिनी। कामस्वर्धिनि कुभि कुभस्तनि
ऊडकणालकृते विभ्रमालकृते। भोगवासप्रिय कामगन्ध प्रिये १

नित्य सौख्यस्थिते लास्य हेवान्चिते चारु भावावृते, चारु हासावृते
बाहु बन्धस्थिते भावचित्रस्थिते। काव्यशय्यास्थिते नित्यहावस्थिते २

तुभ्य नमो यामिनि। तुभ्य नमो भामिनि
पाहि मा पाहि मा पाहि मा। तुभ्य नम ४

द्वितीय — अरे, अय देवी स्तोत्र करोति।

प्रथम – इद नहि देवी स्तोत्र भासते। किन्तु यामिनी दण्डकमिव द्योतते।

विल्हण — काश्मीरकुङ्कुमपराग विलिप्तगण्डा।
रोलम्बकलिमसमान सुदीर्घकेशा।
श्रीनागरे नुत लतान्तपरिमलास्या।
हे यामिनि प्रियसखि क्षितिदिव्यगात्रि॥

द्वितीय अय मरणात् भीत स्तोत्र करोति।

विल्हण — नाह बिभेमि दयिते मरणात कदापि।
तृप्तोऽस्मि ते विरह पीडित रुग्णचित्त।
नैवास्ति दीर्घनयने भवता विनान्या।
मामुद्धरोद्धर शुभे नुतचारुशीले॥

प्रथम — अहो एव न चलति।

द्वितीय — अय अधुना उन्मत्त जात। अस्य ताडनमेव औषध भवेत्।

(यवनिका पतति)

* * *

सप्तमं दृश्यम्

(सिंहासने राजा चिन्ताक्रान्तः उपविष्टः रतिः पार्श्वे विद्यमान सिंहासने चिन्ताक्रान्ता उपविष्टा। ततः प्रविशति अमात्यः)

अमात्यः — महाराज स्वस्ति भवते। (इति आसने उपविशति)

परिचारिका — (प्रविश्य) नमामि महाराज, कुमारी यामिनी, बिल्हण कवे, कवि विल्हण, इति जल्पन्ती विवशाङ्गी पतिता।

मदनः — परिचारिके, त्वं गच्छ।

परिचारिका — यथाज्ञापयति देवः। (इति गच्छति)

मदनः — सा मृता इति मन्ये।

रतिः — तथा मावदतु महाराज। इयमेका पुत्रिका अस्माकम्।

मदनः — किं प्रयोजन तया राजवंशजानाम्। सा राजवंश कलङ्किनी जाता।

रति — महाराज, कोऽयं राजवंशः यः कलङ्कितः। (इति क्रुद्धा भवति)

अमात्यः — मर्षय महाराज्ञि।

(ततः प्रविशति दौवारिकः)

दौवारिक — (नमस्कृत्य) महाराज, कुमारी यामिनी कवि विल्हण, मम जीवनदायिन इति जल्पन्ती सोरस्ताड क्रन्दति।

मदन — (विषण्ण वदन.) तां अत्रे प्रावेशय।

दौवारिकः — यथाऽज्ञापयति देवः। (इति गच्छति)

(ततः प्रविशति यामिनी विषण्णवदना)

यामिनी — महाराज, अभिवादये। (इति नमस्करोति)

मदन —यामिनि, दैवदृष्टया सर्वे समानाः। नात्र विद्यते लेशोऽपि पक्षपातः। राजद्रोहिणा मदीय राज्ये नहि स्थान विद्यते।

मामिनी — महाराज, अत्र कोऽभूत् राजद्रोही।

मदन — यामिनि, अत्र काऽभूत् राजद्रोहिणी इति, पृच्छ।

यामिनी — किमपराद्ध मया।

मदन — राजपरम्परा कलङ्कीकृता, खण्डिताच।

यामिनी — राजपरम्परा मण्डिता इति वक्तव्यम्।

मदन — साम्प्रदायेन भूषितोऽय राजवश' त्वया शतधा दूषित।

यामिनी — कथम्?

मदन — काश्मीर पण्डित बृवसगमेन।

यामिनी — तस्मादेव ब्रवीमि काश्मीर भूषणेन भूषित इति।

मदन — ब्राह्मणक्षत्रियाणा समागम असाप्रदायिक।

यामिनी — इय परम्परा अति प्राचीना महर्षिभ्य।

मदन — त्व मे नहि बोधयिष्यासि।

यामिनी — अधुनाहृ अधीत सवशास्त्रा अस्मि। कोऽय पराशर? केय मत्स्यगन्धी।कोऽयमगस्त्य? का लोपामुद्रा?

मदन — यामिनि तासु कथासु विद्यमान रहस्य अविचार्य त्वत्कतृक साध्विति निरुपयितु प्रयतसे कुवादं।

यामिनी — नहि निरूपयामि। सत्यमिति नेत्रोऽन्मीलन कारयामि।

मदन' — एष सगम अस्वाभाविक।

यामिनी — कथमय अस्वाभाविकः।

मदन — परम्परागत विवाह पद्धत्या न कृतोऽयं सगम'।

यामिनी — परम्परागत विवाह पद्धत्या कृतोऽयं संगमः।

मदनः — त्वं राजानं तृणी करोपि। अपेहि मम समुखात् पापी।

रतिः — अयि देव, यामिनी यत् कथयति तत् सत्यमेव। तयोः विवाहः समजनि, यतः द्वयोर्मध्ये यवनिकापट निक्षिप्तम्। संस्कृत भाषया वेदमन्त्रैश्च अन्योन्य सभाषणेन अय विवाहः कृतः।

मदनः — राज्ञि, त्वमपि यामिनी अभिसरसि।

अमात्यः — महाराज। ताभ्या यदुक्तं तत् सत्यमेव। अपिच अय ब्राह्मणः, कविः पण्डितश्च। सुन्दरः युवा। भारतनंदनवनायित काश्मीर देशात् समागतः सर्व लक्षणोपेतः।

मदनः — संस्काराः भिन्नाः भवन्ति महामात्य।

अमात्यः — भारत राष्ट्रीयाना सर्वे संस्काराः एकरूपात्मकाः भवन्ति भोः। "कन्या वरयते रूपं" अपि च द्वयोर्मध्ये अनुरागः वर्तते। द्वावपि संगीत साहित्य विद्वांसो। समवयस्को, अनुरूपिणो। सर्वमुगुणसपत्तिः एकत्र राशी भूता।

मदनः — अय अनुलाम विलोम विवाहः न भवति किम्?

अमात्यः — अधुना गतजलसेतुबन्धन किमर्थम्? महाराज, मे बुद्धिः कथयति, अय सर्वथा युक्तः योग्यः विवाहः इति।

मदनः — अमात्य, अङ्गीकरोम्यह ते युक्तिवादम्। (यामिनी विलोक्य) कुमारि यामिनि, त्व मा विचारय। निश्शङ्कं त्व तव पति विल्हणमनुव्रज। सुखेन तेन सार्थं जीवनं यापय। अत्र संगीतसाहित्ययोः विवाहः कृतः।

यामिनी — पितः भवान् उदारवान्। राष्ट्रहितः जीवनः। अह भोः अभिवादये। (इति नमस्कृत्य मातुः समीप गत्वा मातर आलिङ्ग्य नमस्कृत्य मन्त्रिणः समीप आगत्य तं नमस्कृत्य) अयि अमात्यवर्य अह भवता आशिषः कामये। (इति नमस्करोति, अमात्यः आशिषः ददाति, यामिनी गच्छति)

मदनः — (घण्टा ताडयति)

(तत प्रविशति भट)

भट — अयमस्मि देव । (इति नमस्करोति)

मदन — अस्मदीय जामातु कविबिल्हणस्य वधामा भूयात् इति सत्वर वध्यस्थान वार्ता प्रेषय।

भट — यथाज्ञापयति देव । (इति निगच्छति)

(यवनिका पतति)

*　*　*

अष्टमं दृश्यम्

(वध्यस्थाने बिल्हण भटौ च प्रविशन्ति, तौ स्वीय कृपाणौ धारायुते कुरुत, बिल्हण कवयति)

बिल्हण — अहो मे हृदय अति निर्भर भवति । यत

यामिनी कामिनी भूत्वा । प्रविवेश हृदन्तरम् ।
यथाऽपगा विशत्याशु । रसराशि महोदधिम ।।

(तत प्रविशति भट)

भट —अयि हन्तकौ, बिल्हण महाकवि मदनाभिराम नृपते जामाता तस्मात् अब अवध्य इति राज्ञा आदेश ।

प्रथम — अय बिल्हण मृत्युमुखात् परावृत्त । अय मृत्युजय ।

द्वितीय — अय महाराजाना जामाता अभूत् । अय अस्माक पूज्य । (इति नमस्करोति द्वावपि हन्तकौ गच्छत)

(तत प्रविशति यामिनी)

यामिनी — बिल्हण महाकवे क्षमस्व माम्। अहमेव कारण तव अस्याः दशाया.। (इति पादयोः पतति)

बिल्हणः — प्रिये यामिनि, नापराद्ध मे भवत्या। इय दशा गीर्वाण साहित्ये भारतवर्षे च वैशिष्टयपूर्णं प्रतिभाति। अय विवाहः लोक सामान्य विवाह. नहि, किन्तु अय संस्कृत सगीतयोः विवाहः। अय आदर्श विवाहः। नात्र चिन्ता कार्या। आवा सस्कृत सगीत कल्याणकारको अभवाव। (इति ता उद्धरति)

यामिनी — प्रिय, बिल्हण, भवान् भारतीय संस्कृति प्रतीक अस्ति। ते भावना अत्यन्त उदार स्वर्लपिणी। अह नितान्त भवता सहवासेन भारतीय सस्कृतिसंरक्षणे कटिबद्धा भवेयम्।

बिल्हणः — प्रिये यामिनि,

काश्मीरकुङकुमपराग विलिप्तगण्डा।
रोलम्बकालिमसमान सुदीर्घकेशा।
श्रीनागरे नृत लतान्तपरीमलास्या।
हे यामिनि प्रियसखि क्षितिदिव्यगात्रि॥

(इति ता आलिङगतु इच्छति)

यामिनी — (किंचित् पश्चात् अपसृत्य) प्रिय सर्वदा समक्ष शृङगार प्रदर्शन किमर्थम्?' तच्च प्रदर्शनं केलीगृहे कर्तव्यम् निर्भीकम्। प्रिय, जानाम्यह, त्व बहु बुभुक्षितोऽसि इति। किन्तु पश्य जगति जन. बुभुक्षितोऽपि भोजन एकहस्तेनैव खादति न किन्तु द्वाभ्या हस्ताभ्याम्। किंचित्काल धैर्यमवलम्बस्व।

बिल्हण — प्रिये विना च तव दशन तव देहस्पर्शन तवाधरपान नाह जीवितु शक्नोऽस्मि, एहि, निवसतु मे बाहुपञ्जरे शुको इव। (इति बाहू प्रसारयति)

यामिनी—प्रिय शृणु, आवयोः सगमे अह एव भवामि, चिन्तयामिच।

बिल्हण — कथम्?

गीतम् (कल्याणी रागे)

यामिनी – त्वमेवाह् त्वमेवाह् त्वमेवाहर्निश मे
जीवने रमसे भृशम्, स्फुरशेऽनिशम् ध्रु.

एषा पौर्णिमा रम्यानिशा
बालाह् सदा सुतरा सुखे विवशा
त्वद्दर्शन विस्मृत तनु भावा
आतत चित्तज भावावेशा ।। १

बिल्हण — चालन चञ्चल गुरुतर श्रोणी भारा
व्यावर्तन शिखरित पीवर कुचभारा
कङ्कण झण झण निक्वण क्वणिता
पारयसीहा हृदय परवश कामावेशा ।। २

यामिनी — शीतल मार्दव सैकत शय्यायाम्
चन्दन चर्चित गन्धिल देहलतायाम्
शारद शुभ्राशुक ज्योत्स्नायाम
क्रीडावावा सुरताऽलिङ्गन डोलायाम् ।। ३

बिल्हण — ते मधुराधर दशनक्षत भणितम्
तनु ते स्वर्गसुख परमानन्दम्
तव सुन्दर शारद नीरज मधुवदनम
आह्वयतीव मधुपानाय यौवन भ्रमरम् ।। ४

यामिनी — त्वत् परिरम्भण पुलकित देहा
व्यपगत लौकिक बाधा पाशा
गत जन्मनि सचित पुण्य वला
सुखमय गाढालिङ्गन विवशा ।। ५

बिल्हणः — मन्मथ शय्या विपुल श्रोणी बिम्बम्
लाक्षा रजित शिंजा ध्वनित पदलास्यम्
कुरुते मे हृदि शाश्वत मुद्राम्यासम
कल्पय देवि परिरम्भण सुखसमयम् ।। ६

(इति आलिङ्गितु गच्छति)

(यवनिका पतति)

* * *

॥ राष्ट्रायेदम् ॥

अन्तरात्मनिभ संस्कृतियुतं । वेदवाङ्मयपुनीतदेहिनं ।
सर्वशास्त्रनुत भव्यजीवनं । राष्ट्रपूरुषमहं प्रणमामि ॥

(नान्द्यन्ते)

(ततः प्रविशतः द्वौ विद्यार्थिनौ, तौ द्वौ कुर्व्याः उपविष्टौस्तः नेपथ्ये हम्पी वैभवमुद्दिश्य गानं भवति तौ शृणुतः)

गीतम् (कल्याणी रागे)

प्राचीनान्ध्रावनि संस्कारिणी । भारतजनताहृदयस्पन्दिनी
पम्पातीरे शिल्पितहम्पी । एकाऽक्षतस्वप्नकथेवाऽभाति   ध्रु.

विरुपाक्षाधिक संभारेण । विद्यारण्याशीर्वादबलेन
हरिहर बुक्कोर्वीपति यत्नेन । रचिता पूर्वं साविज्ञानेन   १

प्रस्थर तक्षित जीवनरेखा । स्मेराङ्कुरविलसित शिल्पाकाराः
चतुराननमानस शिल्पितभावाः । इमे हम्पीयौवनलास्याकाराः   २

स, रि, ग, म, प, द, नि सप्तस्वरशालिनी । श्रीकृष्णराय प्रतिमागायिनी
दिग्गजकविमण्डलकविताजीविनी । भारतसंस्कृति चरमदशा रूपिणी   ३

वीणानिक्वण प्रचुरितसंगीता । कवितावनिताविरचित हेवाका
नूपुरपदचालन ध्वानितसकलाशा पूर्वं रेजे मन्जुलहम्पी लास्याकारा   ४

अगणितवैभव तन्मयहम्पीहृदयम् । अधुना शिथिलित सौकरशकलाकारम्
शिल्पं सर्वं जीर्णं भद्रानद्याम् । कपिकुलसकेतस्थानं दैवायतनम्   ५

आसुर शक्त्या चूर्णितशिल्पाकाराः । भारतजनहृदि मुद्रितमौनाकाराः
कथयति हम्पी प्रकृतिरहस्य विगलितरूपा । पम्पा भद्रा रक्षित
प्राकारा   ६

चन्द्रकान्तः — (गीतावसाने) अरे सूर्य अहो सुन्दरं अतिमधुरं गीतम्। अधुना अत्र गीतोत्पत्ति कथम् ?

सूर्यकान्तः — अरे चन्द्र अद्य अधुना अस्मदीय विद्यापीठे राष्ट्रयेदं इति नाटकं प्रयोक्तुं अस्मदीय कक्ष्य विद्यार्थिनः अतीव उत्सुकाः भवन्ति। अत्र नाटक प्रदर्शनाय नाटक पुनश्चरणा कुर्वन्ति। तन्नाटकं द्रष्टुं त्वमपि एहि।

चन्द्रकान्तः — सूर्य, नाटकमेतत् परं आकर्षणात्मकं भविष्यतीति मे प्रतिभाति।

सूर्यकान्तः — इदं अर्वाचीन-संस्कृत नाटकविश्वे अनुपमं अपरूप नाटकं इति केषाचन मतम्।

चन्द्रकान्तः — कोऽयं अस्य नाटकस्य कर्ता। अस्य नाटकस्य श्रवणेनैव ज्ञायते सर्वथा, इदं अर्वाचीननाटकेषु अत्युत्तमं, देशभक्तिप्रचोदकं इति।

सूर्यकान्तः — सम्यगुदीरितं भवता। अस्य नाटकस्य कर्ता पंडित ओगेटि परीक्षित् शर्मा। अयं गीर्वाणान्ध्र भाषाप्रवीणः। अयं संस्कृत भाषायां केवलं लिखति। विंशति तमे शताब्दे अयं साहित्ये सर्व शाखासु सृष्टिमकरोत्।

चन्द्रकान्तः — हा श्रुतं मया अयं कविः ललित गीता लहरी इति गेय काव्यं विंशति सर्गात्मकं यशोधरा महाकाव्यं, एकोत्तरशत गीतात्मकं सप्तपदी इति अपरनाम्ना प्रसिद्ध अक्षयगीत रामायणं इति गेयकाव्यं, सप्तविंशतिनाटक परिमितं परीक्षिन्नाटकचक्रम् इति नामकं विलिख्य प्रकाशितवान् इति।

सूर्यकान्तः — अयं एकाकी संस्कृतभाषा प्रचाराय कटिबद्धः लेखिनीद्वारा नवीन सृष्टिं करोति।

चन्द्रकान्तः — अरे सूर्य नवीन नाटक सृष्टिं विलोक्य, श्रुत्वा च मम परमानन्दः भवति। संस्कृतभाषाया सहस्रवर्षेभ्यः, द्विसहस्रवर्षेभ्यः उत त्रिसहस्रवर्षेभ्यः प्राक् यानि नाटकानि वर्तन्ते तान्येव नाटकानि संस्कृतभाषा नाटकानीति आधुनिकेषु दिवसेषु प्रदर्श्यन्ते। तानि नाटकानि वारंवारं दृष्ट्वा मे शिरोवेदना भवति यतः दृष्टमेव द्रष्टव्यमिति।

सूर्यकान्तः — इयं नवीना सृष्टिः। एतावत्पर्यन्तं संस्कृत साहित्ये न केनापि सप्तविंशति नाटकानि लिखितानि। एवं कथने न काप्यतिशयोक्तिः विद्यते।

चन्द्रकान्तः — सूर्य, अनेन कविना सप्तविंशति नाटकानि त्रिविधा विभक्तानि, पौराणिकानि, ऐतिहासिकानि, सामाजिकानीति।

सूर्यकान्तः — एकैक नाटकस्य प्रदर्शन वेलायाः कालावधिः अर्ध घण्टायाः आरम्य सार्धवण्टावादन पर्यन्तं भविष्यति।

चन्द्रकान्तः — एहि गच्छावः नाटकं द्रष्टुम्।

सूर्यकान्तः — अपिच श्रुणु, इदं नाटकं भारतेतिहासस्य चरम हिन्दुसाम्राज्य स्थापयितृणा मानसिकआन्दोलनास्थितिमुद्दिश्य कृतम्। तस्मिन् समये कथं ते देश मुद्दिश्य देशममैक्यता सिद्ध्यर्थं राष्ट्रायस्वाहा राष्ट्रायेद न मम इति धनकनकवाहन वस्तुचयं हिन्दुसाम्राज्य स्थापनाय केनमार्गेण समर्पितवन्तः तानुद्दिश्य कृतं इदं नाटकम्।

चन्द्रकान्तः — चरित्रहीनः मानवः, अज्ञात भारतेतिहासमानवः कीटकाऽपेक्ष्या अधमः नीचः इति मे मतिः।

सूर्यकान्तः — छत्रपतिशिवाजीमहाराजः विजयनगरसाम्राज्यं श्रुत्वा विलोक्य च तेन उत्तेजितः हिन्दु साम्राज्यदिपं अशामितं विधातुं स्वतः हिन्दुसाम्राज्य स्थापनाय प्रारभे। किन्तु तस्य महाराजस्य शक्तिः महाराष्ट्रपरिमिता आसीत्। तथापि तस्य राज्ञः भावना हिन्दुसाम्राज्यस्थापना एव।

चन्द्रकान्तः — (प्रकोष्ट घटिका यन्त्रं विलोक्य) अरे अतिक्रान्त वेला भवति . एहि गच्छावः। (इति निर्गतौ)

(तुटग भद्रातीरं सन्ध्यासमयः प्रशीतल वात पोतकाः संचरन्ति। ततः प्रविशति हरिहरबुक्करायौ, हरिहरः एकस्मिन् प्रस्थरे बुक्करायः अनस्या शिलाया उपविष्टौ भवतः संलापं च कुरुतः।

हरिहरः — अनुज बुक्कराय इदं तुटग भद्रातीरम्। अस्मिन्नेव तीरे आवां उपविश्य भारतदर्शनं कुर्याव।

बुक्करायः — अग्रज हरिहर, अत्रैवोपविश्य भारतदर्शनं केवल संस्मरणेन करिष्यावः।

हरिहर — अयमत्र योग्य प्रदेश । तत्रैव कुर्यात। भारतदेशे अनेक प्रदेशा सन्ति।

बुक्कराय — सन्ति किन्तु तेषुतेषु प्रदेशेषु वैशिष्ट्यपूर्णा भिन्नभिन्न भाषा सन्ति।

हरिहर — भवतुनाम विभिन्न भाषा , न काऽहानि विद्यते तासा अस्तित्वेन।

बुक्कराय — भाषा वैविध्येन देशसमैक्यता न भवति।

हरिहर — भाषा विभिन्ना अपि साम्प्रदायस्तु एक भवति।

बुक्कराय — साम्प्रदाय एक एव किन्तु प्रजासु तरतम भेद , भवति।

हरिहर — अर सूक्ष्मा तरतम भेद वर्तते। भाषायामपि गुणानुरूपेण वर्णेषु वर्गीकरण सर्वत्र प्रपञ्चे दृश्यत।

बुक्कराय — अहन जानामि तत् विषयम्। किन्तु त्व सविस्तर प्रतिपादय।

हरिहर — सर्वत्र प्रपञ्चे दृश्यमानभाषासु अच , हल , ऊष्माण , ताल्व्या , मूर्धन्या , अनुनासिका इति, अच प्राणा इति हलादय शरीराणीति अचामभाव शरीरसदृश हलाना शराकृति भवतीति पारमार्थिकभावना सदृश्यते। किन्तु विभिन्नत्व विद्यमाने सति सर्ववर्णा मिलित्वा भाषास्वरूप भाषासौन्दर्य भावप्रकटना कुर्वन्ति यदि एक वर्ण नष्ट भाषामृता भविष्यति। तस्मात् यथा सर्व वर्णा मिलित्वा भाषा प्रवर्धयन्ति तथैव सववर्णा विनावैर विना तरतम भाव भाषा स्वरूप दत्त प्रभवय तु इति ममाभिप्राय ।

बुक्कराय — अधुना सङ्घशक्ति आवश्यका। सा शक्ति कथ भविता इति प्रश्न ।

हरिहर — अर सवत्र सूक्ष्मा भदा सति। किन्तु इद जगत् चक्रवत। पश्य ।ब्रभूतष्वपि तरतमभद विद्यत किन्तु त सव विनावैर मिलित्वा यथाक्रम ते तथा कर्म कुर्वन्ति।

बुक्कराय — सर्व सर्वमपि भदभाव सत्यज्य वय मरिष्याम किन्तु राष्ट्रमिद अमर इति मत्वा स्वीय सव समारम्भान् राष्ट्राय स्वाहा राष्ट्रयद, न मम इति बुध्या समर्पणा करिष्यन्ति नहि दश सौभाग्यम नर्तिष्यति।

हरिहरः — अस्मदीय पूर्वजाः देशहिताय केवलं सर्वमपि चक्रुः।

बुक्करायः — सर्वथा अस्मदीय पूर्वजाः राजानः कवयः शास्त्रकर्तारः देश सौभाग्यं अवर्धयन्। तस्मादेव प्रपञ्चे विद्यमानाना सर्वेषा प्राणिना दृष्टिः भारतोपरि विद्यते। तदर्थमेव ओतप्रोतओवः इव सहस्रवर्षेभ्यः अस्मिन्देशे परदेशीयश्चाटयः आपतन्ति।

हरिहरः — भारतवत् अन्यत्र मानवस्य जीवनसौकर्यं न भवति। अन्येषा देशा· भारतवत् सस्यशालिन· न भवन्ति।

बुक्करायः — सर्वत्र तुषारसंघातवराभाति। तस्मात् कारणात् तत्र सस्य श्यामलतायाः अभावः भवति।

हरिहर· — भारतवर्षे वसुन्धरा नदीनदै. विलसति।

बुक्करायः — तस्मादेव अन्यदेशीया· अत्राऽगच्छन्ति।

हरिहर· — न केवलं जीवनं यापयितुं, किन्तु ज्ञानमुपार्जनार्थं मानवत्वं दैवत्वं च अभ्यस्तु अत्राऽगच्छन्ति।

बुक्करायः — यदि ते अभ्यसन्ति भारतीयता तर्हि समीचीनमेव। तथा अभूत्वा अस्मदीय संस्कृतिमूलभूतं देवायतन समुदाय, विद्यालयान् भस्मावशेषं विधाय मकरत्नवरत्नमचयं सुवर्णराशि च नीत्वा अस्मत् देशं शक्तिहीनं दरिद्रायुतं कुर्वन्ति।

हरिहरः — सोदर त्वया सम्यक् वितर्कितम्। देशे बहव· एनं विषयमुद्दिश्य न चिन्तयन्ति।

बुक्करायः — सर्वोऽपि स्वार्थी भूत्वा संघशक्ति विस्मृत्य विसृज्य च जीवति।

हरिहर — अस्मात् कारणात् अस्मिन् देशे परदेशीयाना प्रवेशः जातः।

बुक्कराय — ते पाशविक जीवनाः। तेषा आचारव्यवहारेण अस्मदीय परम्परा नष्टा भवति। वयं भारतीया· पुनर्जन्मनि विश्वासिन·।

हरिहर. — भवतु नाम तेषा विश्वासादय। किन्तु ते तेषा विश्वासाय सर्वं देशं परावर्तयितु प्रयतन्ते। प्रजासु देशभक्ति· क्षीणा भूत्वा पशुप्रायता अधिका भवति। ता भावना निवारयितुं क· प्रयत्न. कर्तव्यः इति प्रश्न.।

बुक्करायः — तस्मात् अहं चिन्तयामि हिन्दुमहासाम्राज्यस्थापना कर्तव्या इति।

हरिहरः — गुप्तचक्रवर्तिनः स्वर्णयुगं अकल्पयन्। स युगः भारतवर्षे स्वर्ण युगः जातः।

बुक्करायः — हर्ष चक्रवर्ती अपि हिन्दुसाम्राज्यस्थापनाय बहुधा प्रायतत।

हरिहरः — बौद्धजैनचार्वाकादिधर्माः हिन्दुधर्मवृक्षस्य विस्तृत शाखाः एव भवन्ति।

बुक्करायः — तस्मात् भारतदेशीयसर्वधर्माः मिलित्वा राष्ट्राय स्वाहा राष्ट्रायेदं न मम इति बुध्वा अहर्निशं प्रयत्नः कर्तव्यः त्यागः कर्तव्यः।

हरिहरः — भारतवर्षे सकल प्रदेशाः विभिन्नभाषाभूयिष्ठाः अपि अत्मरूप संस्कृत्या ते प्रदेशाः संबद्धाः इति प्रथमतः श्री आद्यशंकराचार्यवर्यैः प्रतिपादितम्। ते भारतं चतुर्मुख ब्रह्मा इव विलोक्य चतुर्वेदमठान् संस्थाप्य धर्मसंस्थापनमकुर्वन्। ते क्रान्तदर्शिनः तेभ्यः नमामि। शङ्करः शङ्करस्साक्षात् नात्र लेशोऽपि संशयः।

बुक्करायः — तस्मात् मम एव प्रतिभाति सर्वदा देशरक्षणा शास्त्रबलेन धर्म चिन्तनया परंपरागत शिक्षणया केवलं भवितव्या इति। साम्राज्य स्थापनाय तपश्शक्तिः आवश्यकी। सा शक्तिः अस्माकं कथं संप्राप्ता भविष्यति?

हरिहरः — सोदर मम अधुना एका भावना विद्युदिव मनसि स्फुरति। पवित्र तुङ्गभद्रानदीतीरे साम्राज्यनिर्माणं अवश्यं भवितव्यमिति।

बुक्करायः — महमदीयसुल्तानाः दक्षिणदेशमपन्वयं देवायतनानि नेतु नाशयितुं च प्रयतन्ते।

हरिहरः — यदि वयं ता शक्तिं न गोत्स्याम तर्हि सर्वमपि दक्षिणभारतं उत्तरभारतमिव ध्वस्त देवायतनं भविष्यति। सर्वेऽपि अन्य धर्मानुयायिनः बलरत्तमेन आगामयेण भारतं परिवर्तितुं प्रयतन्ते।

बुक्करायः — यदि अन्य संस्कृतिः भारते स्थानं संपादयिष्यति तर्हि भारतं मूकरूपीतं अत्यन्तपाशविक केवल भौतिकजीवन तत्परं भविष्यति। सर्वोऽपि देशः

पशुदेशः भविष्यति। विचार्यमाणे देहः रक्तौष्णिक्येन प्रज्वलति। वयं कृतघ्नाः भवामः प्राचीनाना अस्मदीय महानुभावानाम्।

हरिहरः — प्रारब्धमानं हिन्दुसाम्राज्यं आगामिना भारतीय सोदराणा महावीराणा मार्गदर्शकं स्फूर्तिदायकं च भविष्यति। तुडगभद्रा परिखा इव अस्मदीय साम्राज्यं रक्षिष्यति।

वुक्करायः — तुङ्गा महोत्तुङगतरङिगर्णी भूत्वा आनन्देन गत्रवेगात् साम्राज्यं रक्षिष्यति।

हरिहरः — प्रथमतः साम्राज्य स्थापनायाः स्थलनिर्णयः कर्तव्यः।

वुक्करायः — यदि समयः आसन्नः भविष्यति तदा अप्रयत्नेन स्थलनिर्णयः भविष्यति।

हरिहरः — सोदर आवयोः भावनाः एकसूत्रबद्धाः इति भान्ति।

वुक्करायः — अवश्यं अस्मदीय मनोरथः फलिष्यति। एहि गच्छावः। तपस्सम्पन्नं महापुरुष वेदमूर्ति शोधयिष्यावः। जयहिन्द।

हरिहरः — जयहिन्द। (इति सोदरं अलिङगति)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(विद्यारण्यः तुडगभद्राया स्नात्वा विरूपाक्ष दर्शनार्थं विरूपाक्षालयं आगच्छति (नेपथ्ये अयं मन्त्रः पठ्यते) शंनो मित्रश्शं वरुणः। शंनो भवत्वर्यमा। शंन इन्द्रो बृहस्पतिः। शंनो विष्णुरुरुक्रमः। नमो ब्राह्मणे। नमस्ते वायो। त्वमेव प्रत्यक्षं ब्रह्मासि। त्वमेव प्रत्यक्षं ब्रह्म वदिष्यामि। ऋतं वदिष्यामि। सत्यं वदिष्यामि। तन्मामवतु। तद्वक्तारमवतु। अवतुमा। अवतु वक्तारम्। ओं शान्तिः शान्तिः शान्तिः।)

विद्यारण्य — अहो इदं तुङ्गभद्रातीरं परब्रह्मणः भूतले निवासस्थानम्। तुङ्गास्नानं विरूपाक्षदर्शनं अस्मिन्प्रदेशे जायते, एतस्मात् अन्यत् किमपेक्ष्यते भौतिकप्रपञ्चे। अयं विरूपाक्षः अतीव शक्तिसम्पन्नः। अस्य सर्वे आगाराणि धनकनक वाहन वस्तुचयैः सम्पूर्णानि। परदेशीयाः अस्मत् गृहं प्रविश्य गृहं ज्वालयन्ति। अस्मत् गृहं कलुषितप्रायं कुर्वन्ति। भारतीय संस्कृतिप्रतीकान् देवालयान् नाशयन्ति। सम्पदं मुष्णन्ति। यदि एतादृशी परिस्थितिः तर्हि विरूपाक्षस्य सर्वसम्पत् नाशनं भविष्यति। तस्मात् अनेनयत्नेन भारतीय संस्कृतिसंरक्षणार्थं एकं महासाम्राज्यं संस्थाप्य परदेशीय धाटिभ्यः देशं रक्षितुं प्रयतिष्यामहे।

(एकत्रोपविश्य) अहं तु सन्यासी धर्मसंस्थापकः। न मे शक्तिः विद्यते राज्यं पालयितुं। राज्यपालनार्थं क्षात्रशक्तिः अपेक्षनीया। राजशक्तिः पालनरक्षा भवति। सन्यासिना राजसः कृतः। उत्तरभारते देवालयाः धर्मसंस्थापनाश्च नाशनं प्राप्ताः परदेशीयानां पाशविकशक्त्या। चाणक्य सदृशाः चन्द्रगुप्तसहायेन स्वर्णयुगं संस्थापयामासुः। आदिशङ्करः धर्मतः भारतं सर्वं एकमिति प्रचारयामास। तथापि सर्वोऽपि जनः आत्मानं प्रभुः सर्वशक्तिसम्पन्नः मनुते। यदि सर्वैरपि मिलित्वा स्थाप्यते तर्हि देशः क्षात्रशक्तिसम्पन्नः भविष्यति। यदि शक्तिसम्पन्नाः हिन्दभारसम्पन्नाः राजानः स्युः तदा अहं साहाय्यकः मार्गदर्शी च भवेयम्। भारतराष्ट्रं हिन्दुसाम्राज्यं संस्थाप्य भारत संस्कृति परम्परां परिरक्षयेयम्। (इति देवालयस्य प्राङ्गणे उपविशति चिन्तया) अहो तदानीं अहं शान्त्या वेदभाष्यं विलिखेयम्। अस्मदीय पूर्वजाः अनेक कष्टानि अनुभूय अस्माकं बृहत्तमं संस्कृतिं दत्वा तत्क्षणे अस्मान् नियुज्य गताः। संस्कृतिरक्षणं अस्मदीय कर्तव्यं भवति। मन्त्रिणा बुद्धिबलेन राजाणिज्यबलेन, कृषि बलेन देशं सस्यसम्पन्नं सुसम्पन्नं कर्तव्यम्। अधुना क्षात्रं नशक्ता अपेक्षिता। (इति मौनेन उर्ध्वमुखं शून्ये पश्यति)

(ततः प्रविशतः हरिहर बुक्करायौ)

हरिहर — (विद्यारण्य स्वामिनं विलोक्य सादरेण बुक्करायेन) सादरं प्रणाम् विद्यारण्य स्वामिनं पश्य।

बुक्कराय — परमं भाग्यम् इदम्। (इति द्वावपि तस्मै प्रणमतः)

विद्यारण्य — मनोरथ सिद्धिरस्तु। (इति आशिषं ददाति)

हरिहर — अयि भो स्वामिन् तत्र भवता सम्यक् अस्माकं अपेक्षणीयं मार्गम्।

बुक्करायः — अयं, समावेशः मङ्गलमयः भवतु इति भवद्भ्यः आशिष कामयामहे।

हरिहरः — महात्मन् वयं पवित्र भारतवर्षं परेषा चमूभ्यः संरक्षितुं हिन्दु-साम्राज्यं च संस्थापयितुं उद्युक्ता.।

बुक्करायः — तादृश साम्राज्य स्थापनाय ब्राह्मीमयमूर्तिः आवश्यकः।

हरिहरः — यदि युष्मादृशाना सहायः भवति तर्हि हिन्दुसाम्राज्यस्थापना अचिरादेव भविष्यति।

विद्यारण्यः — युष्मदीय भावना अस्माकं मान्या भाति। जगति सर्वेपि, न केवलं जगति, खगोळेऽपि परस्पराकर्षण संजाताजीवना भवन्ति।

हरिहरः — अस्मदीय सकाशे न किमपि धनं विद्यते साम्राज्यस्थापनाय।

बुक्करायः — साम्राज्य स्थापनाय धनमावश्यक भवति।

हरिहरः—कायशक्तिः अस्मत्सकाशे विद्यते। अधुना अपेक्ष्यते मे धनशक्तिः।

बुक्करायः — न केवलं मेधाशक्तिः किन्तु लक्ष्मीकटाक्षश्च अपेक्ष्यते।

विद्यारण्यः — अयि सोदरौ, भवतोः भावनया अहं परं सतुष्टः अस्मि। आवयोः भावनातरङ्गाः समान मार्गे एकसूत्रे प्रवहन्ति। शृण्वन्तु भवन्तः। यदि पर-देशीय शक्तयः आगत्य दक्षिण हिन्दुस्थान नाशयिष्यन्ति तर्हि सर्वविरूपाक्ष धनसंपत्तिः नष्टा भविष्यति। तस्मात् तदपेक्ष्या हिन्दुसाम्राज्य स्थापनाय तदीय सर्वधन उपयुज्येत तर्हि देशरक्षणं भविष्यति। अस्मिम् विषये सर्गेऽपि पौरः तनमनधनचयं राष्ट्राय स्वाहा राष्ट्रायेदं न मम इति वदन् अर्पयति तर्हि हिन्दुसाम्राज्य स्थापना भविष्यति। नोचेत् देशः सङ्कटे पतिष्यति।

हरिहरः — कुत्र कदा सम्राज्यस्थापनायाः कोणशिला समारम्भः भविष्यति, भवन्तः सूचयन्तु।

विद्यारण्यः — अयि सोदरौ शृणुताम्। अहं कथयामि एका वृत्तघटनाम्।

हरिहरः — केयं घटना स्वामिन्।

बुक्कराय — कुतूहल्यात आवाम्।

विद्यारण्य — अद्य प्रात मयि तुङ्गाया स्नातु गच्छति सति तत्र विरूपाक्ष देवाग्यानुत्तरेण एक शशक एक कुक्कुर कलहायमानौ आस्ताम्।

हरिहर — ततस्तत ।

विद्यारण्य — कुक्कुर शशकयोर्मध्ये महान् कलह सजात ।

हरिहर — तत किमभूत्।

विद्यारण्य — अ तत स अल्प प्राणी शशक त कुक्कुराधम द्रावयामास।

बुक्कराय — ततस्तत ।

विद्यारण्य — तत कि यत् भवितव्य तत् वृत्तम्।

हरिहर — किमत्राश्चर्य भा ।

विद्यारण्य — भवदभ्या न ज्ञात अत्र विद्यमानरहस्यम्।

बुक्कराय — नहि।

विद्यारण्य — शृणुता भवन्तौ। कुक्कुर बलवान् शशक अल्पप्राणा। सहजतया कुक्कुर शशक द्रावयित्वा त व्यापाद्य भक्षितु समर्थ । कितु अत्र व्यत्यस्त जातम्। अनया घटनया स्फुरति मे मनसि एतत् स्थल हिन्दुसाम्राज्यस्थापनाय योग्य भविता इति। अपिच वय पाशविक शक्ती सुनायासेन जेष्याम । अनया हिन्दुसाम्राज्य स्थापनया वय दक्षिणभारत रक्षिष्याम । इय हिन्दसाम्राज्य स्थापना अस्मदनन्तर आगताना वाद्धाना भारतवासिना स्फूर्तिदायिना भविष्यति। तस्मात् यत्र कुक्कुर पराजित शशकेन तत्रैव साम्राज्यस्थापना कर्तव्या शुभमुहूर्त उत्तरायण पुण्यकाल रथसप्तमी दिवस।

हरिहर — स्वामिन् अस्या कथाया भविष्यमाण सर्व भवदभि समूचितम्।

बुक्कराय — अन्यथा, श्रवणमात्रेण एतादृशीभावना जाता यत् हिन्दु महासाम्राज्यस्थापनया कवच शात्रव पराजिता इति।

विद्यारण्य — वेदोक्तरीत्या प्रथमत भूमिपूजा कर्तव्या। अनन्तर श्री विरूपाक्षस्य महायामपूर्वक रुद्राभिषेक कर्तव्य इति मे सकल्प तस्मात् गम्यताम्।

हरिहर — सर्वमेतत् सर्वं ग्रामाणाना समक्ष भविता।

बुक्कराय — अधुना अस्माक सङ्घशक्ति विद्यते।

हरिहर —मन्त्रशक्ति अपि विद्यते। अधुना केवल लक्ष्मीशक्ति अपेक्षणीया विद्यते।

विद्यारण्य — अयि बुक्करायहरिहरौ गृह्णाता विरूपाक्ष धनागार कुञ्चिका। (इति तयो निकटे निक्षपति)

हरिहर — श्री विरूपाक्षस्य सर्वं धन राष्ट्रसरक्षणार्थं केवल आवा व्यया कर्तुं प्रयतिष्याव।

विद्यारण्य — सर्वैरपि मन्त्राय उच्चारणाय पवित्रबुध्या यत् राष्ट्राय स्वाहा राष्ट्रायेद न मम इति।

(सर्वेऽपि राष्ट्राय स्वाहा राष्ट्रायेद न मम इति एक स्वरेण उच्चरन्ति हस्ते हस्त निक्षिप्य)

हरिहर — जय विरूपाक्ष। (इति विद्यारण्यस्वामिन नमस्करोति)

बुक्कराय — जय विरूपाक्ष। (इति विद्यारण्यस्वामिने' अग्रजाय हरिहराय च नमस्करोति)

विद्यारण्य — सर्वेषा सन्मङ्गलानि भवन्तु। (इति आशिष प्रयच्छति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(तुङ्गभद्रा नदीतीरे एकस्मिन् ग्रामे ग्रामीणा राम, कृष्ण, शिव, गणपति प्रभृतय ग्रामाध्यक्षण भाषण कुर्वन्त सन्ति)

ग्रामाध्यक्षः — अयि राम, भारतवर्षं सर्वमपि नाशयितुं एते पाशविकाः प्रयतन्ते।

रामः — प्रभो, कः भारतं नाशयिष्यति। भारतं नाशयितुं भौतिकशक्तिः अशक्ता भविष्यति।

ग्रामाध्यक्षः — तथा मावद अन्यदेशीय पाशविकाः सर्वथा प्रयतन्ते।

रामः — एभिः न किमपि क्रियते। ते केवलं मक्षिकाः मशकाः।

कृष्णः — अरे त्वं न जानासि। उत्तर भारते देवायतनानि सर्वाणि परदेशीय चमूधाटिभिः नाशयितानि उर्वर्यां स्थापितानीति किंवदन्ती प्रचलति।

शिवः — एतदपि श्रुतम्। सौराष्ट्रे सोमनाथं स्थल शयनं अकुर्वन् इति केचन यात्रिकाः कथयन्ति।

गणपतिः — *नलन्दा तक्षशिला इत्यादि विद्यासंस्थाः* बहुमास पर्यन्तं वैश्वानरं अतर्पयन् इति कोऽपि परिव्राजकः जगाद।

ग्रामाध्यक्षः — अनेके विषयाः संश्रूयन्ते अस्माभिः। न किमपि प्रतिरोद्धुं अस्माभिः क्रियते।

गणपतिः — अधुना अस्माभिः श्रुतम्। इतः पूर्वं न किमपि श्रुतं अस्माभिः।

शिवः — वयं अस्मदीय ग्रामे एवं विचारयामः, एवमेव सर्वत्र भारतवर्षे सर्वोऽपि यदि चिन्तयेत् तर्हि सर्वत्र हिन्दुसाम्राज्यस्थापना विपणकविघ्नः भविष्यति।

कृष्ण — केषाचन जीवित मुद्दिश्यैव चिन्ता, अन्येषां धनचिन्ता।

रामः — साधूक्तं न कोऽपि चिन्तयति हिन्दुसंघटनामुद्दिश्य। अस्मदीय देशे यदि हिन्दूनां संघटना भवति तर्हि भारतं नाशयितुं कस्य समीपे शक्तिः भविष्यति।

ग्रामाध्यक्षः — अयि राम एते पाशविकाः भारतीय संपद्भ्यः मोहिताः सर्वं संपत्तयं गृहीत्वा भारतं नाशनं कृत्वा गच्छन्ति।

रामः — सर्वं संचयं चोरयित्वा ते अस्मात् देशात् नयन्ति।

कृष्णः — तथा करणमयोग्यम्। ते अस्माभिरस्माकं सुखजीवनं यदि कुर्व
तर्हि तान् स्वागतपूर्वकं वयं आह्वयिष्यामः।

शिवः — स दुरात्मा सोमनाथस्य लिङ्गं नीत्वा स्वप्रासादस्य सोपानमा
निक्षिप्तवानिति प्रजानुमेयः।

गणपतिः — ते सोमनाथपुरोहिताः तान् पशून् करुणान्तरङ्गाः अतिद
दाक्षिणाम्या प्रार्थयामासुः तल्लिङ्गं प्रतिग्रहीतु, किन्तु ते दुष्टाः निर्दयाः भूत्वा ता
ब्राह्मणान् अताडयन्।

ग्रामाध्यक्षः — ते पाशविकशक्तिशालिनः न श्रोष्यन्ति। तेषां जीव
पशुप्रायं स्वार्थ युतं भवति।

रामः —मूर्खाः नाशने तत्पराः न किन्तु सहृदयेन जीवितुं, शक्ताः।

कृष्णः – ते रक्तपायिनः जलूकाः। ते क्रौर्यस्य प्रतिरूपाः। न तेषां बुद्धि
बलं विद्यते।

शिवः — ते भारतावनै जनान् हत्वा भारतात् धनलक्ष्मीं अमुष्णन्।

गणपतिः — सर्वत्र देशे एवमेव प्रचलति। ग्रामाधिपाः महाराजानः कि
कुर्वन्ति? ते स्वपन्ति किम्?

ग्रामाध्यक्षः — ग्रामाध्यक्षाणां मध्ये, महाराजानां मध्ये अनन्त मनोवैषम्याणि
सन्ति। सर्वभारतं न केषामपि दृष्टिपथं समायाति।

कृष्णः — एकस्मात् प्रदेशात् प्रदेशान्तरं गन्तुं सर्वेषां दुष्करं भवति। कथ
एका भावना सर्वव्याप्ता भविष्यति।

शिवः — सर्वत्रापि राजानः स्वीयं राज्यं इति केवलं चिन्तयन्ति न किन्तु
भारतराज्यमिति।

ग्रामाध्यक्षः — भवता निगदितं साध्वेव। किन्तु पश्य भारतीयानां एका
त्मता भवितुं कस्याश्चन शक्तेः आविर्भावः आवश्यकः।

शिवः — एकवारं सर्वत्रभारते युगपत् एकविषयमुद्दिश्य कथनं अतीव दुष्क
भवति।

राम — अश्वयानेन वार्ताहरान् सर्वत्र सम्प्रेष्य सघटना मन्त्रा प्रसारयितव्या ।

कृष्ण — एतत् दुष्कर भविष्यति ।

गणपति — दुष्कर भवताति मावद । कुरु । कारय । दर्शय । चन्द्रगुप्त कथ सुवर्णयुग कृतवान् । हर्षवर्धन कथ विशाल साम्राज्य मस्थापयामास ।

राम — सगण देशभक्तेन भवितव्यम् ।

कृष्ण — अस्मत् देशे अन्तश्शत्रव सन्ति । ते स्वार्थाय परानाश्रयन्ति देश नाशयन्ति ।

शिव — यदि य कश्चन राजा हिन्दुसाम्राज्य स्थापयितु शक्त भवेत् वय सर्व तथाराज्ञा सेनिका भवेम ।

गणपति — यदि तुङगभद्रा समीपे हिन्दु साम्राज्य स्थापना भविष्यति तर्हि वय साम्राज्याय मनोवाक् कायकर्मभि सर्व देशहिताय त्याग कुर्याम इति मे चेत पर नर्तत ।

ग्रामाध्यक्ष — साम्राज्य स्थापनाय सेनिकबलमत्यावश्यक भवति । वय ग्राम णा सर्व सेनिका भविष्याम ।

राम — वय सर्व चिक्राडभक्ति इव अस्मदाय सर्व तनमनधनानि च मातृभूमिकृते अर्पण कुर्याम ।

कृष्ण — राजा उत, शासक सर्वदा स्वार्थरहित भूयात् ।

ग्रामाध्यक्ष — वय सर्व श्व प्रभाते हरिहरस्य समीप गत्वा मर्व भणिष्याम ।

गणपति — धनमूलमिद जगत् प्रथमत वय सर्व मिलित्वा धनसचय कुर्म । अनतर तत् धनसचय गृहीत्वा हरिहर समीप गच्छम ।

शिव — हरिहर अनन धनन कि करिष्यति । प्रथमत भारतायषु आत्मशक्ति यदि स्यात् तया शक्त्या आत्मसकाश विद्यमान परिकरे धनसञ्चये वय देश रक्षिष्याम ।

ग्रामाधिप — यथा श्रीरामचन्द्रस्य वशिष्ठ आसीत्, चन्द्रगुप्तस्य चाणक्य आमात् तद्वत् हरिहरस्यापि एक प्रज्ञाचक्षु वदपारग भवितव्य ।

गणपतिः — वयं सर्वे हरिहरेण बुक्करायेन सार्धं भाषयिष्यामः। अस्मदीय भाषणेन अत्र न किमपि प्रयोजनं भवति। उत्तिष्ठत गच्छामः। (इति सर्वे उत्थाय गच्छन्ति)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(नेपथ्ये विद्यारण्यसाहायेन हरिहरः हिन्दुसाम्राज्यस्थापना कुर्यात्, बुक्करायः तयोः दोहदं कुर्यात्, हरिहर. राजाभूयात्, विद्यारण्यः मन्त्रित्वं प्राप्नुयात्, हिन्दुसाम्राज्यं शरदा शतं जीवेत्। बुक्कराय हरिहर विद्यारण्याः प्रविशन्ति)

हरिहरः — स्वामिनः श्रुतं कि भवद्भिः जनानुरागः प्रजानुमोदश्च।

विद्यारण्यः — सर्वत्र हिन्दूसाम्राज्य स्थापना कर्तव्या इति घोषणा संश्रूयते।

(ततः प्रविशति ग्रामाध्यक्ष, राम, कृष्ण, शिव, गणपति प्रभृतयः।)

ग्रामाध्यक्षः — अयि विद्यारण्य हरिहर बुक्कराय महानुभावाः वयं सर्वे युष्मदीय आज्ञाशिरोधारकाः हिन्दुसाम्राज्य स्थापने सहायकाः।

गणपतिः — वयं तनमनधनसपरिवारं देशरक्षणाय समर्पयितुं उद्युक्ताः।

विद्यारण्यः — अयि देशभक्ताः वयं सर्वे मिळित्वा हिन्दुदेश संरक्षणार्थं भारतीय संस्कृति रक्षणार्थं प्रयतिष्यामः। यदि भारते प्राचीन परम्परा, वैदिक साम्प्रदायः, संगीत कलानृत्य साहित्यादयः भ्रष्टाः भविष्यन्ति, तर्हि भारतनाशनमेव भविष्यति। तस्मात् तत् रक्षणार्थं वयं विरूपाक्ष देवायतनसर्वसम्पदा हिन्दुसाम्राज्यं संस्थापयिष्यामः।

(सर्वे जय विरूपाक्ष जय विरूपाक्ष इति मुक्तकण्ठं गर्जना कुर्वन्ति)

बुक्करायः — सोदर अस्मिन् शुभमूर्ते साम्राज्य स्थापनावश्यकानि कानि अपेक्षितानि सन्ति सविस्तर कथयतु।

हरिहर. — देश रक्षणार्थं पदातयः पंचलक्ष परिमिताः आवश्यकाः। त्रिलक्ष परिमितं आश्विकदलम्। द्विलक्ष परिमितं गजबलम् संहत्य दशलक्ष परिमितं सैन्य मावश्यकम् भवति।

बुक्करायः — विरूपाक्ष देवालयनवीनकरणम्। सकल मणिगण वस्तुचय संरक्षणं च कर्तव्यम्।

ग्रामाध्यक्षः — हरिहर, बहुकालानन्तरं अस्माकं समीचीन सदवकाशः संप्राप्तः। श्रीविरूपाक्षः श्रीविद्यारण्य स्वामिनां दृढविश्वासमार्गरूपेण भवता दृढ संकल्पेन च हिन्दुसाम्राज्य स्थापनाय मार्गमादिदेश। अहं ते चमूनायकः भवितु मुत्सहे। अहं सर्वं सैन्यविन्यासं सर्वसंरक्षणं चतुर्विधोपायशिक्षणां च सैन्येभ्यः शिक्षयिष्यामि। अयं मे भारः।

हरिहरः — सर्वमपि केवल देशभक्त्या करणीयमिति सर्व चमूपतीनां निवेदनीयं अस्ति।

नायकः — भवतः आज्ञां पालयिष्यामि।

बुक्करायः — सोदर हरिहर अहं त्वा अनुसरन् राज्य व्यवहारादीन् पश्येयम्।

नायकः — हरिहर प्रथमतः गजशाला वाजिशाला निर्माय सैन्य प्रशिक्षणादिकं च कर्तव्यं विद्यते। तस्मात् तस्मिन् कर्मणि निरतो भवेयम्।

हरिहरः भवान् तस्मिन् कर्मणि निरतो भूयात्।

नायकः — (गच्छति)

बुक्करायः — हरिहर, एतावत्पर्यन्तं स्वप्ननिरूपिताः भावनाः अधुना कार्यरूपे दर्शयितव्याः।

हरिहरः — सोदर बुक्कराय, अन्य देशीय चमू अवरुन्धनं विधाय सर्वं देशः चारक्षणैः रक्षयितव्यः अस्ति। आवां राजानः इति विस्मृत्य वयं केवलं देशभक्ताः इति भावनया सामान्य मानव जीवनं निर्वहन्तः देशरक्षणे निरताः भवेम।

बुक्करायः — सोदर, भवतः आज्ञा मया शिरसा ध्रियते।

हरिहरः — अयि विद्यारण्यस्वामिनः तत्र भवन्तः वेदभाष्यं विनाविरोधं प्रशान्त मनसा विलिखन्तु।

विद्यारण्यः — अयि सोदरौ। श्वः रथसप्तमी। तस्मिन् दिवसे प्रथमतः भूमिपूजनं कोणशिला समारम्भः महन्यासपूर्वकं रुद्राभिषेकश्च कर्तव्य.। तदर्थं सर्वसमारम्भं कारयन्तु। तदनन्तरं अहं वेदभाष्य लिखने बद्धचित्तः भवेयम्।

हरिहरः — अयि विद्यारण्यमहर्षे श्रीरामचन्द्रस्य वशिष्टमहर्षिः इव, भवन्तः अस्माकं मार्गदर्शकाः अपि च अस्मदीय कुलगुरवः। सत्वरं कारयन्तु भूमिपूजनं रुद्राभिषेकं च।

विद्यारण्यः — मा अनुसरन्तु भवन्तः। (इति सर्वे गच्छन्ति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(नेपथ्ये ''भूमिर्भूम्ना द्यौर्वारिणान्तरिक्षं महित्वा,'' इति भूसूक्त मन्त्रघोषाः तदनन्तरं ''नमस्तेस्तु भगवन् विश्वेश्वराय, महादेवाय, त्र्यम्बकाय, त्रिपुरान्तकाय, त्रिकाग्निकालाय, कालाग्निरुद्राय नीलकण्ठाय, मृत्युंजयाय, सर्वेश्वराय, सदाशिवाय, श्रीमन्महादेवाय, नमः '' इति रुद्राभिषेक घोषणाश्च सश्रूयन्ते)

(ततः प्रविशन्ति हरिहर बुक्कराय विद्यारण्यस्वामिनः अन्ये च पौराः,हरिहरः सिंहासने उपविशति,बुक्कराय विद्यारण्यदयः पार्श्वे स्थियमान पीठेषु उपविशन्ति,तदितराः उभयतः श्रेण्या तिष्ठन्ति, तत्र पीठोपरि न्यस्तं खड्गं श्रीविद्यारण्यःगृहीत्वा हरिहर कटि प्रदेशे बध्नाति, अपि च शिरोवेष्टनं गृहीत्वा हरिहरस्य शीर्षे निक्षिपति, अन्येच मन्त्राक्षतान् पुष्पाणि च गृहीत्वा हरिहरोऽपरि विकिरन्ति।)

।। आत्मार्पणम् ।।

येनामवीराः स्थिरकीर्तिरूपाः। आत्मार्पणं राष्ट्रहिताय चक्रुः।
निस्वार्थबुध्या भुवितानजस्रं। प्रस्तौमि तानाशिवराययोद्धान् ।।

(नान्द्यन्ते)

(ततः प्रविशति वेत्रहस्तः शशाङ्कः)

शशाङ्कः — हञ्जे कौमुदि इतः एहि।

कौमुदी — हां आगच्छामि। (इति पुस्तक हस्ता प्रविशति)

शशाङ्कः — प्रिये, अद्याहं विलम्ब्य गृहमागच्छेयम्।

कौमुदी — विलम्बस्य कारणं किम्?

शशाङ्कः — अद्य मित्रैः साकं नाटकं द्रष्टुं गच्छामि।

कौमुदी — एव, कितन्नाटकम्।

शशाङ्कः — आत्मार्पण नाम नाटकम्।

कौमुदी -- (विहस्य) आत्मार्पण नाम नाटकम्।

शशाङ्कः — असदर्भे अपिच अस्थाने हासः कुतः?

कौमुदी — अहं भावयामि, शाकुन्तलम् उत मृच्छकटिकम् नोचेत् उत्तर रामचरितम् इत्यादि नाटकानि द्रष्टुं गच्छसीति।

शशाङ्कः — इद नवीननाटकम्।

कौमुदी — त्व नवीननाटकानि द्रष्टु मागच्छ।

शशाङ्कः — नवीन नाटकेष्वपि कतिचित् नाटकानि अत्युत्तमानि सन्ति।

कौमुदी — जानामि तत् । अधुना केचन पण्डितं मन्यमाना. ऐतिहासिक महापुरुषाणा जीवितानि कलुषितप्रायानीति चित्रणा विधाय येनकेनाप्यु-पायेन जगति प्रसिद्धाः भवितु प्रयतन्ते । आधुनिक नाटकानि, चलचित्राणि दृष्टवा जनाः न कामपि साधुवर्तना ज्ञातु समर्थाः भवन्ति। तस्मात् अह नवीनलोकं नवीनचित्रणा च विगर्हामि।

शशाङ्कः — अर्थात् आधुनिकेषु नाटकेषु चलचित्रेषु न कोऽपि नवीनः सत् विषयः विद्यते ज्ञातुमिति ते अभिप्रायः।

कौमुदी — आम् । स एव मे अभिप्राय. किन्तु कतिचित् नाटकानि अत्युत्तमानि विद्यन्ते ।

शशाङ्क — आत्मार्पणनाटक वीक्षणेन सामाजिकः देशभक्तिपूर्ण-मानसः, सर्वमपि देशहिताय त्याग कर्तु ससिद्ध भावुकः भविष्यति ।

कौमुदी — आत्मार्पण नाम नाटकस्य इति वृत्त. क किंचित् विस्तरेण कथय मे।

शशाङ्कः — प्रिये, एतादृश कथाश्रवणेन, कथाकथनेन मानवस्य शरीररक्त अत्यौष्णिक्य प्राप्य देशहिताय किमपि कार्य कर्तु प्रचोदयिष्यति श्रुणु। स्वामिभक्त तानाजी हिन्दुसाम्राज्य प्रतिष्ठापकस्य श्री छत्रपति शिवाजी महाराजस्य आज्ञा शिरसि पुष्पमालामिव ऊढवा, परहस्त गत पर्वत स्वाधीन कर्तु आत्मार्पणं चकार। तन्नाटकं सस्कृतभाषाया आधुनिक महाकवि लिलेख।

कौमुदी — तस्य आधुनिक महाकवे. नाम किम् ?

शशाङ्क — तस्य नाम पण्डित परीक्षित् शर्मा।

कौमुदी — (आश्चर्येण) पण्डित परीक्षित् शर्मा।

शशाङ्कः — किं त्व जानासि तम् ?

कौमुदी — हा जानाम्यहं । तमुद्दिश्य बहु श्रुत मया।

शशाङ्कः — किमिति ?

कौमुदी — अय गीर्वाणान्ध्रभाषाप्रवीण महाकवि । अनेन ललित गीतालहरीति गयकाव्य, विंशति सर्गात्मक यशोधरा महाकाव्य, अक्षय गीत रामायण, सप्तविंशति नाटकपरिमित परीक्षिन्नाटकचक्र इति दृश्यकाव्य च विलिखितम् ।

शशाङ्क — तस्मिन् दृश्यकाव्यसचये इद आत्मार्पण विद्यते। अय विंशतितमेशताब्दे महाकवि । अय स्वलेखिनीद्वारा गीर्वाणवाणी आधुनिक सस्कृतविश्व विकिरति । अय सस्कृताय जीवति ।

कौमुदी — अय अतीव प्रतिभासपन्न ।

शशाङ्क — प्रिय त्वन्मुखात् एनमुद्दिश्य बहु श्रुतम् । अधुना एतन्नाटक अत्र रङ्गमञ्चे विद्यापीठ छात्रा प्रदर्शयिष्यन्ति । तदव नाटक द्रष्टु मित्रैस्साक गच्छामि ।

कौमुदी — अहमपि तन्नाटक द्रष्टु इच्छामि । अस्य कवे एक नाटकमपि नाह त्यक्ष्यामि । अह अवश्य मम जीवने तस्य नाटकानि सर्वाणि दिदृक्षामि । अय अताव रसज्ञ दशभवत कवि ।

शशाङ्क — यदि एतन्नाटक दिदृक्षसि तर्हि सज्जित वधा भव

कौमुदी — नाटक प्रारम्भाय वला भवति । अह सज्जित वधा अस्मि । अह त्वामनुसरामि गच्छ ।

शशाङ्क — एहि । (इति ता हस्तेन धृत्वा गच्छति)

(गयगडस्य प्रासादगवाक्षात पश्यन्ता, शिरोजान् कङ्कतिकया प्रसाद, यन्ता, जिजयामाता तिष्ठति, हठात् कोण्डणादुर्ग विलोक्य एव चिन्तयति)

जिजया — (मनसि) अहो निसगरमणीयोऽय पर्वत । अय प्रभात नीहारवृत अभिषिक्तस्य स्फटिक शिवलिङ्गस्य शोभा प्रतनोति । अय पर्वत अनेक वृक्ष परीत सानु मण्डले मण्डित बिल्वदळ मण्डल मण्डित शिवमूर्तिरिव आभाति । एकदा अय अस्मदाय । अधुना अय परहस्त गत. आसीत् । किमर्थमय पवत अस्मदीय न भवितव्य । शैव शोभापरिवृत: अय पर्वत भारतीय हस्तगत भवितव्य ।

सद्यस्यिति भारतीयाना लज्जास्पद भवति। भवतु पुत्रक शिवराय प्रक्ष्यामि। (इति शिरोजान् सहृत्य वेणीभर कृत्वा) कोऽत्र भो। (इति आह्वयति)

प्रतिहारिणी — (प्रविश्य) नमस्ते मात। (इति नमस्करोति)

जिजया — कुमार शिवरायमाह्वय।

प्रतिहारिणी — यथाज्ञाऽपयति देवी। (इति नमस्कृत्य गच्छति)

जिजया — (तत्र एकस्या वितर्दिकाया उपविशति विचार मानसा)

(तत प्रविशति शिवराय)

शिव — (तस्या पादयुगल प्रणिपत्य पीठान्तरे उपविशति) मात किमर्थं माहूतोऽस्मि।

जिजया — शिव इत एहि पश्य। (इति दर्शयति कोण्डण गडम्, शिव तयासह गच्छति पश्यति)

शिव — मात, सुन्दरोऽय पवत।

जिजया — तनय, अय निसगरमणीय पवत।

शिव — अय सत्य रमणीय पर्वत।

जिजया — अय पवत कुत्र विद्यते अधुना।

शिव — अय परहस्तगत विद्यते।

जिजया — कथमय अस्मदीय हस्तगत न भवेत्।

शिव — अवश्य भवितव्य।

जिजया — शिव, मम एका कामना वर्तते।

शिव — का ते कामना मात?

जिजया — किं त्व पूरयिष्यसि मदीय कामनाम्।

शिव — अह त पुत्र, जगति यत असाध्य विद्यते तदपि साधयिष्ये त्वत्कृते मात।

जिजया — शिवराय शत्रून विजित्य एनं पर्वतं उपायनमिव मे समर्पय।

शिवः — मातः अय अधुना अजय्य भवति अस्माकम्।

जिजया — शिव अधुनैव उक्तवानसि यत् असाध्य जगति विद्यते तत् साधयित्वा आनयेयं त्वत्कृते इति।

शिवः — सत्य उक्तमानस्मि। किन्तु सः अधुना असाध्यः।

जिजयाः — अरे शिव त्व वीरोचितं न वदसि।

शिवः — मातः, अह ते पुत्रः हिन्दुसाम्राज्य स्थापने उद्युक्तः।

जिजया — अरे पुत्र, त्व भीतिग्रस्तः कदा अभवः नाहं जाने। तव शैशवे स्तन्यपानेन सम अहं वीरगाथाः अश्रावयम्। त्व सर्व महाभारतं, रामायणं, जानासि, किं ते ज्ञानेन प्रयोजनम्? सत्यं त्व भीरुः जातः।

शिवः — (विनम्रो भूत्वा) मातः अह सव्यसाची भूत्वा भीमो भूत्वा धर्मात्मा भूत्वा सत्यान्वेषणे परायणः। मातः धीरः समय प्रतीक्षते।

जिजया — त्व भीरुः भूत्वा एव वदसि।

शिवः — तथा मावद मातः। अहं अधुनैव विजित्य आनयेयम्।

जिजया — शिव त्वं कोण्ढणगड स्वायत्त करणे प्रयतस्व।

शिवः — तथैव मातः अह स्वय करिष्यामि।

जिजया — अचिरेणाऽय पर्वतः अस्मदीय हस्तगतः भवितव्यः अस्ति।

शिवः — मातः ससैन्यः सयोधः कोण्ढण रोध्दु अद्यैव गच्छेयम्।

जिजया — अरे सुत त्व अद्य गच्छ नोचेत् श्वः गच्छ किन्तु सः पर्वतः अस्मदीयः भवितव्यः अस्ति।

शिवः — जननि, अवश्य त्वत्कृते साधयिष्ये गडमेनम्।

जिजया — शिव अह समस्त भारतवर्षे हिन्दु साम्राज्य दिदृक्षामि। त्वं कदा पूरयिष्यसि मे कामनाम्।

शिव —मात यदि त्वदुपमिता मातर स्यु भारतवर्षे क्षिप्रमेव विना प्रयास भारते हिन्दुसाम्राज्य नंक्ष्यति। मात अह अद्यैव कोण्डदेवैस्साक मन्त्रणा विधाय युद्धाय कृतनिश्चय भवेयम्। (इति नमस्कृत्य गच्छति)

जिजया — सर्वे देवता मम कुमार रक्षन्तु भारतवर्षं पान्तु। (इति अन्त गच्छति)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(शिवराय इतस्तत चरन् किंचित्काल विचिन्त्य कोऽत्र भो इति कथयति)

दौवारिक — (प्रविश्य) एषोऽस्मि देव।

शिव — अरे सत्वरमेणजङ्घ आह्वय।

दौवारिक — यथाज्ञापयति देव। (इति नमस्कृत्य गच्छति)

शिव — (सिंहासने उपविशति)

(तत प्रविशति एणजङ्घ)

एणजङ्घ — (प्रविश्य) प्रभो शिवराय नमामि। (इति नमस्करोति)

शिव — अरे एणजङ्घ त्व अनुपदमेव गत्वा मे शिक्षक श्रीकोण्डदेव आनय।

एणजङ्घ — यथाज्ञापयति प्रभु। (इति गच्छति)

(तत प्रविशति कोण्डदेव)

कोण्डदेवः — शिवराय आशीर्वादान् वितरामि। (इति आशिषः ददाति)

शिवः — (आसनादवतीर्य) गुरुदेव नमासि। (इति नमस्करोति)

कोण्डदेवः — अभीष्ट फलसिद्धिरस्तु।

शिवः — धन्योऽस्मि देव। इतः उपविशन्तु। (इति आसनं दर्शयति, कोण्डदेवः उपविशति)

कोण्डदेवः — शिवराय अधुना हठात् अहं आहूतोऽस्मि कि कारणं विद्यते।

शिवः — कोण्डदेव, कोण्ढणगडं किजित्य मात्रे उपायनमिव देयं विद्यते। तं गडमुद्दिश्य चर्चां कर्तुं भवान् आहूतोऽस्ति।

कोण्डदेवः — शिव पृच्छतु भवान् मा गडमुद्दिश्य।

शिवः — कोण्डदेव गड मिम जेतु अधुना कियती सेना अवश्यकी भवति।

कोण्डदेवः — शिव गड मिमं जेतुं अधुना अशक्यं इति मे प्रतिभाति।

शिवः — कुतः ?

कोण्डदेवः — शिव, तस्मिन् गडे नररूप रांक्षसः एकः उदयभानुरिति राजपुत्रः अस्ति इति, दिग्गज समानः गजः अस्तीति, तौ द्वौ कल्लोलरूप सैन्यमपि एकनिमेषे नाशन करिष्यतः इति जनाः कथयन्ति।

शिवः — कोण्डदेव, अस्मत्सकाशे अधिक सेना नास्ति। कथं अल्प सैन्येन त बलवन्तं शत्रू जेष्यामः। (इति इतस्ततः चरन् आस्ते)

कोण्डदेवः — बाल, शिवराय अधुना शत्रुः बलवान्, वय अल्प सैन्य समायुक्ताः अधुना गड जयाय समयः न भवति। पश्य दीपः शक्तिसपन्नोऽपि वायुबलेन प्रताडितः निर्वाणदशां प्राप्नोति।

शिवः — देव, यदि दीपः बृहद्भानुः भविष्यति तर्हि वायुबलेन प्रताडितः सर्वमपि अरण्य दग्धपटलं करिष्यति। तस्मात् अधिक सैन्य समाविष्टेन वयं शत्रु विजेष्यामः इति मे आत्मा कथयति।

कोण्डदेव — सत्वर सैन्यवृद्धि विधाय गन्तव्यमिति मे अभिप्राय ।

शिव — अल्प कालेन गड जतव्य वतते। सैन्य वृद्धिकरण अतीव वेला भविष्यति। तस्मात अल्पसन्यन, बुद्धिबलेन च शत्रु विजतव्य ।

कोण्डदेव — सैन्यवलबुद्धिवलौ अपेक्ष्यते राजकीयषु।

शिव — देव, यदा अल्प बलेन शत्रुविजय भवितव्य तदा चाणक्य बुद्धिचातुयता कामन्दकनीति शुक्रनीति महाभारते वाश्चन घटना मे दुष्टिपथ चित्ररूपेण समाक्रामन्ति।

कोण्डदेव — कथमिति निवेदयतु भवान।

शिव — कौटिल्य यथा शत्रुवश निमूलन चकार तथा अहमपि वुद्धिवलेन शत्रू विजष्यामि। इय राजनीति परम्परा भारतस्य।

कोण्डदेव — पूवजा धमयुद्ध अकुवन, तद्वत कर्तव्य भवता इति मे मति ।

शिव — कोण्डदेव, धमयुद्ध विधाय महाराणा प्रताप पञ्चविंशति वर्षाणि भारतदेश स्वातन्त्र्यसपादनार्थं सकुटुम्बीक अरण्यवास चकार। अन्तत वीरमरण पेदे। तस्मात अह अस्मदीय पूवजस्य जयापजय सदर्भान परामश्य यथास्थिति राजकीयषु तत्परो भवेयम।

कोण्डदेव — किं कतव्यमिति भवता अभिप्राय ।

शिव — देव, अधुना धमयुद्धस्य स्थान नहि। यदा शत्रु वञ्चक भवति तदा कौटिल्य वुद्धया वञ्चनया स यमसदन प्रापणीय भवति। न तु धर्मेण।

कोण्डदेव — शिव, अह वृद्ध त्व बाल, आवयोमध्य वयोन्तर विद्यते। न केवल वयोन्तर भावनान्तरमपि विद्यते। तव कथन हेतुपुरस्सर भवति म। शिष्यादिच्छत पराजय इति लौकोवित अद्य साथकता पेदे अस्मिन सदर्भे।

शिव — देव यूय म गुरव सव विषयषु शिक्षणदातार ।अह सवदा तव शिष्य एव ।

कोण्डदेव — (आश्चर्येण) शिव, अधुना ते प्रयत्नः कः। सुस्पष्ट कथयतु भवान्।

शिव — देव बलवन्त शत्रु सर्वोऽपि वीर अश्वत्थामभाव प्राप्य अयं रात्रौ नाशयिष्यति चेत् सर्वं सुकर भविष्यति। तदेव अधुना आचरणीय विद्यते।

कोण्डदेवः — (अवनतमुखः) शिवराय, तव कल्पनेय, वैद्युतायमाना प्रतिभा, अन्येषा कथ भविष्यति। शत जीव शिवप्रभो! (इति आशीर्वचनानि दत्वा प्रयाति)

शिव — (गुरु नमस्कृत्य गच्छति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(तानाजी पुत्रस्यरायोबस्य विवाहसमारम्भे वर्तते, सर्वे बान्धवजना समागत्य तत्र स्वीय आसनेषु उपविष्टा, रायबा नूतन वस्त्रधारण विधाय ललाटे कुङ्कुमरेखाञ्चित सुन्दर उष्णीषेन मण्डितशिरः आस्ते। तानाजी स्वीय बन्धुभि साक उपविष्टः आस्ते)

तानाजी — तनय सर्वेऽपि समागता किन्तु शिवप्रभु नागत एतावत्पर्यन्तम्।

रायबा — पित तदेव अहमपि चिन्तयामि।

शेलारमामा — महाराज कस्मिन् कर्मणि रत न कोऽपि जानाति। राजा कदा कुत्र गमिष्यति किं करिष्यति देवो जानाति नान्य.।

सूर्याजी — प्रभु समागमिष्यति। ते हठात् आश्विको भूत्वा अस्मत् गेह पावयिष्यन्ति इति मे मन. कथयति।

तानाजी — पत्रं प्रेषितं मया किन्तु सः पत्रधारकोऽपि न समागतः। कारणं किं स्यात्। (इति विचरयति)

रायबा — पितः बहुसमयः अस्ति। द्विहोरा परिमित समयः अस्ति। प्रभु हठात् ऋक्षपातमिव आगमिष्यति।

तानाजी — मे शङ्का भवति यत् ते किमपि कार्यान्तरे निमग्नाः इति। नोचेत् ते प्रथमतः अस्मद्गेहं आगत्य अनन्तरं अन्यत्र गमिष्यन्ति। जानाम्यहं शिवप्रभूना चित्तवृत्तिम्। ते सर्वं सैनिकान् स्वीय बान्धवानिव पश्यन्ति। ते सामाजिक वादिन.।

शेलारमामा — अयं प्रभुः हिन्दुसाम्राज्य स्थापनाय प्रयतते। राज्ञा अनेकानि राजकारणानि सन्ति। ते अवश्य आगमिष्यन्ति लग्नवेळाया उत लग्नानन्तरं वा इति मे अभिप्राय·।

सूर्याजी — अस्मिन् विषये विचारः नहि कर्तव्यः। (इतस्ततः विलोक्य किंचित् श्रुत्वा) कोऽपि आश्विक· समायाति। (अश्व धावन खुरान्यासस्य ध्वनयः भवन्ति)

तानाजी — (अस्तव्यस्त अश्व खुरन्यास ध्वनिं आकर्ण्य) एते अश्व पद खुराघाता· नहि शिवाजी महाराजस्य घोट्टाणस्य, किन्तु कस्यापि सैनिकस्य अश्व पदघट्टनाः भवन्ति।

रायबा — भवतु नाम कोऽपि वार्ताहर. महाराजसकाशात् कामपि वार्ता आनयतीति मे ऊहः।

शेलारमामा — (इतस्ततः विलोक्य) अयं अस्मदीय मावळः समागच्छति, यः रायबालग्नपत्रिका शिवाजी महाराजाय दातुं गतः।

सूर्याजी — अयं शरवेगेन समागत।

तानाजी — एतावत्पर्यन्तं शिवाजी महाराजस्य अनुपस्थितित्वात्, अस्य पत्रधारकस्य आगमनेन शिवाजीमहाराजः नागमिष्यति इति ससूच्यते। (नेपथ्ये अश्वः स्तब्धः इव खुराना ध्वनिविशेषा हेषाश्च भवन्ति)

(ततः प्रविशति मावळः)

मावळः — (तानाजिं नमस्कृत्य पत्रं दत्वा गच्छति)

तानाजी — (पत्रं गृहीत्वा सर्वसमक्षं वाचयति)

अयि स्वामि भक्ताग्रसर, भारतीय सोदर, मराठा योद्ध नमस्ते। ते चिरंजीवस्य रायबास्य शुभविवाह भवतीति पठित्वा परमानन्देन आत्मानं व्यस्मरम। सर्वदा सर्वत्र भवत कुटुम्बस्य मे शुभकामना सन्ति इति कथने पुनरुक्तिः भविष्यति। भगवान् सर्वशक्तिमान शिवः शुभं कुर्यात इति मम शुभकामना प्रयच्छामि।

महायोद्ध तव पुत्रस्य विवाहाय नाहं उपस्थितं भवितुं शक्नोमि यतः अत्र मम अनुपदाचरणीयकोण्ढणगडस्य विवाहस्य शुभमुहूर्तं अत्यसन्नं अस्ति तदर्थं तत्रोऽपस्थितिः ममात्यावश्यकी। त्वं तव पुत्रस्य शुभविवाहं कुरु। अहं अत्र कोण्ढणगडस्य शुभविवाहं करिष्यामि। गडस्य विवाहानन्तरं अहं त्वत्सकाशं समागमिष्यामि। शुभं भूयात।

एवं

शिवप्रभु

तानाजी — (किंचित्काल आश्चर्येण चिन्तयाच स्थगितं भूत्वा) अयि बान्धवा अन्यस्मिन् शुभमुहूर्ते अयं विवाह भविष्यति। यतः शिव प्रभु नागतः ततः अयं विवाहं अधुना न भविता। यत्र शिवरायस्य उपस्थितिः न भवति तत्र कार्यस्य माहात्म्यं न भवति। तस्मात राज्ञः विना अयं विवाहः न भवति। यूयं सर्वेऽपि अत्रैव तिष्ठत, अहं शिवरायसमीपं गत्वा विदितं सर्ववृत्तान्तं प्रत्यागमिष्यामि। कुमारस्य कल्याणात् देश कल्याणं वरिष्ठं श्रेष्ठतरंच। ततः अहमपि तस्मिन् देशकल्याणे भागं गृहीत्वा प्रत्यागच्छयम्। (इति गच्छति)

शेलारमामा — शिवरायः कस्मिन् अपि सङ्कटे सलग्न इव आभाति। हठात् किमापतितं वयं न जानीमहे।

सूर्याजी — महाराजा सर्वदा आलोचना परा। ते सवदा कायरता भवन्ति। ते कस्मिन् समये किं करिष्यन्ति, कुत्र गमिष्यन्ति न कोऽपि

जानाति। तेषां आलोचनाशक्तेः अवधिः नास्ति। वयं अत्रैव पुनः मिलिष्यामः। नमस्ते। (सर्वेऽपि नमस्ते नमस्ते इति कथयन्तः गच्छन्ति)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(जिजयामाता शिवरायश्च उपविष्टौ संभाषयन्तौ)

जिजया — तनय, कोण्डदेवः किमवादीत् कोण्ढणगड प्रस्थानमुद्दिश्य।

शिव. — अधुना जेतु दुष्करमिति अवादीत्।

जिजया — दुष्कर जेतुमिति अहमपि जानामि, किन्तु किमपि मार्गं जगाद कि इति मे प्रश्नः।

शिवः — सैन्य अधिकसंख्या परिमितं विधाय यदि गम्यते तर्हि जय्यं भवेदिति जगाद।

जिजयाः — शत्रुः अतीव बलवान् किम्?

शिवः — शत्रुः बलवानिति, तस्मिन्गडे नररूपराक्षसः एकः उदयभानुनामकः राजपुत्रः अस्ति इति, तस्य सकाशे दिग्गजसमानः गजः अस्तीति, तौ द्वौ कल्लोलरूप सैन्यमपि एकनिमेषे नाशन करिष्यतः इति जनश्रुति अकथयत्।

जिजया — तस्मात् त्वया कि क्रियते?

शिव — मातः यदा शत्रुः बलवान् भवति तदा बुद्धिबलेन सः जेतव्यः इति निश्चितः तदर्थमहं मार्गं तर्कयामि।

जिजया — तनय, ते जीवन ते साहसं धैर्यं च उत्तरदायिना मार्गदर्शकैः भूयास्ताम्, अपि च दीपस्तम्भसमान विराजतां इति, सर्वदा सर्वेश्वरमहं प्रार्थयामि।

शिवः — मातः मे अनुचराः सर्वे अत्यन्त देशभक्ति सपन्नाः। सत्वर मेवाहं तेषां सहायेन नूनं लिपात्से।

(ततः प्रविशति दौवारिकः)

दौवारिकः — (प्रविश्य नमस्कृत्य) महाराज तानाजी महोदयाः द्वारि तिष्ठन्ति।

शिवः — अनुपदं प्रावेशय।

दौवारिकः — यथाज्ञापयति प्रभुः। (इति गच्छति)

(ततः प्रविशति दीर्घश्मश्रुः महोन्नतः पीनवक्षः धलवान्, नूतन वस्त्रालङ्कृतः कुङ्कुमरेखाचित्रित ललाटतटः खड्गद्वितीयः तानाजी)

तानाजी — (प्रविश्य) जयोऽस्तुते शिवराय। (इति नमस्करोति) (जिजया विलोक्य) नमस्ते मातः। (इति नमस्करोति)

शिवः — (पीठादवतीर्य) मित्रोत्तम कथ हठात् समागतोऽसि।

तानाजी — प्रभो भवता पत्र मा अत्राऽनयत्। भवन्त द्रष्टु अनुपदमेव समागतोऽस्मि।

शिवः — परिसमाप्त तनयविवाहः समागतोऽसि ?

तानाजी — प्रभो भवता पत्र तनयस्य विवाह प्रलम्बयितु दिदेश।

शिवः — ताना, सुतस्य विवाहः न कृतः किम् ?

तानाजी — नहि कृतः।

शिवः — किमत्र कारणम् ?

तानाजी — कोण्ढणगड विवाहानन्तर रायवा विवाहः भविष्यति।

शिवः — ताना मम मातुः चिरकामना इयमस्ति। कोण्ढणगडः अस्मदीय हस्तगतः भवितव्यः इति। तदर्थं अह भवदीय पुत्रस्य विवाहाय अनुपस्थितः अभवम्। मम अधुना कोण्ढणगडस्य कल्याणाय गन्तव्य विद्यते। तदर्थं अह स्वयं ससैन्यः गड जेतु जिगमिषामि।

तानाजी — एन विषय भवान प्रथमत नोक्तवान महाराज।

जिजया — ताना, शिवोऽपि प्रथमत न जानाति। दिवसद्वयात राघव मया इय कामना प्रकटीकृता यदा तवपुत्रस्य विवाहपत्र अस्मदीय हस्तगतम।

तानाजी — गडमेनमद्दिश्य पूर्वमेव मम मनसि विचारधारा समजनि। कि तु अह शिवरायाग नोक्तवान यत शिवप्रभु कार्यान्तरे निमग्न आसीत।

शिव — मित्रोत्तम त्व जानासि, कदा कीदृशी भावना मे मनसि जायते इति।

तानाजी — शिवराय अधुना भवान स्वत गड जतु यियतिपते। तत मह्य न रोचते। अह स्वत त गड विजित्य भवत पादार्पित करिष्य।

शिव — ताना, त्व प्रथमत कुमारस्य विवाह कुरु। अनतर गड जतु प्रयतस्व॥

तानाजी — प्रभो अधुना विवाहस्य सुमुहूत व्यतीत। अन्यस्मिन शुभसमय विवाह भविता। अधुनाह कोण्ढणगडस्य विवाह कारयितु गच्छ-यम। प्रथमत कोण्ढणगडविवाह अनतर कुमारस्य विवाह।

शिव — ताना, अह स्वय गत्वा साधयिष्यामि गड अत्र ते सहाय मास्तु। त्व कुमारविवाह अत्र प्रथमत कुरु। अह तत्र गड विवाह करिष्यामि।

जिजया — ताना ते स्वामिभक्ति सूयरश्मिवत परम पवित्रा। स्व तनयविवाह प्रथमत विधाय अनन्तर गडप्रस्थान कुरु।

तानाजी — मात, कुमार विवाहात मे कोण्ढणगड विवाह वरवत्तर श्रेष्ठतर प्रतिभाति। तस्मात अह कोण्ढणगड विवाह परिसमाप्य कुमार-विवाह करिष्ये। अस्मिन् कर्मणि भवती मा नियोजयतु इति देशभक्तस्य अपि च स्वामिभक्तस्य विज्ञप्तिरिय। (इति मुकुलित हस्त जिजया पुरत तिष्ठति)

जिजया — ताना त्व शिवराय अपृच्छस्व। स भवत प्रभु।

तानाजी — शिवराय, देशे हिन्दुसाम्राज्य स्थापनार्थं इदं मे शरीर समिधं समरवैश्वानरे पातयितुं मे आज्ञा प्रयच्छतु भवान् इति मे चरमाभिलाषः। (इति नमस्करोति)

शिवः — (उत्थाय) मित्रोत्तम ते स्वामिभक्त्या अहं तुष्टोऽस्मि तथैव त्वमेव गत्वा विजयश्रिया समालिङ्गितः प्रत्यागच्छ। शिवास्ते पन्थानः सन्तु। (इति हस्तमुद्यम्य आशीषः ददाति)

तानाजी — (मातापुत्रौ नमस्कृत्य गच्छति)

शिवः — मातः, यदि एतादृश देशभक्ताः स्वामिभक्ताः देशे सर्वत्रस्युः, अचिरादेव विजयनगर हिन्दुसाम्राज्य प्रतिष्ठापकानां, हरिहर बुक्कराय विद्यारण्यादीनां, हिन्दु साम्राज्य रचनां, अह सर्वत्र भारतवर्षे, मे जीवन सर्वव्यापिनी फलमयी विधाय, भारतवर्षं परधाटीभ्यः रक्षयित्वा, हिन्दु साम्राज्यं सत्य स्थापयिष्यामि।

जिजया — तनय, सर्वथा अस्माभिः प्रयत्नः कर्तव्यः। बलीयसी केवलमीश्वरेच्छा।

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(रायवा, शेलारमामा, सूर्याजी, तानाजी एकत्र उपविश्य सभाषन्ते)

शेलारमामा — अरे ताना किं सुखेन सन्ति शिवरायाः।

तानाजी — हां शिवरायाः जिजयामाता सर्वेऽपि सकुशलं सन्ति।

सूर्याजी — अधुना ते कस्मिन् कर्मणि निरताः।

तानाजी — वयं सर्वे जानीमहे। ते कोण्ढणकल्याणकरणे निमग्नाः इति।

शेलारमामा — राजा स्वय कोण्ढणं जेतुं जिगमिषति।

तानाजी — स्वयं गन्तुं प्रयतन्ते। किन्तु अहं गत्वा तान् एवं अवोचं, अयि देव शिवराय भवतां अनुचराः योद्धारः बहवः सन्ति, कोण्ढणगड प्रस्थान युष्माकं न योग्यं इति।

सूर्याजी — साधु समुदीरित भवता।

शेलारमामा — तस्मात् वयं सर्वे गत्वा कोण्ढणं जित्वा महाराजाय उपायनमिव दास्यामः।

तानाजी — इदं उपायनं महाराजाय नहि मातृमूर्त्यै जिजयादेव्यै प्रदातव्यं विद्यते।

सूर्याजी — एतावत्पर्यन्तं आधुनिक भारत इतिहासे एतादृशः वीरः शिवाजी सदृशः न दृष्टः केनापि। अहो किं तस्य बुद्धिचातुर्यम्।

शेलारमामा — कदा एते कुत्र गच्छन्ति किं कर्तुमिच्छन्ति सर्वज्ञः शिवः एव जानाति।

तानाजी — शिवरायः भारतराष्ट्र चिन्तना वेलाया निद्रा भोजनमपि संत्यजति। यदि ते निद्रिताः भवेयुः तर्हि स्वप्नेऽपि भारतमुद्दिश्य, हिन्दु राष्ट्रमुद्दिश्यैव चिन्ता प्रचलिष्यति इति मे वितर्कः।

रायबा — पितः यदि भवन्तः कोण्ढण जेतु गच्छन्ति तर्हि अहमपि भवद्भिः साकं आगमिष्यामि।

तानाजी — चिरंजीव, वयं सर्वे अस्मिन् कर्मणि भवताः, तव उपस्थितिः तत्र अनावश्यकां भाति मे।

रायबा — अस्मिन् संदर्भे ममापि यदि भागः स्यात् तर्हि अहमपि आत्मानं कृतकृत्य मन्ये।

तानाजी — (अतीव संतुष्टः) तनय, भवदीय कामना अतीवानुरूपा भारतीयस्य। तनय त्वं विवाहार्थं नूतन वस्त्रधारणं विधाय वर्तसे अधुना अस्मिन् वेषे तत्रागमनं मे सम्यक् न प्रतिभाति। त्वं गृहे स्थित्वा शत्रुभ्यः स्त्रीगोब्राह्मण रक्षणां कुरु।

सूर्याजी — यदि सर्वोऽपि वीरः कोण्ढणं गच्छति तर्हि अत्र ग्रामरक्षकः कः भविष्यति। तस्मात् रायवा तव निश्चयात् त्वं विरम। त्वं अत्रैव तिष्ठ।

शेलारमामा — अस्मदीय महाप्रस्थान कदा भविष्यति।

तानाजी — श्वः प्रभाते वय मर्वे कोण्ढणगडस्य समीपे विद्यमान अरण्ये मिलिष्यामः। सर्वैरपि यानि यानि परिकराणि युद्धाय उपयुक्तानि भविष्यन्ति तानि सर्वाणि आनीतव्यानि विद्यन्ते। प्रथमतः तत्र दुर्गस्य स्थिति ज्ञातुं य कमपि वार्ताहरं प्रेषयन्तु।

शेलारमामा — सर्वं वय ससिद्ध कुर्याम।

सूर्याजी — अहं सर्वव्यवस्था करिष्यामि।

तानाजी — अयि भोः मित्रवर्याः, सर्वदा यूयं स्मरन्तु इमां भावनां या मया कथ्यते।

शेलारमामा — केय भावना।

तानाजी — वयं एकाकिनः भूत्वा अस्मिन् धरातले समागतवन्तः। पुनः एकाकिनः भूत्वा परलोक गच्छेम। वयं सर्वे यदाकदापि मरिष्यामः। किन्तु देशः स्थिरः। विना च स्वार्थं अस्माभिः व्यवहर्तव्यः। वय देशहिताय सर्वस्याग कर्तुं संसिद्धमनस्काः भवेम। युद्धवेलायां एनां भावना मा विस्मरन्तु इति इय मे चरमाज्ञा भवति। श्वः पुनर्मिलनं भविष्यति। शुभं भूयात्।

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(शिवाजी कोण्डदेवौ भाषयन्तौ स्तः)

कोण्डदेवः—शिवराय, ताना स्वकुमारस्य पाणिग्रहणाख्यं कर्म विसृज्य कोण्ढणगडसाधनाय गतः इति श्रुत्वा अहं पुलकित गात्रः अभवम्।

शिव — देव, प्रथमत अह स्वय गन्तु उद्युक्त अभवम्। किन्तु तेन प्रार्थित अह त अस्मिन् कर्मणि नियोजितवानस्मि।

कोण्डदेव — शिव ते मित्र अतीव स्वामिभक्त देशभक्तश्च।

शिव — देव, अस्मदीय महाराष्ट्र देशे सर्वे नागरिका राष्ट्रभक्ता तस्मादेवाह विजयनगर महाराजाना हिन्दुसाम्राज्य स्थापकाना कामना परिपूर्णता प्रापयितु प्रयतामि। इत. पर भाविभारतराष्ट्र महाराष्ट्रात् स्वातन्त्र्य स्फूर्ति लभतु इति सर्वेश प्रार्थयामि।

कोण्डदेव — श्रीविद्यारण्यस्वामिना हरिहरबुक्करायादीना हिन्दु साम्राज्य वैभव स्थापना भावना अविछिन्ना अखण्डिता भूत्वा सतत भारते विराजतु इति अह भावयामि।

शिव — देव, अह सत्य पूर्वजाना भावना परिपूर्णता प्रापयितु दिवा रात्र प्रयतिष्ये।

कोण्डदेव — शिव, त्व सत्य तानाद्वितीय ते बौद्धिकप्रतिभया त्व असाध्य साधयिष्यसि इति मे मति ।

शिव — महता आशीवचनबलेन सर्व साध्य भवति गुरुदेव ।

कोण्डदेव — शिव, ताना कदा गमिष्यति कोण्ढणम्।

शिव — अद्य साय गमिष्यति।

कोण्डदेव — कै साकम्।

शिव — शेलारमामा, सूर्याजी, मावळसहित गमिष्यति।

कोण्डदेव — शिव कोण्ढणगड विजयानन्तर वार्ता प्रपितु व्यवस्था परिकल्पनीया इति कथित किम् ?

शिव — स एव अवोचत् यत् कोण्ढणगड विजयानन्तर अनेक फिरङ्गय वाद्यन्त भगवाध्वजाविष्करण नियते, अनन्तर पवत चोतिहाग्न प्रज्वाल्यत। सा एव अस्मदीय विजयस्य निस्तन्त्री वार्ता इति उक्त्वा गत ।

कोण्डदेवः — शिव, साधूक्त तेन। वयं द्रक्ष्यामः कोण्ढण गड पुनः अस्मदीय राज्ये इति महानानन्दः भवति मे।

शिवः — देव वयं द्रक्ष्यामः सर्वं सुखान्तम्।

(ततः प्रविशति दौवारिकः)

दौवारिकः — (प्रविश्य) नमो नमः कोण्डदेवाय, शिवरायाय। (इति नमस्करोति)

शिवः — किं रे को विशेषः।

दौवारिकः — देव शिवराय, जिजयामाताः भवन्तं आह्वयति।

शिवः — आगगच्छाम्यहं त्वं गच्छ।

दौवारिकः — यथाज्ञापयति देवः। (इति गच्छति)

शिवः — देव कतिपय दिवसानन्तर वय कोण्ढण विजयवार्तां श्रोष्यामः।

कोण्डदेवः — शिव गच्छामः एहि। (इति गच्छतः)

(यवनिका पतति)

* * *

सप्तमं दृश्यम्

(तानाजी, शेलारमामा, सूर्याजी इत्यादिवीरैः परिवेष्ठितः कोण्ढण गड गमनोन्मुखः चर्चां करोति)

तानाजी — अयि बान्धवाः अद्य सायं अस्माभिः सर्वैरपि सायुधैः कोण्ढणगड प्रति गन्तव्य विद्यते।

शेलारमामा — पवतागेहण उपयुक्त परिकरान् गृहीत्वा गन्तव्य वतते।

सूर्याजी — अह सुदीघ रज्जु एक आनायिष्यामि।

तानाजी नकुल कुलोत्पन्न घोरपडि एक अह आनयेयम। तस्य कृते मधु भाण्डमपि एक आनयिष्यामि। सर्वेण पि खडगद्वयन भवितव्यम। तत्र नररूप राक्षस अस्ति। तस्य हनन कर्मणि उपयुक्तानि आयुधानि गृहीत्वा गन्तव्यमस्ति।

सूर्याजी — भगवाध्वज गृहीतव्य वर्तते।

तानाजी — अयि बान्धवा अय गड अत्यन्तदुर्भेद्य इति जना कथयन्ति। कथ तत्र गन्तव्य इति प्रथम प्रश्न।

सूर्याजी — तत्र गडसान्निध्य बहव मत्स्यग्राहका सागरीया सन्ति।

शेलारमामा — प्रथमत तै साक मैत्री कर्तव्या।

तानाजी — तेभ्य अतीव रोचते ताम्बूलपत्र सुधाचूर्ण मादकता औषध च। तत यदि तेभ्य एतत वस्तु जाल प्रयच्छम सर्व सुकर भवत्येव।

सूर्याजी — ताम्बूल पत्र बन्धनानि सुधाचूर्ण अपिच मादकता द्रव्य औषध च जाल अह आनयेयम।

शेलारमामा — ताना, अह इत पूर्व वार्ताहरमेक वृत्तान्त समाहरणाय प्राहिणम्। स अधुना आगमिष्यति तदुचितमनुसृत्य वय व्यवहारिष्याम।

तानाजी — तत्र कियत् सैन्य विद्यते वय न जानीमहे।

सूर्याजी — वय बहवल्पसैन्य समेता

(तत प्रविशति भट)

भट — (प्रविश्य) वार्ताहर समायात द्वारि तिष्ठति।

शेलारमामा — अन्त प्रपय तम्।

भट — तथव। (इति गच्छति)

(तत प्रविशति वार्ताहर)

शेलारमामा — अस्ति कोऽपि विशेषः? कथय वार्ताम्।

वार्ताहरः — सर्वमपि विदितमासीत् देव।

तानाजी — अरे गडाधिपः कः?

वार्ताहरः — उदयभानुः।

तानाजी — सः कीदृशः इति तत्रत्याना भावना।

वार्ताहरः — सः सिंहबलः।

तानाजी — तस्मिन् पर्वते आहत्य कियत् सैन्यं विद्यते दुर्गरक्षणे।

वार्ताहरः — सहस्राऽधिक सैन्यं विद्यते इति मत्स्यग्राहकैः कथितम्।

तानाजी — गडस्य कस्मात् प्रदेशात् अन्तः गन्तुं सुलभः भवति।

वार्ताहरः — पर्वतानुत्तरेण गडप्रवेशः भवितु सुकरमिति तैः प्रोक्तम्।

तानाजी — तेषां सकाशे के के परिकराः विद्यन्ते।

वार्ताहरः — तेषां सान्निध्ये मत्तगजेन्द्रः एकः विद्यते। सः शत्रुदर्शनेन उद्धतः भूत्वा शत्रून् शुण्डाग्रेण गृहीत्वा आकाशे उत्क्षिपतीति प्रोक्तम्।

तानाजी — तत्र बालाः स्त्रियः विद्यन्ते किम्।

वार्ताहरः — तत्र बालाः विद्यन्ते। तत्र बह्व्यः स्त्रियः वर्तन्ते। ताः सर्वाः तस्य नररूप राक्षसस्य भार्याः। सः सर्वदा मद्येन उन्मत्तः भवति।

तानाजी — गडे सर्वत्र रक्षणा विद्यते किम्?

वार्ताहरः — दक्षिणतः कापि रक्षणा न कदापि भवतीति तैरुक्तम्।

तानाजी — कुतः?

वार्ताहरः — गडस्य दक्षिणभागः अत्यन्तोन्नतः। तत्र कोऽपि प्रवेष्टुं शक्तः न भवति यतः सर्वमपि प्रस्तरैः निम्नोन्नत भाति तत्र। पर्वतस्य पश्चात् गंभीरा सानुः विद्यते। यः कोऽपि तत्र पर्वतात् भ्रष्टः भवति सः अनुपदमेव तस्मात् सानोः पाताल प्रवेक्ष्यति।

शेलारमामा —त्वया प्रथमत कथ मत्स्यग्राहकै साक सबन्ध कृत ।

वार्ताहर — अह एक कृषीवल इति उक्त्वा तेभ्य पूगीफलानि, नागवल्लीदलानि मादकता औषध वितीय तैस्साक विश्वासपूर्वक सख्य अकरवम ।

सूर्याजी — वय सर्वे मिलित्वा रात्रौ पर्वतसमीप गच्छाव । तस्मात त्व अस्माक मार्गदर्शको भव ।

तानाजी — सर्वैरपि निश्शब्द गत्या गन्तव्यम् । (इति सर्वे शनै शनै गच्छन्ति)

(यवनिका पतति)

* * *

अष्टमं दृश्यम्

(नपथ्ये फिरङ्गीना शब्दा जयमङ्गल वाद्यविशेषा भवन्त पर्वत वन्हिश्च प्रज्वलति)

(तत प्रविशत जिजया शिवरायौ)

शिव —मात किं शृणोसि वाद्यविशेषाणा ध्वनौ । इत पश्य कोण्ढण गढ वन्हि प्रज्वलति ।

जिजया — हा पश्यामि पर्वत वन्हिमान् जात ।

शिव — मात किं जानासि कोऽयमग्नि ?

जिजया — दावाग्नि इति मे मति ।

शिव — नहि मात अय वन्हि जयसूचक ।

जिजया — अहो अय जयसूचक वन्हि ?

शिव — हा कोढण्णगड अस्मदीयहस्तगत अस्ति। तदर्थं अव जय सूचक वन्हि ।

जिजया — विदित कुमार।

शिव — ताना जनन प्रयोगन निस्तन्त्री वार्ता प्रपयामास।

जिजया — अद्य मे महानानन्द ।

शिव — मात श्रुणु इमा फिरङ्गी ध्वनी । ताना शत्रून् विजित्य भगवाध्वजारोहण कृतवान्।

जिजया — शिव, मे कामना परिपूर्णा अद्य प्रभृति कोण्डणगड शिवरायराज्य विराजते। अहो निरवधि मे आनन्दस्य।

शिव — मात अह कोण्डणगड गत्वा वीरसत्कार करिष्ये।

जिजया — सत्वर गच्छ वीरसत्कार कुरुष्व।

शिव — (नमस्कृत्य गच्छति)

(यवनिका पतति)

* * *

नवमं दृश्यम्

(सीकरारण्य कोण्डणगडसमीपे सूर्याजी शेलारमामा प्रभृतय वर्तन्ते तत प्रविशति शिवाजी)

सूर्याजी — शिवमहाराजाय जयोऽस्तु। (सर्वे अनुचरा शिवाजीमहाराजाय जयोऽस्तु इति ब्रुवन्ति)

शेलारमामा — प्रभो कोण्डणगड अस्मदीयहस्तगत । वय अल्प सैन्यनकेवल शत्रु जितवन्त ।

शिवः — (श्रृण्वन्) शान्तमयेन गत्या इतस्ततः चलन् सर्वासुदिक्षु कमपि शोधयति।

सूर्याजी — सर्वेऽपि निहताः युद्धे।

शेलारमामा — ताना गतदक्षिण हस्तः, वामहस्तेन खड्गं गृहीत्वा विद्युदिव आकाशे स्फुरन् प्रयुध्य शत्रुं उदयभानुं निहतवान्।

शिवः — शनैः शनैः चलन्। (तानाशवसमीपं गत्वा आपादमस्तकं तं विलोक्य करुणया गिरा)

अहो ताना, मे मित्रम्। मे अनुचर। त्वं स्वामिभक्तोऽसि। राजाज्ञा धारकोऽसि। देश भक्तोऽसि। निस्वार्थी असि। स्वगृहे वैवाहिक मङ्गलकार्यं विसृज्य देश वैवाहिक मङ्गलकार्यं कर्तुं समागतोऽसि। त्वं मे दक्षिणहस्तः। मे हस्तात् स्रस्त वज्रायुधोऽसि। त्वं मे हृदयम्। मे पञ्चप्राणसमवायः। स्वल्प सैन्यैः अनन्तसैन्यपरीतं कोण्ढणगडं अल्प सैन्येन जितोऽसि। त्वं पुरुष सिंहोऽसि। त्वं कालातीतोऽसि। ते जीवितं सार्थकं बभूव। अयि अनुचराः, कोण्ढणगडः हस्तमागतः किन्तु सिंह पञ्चत्वं गतः। अद्य प्रभृति अस्य गडस्य नाम इतिहासे सिंहगडः भविष्यति।

(आश्चर्य व्यथाभ्या) ताना अयं ते आत्मा देशरूप परब्रह्मणे समर्पितः। सोऽयमात्मा ब्रह्मानन्दमनुभवति। राष्ट्राय समर्पितोऽयमात्मा पुनर्जन्म राहित्य भजते। अयं ते आत्मा सायुज्यं प्राप्तः। (इति अधोमुखः भूत्वा वीरासने उपविश्य हस्तं मुखोपरि विन्यस्य अश्रु विन्दून् त्यजति। (सर्वोऽपि हस्तौ निवध्य विषण्णवदनः आस्ते)

(नेपथ्ये)

"न जायते, म्रियते वा कदाचित्।नायं भूत्वा भविता वा न भूयः। अजो नित्यः शाश्वतोऽयं पुराणो। न हन्यते हन्यमाने शरीरे।"

(यवनिका पतति)

।। परिवर्तनम् ।।

गीतां बोधितवन्तं। श्रीकृष्णं मानुष विग्रहवन्तम्।
जनता हृदयान्तस्थं। नौमि विश्वरूपिण देवम्।।

(नान्द्यन्ते)

(सुस्मितावासन्त्यौ उपविश्य हसन्त्यौ सभापेते अत्रान्तरे हठात् वार्तापत्रिका पठन्ती सुस्मिता वासन्तीं कथयति)

सुस्मिता — सखि वासन्ति, शृणु अद्य सप्तघण्टावादनसमये परिवर्तन नाम नाटक गीर्वाणनाटक मण्डलीया संस्कृतभाषाया प्रदर्शयन्ति। प्रवेश शुल्क रूप्यकद्वयम्।

वासन्ती — परिवर्तन नाम नाटक गीर्वाण भाषायाम्?

सुस्मिता — परिवर्तन, इति श्रवणेन जीवितेपरिवर्तितस्य महापुरुषस्य जीवित मन्वर्थीयमेतत् नाटक इति द्योतते।

वासन्ती — कवि· क?

सुस्मिता — कवि गीर्वाणान्ध्र भाषाप्रवीण पन्डित परीक्षित् शर्मा।

वासन्ती — हसे जानामि तम्।

सुस्मिता — कथ जानासि तम्।

वासन्ती — स कवि एकदा अस्मदीय महाविद्यालये स्वरचित संस्कृत गीताना गायनमकरोत्। तस्य गीर्वाणगेयचक्रवर्ती इति नामान्तर विद्यते।

सुस्मिता — अनेन कानि कानि लिखितानि।

वासन्ती — अनेन लिखित गीतालहरी इति गेयकाव्यम्. विद्वन्मानन्दं (अखिल भारतीय कालिदास पुरस्कारेण सन्मानित) यशोगानलहरी, अल्प

गात रामायणम्, सप्तविंशतिनाटकपरिमित परीक्षिन्नाटकचक्र इत्यादीनि काव्यानि निलिखितानि।

सुस्मिता — अरे आश्चर्यं संस्कृतभाषाया बहूनि काव्यानि लिखितानि अनेन महाकविना।

वासन्ती — अपि च सन्ति बहूनि।

सुस्मिता — हा, कानि कानि सन्ति कथय।

वासन्ती — प्रतापराणायनमहाकाव्यम्, त हि नो दिवसा गता इति गद्यकाव्यम्, सौन्दर्यमीमासा इति अलङ्कार प्रबन्ध मित्यनानि बहूनि सन्ति।

सुस्मिता — अस्मिन् विंशतितमे शताब्दे अय महाकविषु एक विराजते।

वासन्ती — सखि, सुस्मिते एकदा तेनोक्त, एतत् परिवर्तन नाम नाटक भक्त पुरन्दरदासमुद्दिश्य लिखितमिति।

सुस्मिता — कोय पुरन्दरदास ?

वासन्ती — अय कर्णाटकसगीतशास्त्र साम्प्रदाये प्रथम कीर्तनकार। अनेन लक्षाधिक कर्णाटकभाषागीतानि रचितानि।

सुस्मिता — अय प्रथम कीर्तनकार इत्युक्त भवत्या अन्ये बहव विद्यन्ते किम् ?

वासन्ती — बहव सन्ति, किन्तु कर्णाटक सगीत शास्त्रसाम्प्रदाये ब्रह्मा-विष्णु महेश्वरत्रयमिव, त्यागराज, दीक्षित, श्यामाशास्त्रित्रय कर्णाटकशास्त्रीयसगीत सागरोपम विधाय लोकव्यापक चकार।

सुस्मिता — कस्या भाषाया कर्णाटक शास्त्रसगीत निलिखितम्।

वासन्ती — गेयकार श्रीत्यागराज आन्ध्रभाषाया, मुत्तुस्वामि दीक्षित गुरुगुह इति नामान्तरेण संस्कृतभाषाया, श्यामाशास्त्रीण आन्ध्रभाषाया अन्नमाचार्य आन्ध्रभाषाया असख्याकानि गीतानि लिलिखु। सर्वेषु कर्णाटकसाम्प्रदाय सगीतकारेषु गेयकार श्रीत्यागराज भानुमण्डलवत् द्योतते कर्णाटकसगीतशास्त्रे।

सुस्मिता — अनेन तव भाषणेन मम ज्ञायते यत् आन्ध्रभाषाया कर्णाटक संगीतशास्त्रं अधिकांशेन विलिखितमिति।

वासन्ती — हा अशीत्यंश परिमित कर्णाटक संगीतशास्त्रं आन्ध्रभाषायामेव विलिखितम्। आन्ध्रेतरैरपि आन्ध्र भाषायामेव कर्णाटक संगीतशास्त्रीयानि असंख्याकानि गीतानि विलिखितानि। तस्मात् कर्णाटक संगीतशास्त्रं आन्ध्रभाषाया निक्षिप्तं आरक्षित इति कथने न कस्यापि विरोधः भवति, यतः इदं भाषणं सत्य दूरं न भवति।

सुस्मिता — किमर्थं आन्ध्रेतराः संगीतकानि आन्ध्रभाषाया विलिखन्ति।

वासन्ती — आन्ध्रभाषा संगीतभाषा इति सर्वेषा कलाराधकानां गायकानां च अभिप्राय तस्मात् ते आन्ध्रभाषाया विलिखन्ति।

सुस्मिता — कर्णाटक संगीतस्य अर्थं कः?

वासन्ती — इद संगीतं एकवार श्रवणमात्रेणैव सर्वदा कर्णे अटति इति हेतोः कर्णाटक संगीतमिति ममाभिप्राय . किन्तु न कर्णाटक देशीय इति।

सुस्मिता — अधुना मया सविस्तरं ज्ञातम्। पुरन्दरदासमुद्दिश्य कृत परिवर्तनं नाम नाटकं द्रष्टु अहं अत्यन्त उत्सुका अस्मि।

वासन्ती — तन्नाटकं द्रष्टु आवां गच्छावः।

सुस्मिता — त्वरस्व।

वासन्ती — (प्रसाधन मञ्जूषा गृहीत्वा) एहि गच्छावः। (इति गच्छतः)

(मञ्चे स्वपन्ती आस्ते छाया आपादमस्तकं वस्त्राच्छादनं विधाय, ततः प्रविशति तस्याः पति प्रभाकर)

प्रभाकर — (आत्मगतम्) बत अद्य बहुपरिश्रान्तोऽस्मि प्रातः प्रभृति अहिण्डमानः। हा प्रभृति न किमपि स्वादितं मया। बुभुक्षा मा बाधते। (पत्न्याः समीपं गत्वा) हञ्जे अधुना अहं बहु बुभुक्षितोऽस्मि यत् किञ्चित् खाद्यं देहि। (इति नागदन्ते उत्तरीयं निक्षिप्य आसने उपविशति)

छाया — (मञ्चे इतस्ततः लुठन्ती) अद्य गृहे पाकः न कृतः। न किमपि विद्यते भोक्तुम्।

प्रभाकर — किमर्थं न कृत ।

छाया— गृहे गोधूम चूर्णं न विद्यते, तण्डुला न सन्ति। न किमपि शाका दिक विद्यते, किं कुर्याम् कथं कुर्याम् ? (इति इतस्तत खट्वाया लुठन्ती वदति)

प्रभाकर — हञ्जे, प्रात रूप्यपञ्चक दत्वा अगच्छम् खलु, तत् किं कृतम् ?

छाया — कुटुम्बे अनेकानि छिद्राणि सन्ति। प्रवाहरूपेण यदि लक्ष्मी समागच्छति तर्हि छिद्रपूरणमेव भविष्यति। पञ्चरूप्यकेन किं भविष्यति ? कथ भविष्यति।

प्रभाकर — तत् रूप्यपञ्चक किं कृतम् ?

छाया — दुग्ध गोपालकाय दशरूप्यकाणि दातव्यानि इति भवान् जानाति।

प्रभाकर — तस्मात्।

छाया — अद्य प्रात स आगत्य तस्य पत्नी शीतज्वरेण बाधते इति तस्मात दश रूप्यकाणि वैद्यकीय उपचाराय अपेक्ष्यन्ते इति मे कण्ठोपरि उपविष्ट आसीत्।

प्रभाकर — तत किं कृत भवता ?

छाया — तत पञ्चरूप्यक अयच्छ तस्मै।

प्रभाकर किमर्थं रूप्यपञ्चक दत्तम् ? हस्ते अधिक न विद्यते इति ज्ञात्वापि त्व दत्तवती असि। रूप्यकद्वय उत रूप्यकत्रय वा दत्वा अनन्तरमागच्छेति वक्तव्य, त्व मूर्खा असि।

छाया — नाह जाने अस्मत् सकाशे केवल पञ्च रूप्यक विद्यते इति। भवत समीपे अधिक विद्यते इति मत्वा एवमकरवम्। मया अनालोच्य कर्म कृतम्। मया प्रमाद कृत क्षमस्व।

प्रभाकर — गत गतमेव। विस्मर। त्व मा विचारय। न किमपि विद्यते किं गृह पातु उत खादितुम्।

छाया — किञ्चित् आम्लतक्र विद्यते। तस्मिन्तक्रे लवण उत शर्करा वा

मिलाप्य पिनष्टु। किञ्चित्कालं विश्रान्तिमनुभूय भवदीय मित्रेभ्यः किञ्चित् धनं ऋणमानीय विपण्या मुद्गदाल्यीं. तण्डुलान्, शाकाय वार्ताकं, दार्विकान्, उर्वारुकान्, कारवेल्लान्, पटोलीन्, चुक्रं, नवनीतं इत्यादिकं आनयतु पाकं करिष्यामि।

प्रभाकर. — न कोऽपि मे मित्र दातुं समर्थः भवति, यतः अयं मासस्य अन्तिमसप्ताह ।

छाया — तर्हि मे मङ्गलसूत्र गृहीत्वा पुरंदरस्य विक्रयस्थाने दत्वा प्रत्याम्नायं रूप्यकाणि गृहणातु अनन्तरं शाकादिकं आनयतु भवान्।

प्रभाकर. — हञ्जे किं त्व उन्मत्तासि ? नोचेत् ते बुद्धिनाशः संजातः।

छाया — कियत्कालं एव ससारं करिष्यामि। कियत्काल रूप्यकद्वयेन रूप्यक त्रयेण कालयापन भविष्यति। यदि जीवितं एव भवेत् तर्हि मरणमेव योग्यं भवति मे। यदि मङ्गलसूत्रदानेन प्रत्याम्नाय द्विशतपरिमित उत त्रिशतपरिमितं धनं लभेत् तर्हि एक सप्ताहपर्यन्तं कालयापन भविष्यति अननेन। मम शिरोबाधा जायते अस्मिन् निर्धनकुटुम्ब जीविते।

प्रभाकर — तथा यदि स्यात् देहि तव कर्णाभरणे। ते कर्णाभरणे निक्षिप्य तस्य सकाशे रूप्यकाणि आनयेयम्। मङ्गलसूत्रन्यासेन कुटुम्बस्य अनिष्टः भवति।

छाया — कियत् कालं अय संसारः चलिष्यति एवं। दिनदिनमरण सदा सनाशुष्यं भवति जीवितस्य।

प्रभाकर — आवा धन्यौ यतः सन्तति नास्ति अस्मिन् दारिद्र्ये। प्रातः सायं च यत्किमपि भुङ्क्त्वा जीवित यापयावः। प्रपञ्चे भोजनविहीनाः मानवाः सन्ति। यदि तुलना क्रियते तर्हि तेभ्यः जीवनेभ्यः अस्मदीय जीवनं सुखतरं भवति।

छाया — एव विचारयतु भवान्।

प्रभाकर — किमिति।

छाया —बहवः सन्ति लोके अस्मदपेक्ष्या,सकल संपचय वस्तुजालेः,विलासेः, राजभोगेः विराजमानाः इति. तेः तुलना कर्तव्या इति।

प्रभाकरः — हा मावद मुखं पिधेहि। देहि ते कर्णाभरणे। अहं अधुनेव पुरन्दरसमीपं गत्वा कर्णाभरणे तस्मै प्रदाय धनमानयेयम्।

– **छाया** — गृहाण। (इति उपविश्य कर्णाभरणे कर्णाभ्याम् अपास्य प्रयच्छति)

प्रभाकर — (गृहीत्वा) अद्याहं किञ्चित् विलम्ब्य समागच्छेयम् गृहम्।

छाया — कथं विलम्बः भविष्यति।

प्रभाकर — पुरन्दरात् धनं गृहीत्वा विपणीं गत्वा शाकपाकाय किमपि क्रीत्वा आनयिष्यामि। तस्मात् किञ्चित् विलम्बः भविष्यतीति कथयामि।

छाया — सत्वरं आगन्तुं प्रयतस्व।

प्रभाकर — तथैव। (इति हस्ते शाकसञ्चीं गृहीत्वा नागदन्तात् उत्तरीयं गृहीत्वा कण्ठं परितः निक्षिप्य गच्छति)

छाया — (उत्थाय अन्तः गच्छति)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(पुरन्दरस्य आपणः। तस्मिन् आपणे सः रक्ताष्णीषं धृत्वा ललाटे दीर्घिकारूपं गोपीचन्दनधारिरेखाभिः अलङ्कृतं तस्याः मध्ये अक्षतबिन्दुं समलङ्कृत्य वर्तते। सः रघुतुल्पं समक्षं एकया पेटिकया सहितः उपविष्टः आस्ते। सः सुलोचनधारकः श्रेष्ठिवेषे उपावेष्टः। सः वस्त्रखण्डेन रत्नादीन् उल्लोठयन् इतस्ततः पश्यन् आस्ते)

(ततः प्रविशति प्रभाकरः)

प्रभाकर — नमस्ते श्रेष्ठिन्। किं उपचीयते ते व्यापारः।

पुरन्दर — व्यापारः उपचीयते। किन्तु अद्य न कोऽपि ग्राहकः समागतः। अद्य प्रातः उत्थाय कृष्णमार्जारं अपश्यम्। अद्य किं भविष्यति वा नाहं जाने। अस्मात् स्थानात् एकमङ्गुलमपि न चलितोऽस्मि। अहं अत्रैवोपविष्टोऽस्मि।

प्रभाकरः — (विहस्य) न चलितोऽस्मि इत्यनेन ज्ञायते नाहिनी रूपेण ग्राहकाः समागताः इति।

पुरन्दरः — (अट्टहासं कृत्वा) तथा यदि स्यात् मे आशाः आशयाश्च फलिष्यन्ति।

प्रभाकरः — पुरन्दर अहमागतोऽस्मि भवता समीपं रूप्यकाणि ग्रहीतुम्।

पुरन्दरः — मम समीपे रूप्यकाणि कुत्र सन्ति। प्रातः प्रभृति न कोऽपि ग्राहकः समागतः। कथं मम समीपे रूप्यकाणा भावः। त्वं किं चिन्तयसि मत्सकाशे रूप्यकाणा वृक्षः अस्तीति।

प्रभाकरः — रूप्यकाणा वृक्ष नास्ति। किन्तु रूप्यकाणा खनिः विद्यते।

पुरन्दरः — मम समीपे रूप्यकाणा खनिः,अहो तावदैश्वर्यं मम कुत्र विद्यते।

प्रभाकरः — एत पश्यतु भवान्। भवान् रूप्यकाणा दानं कुरु इति नाहं कथयामि। अहं ददामि कर्णाभरणे। (इति हस्तमस्याः पत्रबन्धनं बहिष्कृत्य तस्मै ददाति)

पुरन्दरः — (ते कर्णभूषणे गृहीत्वा भ्रूलतानर्तनं कारयन्) अहो एते श्यामिकयापूर्णे कर्णाभरणे। (इति निकषोपले उल्लीढति) सुतरा एते अन्यलोह मिश्रिते।

प्रभाकरः — किमर्थमेव वदसि पुरन्दर। मम विवाह समये एते मे श्वशुरेण प्रदत्ते। कथं एते श्यामिकयापूर्णे भवतः।

पुरन्दरः — अहं वस्तुस्थितिं कथयामि तत् सत्यम्।

प्रभाकरः — भवतु नाम कियत् धनं, एते न्यासं विधाय दास्यसि कथय।

पुरन्दरः — केवल शतरूप्यकाणि दीयन्ते।

प्रभाकरः — केवल शत रूप्यकाणि।,एते त्रिशत रूप्यक मूल्ये योग्ये भवतः। त्रिशत रूप्यकाणि प्रयच्छ। एक सप्ताहानन्तरं प्रत्यागत्य सर्वमपि धनं दत्वा पुनः कर्णाभरणे ग्रहिष्यामि।

पुरन्दरः — अयि ग्राहक अद्य न कोऽपि ग्राहकः समागतः। अद्य न किमपि कृतं, उत संपादितं मया। त्वं मा जानासि यदहं सज्जनः इति। अहं त्वां जानामि। तस्मात् स्नेहाद्वा सौहृदाद्वा अहं तुभ्यं पञ्चविंशत्यधिक शतरूप्यकाणि दास्यामि गृहाण।

प्रभाकरः — नहि पुरन्दर तथा नहि अशीत्युत्तर शतरूप्यकाणि देहि।

पुरन्दरः — एते योग्ये नहि, तावत् धनं दातुं। त्वं गृहीत्वा गच्छ। (इति वस्तु तस्मै दित्सति)

प्रभाकरः — पुरन्दर, सार्धशत रूप्यकाणि देहि भोः। अधुना एतत् धनेन बृहत्तर कार्यं कर्तव्यमस्ति तस्मात् अहं भवन्तं प्रार्थयामि।

पुरन्दरः — अद्य न कोऽपि ग्राहकः समागत.। समक्षं आगता लक्ष्मीं प्रेषितुं मे बुद्धिः न भवति। ततः सार्धशत रूप्यकाणि ददामि। (इति कर्णाभरणे पेटिकाया निक्षिप्य सार्धशत रूप्यकाणि प्रयच्छति)

प्रभाकरः — (गृहीत्वा विकसित वदनः) नमस्ते श्रेष्ठिन्। (इति नमस्कृत्य जिगमिषति।

पुरन्दरः — ग्राहक, अहमपि सन्तुष्टोऽस्मि, त्वमपि सन्तुष्टोऽसि। "सन्तोष एव पुरुषस्य परं निदानम्।

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(पुरन्दरः तस्य पत्न्या भाषमाणं आस्ते)

पुरन्दरः — हञ्जे अद्य अत्युत्तम कर्णाभरणे मम आपणे निक्षिप्य एकः ग्राहकः मत्सकाशात् सार्धशत रूप्यकाणि गृहीत्वा निर्जगाम। त्वं पश्य एते कर्णाभरणे (इति तस्यै दर्शयति)

रमा — (तूलशकलैः दशा· कुर्वन्ती आस्ते, सा ते कर्णाभरणे विलोक्य) अत्यन्त सुन्दरे कर्णाभरणे। (इत्याश्चर्यं व्यक्ती करोति)

पुरन्दरः — त्वं एते कर्णाभरणे उपयुङ्क्ष्व, यावत्पर्यन्तं सः ग्राहकः रूप्यकाणि प्रदाय ग्रहिष्यति।

रमा — भोः परेषां वस्तु उपयोगेन मे आनन्दः न भवति। सा नारी कुटुम्बे सौख्यहीना, जीवितुं पित्रा दत्तं वस्तुचयं न्यासीकृत्य तत् धनेन कालं यापयति। तस्याः कर्णाभरणे अहं धृत्वा आनन्देन कथ नर्तिष्यामि।

पुरन्दरः —अस्मिन् विषये तव मास्तु दयार्द्रभावः। यथा कथंचित् जीवनमेव योग्यं जगति। मम सिद्धान्तस्तु ऋणं कृत्वा घृत पिबेत्। मम नास्ति कापि दया।

रमा — ब्राह्मणाना विज्ञानार्जने श्रद्धा भवितव्या। व्यापारे वृद्धिव्यापारे तेषा बुद्धिः न प्रसारणीया इति परम्परा खलु। त्वं कथं परेषा वस्तुषु दयाविहीनः क्रौर्य ता दर्शयसि।

पुरन्दर· — कि त्वं मे वेदान्तं कथयसि। अहं एवं करोमि तस्मात् त्वं गृहे सुखी वससि। तत् त्व मा विस्मर।

रमा — ब्राह्मणाना व्यापारवृत्ति· न योग्या। यदि ब्राह्मणः व्यापारं करोति सः व्यापारी एव न तु ब्राह्मणः। ब्रह्मज्ञानरतः ब्राह्मणः भवति। धिक् ते ब्राह्मणत्वम्।

पुरन्दरः — न कापि न्यूनता मम ब्राह्मणत्वस्य। अहं प्रतिदिनं पूजा करोमि आस्तिक्यबुद्ध्या। किन्तु जीवनाय अहं इमं व्यापारं करोमि।

रमा — व्यापारः ब्राह्मणस्य लक्षणं नहि। अत्र अस्मिन् व्यापारे स्वार्थना प्रलोभताच विद्येते। किमर्थं ते जीवने अत्यन्त व्यामोहः। तव जीवनाय तव कुटुम्बाय अन्यान् निर्धनान् सहमानवान् वञ्चयित्वा जीवन यापने मे स्वारस्यं न विद्यते।

पुरन्दरः — त्वं किमपि भण, यथा तुभ्यं रोचते। मम जीवने परिवर्तनं न भविष्यति। अहं व्यापारी ब्राह्मणः।

रमा — यदि त्वं व्यापारी ब्राह्मणः तर्हि अब्राह्मण एव। त्वयि ब्राह्मणत्व न विद्यते। त्वं विद्यया जीवनं कुरु, विद्यादानं कुरु।

पुरन्दरः — ब्राह्मणः कः स्पष्टं कथय।

रमा — ब्राह्मण जगति विद्यमानोऽपि जगति सम्बन्धयुतोऽपि सम्बन्ध हीन इव प्रवर्तितव्य पद्मपत्रस्थित वारिवत्। स सर्वदा अधीति बोधाचरणप्रचा रणे वाणीं सर्वव्यापिनीं विधास्यमान परब्रह्माणि लग्नमानस यदृच्छालाभसतुष्ट काल यापयितव्य , नत्वन्यथा।

पुरन्दर —त्व न जानासि लोकवर्तन। न कामपि बोधा त्व कुरु। अह जानामि किं कर्तव्यमिति।

रमा — सर्व वेत्तार पुरुषा एव न तु स्त्रिय । भवतु नाम। त्व यदा कदापि तत्र अज्ञान ज्ञात्वा अवश्य सन्मार्गगामी भविष्यसि। त्वादृशान् पुरुषान् अह प्राचीन भारत इतिहासे अनेकान् अपश्यम्। काल परिवर्तते तथा मानवोऽपि परिवर्तन प्राप्नोति।

पुरन्दर — किं समाप्त तव प्रबोधनम्। गच्छ अन्त , भोजनवेला जाता, भुक्त्वा सपद पुन आपण गन्तव्य विद्यते। अह उद्यमशील पुरुष ।

रमा — जानाम्यह कियकाल एतादृशजीवन चलिष्यति। (इति अन्त गच्छति पुरदरोऽपि अन्त गच्छति)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(पुरन्दरस्य आपणे पुरन्दर पूर्ववत् उपविष्ट अस्ति। तत प्रविशति ब्राह्मण भस्म त्रिपुण्ड्रान् ललाटे कृत्वा गोष्पाद शिखायुत धौतपरिधानधृत उत्तरीय शाभित)

ब्राह्मण — अयि भा श्रेष्ठिन् वर्धते व्यापार ।

पुरन्दर — (उ त्थाय) नमामि ब्राह्मण। (इति नमस्करोति) उपविशतु भवत । (इति आसन दर्शयति)

ब्राह्मणः — कार्यार्थमागतोऽहं अवश्यं उपविशेयम्। (इति उपविशति)

पुरन्दरः — महाब्राह्मण किं ते आगमनस्य हेतुः।

ब्राह्मणः — पुरंदर, ब्राह्मणः किमर्थमागच्छति।

पुरन्दरः — (विहस्य) दातारं धनं याचितुम्।

ब्राह्मणः — जानासि त्वम्।

पुरन्दरः — अहमपि ब्राह्मणः तस्मात् जानामि ब्राह्मणाना चित्तवृत्तिम्।

ब्राह्मणः — पुरन्दर, अहं मम पुत्रस्य मौञ्जीधारणव्रतबन्धं चिकीर्षामि। तस्मात् तत्कृते अपेक्ष्यते धनम्।

पुरन्दरः — य कमपि दातारं गत्वा धनं याचतु।

ब्राह्मणः - न कोऽपि दाना अस्मिन् पत्तने।

पुरन्दरः — तस्मात् किं कर्तव्यम्।

ब्राह्मणः —तस्मात् किं कर्तव्यमिति विचार्य अहं त्वत् सकाशं समागतोऽस्मि।

पुरन्दरः — अर्थात् मा धनं याचितुं समागतोऽसि।

ब्राह्मण. — हा त्वामेव धनं याचितुं समागतोऽस्मि।

पुरन्दरः — किं मत्समीपे निधिः विद्यते सर्वेभ्यः विभाज्य दातुम् ? अत्र न केभ्य अपि दानं दीयते। अहं दानार्थं अत्र उपविशामि किम् ?

ब्राह्मणः — अयि भोः युष्मादृशाना दानात्विना अस्मादृशाना पुत्राणा मौञ्जीधारणव्रतः कथं भविष्यति, भवानेव कथयतु पुरन्दर।

पुरन्दरः — अत्र आपणे वस्तुन्यासेन तत्तु हिरण्यन्यासेन धनं दीयते किन्तु न दानरूपेण। ततः त्व गत्वा यत् किमपि सुवर्णाभरणं आनीय मत्सकाशे निक्षिप्य धनं गृहीत्वा निवर्तस्व। नोचेत् अधुनैव गच्छ पुनः मम समीपं मा आगच्छ।

ब्राह्मणः — अयि पुरन्दर अहं अलौकिकः। मे वेदाध्ययनं विना नान्यत् ज्ञातमस्ति। पुनः उपनयनानन्तरं अहं ते सर्वं धनं दास्यामि।

पुरन्दर — तदा त्वं कथं दास्यसि।

ब्राह्मण — बटो भिक्षावेलायां भिक्षारूपेण यत् धनं बन्धुभ्य मप्राप्यते तत् धनं तुभ्यमहं दास्यामि।

पुरन्दर — ब्राह्मणाय दत्तं वीतिहोत्रे निक्षिप्तं हुतमेव भवति। किन्तु न पुनरागमनं भवति।

ब्राम्हण — किं कुर्यामहम्।

पुरन्दर — पुत्रस्य मौञ्जीधारणव्रतं आवश्यकं किम्? अधुना अस्मिन् दारिद्र्ये।

ब्राम्हण — अयं बालः अष्टवर्षीयः। वेदोक्तप्रमाणं अवश्यं अधुना सः उपनीतः भवितव्यः अस्ति।

पुरन्दर — तस्मात् त्वं गृहं गत्वा यत् किमपि सुवर्णमयं उत वज्रवैडूर्याञ्चितं आभरणमानीय मह्यं देहि। अहं ते धनं दास्यामि।

ब्राम्हण —अयि भो, ब्राह्मणाः निराडम्बरजीविनः तेषां सर्वसमानभावुकता सर्वत्र, सर्वेषु प्राणिषु भगवत्दर्शनमेव सम्पत् नान्यत् विद्यते।

पुरन्दर — स्त्रियः कर्णाभरणानि मङ्गलसूत्राणि हस्तकङ्कणानि धरन्ति, तेषु यत्किमपि आनय।

ब्राम्हण — अस्मत् गृहे गृहिण्यः मङ्गलसूत्रं विना नान्यत् धारयति। तत् मङ्गलसूत्रानयनं अयोग्यं भवति।

पुरन्दर — मङ्गलसूत्रमानय इति नाहं कथयामि। किन्तु भूषणान्तरं आनय धनं दास्यामि।

ब्राम्हण — अहं यायावरः भिक्षाटनेन जीवामि। नाहमानेतुं शक्तः सुवर्णाभरणम्।

पुरन्दर — अहं धनं दातुं अशक्तः।

ब्राम्हण — अस्मिन् ग्रामे न कोऽपि दाता विद्यते प्रष्टुम्। सर्वोऽपि धनसम्पादने तत्परो भूत्वा कृत्याकृत्यं विधाय जीवति।

पुरन्दरः — त्वं तव पत्नीसमीपं गत्वा तां विचारय सा दास्यति तुभ्यम्। तत् आनीय मह्यं देहि तदा अहं तुभ्यं धनं दास्यामि।

ब्राम्हणः — मे जाया कथं दास्यति। तस्याः समीपे न किमपि विद्यते।

पुरन्दरः — आभरणैर्विना स्त्रियः कथं जीवन्ति। तेषां आभरणानि पञ्चप्राणापेक्षया अधिकतमानि। त्वं गच्छ तव पत्नीं विचारय।

ब्राह्मणः — ब्राह्मणस्त्रीणां आभरणं किं प्रयोजनम्। तेषां आभरणं शीलमेव।

पुरन्दरः — ब्राह्मण अधिकप्रलापैः किं प्रयोजनम्। विना वस्तुन्यासेन नाहं दास्यामि तुभ्यं धनम्। त्वं गच्छ। (इति उक्त्वा सः पुरन्दरः अन्तः गच्छति)

ब्राम्हणः — अयि पुरन्दर अहं प्रयतिष्ये। पुनरागच्छेयम्। (इत्युक्त्वा निर्गच्छति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(रमा कङ्कतिकया शिरोजान् प्रसादयति ततः प्रविशति ब्राह्मणः)

ब्राह्मणः — भवति भिक्षां देहि।

रमा — नमस्ते ब्राम्हण।

ब्राम्हणः — भगवति अहं भिक्षार्थमागतोऽस्मि।

रमा — तिष्ठ, भिक्षामानयेयम्।

ब्राह्मणः — साधु मतल्लिके।

रमा — (अन्त गत्वा एक फल गोधूमान्श्च आनीय तस्य भिक्षा गोण्या निक्षिपति)

ब्राम्हण· — अयि मतल्लिके अह सतुष्टोऽस्मि भवत्या: भिक्षादानेन। किन्तु मम-- (इत्यर्थोक्त्या)

रमा — किन्तु कथय किमपेक्ष्यते अधिकम्।

ब्राह्मण· — अयि मात. अहं महत्तरा भिक्षा याचयामि।

रमा — अयि ब्राम्हण, कीदृशी भिक्षा तव याचसे।

ब्राम्हण — अम्बे, अह मे पुत्रस्य मोञ्जीधारणव्रत चिकीर्षामि तदर्थ धनमपेक्ष्यते मया। भवति धन देहि।

रमा — अयि ब्राम्हण नाह धन दातु शक्ता भवामि, यत: धन मम समीपे न विद्यते।

ब्राह्मण — अयि मात त्व जानासि वय भूसुरा: निर्धना केवल वय वेदपारगा। अस्मत् समीपे न किमपि धन विद्यते, तस्मात् मौञ्जी धारण व्रताय धन याचे।

रमा — त्व किमपि वस्तु याचस्व अह दास्यामि किन्तु न धनम्।

ब्राम्हण — भगवति, भवत्या. नाशिकापुढे विराजमान वज्रखचित नाशिकाभरण मे देहि।

रमा — महाब्राम्हण गृहाण। (इति नासिकापुटात् शिथिलीकृत्य प्रयच्छति)

ब्राह्मण — सौभाग्यवती भव। (इति आशीर्वादान् दत्वा निर्गच्छति)

रमा — अहो मे जीविते योग्यब्राम्हणाय अद्यैव दान कृतम्। धन्यास्मि। (इति निश्वस्य निगच्छति)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(पुरन्दरः वज्रवैडूर्याणा गणना कुर्वन्नास्ते, तस्य पुरतः तुला विद्यते सः पूर्ववत् उपविष्टः आस्ते। ततः प्रविशति ब्राम्हणः)

ब्राह्मण· — अपि कुशल पुरन्दर।

पुरन्दरः — (उन्नमित शिर·) नमस्ते ब्राम्हण।

ब्राह्मणः — ते साधु भवतु।

पुरन्दर — किं साधु किं असाधु एषु दिवसेषु सम्यक् व्यापारः न चलति। तूष्णी अह अत्रोपविशामि।

ब्राह्मणः — अह आगतोऽस्मि पुनः त्वा द्रष्टुम्।

पुरन्दरः — दर्शनेन किं प्रयोजन भवति। त्वया यत् किमपि आनीत किम्। अहं विस्मृतवानस्मि, किं पुत्रकस्य उपनयन कृत किम् ?

ब्राह्मण — एतावत्पर्यन्त न कृत मया यतः वहु धनमपेक्ष्यते उपनयनस्य। तत् धन अधुना अह त्वत्तः गृहीतु आगतोऽस्मि।

पुरन्दर — उक्त च मया विनाच न्यास धन न दीयते इति।

ब्राह्मणः — हा अह उक्तोऽस्मि।

पुरन्दर. — तर्हि किमर्थमागत विनाच न्यासम्।

ब्राह्मण· — अयि भोः न्यास सम्पाप्य धन ग्रहीतु आगतोऽस्मि।

पुरन्दर· — हा तथा यद। दर्शयतु तत् वस्तु भवान्।

ब्राह्मण — पुरन्दर, अस्य कृत कियत् धन दास्यसि। (इति तत् वस्तु हस्तेन गृहीत्वा दर्शयति)

पुरन्दरः — देहि मे तत् वस्तु हस्ते।

ब्राह्मण. — (उत्तरीयाञ्चल ग्रन्थि विस्रस्य तस्मात् नाशिकाभरण गृहीत्वा तत् पुरन्दर हस्ते निक्षिपति)

पुरन्दर — (विकसितवदन तत् वस्तु तदेकदृष्ट्या पश्यन् पुन ब्राम्हण पश्यन) एतत वस्तु अतीव सुन्दर अमूल्य च प्रतिभाति।

ब्राह्मण — हा इद नाशिकाभरणम्।

पुरन्दर — तदेव अहमपि तकर्यामि इद कस्या नाशिकाभरणमिति।

ब्राह्मण — पुरन्दर, महत धन प्राप्तु आनीत मया।

पुरन्दर — कस्मात उत कस्या समानीतम।

ब्राह्मण — गृहिण्या ।

पुरन्दर (साशडकम) किं तया दत्त इद, उत चोरयित्वा आनीतम्।

ब्राह्मण — पुरन्दर त्व अधिक प्रसङग करोषि तथामावद।

पुरन्दर — परिहास विजल्पित मया।

ब्राह्मण — मौञ्जी धारण व्रताय दत्तवती सा।

पुरन्दर — सत्य इद गृहिण्या एव।

ब्राह्मण — अह गृह गत्वा तामपृच्छम्। सा अनुपदमेव दत्तवती। एतत् न्यासरूपेण गृहीत्वा दीयता धन सत्वरम।

पुरन्दर — एतत वस्तु अमूल्य विद्यते। अस्य कृते मम समपे धन नास्ति। एतत् वस्तु अत्रैव स्थापय। श्व आगत्य धन गृहाण।

ब्राह्मण — तथा कतु नोत्सहे। मम धन अधुनैवापेक्ष्यते।

पुरन्दर — तथा यदि त्व अत्रैवोऽपविश। अह अधुना प्रत्यागच्छयम्।

ब्राह्मण — अधुना त्वया कुत्र गम्यते ?

पुरन्दर — अधुना मया गृह प्रति गम्यते। अह पुनरागत्य धन दास्यामि। (इति नाशिका भरण पेटिकाया निक्षिप्य पेटिकावन्धन करोति) *ब्राम्हण अह गच्छामि त्व अत्रैवोपविश। (इति निगच्छति)*

ब्राम्हणः — (विहस्य) अरे पुरन्दर त्वं परम मूर्खोऽसि मूर्खशिरोमणिरसि। नश्वर संसार लम्पटोऽसि। इतः परं त्वं भक्तः भविष्यसि, दाससाहित्य सृष्टि करिष्यसि। ते सर्वं शुभं भूयात्। (इति वदन् हसन् निर्गच्छति)

(यवनिका पतति)

* * *

सप्तमं दृश्यम्

(पुरन्दरः पिनद्ध कवाटं उद्घाटयितुं ताडयति. आह्वयति रमे इति, किन्तु कवाटोद्घाटनं न भवति)

पुरन्दरः — (आत्मगतम्) किं करोति एषा अन्तः। कतिवारं मया कवाटोद्घाटनाय ताडितम्। (उच्चैः रमे इति आह्वयति)

(नेपथ्ये तिष्टन्तु किञ्चित् कालं तत्रैव, अहं स्नामि इति रमायाः कण्ठध्वनिः श्रूयते)

पुरुषः सम्पादयति अतिकष्टेन गृहिणी व्ययीकरोति स्वेच्छया आर्जितं सर्वम्। कष्टालुः पुरुषः, सुखमनुभवति स्त्री, इयं लोकपरिपाटिः। यदि नाशिकाऽभरणं तस्याः समीपे न दृश्यते तर्हि अद्य तस्याः मरणमेव भविष्यति। अत्रैवोपविश्य पश्यामि सर्वम्। (इति तत्र पीठे उपविशति)

रमा — (कवाटं उद्घाटयति, शिरोजान् वस्त्रखण्डेन वर्षयति) भोः स्नाम्यहं तस्मात् आलस्यं जातं किमर्थमेवं कवाटताडनं आक्रोशनं च। अद्य कृत्याः इव भवन्तः मंदृश्यन्ते। कोऽत्र हेतुः ?

पुरन्दरः — हा सत्यमेव कृत्योऽहम्। मम वचनस्य अनुपदमेव प्रत्युत्तरं देहि।

रमा — कोऽयं प्रश्नः पृच्छतु।

पुरन्दरः — (तस्याः मुखं विलोक्य) ते नाशिकाऽभरणं न दृश्यते कुत्र नियते तत् ?

रमा — स्नान समये नासिकाया शिथिलीकृत्य स्नानकोष्ठे निक्षिप्तास्मि।

पुरन्दर — त्व गत्वा प्रथमत नाशिकाभरण आनय।

रमा — अधुना तेन तत्र किं प्रयोजन विद्यते।

पुरन्दर — हञ्जे, दिदृक्षामितत्।

रमा — आनयेय अनन्तर दर्शयेय अधुना किमर्थम्।

पुरन्दर — (सक्रोधम्) अह त्वा पृच्छामि नासाभरण आनय दर्शय इति। यदि त्व न दर्शयसि तत्र यमसदनमेव शरण्य भवति।

रमा — (भीता) आनयेय। (इति अन्त गच्छति)

पुरन्दर — (तत्रैव तिष्ठति)

रमा — (प्रविश्य) गृह्णातु। (इति ददाति)

पुरन्दर — (गृहीत्वा) अह अधुनैवागच्छेयम्। (इति निर्गच्छति)

रमा — (आनन्दाश्रुपूर्णा तत्र विद्यमान श्रीकृष्णस्य मूर्तिसमीप गच्छति तस्य विग्रहस्य पुरत स्वात्मान पातयित्वा कृष्ण त्वमेव मे रक्षक इति नमस्करोति)

(यवनिका पतति)

* * *

अष्टमं दृश्यम्

(तत प्रविशति पुरन्दर, उपविशति पेटिका समीपे, उद्घाटयति पेटिका, तत्र नाशिकाभरणस्य अभाव विलोक्य हस्ते विद्यमान नाशिकाभरण विलोक्य आश्चर्य चकित पुरत विलोक्य तत्र ब्राह्मणाऽभाव विलोक्य अत्यन्तचकित विस्फारित लोचन भक्तिभावेन एव कथयति)

पुरन्दरः — अयं ब्राह्मणः नहि। ब्राह्मणरूपे आगतः श्रीकृष्ण परमात्मा एव। प्रभो वासुदेव त्वमेव पुत्रकस्य मौञ्जीधारणव्रतार्थं धनं पृष्टवानसि। त्वमेव मे गृहं गत्वा मे पत्न्याः इदं नाशिकाभरणं आनीतोऽसि। अहं मृत्पिण्ड बुद्धिः अभवम्। तव नाटकं अनवबोधितोऽस्मि। देव न कोऽपि जानाति ते अद्भुत रचना माया च वसुधातले। किमेतत् जीवितेन प्रयोजनं यदा साक्षात् भगवान् श्रीकृष्णः ब्राह्मणरूपेण मा प्राप्तः तदा अहं अन्धो भूत्वा तं द्रष्टुम शक्तोऽभवम्। धिङमे जीवितम्। धिङ मे संपत्। धिङमे धनकनक लोलुपत्वम्। सर्वं धिक्। दृश्यमानं धिक्। रमे त्वं धन्याऽसि। त्वं श्रीकृष्णेन याचितं दत्तवती। ते जन्म सार्थकं बभूव। न मे रोचते इदं वस्तुजालम्। सर्वं नश्वरम्। परमात्मा अनश्वरः नित्यः, स्थाणुः अचलः सनातनः। अधुना परावर्तित जीवितोऽस्मि। तस्मादहं विठ्ठलं गानरूपेण स्तोत्रं विधाय मुक्तिं प्राप्स्यामि। हे पुरन्दर विठ्ठल। कृष्ण, मुरारे, मधुकैटभारे, आनन्द, गोविन्द मुकुन्द, शौरे।

सर्व भूतान्तरात्मानं। बहुरूप विलासितम्।
अणीयांसं च देवेशं। हृषीकेशं भजाम्यहम्॥

(यवनिका पतति)



।। परीक्षिन्नाटकचक्रम् ।।

3. सामाजिक–नाटकानुक्रमणिका

२१) पानशाला

२२) प्रेम-परीक्षा

२३) परिणीता

२४) अपराजितम्

२५) मतिभ्रमणम्

२६) वय पचाधिक शतम्

२७) न स्त्री स्वातन्त्र्यमर्हति

समर्पणम्

३. कैलासवासिभ्यां मे श्वशुराभ्यां कुचूरु रुक्मिणी-कृष्णराव दम्पतीभ्यां सभक्तिकं समर्पितमिदं सप्तसामाजिक नाटकऋक्षमालाचक्रम् ॥

॥ पानशाला ॥

(व्यवस्थापकः यवनिकापुरतः आगत्य ध्वनियन्त्रं हस्ते गृहीत्वा रसिकान् एवं मनोरयति)

व्यवस्थापकः — अयि भो रसिकाः वयं अद्य सामाजिकं नाटकं पानशाला नामकं प्रदर्शयितुं उद्युक्ताः स्मः। संस्कृतभाषायां एतादृशं नाटकं प्रदर्शयितुं वयं अहमहमिकया प्रयत्नं विधाय सफलाः अभवाम। संस्कृतसामाजिकनाटकेषु एतन्नाटकं अद्वितीयं अनुपमं इति नटकानां अभिप्रायः। अस्य नाटकस्य कर्ता पण्डितः ओगेटि परीक्षित् शर्मा। अयं गीर्वाणान्ध्रभाषाप्रवीणः। अयं नवीनभावसमलङ्कृतः क्रान्तिकारकः कविः। अस्मिन् परीक्षिन्नाटकचक्रे संहत्य सप्तविंशतिः नाटकानि विद्यन्ते। तेषु नाटकेषु चतुर्दश नाटकानि पौराणिकानि षण्णाटकानि ऐतिहासिकानि सप्त नाटकानि सामाजिकानि च। तेषु सप्त सामाजिकेषु अयं प्रथमः नाटकविशेषः। तत्र भवन्तः नाटकं द्रष्टुं समागताः किन्तु न भाषणं श्रोतुम्। तस्मात् अहं भाषणं विरम्य नाटकप्रदर्शनं कर्तुं प्रयत्नो भवेयम्। नमामि। (इति नमस्कृत्य गच्छति)

(ततः यवनिका अपसार्यते)

तत्रैकस्मिन् पार्श्वे उन्नतवेदिकायाः कपाटिकायां विस्क्यादि बाटिलानां श्रेणिः वर्तते। तत्रैव पार्श्वतः ग्वाचनिशापाः सन्ति। तत्र मध्ये व्यवस्थापकः आसने उपविश्य सर्वं पश्यन् आस्ते। तत्रैव पार्श्वे एकः मधुवितरकः उपविष्टः अस्ति। एकः बालसेवकः इतस्ततः चरन् तत्र विद्यमानानि टेबुलानि स्वच्छयति। एकस्मिन् कोणे नाट्यार्थं वाद्यविशेषे वेदिका भाति। तत्र आगन्तारः गन्तारः सन्ति। स्वलनादनं सर्वदा सातत्येन डिस्को वाद्यमिश्रितं गानं पिशाचानां कोलाहलमनुकुर्वत् संश्रूयते। ततः प्रविशति एकः पाश्चात्यः तस्य नाम स्मितः। सः सन्ध्या शिरोवेष्टनेन ऊर्णवेषे विद्यमानः धूम्रपानं कुर्वन् वेत्रहस्तः शनैश्शनैः, चलन् पानशालान्तः प्रविशति। तस्य वयः षष्टिः। सः आगत्य तत्र एकस्यां कुर्च्यां उपविशति। (धूम्रवर्तिकां प्रशाम्य जृम्भणं विधाय)

स्मितः — अरे बाल। (इति बालसेवकं आह्वयति)

(बाल तस्य समीपमागत्य)

बाल — अहमस्मि भो ।

स्मित — कि विद्यते र ।

बाल — पनिका, मदिरा, मधुका, मद्य, मधु सीधु, सोम, तारा सुरा येना पानम् ।

स्मित — (स्मित्वा) कि र दण्ड पटसि उत पाठ करोषि ।

बाल — विद्यमान वस्तुचय कथयामि भो ।

स्मित — अर किम् । पश्य पानकस्य बाटिलं आनय ।

बाल — चित्त भो । यदाज्ञापयति भवान् ।

स्मित —(पूर्णवर्तिका अनल्पयति धूम्र नासिका रन्ध्राभ्या मुखाच्च निर्गमयति)

बाल — भो आगतोऽस्मि । (इति तस्य पुरत पनिका बाटिल चषक च संस्थाप्य निर्गच्छति)

स्मित — (बाटिल उद्घाट्य चषक पनिका स्रावयति । आत्मगतम्) अद्याह अतीव श्रान्तोऽस्मि अधुनाह पनिकया अपगतश्रम भवेयम् । आनन्द ब्रह्मेति ज्ञास्यामि । (इति किञ्चित् पीत्वा) अरे बाल भाग विशाप मांसापूपमानय, उत शुष्कमास आनय ।

बाल — साधु आनयामि भो । (इति आनीय तत्र टेबुलोपरि निक्षिप्य गच्छति)

स्मित — (किञ्चित् किञ्चित् पिबन् मध्ये मध्ये खादन् इतस्तत पश्यन् आस्ते)

(तत प्रविशति हरिहर शर्मा । स धनपत्रधारी, लम्बमानधनकञ्चुकत भूषित द्वारपर्यन्तमागत्य उपरि दृष्ट्वा) पानशाला । (इति पठित्वा किञ्चित् विचार्य) पानार्थं शाला पानशाला । (इति वितर्क्य) अह अन्त गत्वा किञ्चित् पास्यामि । (इति प्रविशति स्मिताभिमुख कुर्सी उपविशति अनुपदमेव बाल समागच्छति)

बालः — भोः किमपेक्ष्यते।

शर्मा — अरे गाढ किं किं विद्यते।

बालः — भोः रसिका, मदिरा, वधुका, नीरा, सुरा, सोम, त्रैना, वीरपानं आसवश्च।

शर्मा — वत्स किं त्वं दण्डकं पठसि ?

बालः — विद्यमान वस्तुसारणीं कथयामि भो ।

शर्मा — कोला न विद्यते किम् ?

बालः — नहि।

शर्मा — ऊर्ध्वाङ्गुष्ठं विद्यते किम् ?

बालः — किमेतत् भो., नाहं जाने।

शर्मा — त्वं संस्कृतं जानासि ?

बालः — हा अहं संस्कृतं जानामि।

शर्मा — ऊर्ध्वाङ्गुष्ठं इति पदं Thums up इत्यस्य भाषान्तरीकरणम्।

बालः — तत् न विद्यते अत्र।

शर्मा — इयं पानशाला खलु' तत् स्थापनीयं भवति।

बालः — इयं पानशाला भोः।

शर्मा — किं रे त्वं मा अनुशास्ति। जानाम्यहं इयं पानशाला इति। अत्र कोला सोडा नारङगरसः तक्रम्, लिम्बफलरसश्च लभिष्यंति इति मत्वा पातुं समागतोऽस्मि। इयं पानार्थं शाला तस्मात् पानशाला इति कथ्यते। भारतदेशे पानशाला इत्यस्य पदस्य अयमेवार्थः।

बालः — एतत् सर्वं नाहं जाने भोः।

शर्मा — हा सोडा विद्यते किम्।

बालः — सोडा विद्यते भोः।

शर्मा — संतुष्टोऽस्मि आनय सोडाम्।

स्मित — (शर्माणं पश्यन्) अयि भोः बालेनसार्धं पानशालाशब्दस्यार्थं विस्तृत्य कथयति भवान् कोऽस्ति भो.।

शर्मा — अहं संस्कृतपण्डित । मम नाम हरिहर शर्मा।

स्मित — बालसेवकेन सार्धं पानशाला शब्दस्य अर्थविवरणं करोषि, किं सः जानाति इयन्तं संस्कृतम्।

शर्मा — भवता शुभनाम किं भोः।

स्मितः — मम नाम स्मितः।

शर्मा — अयि स्मित, भारतवर्षे सर्वोऽपि संस्कृतं जानाति यतः सा भाषा भारतीयाना भाषा विद्यते। तस्मात् कारणात् संस्कृत भाषाया बालेन सार्धं भणामि। अर्थ विवरणं च करोमि।

स्मितः — कथं सर्वे संस्कृतं जानन्ति।

शर्मा — पाश्चात्यभाषा भारतवर्षे वेश्यासु गार्दभ सदृशा अनभिज्ञाः अपि भाषन्ते। भारतीयाः भारतीय भाषा संस्कृत न जानन्ति किम्।

स्मितः — तव उत्तर प्रशंसनीयं अस्ति अयि भो भवता व्यवसायः कः।

शर्मा — मम व्यवसाय संस्कृत भाषाप्रचार एव। कोऽस्ति भवान् भवता पूर्ण परिचयः कः?

स्मितः — *अहं अमेरिका देशीयः। अहं अस्मिन् भारतवर्षे एकस्मिन् विद्यालये आङ्ग्ल विभागस्य प्रधानाचार्य*।

शर्मा — भारतवर्षे एकस्मिन् विद्यालये आङ्ग्ल विभागे प्रधानाचार्यः भवान्। अहं अहं बहु प्रमुदितोऽस्मि। तस्मादेव भवान् वणिका पर्यन्तं पिबति।

स्मितः — अयं अस्मदीय देशीयाचारः।

शर्मा — देशीयाचारस्तु अवश्यं परिपालनीयः न केनापि देशद्रोहः कर्तव्यः। तस्मात् भवान्

पीत्वा पीत्वा पुनः पीत्वा। वशिकां वश्यकारिणीम्।
धूम्रपानं करोष्येवं। भ्रमणं ते न जायते?

स्मितः — (विहस्य) अयि भोः शर्मन् भवान् आशु कविरस्ति।

शर्मा — किमत्राश्चर्यं विद्यते। यदा केचन भारतीयाः अन्य भाषासु कवयन्ति किं नाहं भारतीय भाषाया सुरभाषाया कवयितुं न शक्तोऽस्मि?

स्मितः — हा सत्यमेव।

शर्मा—भवान् सम्यक् गीर्वाणीं जानाति। दृष्ट्वा शृत्वाच मे परमामोदः भवति।

स्मितः — भवता प्रशंसया अहं सतुष्टोऽस्मि धन्यवादाः। अहं मम बाल्ये लण्डन देशे एकस्या पाठशालाया अमरभारतीमपठम्।

शर्मा — पाठशालाया कथम्।

स्मितः — लण्डन नगरे सर्वत्र सर्वासु पाठशालासु एषा अनिवार्य भाषा अस्ति। तस्मात् शालाया प्रथमकक्ष्यातः एकादश कक्ष्यापर्यन्तं गीर्वाणी अनिवार्या अस्ति। एषु दशवर्षेषु सर्वोऽपि बालः प्राथमिक भाषाज्ञान संराजितः भवति।

शर्मा — लण्डन नगरे गीर्वाणी अनिवार्या किमर्थम्।

स्मितः — भारतीज्ञानेन सर्वाणि शास्त्राणि गणितं च सुलभतया अवगाहनानि भवन्ति। मानवः संस्कारवान् भवति इति तत्र पालकाना आशयः तस्मात् एषा भाषा अनिवार्यत्वेन संस्थापिता।

शर्मा — अहो मे भवता वचनं श्रुत्वा परमामोदः भवति। भवान् अभारतीयः तथापि भवान् सुरभाषाया भणति श्रुत्वैतत् अहं स्वात्मानं विस्मरामि।

बालः — भोः इयं सोडा। (इति पात्रे प्रस्ताव्य गच्छति)

स्मितः — अहं भवता परिचयेन परमानन्दमनुभवामि।

शर्मा — लण्डन नगरे सुरभाषा अनिवार्यत्वेन शालासु निक्षिप्ता इति श्रुत्वा अहं भारतीयान् गर्हामि। यत् सुर भाषा कृते लण्डन नगरेण कृतं तत् भारत-

वर्णंग न कृत इति विचार्य भारत देशीया. गीर्वाणी द्वेषिणः संस्कृति द्रोहिनः इति भावयामि।

स्मित — तथाभावदत्तु भारतदेशेपि संस्कृतभाषा अनिवार्यभाषा सर्वासु दशासु भविष्यतीति ममाभिप्राय ।

शर्मा — तान् दिवसान् अह द्रष्टुमिच्छामि। अहं भवता भाषणेन अतीव सतुष्टो जात ।

स्मित — अयि भो शर्मन्, वशिका किञ्चित् सोटा सार्धं मिश्रण विधाय यदि पास्यसि आनन्दो ब्रह्मेति ज्ञास्यसि।

शर्मा — अयि भो· स्मित यूय पाश्चात्या· भवता वेषभूषादिक अन्यत् अन्न पानादिकं अन्यत् आवयो सस्कृत्योर्मध्ये महदन्तर विद्यते। युष्मदीय विद्याया· स्वरूप अन्य अस्मदीय विद्याया स्वरूप अन्य । आनन्दो ब्रह्मेति वाक्य अस्मिन् विषये योग्यं न भवति। युष्माभि· अस्यार्थं सम्यक् नाधीत । केवल पठन मात्रेण प्रमाणपत्र स्वीकारमात्रेण विद्यायाः स्वरूप न ज्ञात भवति।

स्मित — कि भवान् वदति। अस्मदीय प्रभुता प्रपञ्चे सर्वत्र विद्यते। इयं आंग्लभाषा जगति सर्वैरपि भण्यते। तस्याः भाषाया· स्वरूपः अन्य·। भारतवर्षे नकापि भाषा विद्यते तया भाषया सतोलयितुं उत उपमितु।

शर्मा — (विहस्य) भवान् किं वदति। (इति सोटा पीत्वा एकमुद्गीर्य) यथा संस्कृत भाषाया प्रत्येक शब्दस्य शब्दोत्पत्ति विद्यते तद्वत् जगति न कस्यापि भाषायाः विद्यतेति भाषा तज्ज्ञाना मतम्। इय शास्त्रीय भाषा इति केषाचन मतम्। इयं भाषा सर्वासा प्रपञ्च भाषाणा जननीति सशोधका· भाषातज्ज्ञाः भणन्ति किं त्व न जानासि एतद्विषयम्।

(पानशाला व्यवस्थापकः ध्वनियन्त्रे एवं कथयति)

व्यवस्थापकः — अयि भोक्तारः पायिनः शृण्वन्तु भवन्तः। वयं अतीव प्रहृष्टा स्मः यतः हेलानाम भारतीय सुन्दरी अत्र अद्य यामिन्या नाट्यं करिष्यति यूय सर्वे तन्नाट्य दृष्ट्वा पानशाला सार्थकता कुर्वन्तु इति आशास्महे। अपिच अत्र सर्वदा विविध शिक्षण शाखासु सुप्रसिद्ध विद्वासः आगत्य बहुविषय संवादकाः भूत्वा पानशाला

विद्याशालेति सुखशालेति मत्वा पानशाला जगत्प्रसिद्धां चारित्र्यशालिनीं कुर्वन्ति तस्मात् यूयं सर्वे धन्यवादार्हाः नमामि। (इति विरमति)

(अत्रान्तरे षण्मुखोनाम एकः तमिळ पण्डितः कण्ठेलम्बमानोत्तरीयः दीर्घ कञ्चुकः लुंगीवेष्ठितः अपिच गान् कलाकोविदः गन्धर्व नामकः द्रविड पण्डित वेषेण भूषितः प्रविशतः तौ स्मितशर्मणो पार्श्वतः उपविष्टौस्तः)

षण्मुखः — अरे बाल।

बालः — भोः एषोऽस्मि।

षण्मुखः — वघूकमानय।

बालः — आनयामि। (इत्युक्त्वा गन्धर्वं प्रति) भोः वः किमानयेयम्।

गन्धर्वः — मदिरामानय। (इत्युक्त्वा) स गि ग प ध स, स ध प ग रि स (इति मोहनरागमालपति)

षण्मुखः — अरे (गन्धर्वं विलोक्य) गन्धर्व इयं पानशाला नतु संगीतशाला

गन्धर्वः — न किमपि विद्यते अन्तरं द्वयोर्मध्ये।

षण्मुखः — किं वदसि। कथं न विद्यते अन्तरम्। तत् कथं कथय।

गन्धर्वः — संगीत चेतनानेचेतनं सर्वं जगत् स्वर्गं नयति। इयं मदिरापि तथैव करोति।

षण्मुखः — अद्य रात्रौ हेलायाः नाट्यं भविष्यति इति वृत्तपत्रे प्रसिद्धमासीत्।

गन्धर्वः — अथ किम्। अहो परमानन्दः यतः मदिरापानं मदवती मधुराधर निसृत गानं, विलास परिसर्पित लास्यम्। अतः परं किमपेक्ष्यते। इयं पानशाला आनन्दानां निलया प्रतिभाति।

बालः — भोः इयं वघूका। (इति षण्मुखस्य पुरतः स्थापयति) इदं मदिरा (इति गन्धर्वस्य पुरतः स्थापयति)

(षण्मुखगन्धर्वौ बाटिलौ उद्घाट्य चषकयोः स्रावयतः अनन्ततरं किञ्चित् किञ्चित् पिबतः)

गन्धर्व — अरे बाल पिष्टकमानय।

षण्मुख — अरे बाल अपूपमानय।

बाल — भित्त भो आनयामि। (इति गच्छति)

षण्मुख — शर्मन् सर्वषां संस्कृत शब्दानां व्युत्पत्ति विद्यते किम्?

शर्मा — अयि स्मित महोदय संस्कृत भाषाया ईदृशी शक्ति विद्यते या अन्यत्र भाषासु न विद्यते। सुर भाषाया व्युत्पन्न प्रातिपादिकाश्च विद्यन्ते। शक्यत एकानशत पर्यन्त सर्वषां शब्दानां व्युत्पत्ति विद्यते। तस्मात् नूतन शब्दसृष्टि अपि कर्तुं अस्या भाषाया शक्य भवति। नान्य भारतीय भाषासु तादृशी शक्ति विद्यते।

स्मित — किन्तु इयं प्रवाहिना देश्या, जनोपयोगी भाषा नहि। इयं न भवन्ति, न भविष्यति ना भूत् इति मे विश्वास।

शर्मा — अस्मिन् विषये केषाचन मानवाना भ्रान्ति विद्यते। यथा आङ्ग्ल भाषा सर्वसामान्य भाषा नहि तथा संस्कृत भाषापि नहि। लेखन व्यवहार उच्चतम व्यवहार आङ्ग्ल भाषाया यथा भवति तथा गीर्वाण भाषायामपि भवति। तदर्थमेव पूर्वं सकलशास्त्रचय अस्या भाषायामेव प्रादुर्भूतम्। आसेतु हिमाचल सपर्क भाषारूपेण संस्कृत प्रसिद्धम्। श्रीआदिशङ्करभगवत्पादा संस्कृत भाषाया सर्वं भारत नित्वा भारत सर्वं एक संस्कृतिसूत्रेण बद्धमिति घोषयामास।

स्मित — एकदा अभूत्। अधुना तस्या भाषाया उपयोग कुत्र विद्यते।

शर्मा — स्मित महाशय कि वदति भवान्। सर्वऽपि भारतीयानो गीर्वाण सूक्ती भाषायां वाणिज्यार्थं प्रयुञ्जत अधुना।

स्मित — दृष्टा तं देहि तत्प्रमम्।

शर्मा — सर्व संस्कृतभाषा मृतभाषा इति कथयन्ति किन्तु सर्वषां नामानि संस्कृत नामानि निश्चिपन्ति ते नामभि आह्वयन्ति। राम कृष्ण शिव गिरिजा रमा सुषमा यामन्ता इत्यादय। अपिच भारतवर्षे सर्वे वारा मासाणि नक्षत्राणि सर्वा तिथय सर्वे मासा पुनः अभिषेकादय विवाह उपनयन इत्यादय अपर धर्म इत्यादय श्राद्धादय सुरभाषायामेव कुर्वन्ति। सर्वोऽपि मानव ज्ञात्वा उत अज्ञात्वा स्वीय भाषण वितनोति अत गीर्वाणामेव भाषतेति विविच्छमेव।

स्मित — वाणिज्ये कथं उपयुज्यते।

शर्मा — शृण्वन्तु, समानी वः आकूतिः सामाजिक समारम्भेषु। शीलवृत्त फलाविद्या इति विश्वविद्यालय भवनेषु। योगक्षेमं वहाम्यहं इति विमाकार्यालयेषु, अक्षय्यं ते भविष्यतीति व्याक् सौधेषु, अमृतंतु विद्या इति सर्वत्र सर्व भापणेषु गीर्वाणमेव सुर भाषा द्वेषिणः अपि यथा संदर्भं उपयोजयन्ति बहिरागत्य ता द्विषति।

षण्मुख. — अयि भोः भवन्तौ संस्कृतं संस्कृतं इति आवयोः शिरोवेदना कारयत। किमर्थं भवन्तौ शने शनैः पीत्वा शान्तमार्गेण न गच्छथः। एवं भापणेन कोऽपयोगः।

स्मितः — कोऽस्ति भवान् आवां निरोद्धु। इयं पानशाला अत्र सर्वमपि चलिष्यति। भवान् यथेच्छं पीत्वा शान्तमार्गेण गच्छतु। आवयोः वाक् स्वातन्त्र्यं मा निरोधयतु भवान्।

षण्मुखः — क्षमस्व प्रमादः कृतः।

स्मितः — मर्षीर्चानम्।

शर्मा — अयि भोः। (इति षण्मुखं विलोक्य) त्वमपि भण यत्किमपि गीर्वाण मुद्दिश्य। तवापि वाक् स्वातन्त्र्यं विद्यते। विस्मृतोऽस्मि तव नाम प्रष्टुम्। किं ते नाम।

षण्मुखः — मम नाम षण्मुख.।

शर्मा — षण्मुख.। त्वं दाक्षिणात्यः असि।

षण्मुखः — अहं दाक्षिणात्यः। कथ त्वया ज्ञातम्।

शर्मा — नाम श्रवणेन तस्य प्रादेशिकता ज्ञायते। (स्मितं उद्दिश्य) शृणोतु भवान्। अस्य नाम षण्मुखः।

स्मितः — हा श्रुतं अस्य नाम षण्मुखः। (That means six faces)

शर्मा — भोः षण्मुख तव सख्युः नाम किम्?

षण्मुख — अस्य नाम गन्धर्वः अयं गायकः।

शर्मा — भवान् क अस्ति।

षण्मुख — अह तमिळ पण्डित ।

शर्मा — भवान् तमिळ पण्डित (गन्धर्वं विलोक्य) अय गायन कला निष्णात गन्धर्व । (स्मित विलोक्य) अयि भा शृणोतु भवान् तव नाम स्मित अमुया नामानि षण्मुख गन्धर्वौ। मम नाम हारहर शर्मा। अस्या शालाया नाम पानशाला। अत्र सवषा नामानि सस्कृतानि। सस्कृत भाषा जीवन्ती भाषा नहि किम्।

षण्मुख — अयि भा शर्मन्। तथा नहि।

शर्मा — तवाभिप्राय क ?

षण्मुख — मम तमिल भाषाया आरुमुगम् विद्यत तन्नामवाचक विलोक्य सुराणा पण्डिता षण्मुख इति शब्द असृजन्। प्रथमत बहुकालात् प्राक् भारत वर्ष तमिळ भाषा अवर्तत। सर्वपि तमिळाया एव।

स्मित — षण्मुख तथापि वाक् स्वातन्त्र्य विद्यते तत् कथ भवति त्व विस्तारय।

षण्मुख — यदा आर्या उत्तर ध्रुव प्रान्तात् भारत आगता तदा त भारत विद्यमान भारतीये प्रयुध्य तान् दक्षिणापथ द्रावयामासु । तस्मात् त द्राविता अभूवन्। तदेव अनन्तर Dravidian बभूव।

स्मित - त्वदुदारित सत्यम्। ततस्तत ।

षण्मुख — तस्मात् भारतवर्ष मवासु भाषासु तमिळ भाषा आद्या भारतीय भाषा। अस्मदीय कानिचन अक्षराणि र ळ न्यायानि नाग पुना इत्यादि शब्दान् आर्या सस्कृत भाषाया समावेशयन्।

शर्मा — अयि भा षण्मुख तव तमिळ भाषाया सन्मिळ् कोन्दामव इत द्वे नाख स्त । तत्र प्रथम शाखाया सस्कृत शब्दा विशति गत विद्यन्त।

षण्मुख — केवल कथन उपयोग नास्ति। दर्शय शब्दान्।

शर्मा — (किञ्चित् विचार्य) मणिमेखला काव्यम्। अङ्गरे, नडन, करुणाकरन्, गणमन् इत्यादि शब्दा तत्समा विद्यन्त। अपिच शीघ्र, अध्य नळ इत्यादि शब्दा यत्र मान्त। तवापि भाषा विद्यत सस्कृत सम्बन्ध विना।

षण्मुखः — एते सर्वे शब्दाः तमिळ शब्दाः। एतान् शब्दान् आर्याः संस्कृत भाषाया समाविष्टेनं अकुर्वन् इति अहं कथयामि।

शर्मा — भवान् असंबद्धं अप्रामाणीयं कथयति। सुरभाषा भारतदेशाय या संस्कृतीं दत्तवती तद्वत् भारत देशे विद्यमानाः सर्वाः भाषाः मिलित्वा अपि तादृशीं संस्कृतिं भारतवर्षस्य समैक्यता प्रतिपादनाय न प्रभवन्ति। यदि प्रयत्नः क्रियते सः प्रयत्नः विफलः भविष्यति। कालक्रमेण विषयमेतत् सर्वेषा अवगतं भविष्यति। विना संस्कृतेन भारतदेशस्य अस्तित्व न भवति।

गन्धवः — शर्मन् सर्वमपि भारतेतिहासं पाश्चात्याः असंबद्ध असत्य लिलिखुः। विचार्यमाणे संगीतंविना प्रपञ्चमेव नास्ति। सर्वं नादमयं जगत्। नादः ब्रह्म। केवलं सप्त स्वराणा तेषा ध्वनि विभेदाना च समवायेन अर्थात् अल्पाक्षरे· संगीतशास्त्रं अनन्तं भूत्वा जगति सर्व प्राणिना हृदयङ्गमं भूत्वा चित्तचोरकं चित्ताकर्षकं भवति। तत् संगीतमेव भारत समैक्यतायाः उत प्रपञ्च मानव सौहार्द्रतायाः निदानं भवति। तस्मात् यः संगीत न जानाति सः पशुप्रायः भवति।

स्मितः — (विहस्य) गन्धर्व भवान् किं वदति। सर्वोऽपि स्वमतानुकूलं प्रपञ्चं परिवर्तितुं प्रयतते। तथा मा कुर्वन्तु। यत् अहं कथयामि तत् भवन्तः विचारयन्तु। पश्य।

आन्ङ्ग्लत्वं आन्ङ्ग्ल भाषाच। सर्वत्रैवयं विधीयते।
तस्मादान्ङ्ग्लीय भावेन। वर्तितव्यं सदा भुवि॥

इति मे मतिः।

शर्मा — भारतवर्षे भारतीयाः पाश्चात्यान् अनुकुर्वन्ति सर्व विषयेषु। तेषा सा एका व्याधिः बभूव। सा व्याधिः चिकित्सानर्हा। मरणानन्तरमेव सा व्याधिः शममेष्यति। सर्वोऽपि देशभक्तिहीनः सुखलंपटो भूत्वा अमूल्य राष्ट्रीयपरम्परा नाशयन् जीवति। विना च सुरभारतीज्ञान भारतीय परम्परा अवगाहनानर्हा। भुविविद्यमान सकल भाषा पारंगतोऽपि तस्य भारतीय अन्तरात्मा नावगाहनं भवति। तस्य देशभक्तिः न संजायते।

स्मितः — तत् कथम्।

शर्मा—विना च रामायण महाभारत उपनिषदादीनापठन कालिदास महाकवि प्रभृतीनाकवन विनैव शब्दशास्त्र नाट्यशास्त्र दशन वेदाङ्गाना परिचयन देशभक्ति न भवति। देशस्य सस्कृति वैभव परम्परादय देशीय भाषासु प्रतिबिम्बिता भवन्ति। भारतीय प्राचीनपरम्परा समाजस्थिति सकल शास्त्राणा सृष्टि वेदोपनिषदा अपिच आयुर्वेद गणित नाट्य खगोळ शास्त्रादीना शब्दशास्त्र मीमासादि शास्त्राणा सृष्टि सुर भाषायामेव बभूव नान्य भाषासु। तस्मात् इय भाषा भारतीय परम्परा प्रतीका अभूत, भवति भविष्यति। केचन विध्वसक भावना भूषिता नेतार मन्यमाना विना सस्कृत भाषा, सस्कृति च भारत देशस्य समैक्यता प्रतिपादयितु साधयितु च प्रयतन्ते तेषा प्रयत्न विफल भविष्यति।

षण्मुख — विनाच सस्कृतज्ञान सर्वाणि मम तमिळ भाषाया अह पठितु समर्थोऽस्मि।

शर्मा — प्रान्तीय भाषा सर्वा सस्कृत भाषाया विद्यमान काव्य नाटकादि अनुवादेन परिपुष्टिगता। किन्तु वेदै सर्वोऽपनिषद्भि ब्राह्मणैः पुराणै अन्य तन्त्रविद्याभि न परिपुष्टि गता। तस्मात् ते राष्ट्रभाषा पद आरोढु अशक्ता भवन्ति।

स्मित — आङ्गल भाषाया शब्दसपत्ति बहुला विद्यते तस्मात् सर्व शास्त्रोपयोगिनी आङ्गल भाषा भारतीयाना राष्ट्रभाषा भवितुमर्हति।

शर्मा — आङ्गल भाषा परदेशीया। सा भाषा भारतीय भाषा कथ भविष्यति। तस्या भाषाया भारतीय जीवन न दृश्यते। सा भाषा व्यवहार योग्या भवति। न किन्तु भारतीय सस्कृति प्रतिबिम्बिता भविष्यति।

गन्धर्व — अयि महाशया भाषाविषय स्पर्धा मा भूयात्। सगीततु वस्तुत सहजतया प्रकृति भाषा तस्मात् जगत्भाषा सगीतम्।

शर्मा — अयि गन्धर्व। तव भाषणे विचार सरणि न सदृश्यते। पश्य सगीते भाषा न विद्यते भाषितुम्। तस्मिन् केवल सुस्वराणा सगम विद्यते। स. स्वरसगम सस्कृतभाषया भूषित सुमधुर सगीत भवति भाषितु योग्य गातु सुकर भवति। गायक सस्कृतभाषाज्ञान विना गातु समर्थ न भवति।

स्मित — तत् कथ भो । गानस्य सस्कृतसवन्ध कुत ? सत्य सर्व भवान् सस्कृतस्य अनुसधान करोति ।

शर्मा — अह न किमपि अनुसधान करोमि। स सस्कृतभाषाया स्वभाव । सगीतस्य व्युत्पत्ति सम्यक् गीयते इति सगीतम्। सगीते अनके रागा सन्ति। सर्वेषा रागाना नामानि सस्कृत शब्दा एव।

स्मित — भवतु नाम गायने सस्कृतस्यावश्यकता। अरे वाल।

वाल — अहमस्मि भो । किमपेक्ष्यते ।

स्मित — एक चषक वधूकामानय (शर्माण विलोक्य) भवद्भ्य कि रोचते

शर्मा — अत्र मे रोचकानि न सन्ति। केवल सोडा विद्यते।

वाल — कोकाकोला विद्यते भो ।

शर्मा — प्रथमत न विद्यते इति उक्तवान् अधुना कोकाकोला कथ विद्यते ।

वाल — अधुना नवीन वस्तुचय समागत भो ।

शर्मा — अपि च कि कि विद्यते।

वाल — आम्ररस विद्यते नारङ्गरस विद्यते।

शर्मा — आम्र रसमानय।

वाल — यथाज्ञापयति। (इति गच्छति)

शर्मा — शृण्वन्तु, हसध्वनिरिति, शङ्कराभरण इति, उमा भरणमिति, षण्मुखप्रियति कल्याणीति, उदयचन्द्रिकेति, कलहस इति, चारुकेशीति, अमृतवर्षिणी, जलार्णवम्, मेघदूतम् इति अनेकानि नामानि ओडव षाडव शुद्ध वादि, सवादि इत्येषा शब्दाना अथज्ञान विना कैशिकी, काकली, निषाद कोमल कपित इत्यादि शब्दाना च अवगाहन विना अथ ज्ञानेन विना सगीत गायन गार्दभ स्वरमेव भवति। यदि रागस्य अथ ज्ञायते तर्हि आनन्द द्विगुणीकृत भवति।

शर्मा—विना च रामायण महाभारत उपनिषदादीनांपठनं कालिदास महाकवि प्रभृतीनांकवनं विनैव शब्दशास्त्र नाटचशास्त्र दर्शन वेदाङ्गानां परिचयेन देशभक्ति न भवति। देशस्य संस्कृतिः वैभवः परम्परादयः देशीय भाषासु प्रतिबिम्बिताः भवन्ति। भारतीय प्राचीनपरम्परा समाजस्थितिः सकल शास्त्राणां सृष्टिः वेदोपनिषदां अपिच आयुर्वेद गणित नाटच खगोळ शास्त्रादीना शब्दशास्त्र मीमांसादि शास्त्राणां सृष्टिः सुर भाषायामेव बभूव नान्य भाषासु। तस्मात् इयं भाषा भारतीय परम्परा प्रतीका अभूत्, भवति भविष्यति। केचन विध्वसक भावना भूषिताः नेतारं मन्यमानाः विना संस्कृत भाषा, संस्कृति च भारत देशस्य समैक्यता प्रतिपादयितुं साधयितुं च प्रयतन्ते तेषां प्रयत्नः विफलः भविष्यति।

षण्मुखः — विनाच संस्कृतज्ञानं सर्वाणि मम तमिळ भाषाया अहं पठितु समर्थोऽस्मि।

शर्मा — प्रान्तीय भाषाः सर्वाः संस्कृत भाषाया विद्यमान काव्य नाटकादि अनुवादेन परिपुष्टिगताः। किन्तु वेदैः सर्वोऽपनिषद्भिः ब्राह्मणैः पुराणैः अन्य तत्रविद्याभिः न परिपुष्टि गताः। तस्मात् ते राष्ट्रभाषा पदं आरोढु अशक्ताः भवन्ति।

स्मितः — आङ्गल भाषायां शब्दसंपत्तिः बहुला विद्यते तस्मात् सर्व शास्त्रोपयोगिनी आन्ङ्गल भाषा भारतीयानां राष्ट्रभाषा भवितुमर्हति।

शर्मा — आन्ङ्गल भाषा परदेशीया। सा भाषा भारतीय भाषा कथ भविष्यति। तस्यां भाषाया भारतीय जीवन न दृश्यते। सा भाषा व्यवहार योग्या भवति। न किन्तु भारतीय संस्कृति प्रतिबिम्बिता भविष्यति।

गन्धर्वः — अयि महाशयाः भाषाविषये स्पर्धा मा भूयात्। सगीततु वस्तुतः सहजतया प्रकृति भाषा तस्मात् जगत्भाषा सगीतम्।

शर्मा — अयि गन्धर्व। तव भाषणे विचार सरणिः न संदृश्यते। पश्य संगीते भाषा न विद्यते भाषितुम्। तस्मिन् केवल सुस्वराणां सगमः विद्यते। सः स्वरसगमः संस्कृतभाषया भूषितः सुमधुरं सगीत भवति भाषितुं योग्यं गातु सुकरं भवति। गायकः संस्कृतभाषाज्ञानं विना गातुं समर्थः न भवति।

स्मित — तत् कथं भो । गानस्य सस्कृतसवन्ध. कुत.? सत्य सर्वं भवान् सस्कृतस्य अनुसधान करोति।

शर्मा — अहं न किमपि अनुसधान करोमि। स सस्कृतभाषाया स्वभाव । सगीतस्य व्युत्पत्ति सम्यक् गीयते इति सगीतम्। सगीते अनेके रागा. सन्ति। सर्वेषा रागाना नामानि सस्कृत शब्दा एव।

स्मित — भवतु नाम गायने सस्कृतस्यावश्यकता। अरे वाल।

वाल — अहमस्मि भो । किमपेक्ष्यते।

स्मित — एक चषक वधूकामानय (शर्माण विलोक्य) भवद्भ्य कि रोचते

शर्मा — अत्र मे रोचकानि न सन्ति। केवल सोडा विद्यते।

वाल — कोकाकोला विद्यते भो ।

शर्मा — प्रथमतः न विद्यते इति उक्तवान् अधुना कोकाकोला कथ विद्यते ।

वाल — अधुना नवीन वस्तुचय समागत भो ।

शर्मा — अपि च किं किं विद्यते।

वाल — आम्ररस विद्यते नारङ्गरस विद्यते।

शर्मा — आम्र रसमानय।

वाल — यथाज्ञापयति। (इति गच्छति)

शर्मा — शृण्वन्तु, हसध्वनिरिति, शङ्कराभरण इति, उमा भरणमिति, षण्मुखप्रियेति कल्याणीति, उदयचन्द्रिकेति, कलहस इति, चारुकेशीति, अमृतवर्षिणी, जलार्णवम्, मेघदूतम् इति अनेकानि नामानि औडव पाडव शुद्ध वादि, सवादि इत्येषा शब्दाना अर्थज्ञान विना कैशिकी, काकली, निषाद कोमल कपित इत्यादि शब्दाना च अवगाहन विना अर्थ ज्ञानेन विना सगीत गायन गार्दभ स्वरमेव भवति। यदि रागस्य अर्थ ज्ञायते तर्हि आनन्दः द्विगुणीकृत भवति।

गन्धर्व· — शर्मन् भवता यत् प्रतिपादित तत् सत्यमिति मे प्रतिभाति। विना सस्कृतवाण्या कण्ठगत स्वरमपि सुष्टु नोच्चारितं भवति। सस्कृत भाषा मानव सस्कृतवन्त करिष्यति तत् सत्यम्। अधुना अवगतं मया।

शर्मा — गन्धर्व।

संगीतमपि साहित्यं। सरस्वत्याः कुचद्वयम्।
एकमापात मधुरं। अन्यदालोचनामृतम्॥

गन्धर्वः — साधु शर्मन् साधु त्वामह वन्दे। (इति हस्तावुद्यम्य नमस्कार करोति)

स्मितः — शर्मन् भवान् सर्वं विषयस्यापि दृष्टान्त दर्शयति तदतीव हृदयङ्गम भवति मे। कथ शक्यते भवता एवं कर्तुम।

शर्मा — सस्कृताभ्यासेन मानवस्य सर्वं भाषाणा स्वरुपः ज्ञायते तादृशी शक्ति. तस्या· भाषायाः सहजालङ्कारप्राया भवति। न तु मम।

षण्मुख· — अयि शर्मन् द्राविड भाषा अपि संस्कृत भवः इति भवान् कथयति कथम्।

शर्मा — द्रविड भाषा, तमिळ भाषा सस्कृत भाषा इति नाहं कथयामि। किन्तु तस्याः अपि सस्कृत सबन्धः विस्तारेण प्राचुर्येण विद्यतेति कथयामि। विना च वेदवाङ्मय सबन्धः भाषा परिपुष्टि न प्राप्नुवन्ति। तस्मात् सर्वसा भारतीय भाषाणा तज्ज्ञाना विना सस्कृत भाषा ज्ञान तेषा तासु भाषासु पाण्डित्य न भवतीति मे अभिप्रायः।

बालः — अयि भोः इय वधूका। (इति स्मिताय ददाति) अयं आम्र रस.। (इति शर्मणे ददाति)

व्यवस्थापक — अयि भोः पायिनः भोक्तारः शृण्वन्तु घोषणा। वय अधुना हेला सुन्दर्याः मनोरजक नाटचं दर्शयिष्यामः। सावधानतया युष्मदीय आसनेषु उपविशन्तु भवन्तः। नमास्ते।

(पिशाच संगीतवत् वाद्यविशेषणा कलकलः तस्मिन् कलकले पैशाचीय कण्ठ स्वरः काम तृष्णा प्रजनयन् अस्ति हेलानाट्यं करोति)

पिब पिब पिब। मधु मधु मधु
घूर्ण घूर्ण घूर्ण। सीधु सीधु सीधु। पत पत पत ध्रु.

आलिङगनं देहि रे। अधरपानं कुरु रे।
नखक्षतं कुरु रे। शुक्रच्युति कुरु रे १

देहि देहि बाहुबन्धनम्। दश दश पल्लवाधरम्।
आरोहरोह नितम्बम्। चुम्ब चुम्ब रागकपोलम्। २

पश्य पश्य मे कुचभारम्। स्पर्श स्पर्श मे कचभारम्।
पश्य पश्य मे ऊरुभारम्। भ्रम भ्रम मे पादपीठम्॥ ३

(इति सा हेला नृत्यन्ती सर्वेषां सकाशं समागच्छति चेष्टादिकं करोति। सर्वे करतल ध्वनि कुर्वन्ति, कश्चन मुखवेणुं नादयति)

स्मितः — हेलानाट्यं अतीव सुन्दर वर्तते।

शर्मा — (विहस्य) एतत् पिशाच गान पिशाच नाट्यं अतीव जुगुप्साकारकं शिरोवेदना मूलभूतम्।

षण्मुखः — शर्मन् त्वं अतीव प्राचीन भावनुयायी पाषण्डः। भवान् जानाति खण्डनं न तु मण्डनम्। अधुना अहं ज्ञातोऽस्मि।

शर्मा — अयि भोः मित्रवराः अत्र अस्मिन् नाट्ये आङिगकाहार्य वाचकाभिनयाना सन्निवेश' नास्ति कथ इदं नाट्य भवति। युष्मदीय मते अर्धनग्न सुन्दरी यदि नर्तिष्यति तर्हि तत् नाट्यं भवति। मम मते इदं नाट्यं नहि इदं केवलं कामपिशाचस्य नाट्यम्। एषा कामुकी रूपाजीवा न तु नर्तकी। नात्र विद्यते ममलेशोऽपि आदर.। एवं इद नाट्यमिति प्रदर्शयित्वा व्यापारिणः कामुकाः धनं लभन्ते। अनया पद्धत्या एते कामुकाः व्यापारिणः भारतीय जीवन नाशयन्ति। जनाः अविचार्य एता-

दृशं विलोक्य कामलोलुपा. मूत्वा स्वीय कुटुम्बं नाशयन्ति। देशः संकरः भवति कामुक भाव संपन्नः भवति। धिक् आधुनिकता जीवनम्।

स्मितः — भवतुनाम का हानिः। जनाः सुखमनुभवन्ति आनन्दमनु भवन्ति। कलानां अन्ततः आनन्ददायित्वमेव परमावधिः खलु।

शर्माः — एवं यदि स्यात् भारतीय परम्परायाः हानिः भविष्यति। कालक्रमेण देशे सर्वे कामुकाः व्यापारिणः भविष्यन्ति। देशः अल्पहिन्दु संयुक्तः भविष्यति यत्र अधिक धार्मिकाणां भवितुं शक्यते। तस्मात् भारतीय कला संस्कृति रक्षणं भारतीयाना कर्तव्यमिति मे मनीषा। एतादृश कामपरीत व्यापारः क्षुल्लक नाटयकला च देशं नाशयिष्यतः। यत्र कालासु दिव्यत्वं न दृश्यते सा कला नहि भवतीति भारतीयाना साम्प्रदायः। तस्मात् सर्वत्र भक्तिभावं मेलयित्वा ते संस्कृति रक्षणमकुर्वन्। एतादृशी पवित्र भावना क्षुल्लकाना अल्पकाना देशद्रोहिणा न भवति।

स्मितः — एतत् सर्वं नाटयशास्त्रे भागः एव।

शर्मा — भवन्तः अन्य देशीयाः। संस्कृतं भवन्तः जानन्ति किन्तु तत्र आत्मा भवद्भिः न ज्ञातः। यूयं अर्थात् भारतभिन्न देशीयाः। प्रथमतः आरभ्य व्यापारिणः एव। भौतिकादन्यत् विद्यते न किमपि। पश्यत एक गानेन यदि संगीतं भवति, एक प्रवनेन नाटय भवति सर्वमपि शास्त्रं निरर्थकं भवति। एतत सर्वं अल्पज्ञानामतम्। तत् मे न रोचते।

स्मितः — नाहं अवगनोऽस्मि का ते भावना इति।

शर्मा — प्राचीन भारतीय संस्कृतिः सकल विद्याना समवायः। सः एव आनन्दस्य हेतुः भवति।

षण्मुखः — भवादृशाः विरलाः लोके।

शर्मा — एतादृशी भावनाभूषिताः बहवः सन्ति। यूयं द्रष्टुं अशक्ताः अभवन्।

स्मितः — आन्डाग्लभाषा विना केवलं संस्कृतपठनेन विश्वव्याप्त भावना न भवति।

शर्मा — विश्वव्याप्तभावना ।संस्कृत पठनेन केवलं भवति नत्वन्यथा।

गन्धर्वः — तत् कथम्।

शर्मा — संस्कृतात्मा सर्वत्र आत्मानमेव पश्यति। अन्तर्बहिश्च तत् सर्वं व्याप्यनारायण स्थितः। एतादृशी भावना गीर्वाणभाषापठनेन भविष्यति नत्वन्यथा। आन्ङग्लभाषा विश्वभाषासु एका।

स्मितः — अन्या विश्वभाषा विद्यते किम् ?

शर्मा — विश्वभाषा केवलं सुरभाषा एव भवति। आङग्ल भाषातु व्यवहार भाषा भवति। भारतीय संस्कृति अवगाहनाय संगीत नाटय साहित्य इत्यादि ललित कलाना आनन्दानुभवाय, सकल शास्त्रज्ञान संपादनाय गीर्वाण भाषा ज्ञानस्य आवश्यकता भवति। जागतिक विषय ज्ञानार्थं आङग्ल भाषा अत्यावश्यकी। तस्मात् एते द्वे भाषे दृगिन्द्रिय समाने। प्रत्येक मानवस्य एते द्वे भाषे पर्याप्ते भवतः।

षण्मुखः — शर्मन् भारतवर्षे बहवः पदवीधराः विश्वविद्यालय प्रमाणपत्र धारकाः विभिन्न शाखासु निष्णाताः वर्तन्ते। किं ते पण्डिताः न भवन्ति।

शर्मा — पाण्डित्यं यदि प्रमाणपत्रेण भवति तर्हि भारते सर्व शाखासु विभिन्न विषयेषु विद्यमानाः सर्वे पण्टिताः भवन्त्येवा तद संभवम्। वयं सर्वे प्रमाणपत्र धारकाः उदरपोषणार्थं। किन्तु एषा सुशिक्षणा न भवति। या विद्या देशसंस्कृतिमुद्दिश्य न कथयति सा विद्या निरर्थका। सा विद्या न भवति। ते पौराः देशभक्ताः न भविष्यन्ति संस्कृति प्रेमिकाश्च न भवन्ति।

स्मितः — शर्मन् भवता प्रतिपादितं अङगी करोमि। अद्य प्रभृति अहमपि गीर्वाणं सम्यक् पठित्वा भारतीय संस्कृतिं अवगाहनं कर्तुं प्रयतिष्ये। देशभाषया देशीय जीवनं अवगाहितुं शक्यते।

गन्धर्वः — तस्मात् देशभाषा हिन्दीमङ्कुर्वन्।

शर्मा — समस्त राष्ट्रस्य एका राष्ट्रभाषा अत्यावशकी विद्यते इति मत्वा, अपि च हिन्दी भाषा सर्वेषामपि सुलभ तथा अवगाहनं भविष्यतीति राष्ट्रभाषा स्थानं अयच्छन्। किन्तु राष्ट्रस्य परम्परा जीवनं तस्या भाषाया नास्ति। भारतीय सास्कृतिक भाषा गीर्वाण भाषा। भारतीय सामान्य जनाना संपर्क भाषा हिन्दी भाषा।

स्मितः — प्रपञ्चविज्ञानम्पिय स्वीकारार्थं आङग्लभाषा।

षण्मुखः — सुलभ पद्धत्या सत्परावगाहनाय मातृभाषा ज्ञानं आवश्यकं भवति।

स्मित — संहत्य चतस्त्रः भाषाः अवश्यं पठनीयाः सन्ति।

गन्धर्वः — बालकाना अतीव भारहेतुः भवति एषा पद्धतिः।

शर्मा — तस्मात् अहं वच्मि सर्वत्र भारतवर्षे प्राथमिक शिक्षणा मातृभाषाया माध्यमिक शिक्षणादारभ्य आङ्गल गीर्वाण भाषयो शिक्षणा भवितव्या इति मे मतिः।

स्मित — संस्कृताङ्गल भाषे अनिवार्यत्वेन विश्वविद्यालय पर्यन्तं ?

शर्मा — हा तावत्पर्यन्तम्।

स्मित — शर्मन् तव कल्पना सम्यक् विद्यते। मध्ये हिन्दी भाषामानीय भाषा समस्या जटिला अकुर्वन्।

शर्मा — प्रान्तीय भाषापेक्षया प्रादेशिकमातृभाषापेक्षया भारतीयः प्रथमः। भारतीय भाषा प्रथमा। तस्मात् भारत राष्ट्र जीवनार्थं संस्कृतमावश्यकम्।

षण्मुखः — शर्मन् भवान् मूर्तीभूत भारतीय संस्कृति रिवाभाति।

शर्मा — अहं केवलं देशभक्तः देशं देश संस्कृति, संस्कृतंच रक्षयितुं इच्छामि।

स्मितः — अरे बाल।

बालः — एषोऽस्मि।

स्मितः — एकं गोल्ड फ्लाक्मानय।

बालः — हा भोः।

स्मित. — अधुना नव घण्टावादन समय।

शर्मा — घण्टात्रयं अत्रैव कालयापनं कृतम् अस्माभिः।

(आकाशवाणी श्रूयते वार्ता। इयं आकाशवाणी वार्ताः श्रूयन्ता प्रवाचिका विजयश्री। एकोन विंशत्युत्तर चतुरशीति संवत्सरादारभ्य भारत राष्ट्रभाषा संस्कृत भाषा भविष्यतीति भारत शासनस्यादेशः। तदा प्रभृति सर्वासु शालासु विद्यालयेषु विश्व विद्यालयेषु सर्व शाखासु गीर्वाण प्रश्नपत्र अनिवार्यत्वेन स्थापनीयं इति शासनस्यादेशः।

स्मितः — शर्मन् अह त्वा अभिनन्दामि तव स्वप्नः फलितः।

सर्वे — सरकारः जिन्दाबाद। शरदा शत जीवेत।

शर्मा — (कुर्च्यां निश्चेष्टः उपविष्ट ।)

षण्मुख — किं भोः शर्मन् किमर्थं मौनमवलम्बसे। एतावत्पर्यन्त भाषण कुर्वन् अधुना स्तब्धोऽसि।

गन्धर्व. — एतत् आनन्दस्य पराकष्टालक्षणम्।

शर्मा — "रात्रिर्गमिष्यति भविष्यति सुप्रभातम्"।

स्मितः — शर्मन् नीचैर्गच्छत्युपरिच दशा चक्रनेमि क्रमेण। भवान् अस्माक सर्वेषा चन्दन कुरु।

शर्मा — अरे बाल सर्वेषा हिमपुटिका आनय।

बाल. — हा आनयेयम्। (इति गच्छति)

व्यवस्थापकः — अयि भोः मित्रोत्तमाः अधुना सार्धनवघण्टा परिमितकाल. समासन्न. भवति। पानशालाया कवाटबन्धन विधीयते। अद्य अस्मदीय पानशाला चारित्र्यात्मक सघटना भूषिता अस्ति। भारतीय राष्ट्र भाषा सस्कृत भाषा सजाता। इयं वार्ता अत्र पानशालाया श्रुत अस्माभिस्सर्वैरपि, तस्मात् मे परमानन्द. समजनि। इत पर इय पानशाला पानशाला एव भविष्यति विनाच मादकता पेयम्। श्व. प्रभृति अत्र केवल फलरसाना पेय लभिष्यति। नत्वन्यत्। नाट्यनु भरतनाट्य कूचिपूडिनाट्य इत्यादि भारतीय पद्धत्या विराजमान नाट्यादिक भविष्यति। शुभरात्रिः।

गीतम् (भैरवी रागे)

शर्मा — भुवि मे तिष्ठतु निर्मल जननी गीर्वाणी
कमलासन वदन प्रसारित परिमल सरणी ध्रु·

वेद चतुष्टय वर्णित पावन रमणि
स्फाटिक निमल विलसित वीणापाणी
निर्जर वल्लभ त्रिदिवशासन पूतावाणी
नूनं भवति न शाश्वत भारत वाणी १

अनन्तोपनिषद ब्राह्मण पूर्णा सुरवाणी
शीतल नगसेतु विशाले भुवि मन्जुल राज्ञी
प्राचेतस कविवर कीर्तित रामायण चित्रितवाणी
पाराशरमुनि विस्तारित भारत गीता वाणी २

पतञ्जलि पाणिनि वररुचि कात्यायन संस्कृतवाणी
षडङ्गाकुल पातञ्जल योगायुर्वेदावृतस्ववर्णि
भास्कर मिहिर कुलार्चितागणित गणिता वाणी
निगमागम पदचय पूरित पारपर्येणागतावाणी ३

भास कालिदास मायूरकदण्डि माघसपूजित चरणा
भवभूति बाण मुरारि भारवि कीर्तित सुस्थिर चरिता
भरत प्रशिक्षित लीला हेवा नाट्याञ्चित विभ्रमरूपा
जगन्नाथानन्द मम्मट विश्वनाथ भूषित रम्यालङ्कारा ४

लोके भाषा सवधन मूलापयोधररूपा जननी
भारत गौरव जीवन संस्कृति विद्या सदायिनी
शङ्कर रामानुज मध्वोदित वेदा तावृत जीवन शालिनी
बिलसतु मे देशऽच्युत भारतवाणी गीर्वाणी ५

मुनिजन पदगण जीर्णित देहा मे वाणी
अस्थिर रूपास्थिर भारत जीवन सञ्जीविनी
अपगत गौरव जीवन दायिनी मधसुरवाणी
नून भवति च भारत शासन वाणी नान्यात्राणी ६

॥ जय भारत ॥

(यवनिका पतति)

।। प्रेमपरीक्षा ।।

(व्यवस्थापकः रङ्गमञ्चोपरि ध्वनियन्त्र हस्ते गृहीत्वा)

अयि भो सामाजिकाः अद्य वयं प्रेमपरीक्षा नाम नाटकं प्रदर्शयितुं उद्युक्ताः। आधुनिक प्रपञ्चे केचन युवका, युवत्यः वक्रमार्गं नेतुं स्वीय हृदय भावना मधुर, भाषणारूपेण दर्शयित्वा ता. अनुभोक्तुं प्रयतन्ते। तेषा हृदयस्य भावना परीक्षितुं युवत्यः अशक्ताः भवन्ति। केचन युवकाः सत्यं मनसा अनुरूपवत्यः युवतीः परिणेतुं अभिलषन्तः तेषा भावना प्रकटी कर्तुं संकोचात्मान· भवन्ति। युवत्यः पुरुषान् परीक्ष्य तैस्साक परिणीता. भवितव्या. इति अनेन नाटकरूपेण प्रदर्शितं आसीत्। अस्य नाटकस्य कर्ता गीर्वाणान्ध्र भाषाप्रवीण गेयचक्रवर्ती संस्कृत महाकविः पण्डित पराक्षिन् शर्मा। अस्य कविता अतीव सरळा सर्व जनानानुमोदिनी। विंशति तम शताब्दे अयं सप्तविंशति नाटककर्ता! अस्य नाटकसमुदायस्य नाम परीक्षिन्नाटकचक्रम्। नाटकं दृष्ट्वैव भवन्त· अस्य कवे भाषा सौन्दर्यं पात्र चालनदक्षता च ज्ञास्यन्ति। नमामि। (इति निर्गच्छति)

(यवनिका अपसार्यते)

(रङ्गमञ्चे कामाक्षी (माता) सुन्दरी (कुमारी) स्तः। सुन्दरी कुर्च्यां उपविश्य टेबुलोपरि पत्र निचय संस्थाप्य किमपि लिखन्ती आस्ते। कामाक्षी गृहकृत्यं कुर्वन्ती इतस्ततः वस्तुनिचयं सारयन्ती आस्ते)

कामाक्षी — सुन्दरि।

सुन्दरी — हाँ मात ।

कामाक्षी — अधुना दशवण्टाः अभवन्। त्वं कदा गमिष्यसि विद्यालयम्।

सुन्दरी — मे लेखन कर्म समाप्तं। अधुना गच्छामि। (इत्युत्थाय स्कन्ध उभिनि गोण्या निक्षिपति)

कामाक्षी — सुन्दरि, पाथेयपात्र गृहाण। (इति अन्त गच्छति आनेतुम्)

सुन्दरी — मात ।

कामाक्षी — परावृत्य) हा किम्।

सुन्दरी — मात अद्य पाथेयपात्र मा देहि।

कामाक्षी — किमिति।

सुन्दरी — अद्य शनिवासर । अद्य एकघण्टावेलाया विद्यालयबन्धन भवति।

कामाक्षी — विद्यालय बन्धनानन्तर भोजन कुरु पाथेयपात्र गृहाण।

सुन्दरी — अद्य भोजन मास्तु।

कामाक्षी — विना च भोजन कथ। किमर्थमेव वदसि अद्य।

सुन्दरी — अद्य मे एकस्य सहाध्यायिन जन्मदिवस भवति। वय सर्वे सहाध्यायिन मिलित्वा तस्य गृह द्विघण्टावादन समये भोजनार्थं गमिष्याम ।

कामाक्षी — पुनरागमन कदा।

सुन्दरी — पुनरागमन सप्तघण्टावादन समये। (इति स्त्रीयालङ्करण सम्यक् विधाय पादत्राणे धरति)

कामाक्षी — इयन्तमालस्य किमर्थं भवति।

सुन्दरी — जननि, भोजनानन्तर सन्ध्यासमये सार्ध पञ्चघण्टावादन समये सर्वेषा समक्ष जन्मदिनसदीपसमारम्भ भविष्यति। तदा यत्किमपि तस्मै उपायनमिव दातव्य अस्ति। तस्मात् वय विद्यार्थिन्य समाहूय यत्किमपि वस्तु तस्मै दातु उद्युक्ता अभवाम। तदर्थं तद्वस्तुक्रेतु विपणी गन्तव्य विद्यते।

कामाक्षी — जगति एव प्रथा विद्यते जन्मदिवसे यत्किमपि उपायनमिव दातव्य इति।

सुन्दरी — तस्मात् वय विद्यार्थिन्य मे सखी वल्लरी इत्यादय सन्ध्यासमये

विपणीं गत्वा ऊर्णवस्त्रं वयार्थं क्रीत्वा आनयेम। सप्तप्रष्टावादनपर्यन्तं तत्रैव वय स्थास्याम ।

कामाक्षी — एकैकस्य अशदान कियत् भवति।

सुन्दरी — एकैकस्य अशदान पञ्चतिष्यकाणि भवन्ति।

कामाक्षी — गच्छ। अप्रमत्ततया चलन तरण च कर्तव्य स्यात्। यातायातया न विषय लक्ष्यीकृत्य व्यवहर।

सुन्दरी — तथैव मात । (इति गोर्णी गृहीत्वा निर्गच्छति)

कामाक्षी — (वस्तुचय स्वटीकृत्य निक्षिपति अत गच्छति)

(तत प्रविशति भास्कर धूम्रपानवर्तिमुख स पादत्राणौ त्यक्त्वा शयन कुर्च्या उपविशति)

भास्कर — हञ्जे कामाक्षि। (इति आह्वयति)

कामाक्षी — (प्रविश्य) कि भा एषास्मि कथयतु।

भास्कर — इत एहि।

कामाक्षी — (समीपमागच्छति) किम् विद्यते रहस्यम्।

भास्कर — उपविश।

कामाक्षी — (एक त्रिपाद पीठ आनीय उपविशति)
भास्कर — कि श्रुत भवत्या।

कामाक्षी — किमिति।

भास्कर — त्वया न श्रुतम्।

कामाक्षी — तत कथयतु भवान् सत्वरम्।

भास्कर — त्रिपाठी, पुत्रस्य विवाह विनिश्चितवान्।

कामाक्षी — भवन्त कथ नानाम्ति।

भास्कर — मया अधुनैव ज्ञातम्।

कामाक्षी — केनोक्तम्।

भास्कर — त्रिपाठिना।

कामिक्षी — तेन स्वत उक्तम्।

भास्करः — हाँ स्वतः तेनैवोक्तम्।

कामिक्षी — कदा।

भास्करः — अधुना ममागमनसमये मे समुखमागत्य नमस्कृत्य अयि भोः भास्करमहोदय किं ते कुमार्याः विवाहः न निश्चितः किं एतावत्पर्यन्तं, इति मां अपृच्छत्। एतावत्पर्यंत न निश्चितमिति मया उक्तम्।

कामिक्षी — तदा किं प्रत्युत्तरं दत्तं तेन।

भास्करः — तदा सः अवोचत् तस्य कुमारस्य विवाहः विनिश्चितः इति।

कामिक्षी — कुमारस्य विवाह निश्चये न किमपि कष्टं भवति। म्रियते खलु तस्य पुत्री, यदि तस्याः विवाहः निश्चितः भवति तर्हि अयं अदृष्टवान् महत् कार्यकर्ता भविष्यति।

भास्करः - सः अघटन घटनासमर्थः सः करिष्यति।

कामाक्षी — हा सत्यमेव सः अस्मादृशः नहि।

भास्कर — व्यङ्ग्य कथनं प्रारब्धं किम्।

कामाक्षी — नहि नहि। कुत्र विनिश्चितं अस्ति।

भास्करः — मद्रपुर्यां। (मद्रासनगरे)

कामाक्षी — किं सा पदवीधरा।

भास्करः — हा सा गणितशास्त्रज्ञा। तत्रैव अशासकीय कर्मागारे कर्म करोति। तस्य मासिकवेतनं सहस्रद्वयमितिच प्रोक्तम्। सा तमिल मातृभाषिका।

कामाक्षी — त्रिपाठी महोदय औत्तराहो खलु।

भास्करः — हा नः औत्तराहः।

कामाक्षी — एकः उत्तरध्रुवीयः अपरः दक्षिणध्रुवीयः द्वयोर्मध्ये महदंतरं विद्यते विवाहः कथं भविष्यति।

भास्कर. — अधुना तादृश विभागः नहि। वयं भारतीयाः भारतीय संस्कृति प्रेमिणः। संस्कृतिज्ञाः। सर्वमपि भारतवर्षं एकमेव। विशिष्य ब्राह्मणाना संस्काराः आचारव्यवहारादयः एकसूत्रिताः भवन्ति। एतौद्वावपि ब्राह्मणौ।

कामाक्षी — अयं दक्षिणात्यः अय्यरमहोदयः त्रिपाठी औत्तराही कथं संबन्धः भविष्यति।

भास्करः — (उत्थाय) कामाक्षि त्वं अतीव पूर्वाचार परायिणी असि। श्रृणु भारतवर्षं आसेतुहिमाचलं सर्वे भारतीयाः एव। विशिष्य ब्राह्मणाना भावना वेदान्त सूत्रबद्धा। तस्मात् त्रिपाठीअय्यर महोदययोः समागमः शास्त्रबद्धएव।

कामाक्षी — गृहे ते विभिन्न भाषाः भाषन्ते। कथं हृदयाभिप्रायं अन्योन्यं ज्ञास्यन्ति।

भास्करः — हृदयभाव व्यक्तीकरणार्थं प्रथमतः दयार्द्रहृदयं विद्यते। द्वितीयं भारतीय संस्कृति भाषा संस्कृत भाषा विद्यते। तृतीयं प्रपञ्चभाषा आङ्ग्लभाषा विद्यते। *व्यवहारभाषा हिन्दी विद्यते। एतत् भिन्नं किमपेक्ष्यते कथय।*

कामाक्षी — अधुना भवतः हृदयं मम ज्ञातं आसीत्। एतादृश भावना परीतः भवान् स्वकुमार्याः विवाहकरणे विलम्बं कथं कृतवानसि। अहं बहुवारं कुमार्याः विवाहः करणीयः इति अवोचम् भवान् न श्रुतवानस्ति। एतादृशी भारतीय संस्कृति प्रेमिकः कुमार्याः विषये आस्था दर्शितवान् इति अहं कथयामि।

भास्करः — त्वदुदीरितं सत्यमेव किन्तु त्रिपाठी अतीव धनसंपन्नः। अपिच अस्मदीय पुत्री एम्. एस. सी. पठति इति निर्लक्ष्यमकरवम्।

कामाक्षी — पश्य एतावत्पर्यन्तं भवता न किमपि कृतम्। भवान् व्यवहारानभिज्ञः।

भास्करः — कामाक्षि विवाहविषये समानशीलता समान आहार व्यवहारः युक्तो भवति इति मे अभिप्रायः।

कामाक्षी — अधुनैव भवता प्रोक्तं खलु वयं भारतीयाः एक संस्कृति सूत्रबद्धाः इति।

भास्कर — तत् सत्यमेव। श्रीमतां न किमपि कष्टं भवति। सर्वमपि मध्यम कुटुम्बीकाना कठिनं भवति इति मया अवगतम्। तस्मात् अहं माध्यस्तमवलम्बितोस्मि श्रृणु।

विरोधे च विवाहेपि। स्नेहेच समता सदा।
पालनीयास्ति लोकेस्मिन्। सज्जनैस्संघवादिभिः।

अस्मदीय सुभाषिणी शतधा सुन्दरी तस्ये सुन्दरः कुमार द्रष्टव्यः विद्यते न तु अत्यन्त श्रीमान्।

कामाक्षी — त्वं सर्वदा एवमेव कथयसि।

भास्करः — कथने किं विद्यते। विवाहस्य समयः समासन्नः भवितव्य. विद्यते।

कामाक्षी — भवान् विचार्य सत्वर सुन्दर्याः परिणयं समाचरतु।

भास्करः — एषु दिवसेषु एषा य कामयते तेन साकं विवाहं कर्तुं अहं उद्युक्तः अस्मि। वरमार्गणं न योग्यं भवति।

कामाक्षी — मास भक्षणेनापि विवाहः निर्णीयते।

भास्करः — नहि। योग्येन येनकेनापि ब्राह्मण कुमारेण केवलम् सः यदि शाकाहारी भवति तदैव नोचेत् नहि।

कामाक्षी — असंस्कारेणापि।

भास्करः — तथा नहि यदि सः शाकाहारी भवति अपिच संस्कृति सम्पन्नः अपिच भारतीय परम्परा प्रेमिक. अधुनातन जीवने वसन्नपि प्राचीन मार्ग जीवन संलग्नः भवति तर्हि, तदैव सुन्दर्याः विवाहं करिष्यामि न त्वन्यथा।

कामाक्षी — वंशानुरोधेन गुणाः भवन्ति। वंशाचारः कुलाचारः नलक्तव्यः अस्ति।

भास्करः — तदेवाहमपि चिन्तयामि। (किञ्चित् विचार्य) हा सुन्दरी गृहेनास्ति किम्।

कामाक्षी—नास्ति, अद्य सा मित्रस्य जन्मदिवसार्थं मित्रगृह गतवती।

भास्कर: — कदा प्रत्यागमिष्यति।

कामाक्षी — सप्तघण्टावादन समये।

भास्कर — कामाक्षि, आधुनिका. युवका. संस्काररहीना: निर्गन्ध कुसुमा इव वर्तन्ते। समाजे सावधानतया व्यवहर्तव्या इति ता प्रति कथय।

कामाक्षी — अह उक्तवती। सा न एकाकी गता तस्याः सखीभिः ता। अत्र चिन्ता न कार्या।

भास्कर: — (उत्थाय) हञ्जे अद्य शाकपाकादिकं किं कृतम्।

कामाक्षी — वार्ताकशाक: सूप: पोळिका ओदन पायसान्नच कृतानि वर्तन्ते।

भास्कर — वार्ताकशाक:। अरे वा।

कामाक्षी — कदापि न भुक्त किं वार्ताकम्।

भास्कर — बहुवार भुक्तम्। तव किं ज्ञायते वार्ताकस्य स्वादुता।

कामाक्षी — नाह जाने वार्ताकस्य स्वादुताम्।

भास्कर — शृणु। वार्ताकस्य स्वादुता वृत्तमूले, वनितायाः स्वादुता ऊरमूलेच वर्तते इति रसिकाना समयः अस्ति।

कामाक्षी— (त्रपया हस्तेन मुखं पिधाय) भवान् वृद्धोऽपि कुमारायसे।

भास्कर — सर्वेऽपि वार्धक्ये कुमारायन्ते। चल अन्तः चल।

कामाक्षी — स्तव्ध निमेष पञ्चकम्।

भास्कर: — बुभुक्षा मा पीडयति। भोजनं देहि कामाक्षि घृतसूप समन्वितम्। (इति अन्तः गच्छति कामाक्षी अपि अन्तः गच्छति)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(सुन्दरी, वल्लरी, अनिलः, भार्गवी, अविनाश, प्रभृतयः कुर्चीपु उपविष्टाः। एकस्मिन् टेबुल्या केक् अपि च मेनवर्ती दीपिका. वर्तन्ते सर्वेऽपि उपविष्टाः सन्ति)

अविनाशः — अयि भो सुहृद अद्य मे पञ्चदशीय जन्मदिवसोत्सवे मम मैत्रिणी सुन्दरी गायनं करिष्यति। (सर्वेऽपि करतालध्वनिं कुर्वन्ति)

सुन्दरी — अरे अविनाश अत्र बह्वः सन्ति ते न गायन्ति किम् :

अविनाशः — अहं तव गान अभिलषामि।

सुन्दरी — *मया गातव्य किम् ?*

अविनाशः — त्व सुन्दरी खलु। तवागमनेन अद्य समारम्भः परिपुष्टि प्राप्तः। तव गानामृतेन सर्वत्रापि मरन्दसेचनं भविष्यति।

सर्वे — हा सत्यमेव सुन्दरी गायस्व भवती।

भार्गवी — बाले सुन्दरी मम पुत्रस्य जन्मदिवसि तव गायनमेव योग्य शोभामयच भवति इति सर्वेषा मतम्।

सुन्दरी — मातृसमाना भवती कथयसि, हा सत्य अवश्य अहं गास्यामि।

गीतम् (कल्याणी रागे)

तव जीवन सुखजीवनम्
भूयात् सदा कामितम्
शान्ति सुख पूरितम्
प्रेमभाव लता वेष्ठितम् ध्रु.

मित्र हृदय भावसून मण्डितम्
मधुर प्रेमरसाभि वर्धितम्
राजतेनरा शताब्दसोमितम्
वसतु भवान् मुदा निरामयम् १

सर्वं सुहृद मनोभिलाषितम्
शान्ति सौख्य विलासितम्
भवतु लोक सजीवनम्
लसतु जगति शरदा शतम् — २

भार्गवी — जाले सम्यक् गीत भवत्या। त्व सर्वथा सुन्दरी। (इति ता स्वीय हस्तेन मस्तक स्पृशति)

(अविनाश दीपिका मुखवातेन प्रशामयति सर्वेऽपि करताल ध्वनि कुर्वन्ति। अविनाश मुष्टिधारया केकु कटति एकैक केकु नीत्वा अविनाशाय यच्छति। अविनाश एक केकु खादति सर्वान् नेतु आदिशति। सर्वोऽपि केकु गृहीत्वा अरे अविनाश शरदा शत जीवतु भवान् इति आशीर्वादन् यच्छन्ति।

अविनाश — (सुन्दर्या समीप आगत्य) सुन्दरि त्व सत्यमेव गायनेऽपि सुन्दरा असि। तव गानेन मे जन्मदिवस परिपूर्णता गत। त्व आगत्य मे जन्म दिवस कार्यक्रम सौन्दर्यपूर्ण कृतासि।

सुन्दरी — अरे अविनाश, कृतार्थास्मि तव प्रशसया। मम जीवने अह ते अप्रिय न करिष्यामि। तव सन्तोष एव मे सन्तोष।

अनिल — अरे अविनाश शतसवत्सर दीर्घमायु भूयात् ते।

सुन्दरी — अरे अनिल त जन्मदिवस कदा।

अनिल — आवयो जन्मदिवस एकस्मिन् वर्षेमासे भविष्यति। (सर्वेऽपि हसन्ति)

सुन्दरी — हञ्जे वल्लरि किं ते पति एतावत्पर्यन्त नागत। अद्य आगमिष्यति वा न वा ?

वल्लरी — त्व गच्छ, अह आगच्छेयम् इत्युक्त तेन। नाह जाने कुतः न आगत।

अविनाश — कार्यान्तरे निमग्नेन भवितव्यम्। तस्मात् आगतु ना शक्नोत् इति मन्ये।

वल्लरी — हा तथैव सदृश्यते।

अविनाश — सुन्दरि त्वया कथं गम्यते गृहम्।

सुन्दरी — अहं वल्लरीच बसयानेन उत त्रिचक्र यानेन गच्छेव।

अविनाश — तथा मा गच्छ। युवां द्वावपि मम कार यानेन गच्छतम्। अधुना सप्तवण्टाऽभूत्।

सुन्दरी — अरे अविनाश त्वं सर्वदा मद्विषये अतीव श्रद्धालु भवसि।

अविनाश — सत्यं भवद्विषये मे अत्यन्त श्रद्धा विद्यते।

भार्गवी — वाले वल्लरी सुन्दर्यौ अधुना रजनी जाता भवत्यौ कारयानेन गच्छताम्। अस्यां रजन्या युवतीनां गमनं न समीचीनं भवति। अथ प्रदेशः सर्वथा दुष्टशक्तिभिः कलुषितः। (इति वल्लर्याः मुखेतिलकं निक्षिपति ताम्बूलं च ददाति अनन्तरं सुन्दर्याः फाले तिलकं निक्षिप्य तस्यै ताम्बूलं ददाति) हञ्जे सुन्दरि सत्वरं त्वं कल्याणवती भव। (इति आशीर्वादान् ददाति)

सुन्दरी — (लज्जा विनम्रा) वल्लरी एहि गच्छाव।

अविनाश — अरे सिंग्।

(ततः प्रविशति सिंग्)

सिंग् — अयमस्मि भो।

अविनाश — इमौ द्वे गृहं प्रापय कारयानेन।

सिंग् — बाढम्। (इति गच्छति)

सुन्दरी — नमनि भार्गवि अरे अविनाश शुभरात्रि। (इति हस्तमुद्रम्य गच्छतः)

अनिल — अरे अविनाश अहमपि ताभ्यां साकं गच्छेयम्।

अविनाश — अरे अधुना त्वं अत्वरः किम्। अधुना गृहं गत्वा किं करिष्यसि। उपविश किञ्चित्कालं अत्रैव इष्टगोष्ठिं कुरुव।

अनिल — अधुना मया गन्तव्यं वनिता कर्मणा।

अविनाशः — अत्र कुरु कविता। किञ्चित्कालं अत्रैव निवस लोकाभिरामायणं करिष्यावः।

अनिलः — हा वसेयम्। (इति कुर्च्यां उपविशति)

(यवनिका पतति)

*　*　*

तृतीयं दृश्यम्

(विश्वविद्यालयस्य पुरतः नारिकेळ वृक्षासमीपे अविनाशः अपिच सुन्दरी संभाषेते)

अविनाश. — हञ्जे सुन्दरि ह्यः तव गान अतीव सुन्दरं जातम्।

सुन्दरी — न कोऽपि विशेषः अस्ति रे ह्यस्तन गाने। मम तत् गानम् साधारण आसीत्।

अविनाश — नहि ह्य· तव कण्ठे कलकण्ठ काकलीध्वनिविशेषः परमभूत्।

सुन्दरी — (विहस्य) अरे तव जन्मविशेषः खलु तस्मात् तव तथा आभासे।

अविनाशः — हसे सुन्दरी तव गायने कापि अनिर्वचनीय भावना मन्द मन्द किमपि उत कमपि शोधयन्ती मार्गयन्ती च आसीत्।

सुन्दरी — त्वं तथा मनुषे किम्।

अविनाश· — सुन्दरि त्वं मे जीवन सर्वस्वमिव ह्यः अभासथाः।

सुन्दरी — त्वमपि ह्यः नवमन्मथः इव दृष्टोऽसि।

अविनाशः — अह त्वा परिणेतु इच्छामि सुन्दरि का ते भावना।

सुन्दरी — (लज्जया) अरे अविनाश, किं वदसि रे त्वम्।

अविनाश — हसे त्वया साक भाषितु तव गान श्रोतु अह मे जन्म॰ दिवस अस्मिन् वर्षे व्यरचयम्।

सुन्दरी — ते प्रमभावना परम स्तवनीया भवति।

अविनाश — पुरुष प्रकृति विलसितोऽय प्रपञ्च। आवयो समागम' गङ्गा सागर सगम सदृश।

सुन्दरी — अरे अहमपि त्वयि लग्नमानसा सजाता।

अविनाश — त्वामह नित्य पुष्पशय्यायां शाययित्वा सौख्योदधि तारयेयम्।

सुन्दरी — अरे त्व अतीव रसिक। तव सगमेन अह मा धन्य मन्ये। त्व एतादृश भावना भूषित इति अधुना अवगत मया।

अविनाश — यत्र मन रमते तत्र सगम सम्यच सौख्य भजते।

सुन्दरी — तत्र परिणय सुखावसन भविष्यति।

अविनाश — साधु प्रतिपादित भवत्या।

सुन्दरी — अह सर्वं विचार्य कथयामि।

अविनाश — मम जननी त्वा विलोक्य केयं युवती मूर्तीभूत रतिरिव प्रतिभाति, ता द्रष्टु पुन पुन मे मन काङ्क्षते इति उक्तवती।

सुन्दरी — अह त्वा कथयामि। अह मम पितरौ मे निर्णय उक्त्वा भवन्त कथयिष्यामि।

अविनाश — यदि आवयो अङ्गीकार भवति तर्हि पितरौ अवश्य आवयो कृतिमङ्गीकरिष्यत।

सुन्दरी — प्रथमत पितरौ निवेद्य अनन्तर कथयेयम्। एतत् मम कर्तव्य विद्यते।

अविनाश — अह तव सस्कारेण अतीव सतुष्टोस्मि।

सुन्दरी — अविनाश अधुना मम वर्ग प्रचलिष्यति गच्छेयम्।

अविनाश — पुन समागम कदा।

सुन्दरी — पित्रो अङ्गीकारानन्तर समागम भविष्यति। नमस्ते।

अविनाश — ममापि वर्ग नियते अहमपि गच्छेयम्। शृणु अत्र वृक्षच्छाया यामेव आवयो समागम सर्वदा भविता नमस्ते।

सुन्दरी — नमस्त। (इति निगच्छत)

(यवनिका पतति)

* * *

चतुर्थ दृश्यम्

(सध्यासमये सुन्दरी स्कन्धेलम्बमान पुस्तकगाण्या गृह गच्छन्ती आस्ते तस्या अभिमुख अनिल आगच्छति)

अनिल — (विलोक्य) सुन्दरि!

सुन्दरी — अरे अनिल अह त्वामुद्दिश्य चिन्तयामि।

अनिल — मामुद्दिश्य चिन्तयसि कारण किम्।

सुन्दरी — अय सन्ध्यासमय गृहगमनवेला अवश्य आवयो मेलन भविष्यति अत्र इति।

अनिल — सुन्दरि अविनाशस्य जन्मदिवसे त्वया गीत गान श्रुत्वा मे परमानन्द अभूत्। तस्मिन् समये त्वया भाषितु उद्युक्तोऽभवम्। किन्तु पार्श्वे वहरी विद्यते तस्मात् न किमपि भाषितोऽस्मि।

सुन्दरी — मयापि चिन्तित त्वमपि अविनाशस्य काव्याने आनाभ्या साक आगमिष्यसीति, किञ्चित् सल्लाप करिष्यतीति।

अनिल — अविनाश अवोचत् अरे त्व अत्रैव तिष्ठ किञ्चित्काल इष्टगोष्ठि कुर्याव इति।

सुन्दरी — एव जात। भवतु नाम।

अनिल — सुन्दरि त्व मे हृदयसुन्दरी। त्व मे हृदये सदा निवससि। अत्र कथ त्व वहि समागता नाह जाने।

सुन्दरी — आहह। कि वदसि रे। त्व सत्य कविकुमार।

अनिल — अह कविकुमार एव। त्वामुद्दिश्य बहुगीतानि लिखितानि।

सुन्दरी — गायत श्रोष्यामि। इति भूम्या उपविशति)

अनिल — शृणु। (इति भूमौ उपविश्य गायति)

गीतम् (भीमपलास रागे)

पठरे मनमोहन तरुणीकाव्यप्रपञ्चम्
अनुभव नित्य रतिपतिभावनिकुञ्जम् ध्रु

मन्मथ भावातप सान्द्र वितानम्
धरणीतल विचकित मरीचीजालम्
दर्शं दर्शं मे कामुक रागमय चपलम्
धावति सारङगयित हृदय तृष्णाकुलितम् १

किमिद चित्र किमिद हृदयम्
केवल युवती सङगम चतुरम्
तरुणी हृदयाम्बर विहरित चन्द्रमसम्
जरा स्वर्भानुर्ग्रसति यदावा सम्पूर्णम् २

पिव रे मन रमणी मधुराधरसारम्
भज रे मन यौवत लास्याञ्चितरूपम्
स्मर रे मन परमानन्दावधिभूत मणितम्
जप रे मन सुखकेन्द्रीभूत यौवत निचयम् ३

एषा स्मर सङ्गर भौतिक भावना
अलौकिक मार्गण नान्दी स्मरणा
तरुणी स्तनभार पीवर नृपभाकामी
नूनं भवति च चरमे मोक्षदशागामी ४

सुन्दरी — अनिल सम्यक् कृतं गेय अपिच अनुरुप रागेण च गीतम्।

अनिलः — सुन्दरि, केवल मंलापेन प्रयोजनं न विद्यते त्वया सार्थं अहं जीवनं यापयितुमिच्छामि।

सुन्दरी — कथम्।

अनिलः — कथं किम्। विवाहेन।

सुन्दरी — अरे त्वं श्रीमान् असि। बह्व्व ते परिणेयाः विद्यन्ते। अह किमर्थम्।

अनिलः — यत् अह त्वयि पश्यामि तत् अन्यत्र न विद्यते। त्व सर्व सुगुणराशिः असि।

सुन्दरी — अरे त्वं कवयसि। अतिशयोक्ति करोपि। सर्वोपि सर्वं भजते। सर्वमपि सर्वत्र विद्यते।

अनिलः — तथा मे न प्रतिभाति। यत् त्वयि अहं पश्यामि तत् अन्यत्र नास्ति।

सुन्दरी — अहमपि सर्वदा त्वामुद्दिश्य चिन्तयामि।

अनिलः — अहं त्वया सार्थं भाषितुमुद्युक्तोऽस्मि बहुवारं किन्तु समयः न समापन्नः।

सुन्दरी — अधुना समयः समापन्नः। (इति हसति)

अनिलः — सुन्दरि ते हसने अहं पुष्पगुच्छान् फेनिलंच अपिच चन्द्रिकांच विलोकयामि।

सुन्दरी — अरे। (इति अनिलं पश्यति लज्जा मन्थराभाति)

अनिल — सुन्दरि, लज्जाया त्व अतीव सुन्दरी भाससे। नारीणा भूषण लज्जा इति प्रोक्त पूवसूरिभि ।

सुन्दरी — विलम्ब सजात गच्छयमहम ।

अनिल — एहि मम कारुयाने अह त्वा गृहे विसृजेयम

सुन्दरी — नहि रे अह वमयानेन गच्छयम् ।

अनिल — पुन ह्य समागम अत्रैव भविष्यति नमस्ते। (इति गच्छति)

सुन्दरी — नमस्ते। (इति गच्छति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(वल्लर्या गृह तत्र अनिलस्य माता मैथिलो, वल्लर्या सार्थं उपविश्य सलपन्तो आस्ते)

मैथिली — वल्लरि अनिल सदा त्वामुद्दिश्य ते मैत्रिणी सुन्दरीमुद्दिश्य मे कथयति ।

वल्लरी — वय सर्वे एक कक्ष्या विद्यार्थिन । तत सा एव कथयति ।

मैथिली — सदा सुन्दरी उद्दिश्य मे कथयति यत् तादृशी युवती विश्वविद्यालय न कुत्रापि सदृश्यते इति ।

वल्लरी — अनिल यत कथयति तत् सत्यम । सा अतीव सुन्दरी ।

मैथिली — एतावत्पयन्त तस्या विवाह न कृत कारण किम ।

वल्लरी — मात मैथिलि, भवती कथयसि, सा अतीव सुन्दरीति तव पुत्र सर्वदा तस्या सौन्दर्यं वर्णयित्वा कथयतीति तत्या अनुरूप वर लभ्य यदि भविष्यति तर्हि अवश्य विवाह भविष्यत्येव ।

मैथिली — तस्या पितरौ न प्रयतेते किम्।

वल्लरी — प्रयततै किन्तु तयो पित्रा सुन्दर्या विवाहविषये न किमपि आग्रह विद्यते। यदि कन्यावरयो अङ्गीकार भवति तर्हि तयो इच्छानुसार तौ दम्पती सुन्दर्या विवाह करिष्यत इति एकदा तस्या पितरौ अवोचताम्।

मैथिली — आधुनिकेषु दिवसेषु तथा करणमेव वर भवति।

वल्लरी — उपविश अहमधुनैव चहपानादिक आनयेयम्।

मैथिली — अह करिष्यामि चहा आवा स्वयपाक गृह प्रविशाव एहि। (इति उत्तिष्ठत)

(कवाट ताडनम् आह्वानघण्टानादौच भवत) वल्लरि त्व स्वयपाक गृह प्रविश। अह कवाटमुद्घाटयिष्यामि। (इति कवाट उद्घाटयति)

(तत प्रविशति सुन्दरी)

सुन्दरी — नमस्त इति। (मैथिल्यै नमस्करोति) नमस्ते वल्लरि। (इति वल्ल्यै नमस्करोति)

वल्लरी — (सन्तोषेण) हसे सुन्दरि हठात् त्व कथमागतासि अत्र। (इति तस्या हस्ते गृह्णाति)

सुन्दरी — (विहस्य) हठात् कि यस्मिन् कस्मिन् समये यदा कदापि विना च ते आज्ञा अह तव गृह आगन्तु योग्याऽस्मि।

वल्लरी — अवश्य मम गृहद्वाराणि त्वत्कृत सर्वदा विवृतान्येव।

सुन्दरी — का विशेष । अपि कुशलम्।

वल्लरी — न कापि विशेष । सर्व सकुशलमेव।

सुन्दरी — एषा द्वारकवाटोऽद्घाटिता का ?

वल्लरी — एषा अनिलस्य माता मैथिली।

सुन्दरी — (आश्चर्येण) अहो अनिलस्य माता। नमामि मात । (इति नमस्करोति)

मैथिली — शीघ्रमेव कल्याण प्राप्तिरस्तु।

सुन्दरी — (अधोमुखी तिष्ठति)

वल्लरी — सुन्दरि अन्त एहि। अद्य मैथिलीमाता चहादिक करिष्यति।

सुन्दरी — अद्य मातु हस्तकृतचहा पास्याव ।

मैथिली — युवा द्वे अत्रैवोपविशताम्। अह चहा कृत्वा आनयेयम्।

वल्लरी — मात भवती अपिच सुन्दरी युवा द्वे सल्पन्त्यौ अत्रैवोपविशताम्। अह पञ्चनिमेषे चहा विधाय आनयेयम्।

मैथिली — तथैव। (इति तत्रैव सोफाया उपविशति)

वल्लरी — सुन्दरि, मैथिलीसाका सल्पन्ती उपविश। अह अधुनैव गच्छेयम्।

सुन्दरी — गच्छ तथैव। (इति मैथिल्या सकाशे सोफाया उपविशति)

मैथिली — बाले तव वय कियत्।

सुन्दरी — मम वय विंशति।

मैथिली — तव पिता कि करोति।

सुन्दरी — मम पिता विधितज्ञ ।

मैथिली — हा अनिलेन कथितम्। तव पितु नाम भास्कर इति। अह विस्मृतास्मि।

सुन्दरी — अनिल मे मित्रम्।

मैथिली — अस्मिन् वत्सरे अनिलस्य विवाह कर्तव्य इति मे चिन्ता।

सुन्दरी — अवश्य करणीया। अधुना अस्मिन् वत्सरे अनिलपिता पदवा निवृत्त । अधुना करण अवश्यमेव।

मैथिली — अनुरूपा युवती अपश्यते। सा सर्वथा दक्षतायुता भवितव्या। तस्मात् तस्य पिता अनुरूप वन्वे मार्गयति।

सुन्दरी — न कोपि क्लेशः विद्यते अनुरूपवधूप्राप्ति विषये। अनिल सज्जन मेधावी श्रीमान् सुन्दर. कवि. गायकश्च नात्र चिन्ताकार्या भवत्या।

मैथिली — सर्वदा गृहे अनिल. त्वामुद्दिश्य कथयति।

सुन्दरी — अय कविकुमार:।

मैथिली — गृहे सर्वदा कविता कुर्वन् गायति। न किमपि पठति।

सुन्दरी — तस्य कवित्व मह्यं अत्यन्त रोचते। एम् एस् सी विद्यार्थिना कविताभिलाषा.विद्यते इत्यत्र प्रश्नःतोयोय विषय।।

वल्लरी — मातः मैथिलि, सखि सुन्दरि इदं पिष्टकं इदं चहपानं।
(इति तत्र निक्षिप्य सापि उपविशति)

मैथिली — (एक पिष्टक गृहीत्वा चहाया मज्जयित्वा खादति सर्वा अपि तथैव कुर्वन्ति)

सुन्दरी — असे वल्लरि तव पति कदा शार्यालयात् आगमिष्यति।

वल्लरी — सः षट्घण्टावादन समये आगमिष्यति।

सुन्दरी — अधुना पञ्चघण्टा जाता।

मैथिली — वल्लरि, अनिल. आगमिष्यति अपि च अनिलस्य पिता एकः एव गृहे विद्यते। ममात्रगत्य बहुकाल व्यतीत.। सन्ध्यासमये गमन सुकर न भवति। रस्त्याया सवत्र वाहनसकुलमेव भवति। मार्गेषु चलनं तरणं अतीव कष्ट भवति।

सुन्दरी — किं वसयानेन गम्यते।

मैथिली — नहि त्रिचक्रयानेन गम्यते। सन्ध्यासमये वसस्थानके जनसमर्दः अधिक भवति।

वल्लरी — यदि त्रिचक्रयानेन गम्यते अधुना गमन किमर्थं अर्धघण्टानन्तर गच्छ

मैथिली — नहि अधुना गन्तव्यमेव। अनिलस्य पिता मह्य कुप्यति गच्छेयम्। (इति उत्तिष्ठति)

वल्लरी — तिष्ठ मात तिलक करिष्ये। (इति अन्त गच्छति)

सुन्दरी — मात. एकदा मम गृहमपि आगच्छतु भवती।

मैथिली — अधुना परिचय जात भवती दृष्टा अस्मि। गृह अवश्य आगच्छेय कुशल प्रष्टुम्। त्वमेव अस्मत् गेह एहि।

सुन्दरी — अवश्य अनिलेनसार्थं आगच्छेयम्।

वल्लरी — (कुङ्कुम भरणीहस्ता आगत्य) मातः तिष्ठ। (इति तस्या फाले कुङ्कुमतिलक करोति कदलीफलयुक्त क्रमुकचूर्णमिश्रित ताम्बूल तस्याः हस्ताञ्जल्या निक्षिपति सुन्दर्या. फाले तिलक करोति)

मैथिली — वल्लरि, सुन्दरि गच्छाम्यह पुन दर्शनाय। (इति गच्छति)

वल्लरी सुन्दर्यौ — नमस्ते मात। (इति नमस्कुरुतः)

(वल्लरीसुन्दर्यौ उपविष्ठे सोफाया)

वल्लरी — सखि सुन्दरि, कथय त्व, कथ किं कथयित् किं साधयितु आगतासि।

सुन्दरी—सखि अह त्वा एक प्रश्न प्रक्ष्यामि तस्य प्रश्नस्य उत्तर देहि।

वल्लरी — क ते प्रश्नः। का ते भावना। नाह सक्षमा भवामि ते प्रत्युत्तर दातुम।

सुन्दरी — त्व ते अभिप्राय कथय तदेवाल मे।

वल्लरी — किं तत् कथय।

सुन्दरी — एतत् विषय कुत्रापि मा भण।

वल्लरी — सखि त्व मे प्राणा। अह कुत्रापि कस्यापि न कथयेयम्।

सुन्दरी — अविनाश मा कामयते।

वल्लरी — तदह जानामि।

सुन्दरी — कथम्।

वल्लरी — जन्मदिनससमारम्भे आवां प्रेषयितुं काश्यानं प्रेषयामास। तदा ज्ञातं मे सः त्वयि लग्नचित्तः इति।

सुन्दरी — त्वं अतीव कुशाग्रबुद्धिः।

वल्लरी — किं त्वं कामयसे तम्।

सुन्दरी — हा अहमपि तं कामये।

वल्लरी — तर्हि तदा काहं युवयोर्मध्ये। तव प्रश्नाना मम उत्तरयितुं अवकाशोनास्ति।

सुन्दरी — तथा नहि। अत्र विद्यते अन्यः प्रश्नः।

वल्लरी — कोऽयं प्रश्नः।

सुन्दरी — अनिलः अपि मा कामयते।

वल्लरी — किं ते तस्मिन् अनुरागः वर्तते।

सुन्दरी — विद्यते। एतौ द्वौ आवयोः मित्रे।

वल्लरी — अस्मिन् विषये अत्र मा प्रष्टुं अवसरो नास्ति। तव इच्छानुसारं त्वं व्यवहरस्व।

सुन्दरी — वल्लरि, अत्र विद्यते किमपि रहस्यम्।

वल्लरी — किं तत्।

सुन्दरी — तौ द्वौ मनसा मा कामयेते वा उतनवा इति मे संशयः।

वल्लरी — अयं विचारणीयः प्रश्नः।

सुन्दरी — कः मा अतीव कामयते इति ज्ञातुं मे कुतूहलं भवति। अस्मिन् विषये अधुना मया किं कर्तव्यं विद्यते इति आलोचना भवति।

वल्लरी — सुन्दरि ! काहं निर्णेतुं युवयोर्मध्ये संजातं विषयम्।

सुन्दरी — जानामि तयोः कामना। केवलं कृत्रिम भावपूर्णा उत प्रेमपरीतावा इति नाहं ज्ञातुं समर्थः भवामि।

वल्लरी — त्वं कं कामयसे।

सुन्दरी — तौ द्वावपि समानौ। अहं द्वावपि कामये।

वल्लरी — कथं द्वावपि कामयसे।

सुन्दरी — तस्मादेव द्वैधीभावमना समस्या परिष्कारार्थं तव गृहं आगतास्मि।

वल्लरी — अहं किं कुर्याम्।

सुन्दरी — एना समस्या शिथिलयितुं त्वमेव शक्तासि इति मे मतिः।

वल्लरी — विचार्यमाणे मे कोप्युपायः न भवति।

सुन्दरी — असे वल्लरि त्वं अनुभवज्ञा विचारशीला त्वं कमप्युपायं सूचयिष्यसीति त्वत्सकाशं समागतास्मि।

वल्लरी — (किञ्चित्कालं शान्तमना· भूत्वा एकान्ते उपविश्य चिन्तयामि।

सुन्दरी — (*इतस्तत· चलन्ती विचिन्तयन्ती आस्ते*)

वल्लरी — सखि सुन्दरि मे एका भावना मेधसि विद्युतायते।

सुन्दरी — (तस्या· सकाशं आगत्य) का सा भावना।

वल्लरी — शृणु नाटक कुर्याव आवाम्।

सुन्दरी — किं तन्नाटकम्।

वल्लरी — त्वं समय परिकल्प्य एकेकमुद्दिश्य एवं कथय।

सुन्दरी — किमिति।

वल्लरी — त्वं अन्तर्वत्नी संजाता इति।

सुन्दरी — अहो किं वदसि त्वम्। इयं भावना त्वया प्राप्ता किम्?

वल्लरी — एतत् नाटकमेव।

सुन्दरी — (वल्लरीं हस्ते गृहीत्वा) अहो अहं कथं कथयेयम्।

वल्लरी — धैर्यमवलम्ब्य कथय।

सुन्दरी — तदा किं भविष्यति।

वल्लरी — अविनाशः चिन्तयिष्यति अनिलेनसार्यं त्वं अन्तर्वत्नी जाता इति।

सुन्दरी — ततः।

वल्लरी — अनिलेनापि एवमेव कथय। सः चिन्तयिष्यति अविनाशेन त्वं अन्तर्वत्नी जाता इति।

सुन्दरी — कथं नटनीयम्। अहं नटी नहि। (इति भीता भवति)

वल्लरी — त्वं नटनं कुरु यथा कथचित्। अन्ततः सर्वं तव इच्छानुसारं भविष्यति।

सुन्दरी — नटनानन्तरं किं कर्तव्यम्।

वल्लरी — नटनानन्तरं तयोः भावनाः तयोः ललाट भागयो. पठ।

सुन्दरी — प्रथमतः अनिलं विचारयिष्यामि।

वल्लरी — प्रथमतः अनिलमेव विचारय।

सुन्दरी — प्रथमतः अनिलं विचार्य तस्याभिप्रायं ज्ञात्वा अनन्तरं अविनाशं विचारयेयम्।

वल्लरी — अन्ततः यदि द्वयोर्मध्ये कलहः नोचेत् कोवा त्वां परिग्रहिष्यति, कोवा त्वां हृदयपूर्वकं कामयते ज्ञास्यति।

सुन्दरी — कलहो मा भूयात्।

वल्लरी — कलहः नहि।

सुन्दरी — अथ कलहः एव।

वल्लरी — प्रेमपरीक्षार्थं कलहः भवितव्यः एव।

सुन्दरी — प्रेमपरीक्षा कर्तव्या किं मया।

वल्लरी — प्रेममार्गः प्रथमतः कण्टकावृतः इव भाषते। यदि सः हरितः पल्लवितः पुष्पितः फलितः भवति तदा अनुभुज्यते।

सुन्दरी — सखि वल्लरि ते भावना अतीव प्रशसनीया। श्व एव अह नाटक रचययम्।

वल्लरी — सखि त्व प्रमपरीक्षाया उत्तीर्णा भविष्यसि।

सुन्दरी — धन्यवादान वितरामि तुभ्यम्। (द्वावप्युद्धाय परस्पर हस्तावबलम्ब्य तिष्ठत। सुन्दरी गच्छन्ती) नमस्ते। (इति नमस्करोति)

वल्लरी — मनोरथसिद्धिरस्तु। (इति हस्तमुच्चम्य ता प्रपयति)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(विश्वविद्यालयस्योऽद्यानवन तत्र सुन्दरी अनिलयो समागम।)

सुन्दरी — अरे अनिल किं मा अदृष्ट्वैव गच्छसि।

अनिल — अह अदृष्टवा न गच्छामि दृष्टवैव गच्छामि।

सुन्दरी — तथा किमर्थं गच्छसि रे।

अनिल — यदि त्व मा कामयसवा नवा जातु तथा अकरवम्।

सुन्दरी — अर त्व मा परीक्षस

अनिल — परीक्षा नहि। विडम्बना करोमि।

सुन्दरी — इय विडम्बना।

अनिल — सुन्दरि एहि अत्र आवा किञ्चित्काल उपविशाव। (इति उपविशत)

सुन्दरी — अर त्व कि प्रष्टुमिच्छसि मा।

अनिलः — किं सुन्दरि, आवयोः विवाहः भविष्यति। उत न भविष्यति कथय।

सुन्दरी — यदि मनोनिश्चयः भवति तर्हि विवाहः भविष्यति।

अनिलः — अस्मिन् वर्षे निश्चित्य विवाहः कर्तव्यः एव।

सुन्दरी — त्वं मा कामयसे किम्।

अनिलः — कामयामि।

सुन्दरी — तर्हि विवाहसमयः निर्णीतव्यः।

अनिलः — यदि त्वं हा इति कथयसि तूर्णमेव विवाहः भविष्यति।

सुन्दरी — सत्वरं विवाहकरणे मनः मां प्रचोदयति।

अनिलः — त्वमेव कथय कदा विवाहः निर्णेतव्यः।

सुन्दरी — शृणु। अनुपदमेव कार्यमग्नो भव।

अनिलः — कथय श्रोष्यामि।

सुन्दरी — अहं अधुना अन्तर्वत्नी जाता।

अनिलः — (आश्चर्येण) अहो भगवन्। सुन्दरी सत्यमेव अन्तर्वत्नी जातासि।

सुन्दरी — अहं सत्यमेव अन्तर्वत्नी जाता। मां वैद्यसकाशं नीत्वा परीक्षां कारय। यदि त्वं मां सत्यं इच्छसि तर्हि अनुपदमेव पाणिग्रहणं कुरु। अहं अधुना त्वया साकं विवाहितुं उद्युक्तास्मि।

अनिलः — (हस्तवस्त्रखण्डं गृहीत्वा मुखे तारकित घर्मबिन्दून् मार्जयति)

सुन्दरी — अरे त्वं किमर्थं कम्पसे। किं त्वं भीतोऽसि।

अनिलः — नहि।

सुन्दरी — किं विचारयसि।

अनिलः — नहि विचारयामि।

सुन्दरी — सत्वरं त्वं किमपि कुरु विवाहार्थम्।

अनिल — मम किञ्चित् कालं समयं देहि। अहं मे पितरौ कथयित्वा ताभ्यां विचार्य श्वः कथयेयम्। अधुना मे सत्वरं गन्तव्यं विद्यते कार्यान्तरसमापनाय।

सुन्दरी — अद्य विद्यालयं नो गच्छसि।

अनिल — अद्य मे विद्यालयस्य विरामः भवति।

सुन्दरी — किमर्थम्।

अनिल — अद्य मे शरीरे प्रातः प्रभृति तीव्रज्वरः अस्ति।

सुन्दरी — अरे अनिल त्वं मां मनसा कामयसे खलु।

अनिल — अकामयम्।

सुन्दरी — अधुना।

अनिल — अधुनापि कामये। नमस्ते अहं गच्छेयम्। (इति गच्छन् एकं क्षणं स्थित्वा मनसि) एषा अविनाशेन सार्धं विचरति। सत्यमेव तेन साकं एषा अन्तर्वत्नी जाता। अधुना एषा पुंश्चली जाता। मां परिणेतुमिच्छसि। नाहं कामये एनाम्। (इति गच्छति)

सुन्दरी — अयं कामुकः। मां अनुभवितुं मह्यं स्निह्यति। मयि तस्य न लेशोपि प्रेमभावना विद्यते। आधुनिकाः युवकाः स्त्रीमानं नाशयितुं अग्रेसराः किन्तु विवाहकरणे अन्तिमाः भवन्ति संशयग्रस्ताः भवन्ति। अहं अविनाशं समीपं गत्वा तेन साकं एवमेव व्यवहरिष्ये। (इति गच्छति)

(यवनिका पतति)

* * *

सप्तमं दृश्यम्

(विश्वविद्यालयस्य समीपं नारिकेळ वृक्षच्छायायां सुन्दरी अविनाशौ सल्पन्तौ आस्ताम्)

अविनाश — अहं त्वां मनसा कामये इति कथनं पुनरुक्तिः भवति)

सुन्दरी — त्वा वहुकालदारभ्य अहं कामयमाना अस्मि। किन्तु मे भावना न प्रकटी कृतास्मि।

अविनाशः — सर्वस्यापि समयः भवति।

सुन्दरी — अरे अविनाश, त्व मदपेक्ष्या श्रीमान् विद्यादिकः सकल गुणोपेतः।

अविनाश — तथा कथने त्वं त्वा न्यूनीकरोषि।

सुन्दरी — इदं आत्मान न्यूनीकरण नहि। किन्तु अय विनयवतोना लक्षणम्।

अविनाशः — जगति सर्वे समानाः सन्ति। न कोपि न्यूनः न कोप्यधिकः। आत्मान न्यूनीकरण अपिच अधिककरण न युक्त प्रज्ञावताम्।

सुन्दरी — सत्यमेव तादृशा भूतले विरला. सन्ति। त्वं तु मा न्यूमी करोषि।

अविनाश. — त्वा न्यूनीकरणे को लाभ. भवति मे। त्व तु मे प्रेयसी।

सुन्दरी — पुरुषाणा प्रेम चञ्चल भवति।

अविनाश —तथा मावद सुन्दरि। अयं अविनाशः विचार्यकर्म करोति।

सुन्दरी — अहंमद्विषयमुद्दिश्य किञ्चित् वक्तु कामये।

अविनाश. — कथय।

सुन्दरी — मे भीतिः भवति त्रपाच सजायते।

अविनाश· — मम सकाशे भीत्या. स्थानं नास्ति। त्रपाकुतः अह ते मित्रम्। कथय यथेच्छं। मत्सकाशे गोपनस्यापि स्थान नास्ति।

सुन्दरी — अविनाश अहं गुर्विणी संजाता।

अविनाश. — (साश्चर्यम्) कथम्। केन।

सुन्दरी — परपुरुष सपर्केण।

अविनाश — किं अनिल सपर्केण।

सुन्दरी — नहि।

अविनाश — त्व मा विचारय। कन्यका जीवने अनालोच्य त्वरया कामावेशन अकार्यं कुर्वन्ति। तत्र क्रोधो न कर्तव्य। तत विषयमुद्दिश्य न स्मर्तव्यम विद्यते। अहं त्वा सवदा कामयामि, यदि त्व सत्य अन्तवत्नी उत मा परीक्षितु नाटक करोषि त विषय नाह विचारयामि। अह त्वा सम्यक् जानामि त्व कदापि वक्रमागगामिनी न भविष्यसि। इद सर्व नाटकनेव। भवतु नाम सत्य तथापि मे बाधा नास्ति। त्वामह कामय। त्व मे हृदय सुन्दरी असि। त्वमेव मे जीवन सहभागिनी असि।

सुन्दरी — अविनाश अस्या दशाया त्व मा परिणयिष्यसि।

अविनाश — हा परिणष्यामि। मम प्रम निश्चल पवित्र नात्र शङ्का कार्या।

सुन्दरी — अविनाश त्व मे प्रिय। अह ते प्रिया। त्व मे सत्य कामयसि। त्व धीरोदात्तोऽसि। पूर्वापर विचक्षणा ज्ञानी असि। (इति आनन्देन तस्य समीप गच्छति)

अविनाश — एहि सुन्दरि, त्व मे प्रयसी।

सुन्दरी — अविनाश, इद सर्व नाटकमिति त्व जानासि। अनिल मा अवगाहयितु अनभिज्ञ बभूव।

अविनाश — स चञ्चलमनस्क। उद्वगपूरितश्च।

सुन्दरी — यदाह अवोचम् अन्तर्वत्नीति स कम्पित बभूव। मया साक भाषण अकृत्वैव निगत।

अविनाश — भवादृशी कथ वक्रमार्गे चरिष्यति।

सुन्दरी — मे पितरौ मा अवोचताम् बाले त्व य कामयसे तेन साक ते विवाह भविष्यति।

अविनाश — असस्कारयुतनापि।

सुन्दरी — तथा नहि । यः संस्कारवान् प्राच्यसंस्कृतिप्रेमी शाकाहारी भवति तेन साकं भविष्यतीति एकदा उक्तवान् ।

अविनाशः — पित्रोः भावना अतीव कालानुयायिनी अस्ति ।

सुन्दरी — अरे अविनाश गच्छावः श्व एव आवयोः बाह्यविवाहः ।

अविनाशः — का ते भावना ! बाह्यविवाहः इति कथयसि ।

सुन्दरी — अरे आवां परस्परं मनोभ्यां परिणीतौ अर्थात् आन्तरङ्गिक विवाह पूर्वमेव समजनि । अधुना लोके दर्शयितुं बाह्यविवाहः कर्तव्यः इति मे अभिप्रायः ।

अविनाशः — प्रेयसी ते भावना अतीव आदर्शं प्राया स्त्रीजगति । पूर्वं उमा तपसा शङ्कर क्रीता आसीत् ।

सुन्दरी — अधुना त्वं मां परीक्ष्य मनसा गृहीतोऽसि ।

अविनाशः — त्वमेव मां परीक्ष्य मनसा गृहीतवती असि । त्वं प्रेमपरीक्षा कृतवती असि ।

सुन्दरी — (विहस्य) अरे आवां अन्योन्यार्थं भगवता सृष्टौ एहि गच्छावः पितृभ्यां निवेदयाव. । एहि । (इति हस्तावबलम्ब्य गच्छतः)

(यवनिका पतति)



॥ परिणीता ॥

(ततः प्रविशतः यवनिका पुरतः व्यवस्थापक दर्शकौ)

व्यवस्थापकः — (ध्वनियन्त्र हस्ते गृहीत्वा) तत्र भवन्त· सामाजिकाः श्रृण्वन्तु भवन्तः। अद्य वयं परिणीता इति नामक नाटक प्रदर्शयितुं अतीव उत्साहिनः अभवाम। अहं अस्य नाटकस्य निर्माता। अय अस्य नाटकस्य दर्शक·। अय एतन्नाटकमुद्दिश्य कतिचित् परिचय वाक्यानि दास्यति। (इति ध्वनियन्त्रं तस्य पुरत· निक्षिपति)

दर्शकः — अयि भो. सामाजिकाः एतन्नाटक गीर्वाणान्ध्र भाषाप्रवीणेन पडित ओगेटि परीक्षित शर्मणा विलिखितम्। अयं विंशतितम शताब्दे सुप्रसिद्ध संस्कृतकविः। अनेन अनेकानि काव्यानि विलिखितानि। एतन्नाटक अनेन विलिखित सामाजिक नाटकेषु एकं वर्तते। अस्मिन् नाटके वरशुल्केन विना नायिका राधा परीणिता आसीत्। तत् कथं बभूव भवन्त प्रत्यक्षं अधुना पश्यन्तु। धन्यवादाः। (इति द्वावपि अन्त· गच्छतः)

(यवनिका अपसार्यते)

(रङ्गमञ्चे एकस्मिन् पार्श्वे टेबुलोपरि पुस्तकानि निक्षिप्तानि। एकत्र शयन कुर्चिका। तस्याभिमुख उपवेष्टु सोफादिकं वर्तते।)

(तत· प्रविशति कौटुम्बिक. गिरिधरलाल.)

गिरिधर· — "चक्रार पङ्क्तिरिव गच्छति भाग्यपङ्क्तिः" हा सम्यगुक्तं भास महाकविना। (इति शयन कुर्चिकाया उपविशति। आत्मगतम्) समाजे सर्वदा स्थिति परिवर्तिनी भवति। अधुनातन दिवसेषु दैनदिनकार्यक्रमकरणे जना· बहु श्रान्ताः भवन्ति। चहपानादिकं करणानुपदयेन कार्यालयगमन गृहेपि कार्यालयचिन्ता किं जीवितमेतत्। दैनदिनकार्यं कार काल मे चित्त शरीर च बहु खिन्नं श्रमया च विदारित आसीत्।

राधा — (चहामानीय पार्श्वे टेबुलोपरि निक्षिपति) अयि भोः कार्यालयवेला भवति सत्वर चहापानादिकं कृत्वा स्नात्वा कार्यालयं गच्छतु । किमर्थं उपविष्टाः । चहा सत्वरं पिबतु, नोचेत् शीतल भविष्यति ।

गिरिधर — राधे अद्य वृत्तपत्रं आगत किम् ।

राधा — आगतम् ।

गिरिधर — तर्हि आनीय मह्यं देहि ।

राधा — वृत्तपत्रमपि मया दातव्य किम् ? (इति मुखं वक्रितं विधाय वृत्तपत्र आनीय तस्मै ददाति)

गिरिधर — किं रुष्टासि ?

राधा — हसितव्यं किं । गृहे सर्व कर्म कर्तव्य । युष्माकं वृत्तपत्रमपि दातव्यम् ।

गिरिधरः — मह्य वृत्तपत्र दानेन परिश्रान्ता भवेः किम् ?

राधा — मे प्राणा निर्गच्छन्ति गृहकर्म करणे । एका पाचका स्थापयतु गृहे ।

गिरिधर. — जानकी किं करोति ।

राधा — सा लिखति । तया गन्तव्य वैद्य शालाप्रति ।

गिरिधरः — सा ते गृहकर्मकरणे साहाय्यं करिष्यति ।

राधा — मम तस्या सहायोमास्तु । यदि सा स्वय स्वीयकर्म करिष्यति तदेवाल मम ।

गिरिधरः — किं तथा कृत्वा भवसि अद्य । किं रक्तपीडनं भवति ।

राधा — मनो वैकल्यं भवति मे । पुत्रिकायाः जानक्याः पञ्चविंशति वर्षाणि व्यतिर्यातिं । सर्वदा तस्या. विवाहविषये चिन्ता भवति । तया चिन्तया अहं शिथिलिताङ्गी भवामि ।

गिरिधरः — त्व गच्छ । चिन्ता मा कुरु । सर्वमपि शान्तगत्या सुखमयं भविष्यति । त्व अन्त. गत्वा कार्यतत्परा भव । नोचेत् चिन्ता चिति भूत्वा शरीरं सर्वमपि दाहयिष्यति ।

राधा — (मुख सकोचयित्वा अन्तः गच्छति)

गिरिधर — (वृत्तपत्र पश्यन्) वधूः अपेक्ष्यते। वयः पञ्चविंशति वर्षाणि वैद्या एम् बि बि एस् अन्तिम वर्षं विद्यार्थिनी उत उत्तीर्णा वैद्या रुपवती गुणवती च अपेक्ष्यते। (उत्थाय) हञ्जे राधे इतः एहि।

राधा — (आगत्य) किमर्थं एव आक्रोशति। किं वृत्तम्।

गिरिधर· — पश्य। (इति वृत्तपत्र ददाति)

राधा — (वृत्तपत्र गृहीत्वा पठति) वय. पञ्चविंशति वर्षाणि। वैद्या एम् बि. बि एस् अन्तिमवर्ष विद्यार्थिनी उत उत्तीर्णा वैद्या, रुपवती गुण· वती च अपेक्ष्यते। बालस्य वयः त्रिंशति. वैद्य औषधतज्ञ। अमेरिका देशात् प्रतिनिवृत्त सुन्दर दत्ताङ्के पत्रव्यवहार कर्तव्य।

गिरिधर — कथ विद्यते।

राधा — समीचीन। अद्यैव पत्र विलिखतु। नोचेत् गत्वा सर्वं तं स्माक विचार्य बालक दृष्ट्वा आगच्छतु। एषा पत्रिका प्रकटना जानवर्य कृता इव मे प्रतिभाति।

गिरिधर — विवाह समय समापन्न। सप्राप्त समये वमन कल्याणयो न कोपि निरोध भवति। दशघण्टावादन भवति। कार्यालय गन्तव्यम्। इति अन्त गच्छति।

राधा — अहं पाथेयपात्र ससिद्ध करिष्ये। (इति अन्त गच्छति)

गिरिधर — (बूटु टं बन्धयित्वा कोटु धारयति) हञ्जे गच्छाम्यहम्।

राधा — (पाथेय पटिकादत्वा) पश्यतु भवान् कार्यालयवेला सामाप्य नन्तर सन्ध्यासमये दत्ताङ्क गृह गत्वा सर्वं विचार्य आगच्छतु।

गिरिधर — हञ्जे यादृशी शीघ्रता विद्यते ते कुमार्या विवाहकरणे तादृशी शीघ्रता ममापि विद्यते। अहं सर्वं सम्यक् विचार्य निश्चित्य आगच्छम मात्र चिन्ता न अस्तु। (इति गच्छति)

राधा — हे भगवन् यदि अद्य विवाह सवन्धः भविष्यति तर्हि वय सर्वे मिळित्वा अति वैभवेन सत्यनारायणपूजा करिष्यामः। (इति नमस्कृत्य अन्त. गच्छति)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(उद्यानवनं तत्र एकस्मिन् कोणे एकस्य वृक्षस्य अधः उपविश्य जानकारामौ सलान्तौ आस्ताम)

राम — प्रेयसि जानकि अहं पञ्चवर्षाणि अमेरिका देशे न्यूयार्क नगरे अवसम्। किन्तु तत्र जीवन भारतात भिन्नम्। तत्र जीवनं अत्यन्त वेगपूर्णम। तत्र न विद्यते मनश्शान्ति.। तत्र सर्वे सर्वभक्षकाः। अहं तु शाकाहारी। मया न कदापि मद्य सेवितम्। मम जन्मत' आरभ्य अहं भारतीय आर्य परम्परागत साम्प्रदाय प्रेमिकः। तस्मात् तत्रस्य जीवन मह्य न रोचते।

जानकी — अरे राम, अद्यतन दिवसेषु सर्वोऽपि अन्यदेश उद्दिश्य अतिशयोक्ति करोति। कि तत् असत्यम्।

राम• — तत् सर्वं असत्यमव। तत्र मानव जंवन नहि। तत्रत्याना पशुप्रायता जीवन अधिक भवति। न शान्ति विद्यते। केवल सम्पादन भौतिक सुखानुभवमेव तत्र भवति। नान्या चिन्ता विद्यते।

जानकी — त्व पञ्चवर्षाणि तत्र स्थित्वा तत्रत्या युवत्या न विवाहितोसि।

रामः — तर्हि, भारतीय सौन्दर्यं अहं तत्र ना पश्यम्। भारतीयानां विलासादिक ना पश्यमह तत्र। ताः स्त्रिय. पुरुषाः इव आचरन्ति। तस्माद् मे शृङ्गार भावादिक न बभूव। सर्वदा अहं भारतमुद्दिश्यैव चिन्तितम्।

जानकी — राम, केचन आधुनिकाः कथयन्ति तत्र जीवनं सुखमयमिति, स्वेच्छा जीवनमिति। तत् सर्वं असत्यं किम्।

रामः — सर्वेषां स्वेच्छा विद्यते। अशन पानादिकं अस्मदीय देशवासिनां अननुकूलं प्रतिकूलं च। भारतवर्षे सर्वेषां मानवाना स्वेच्छाविचारः नियमबद्ध वैयक्तिक स्वतन्त्रता च अवश्यं स्वीकरणीये।

जानकी — तत्र जीवनं अनुभोक्तुं आधुनिकाः अहमहमिकया तत्र गन्तुं प्रयतन्ते। किं तत् अयोग्यम्।

रामः — उच्च शिक्षणार्थं वैज्ञानिक विषयान् ज्ञातुं तत्र गमनं आवश्यकमेव। किन्तु भारतीय जीवन सदृशं प्रपञ्चे कुत्रापि न दृश्यते। भारते ग्रामीणाः अपि स्वतन्त्रतया आनन्देन जीवंति विद्यमान संपच्चये। तत् तत्र ग्रामेषु न संदृश्यते। तत्र सर्वेषां अधिकाशा भवति। यदि मानवस्य सकाशे किञ्चित् धनं स्यात् तर्हि भारतदेश सदृशं देशं अन्यत्र नहि पश्यामः। तस्मादेव सर्वे भारतेतराः भारतं समागताः। वयं भारतीयाः कुत्रापि नागच्छाम। अधुना विज्ञान शिक्षणार्थं उच्च शिक्षणार्थं भौतिक सुखप्राप्त्यर्थं आधुनिकाः गच्छन्ति।

जानकी — अस्मद्देशीय जीवनमेव वरमिति ते मनीषा।

रामः — सत्यमेव महाकवि चटर्जी महोदयेन गीतं खलु वन्दे मातरं, सुजलां सुफलां मलयज शीतलां मातरं, वन्दे मातरम् इति। सा भावना शतथा सत्यं तथ्यांच।

जानकी — भवदीय अनुभवेन अहं अत्यन्त प्रभाविता अस्मि।

रामः — अये सुन्दरि त्वादृश सौन्दर्यवतीं अहं अमेरिकादेशे नापश्यम्।

जानकी — त्वं वैद्योपि देशान्तर गतोपि त्वं सत्यमेव भारतीय जीवनाभिलाषी इति मे परमानन्दः भवति।

रामः — परदेशं गतोऽस्मीति परदेशीयः भवेयम् किम्? अहं देशद्रोही न भवेयम्। अहं सर्व सेवा भारतीय जनता कृते करिष्यामि।

जानकी — अरे राम, आवयोः विवाहः अतीव स्वल्प धनविनिमयेन भवितव्यः। भारतवर्षे दरिद्रता भजन्ते, ततः विवाहार्थं अति स्वल्प धनं विनिमयं कर्तव्यमिति मे अभ्यर्थना।

राम — आवयो भावना साम्प्रदाय आचार व्यवहार अशन पानादिक भारतीयता त यति। आवयो शरीरे स्त्रीपुरुष विलासिते। किन्तु मनोभावना आमा च एक एव। अस्मदीय विवाह जात। किन्तु लोकाय दर्शयितु यस्मिन् कस्मिन् अपि देवालये विवाह शास्त्रपद्धत्या कर्तव्य वियते।

जानकी — ममाभिप्राय अपि स एव।

राम — जानका तव पितु नाम किम्।

जानकी — गिरिधर।

राम — मातु नाम।

जानकी — राधा।

राम — मम नाम राम। तव नाम जानकी। सर्वं भगवता निर्णीतमिव प्रतिभाति मे। पश्य विवाह परम्परागत शास्त्रोक्तप्रमाण करणीय। सप्तपदीसहित अग्निसाक्षिक शास्त्रपद्धत्या सुस्पष्ट मन्त्रोच्चारणे ब्राह्मणाना समक्ष करणीय।

जानकी — ममापि एवमेव विवाह कर्तव्य इति वियते। आचारार्थं धन व्ययीकरण न योग्य भवति। आवयो विवाहमुद्दिश्य कुत्रापि न वक्तव्यम्।

राम — नहि। एहि मत्सकाशम्।

जानकी — अरे राम, न मे नाजनम्। (इति तस्य सकाश ग च्छति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(पशुपति गिरिजया उपविश्य मभाषत)

पशुपति — गिरिजे, पत्रिकाया विवाह प्रकटना दत्ता एक सप्ताह व्यतीत।

बहूनि पत्राणि सप्राप्तानि न किमपि पत्रं तृप्तिं नाऽदत्। अनुरूप युवकस्य अमेरिकातः प्रतिनिवृतस्य अनुरूपकन्यका न संप्राप्ता भवति किमेतदाश्चर्यम्।

गिरिजा — द्वितीय सप्ताहे अवश्यं बहू सख्यकानि योग्य पत्राणि समागमिष्यन्ति। यदि अस्मिन् पत्तने यः कोऽपि स्यात् सः आगमिष्यति। अत्र चिन्तायाः स्थानं नहि।

पशुपतिः — न मे कापि चिन्ता विद्यते। मे केवलं आश्चर्यं भवति वर्तमानास्थितिमुद्दिश्य। केचन अमेरिकात· प्रत्यागतस्य युवकस्य कन्या दातु शङ्कितमनाः भवन्ति। तादृशानुद्दिश्य अहं आश्चर्यं व्यक्तीं करोमि।

गिरिजा — अति शङ्किना जगति शान्ति· कथं भविष्यति। केचन जगति अन्य देशेभ्यः प्रत्यागतान् अतीव गौरवपूर्णं पश्यन्ति। अन्येच बहूहीनं पश्यन्ति।

पशुपतिः — केचन अन्य देशानुद्दिश्य ऊहामपि कर्तुं असमर्थाः भवन्ति। केचन ऊहा कृत्वा अस्माकं तादृश जीवनं अयोग्यं अनवसरमितिच चिन्तयन्ति। केचन परदेशमुद्दिश्य श्रवणानुपदमेव उन्मत्ताः भूत्वा जीवने एकवार गन्तुं चिन्तयन्ति इयं लोक परिपाटिः, वर्तमान स्थितिश्च। (बहिः कवाट ताडनम् द्वारघण्टारावश्च)

गिरिजा — कवाटताडन अपिच द्वारघण्टारावश्च भवतः। कोपि समागतः आसीत्।

पशुपतिः — बत विरामदिवशेषु अपि सन्ध्या समयेषु कवाटताडनं द्वारघण्टारावश्च अविराम भवतः। आगन्तुकाना अवधिर्नविद्यते। ते केवल आगच्छन्ति चहा पिबन्ति सलाप कुर्वन्ति गच्छन्ति।

(इति सतापेन उत्थाय अन्तः गच्छति)

गिरिजा — अहंगत्वाद्वार उद्घाटयामि।

(इत्युत्थाय विवृतद्वार करोति)

(ततः प्रविशति गिरिधरलालः)

अयिभोः महाशये। इद पशुपति महाशयाना गृह किम्।

गिरिजा — हा इद तेषा गृहमेव।

गिरिधर – ते गृहे सन्ति किम् ?

गिरिजा — सन्ति

गिरिधर — किमहं अन्तः आगच्छयम ।

गिरिजा — आगच्छन्तु ।

(गिरिधर अन्त प्रविश्य कुर्च्या उपविशति)

पशुपति — अन्तर्गृहात प्रविश्य नमासि ।

(इति नमस्करोति)

गिरिधर — नमासि । भवानेव पशुपति महोदय ।

पशुपति — हा अहमेव पशुपति ।

गिरिधर — अहं भवदीय पुत्रस्य वैवाहिक प्रकटना वृत्रपत्रे विलोक्य भवद्भि भाषितु समागतोऽस्मि ममनाम गिरिधर ।

पशुपति – हुं (इति पत्नी आह्वयति)

गिरिजा — (प्रविश्य) अधुनव चहा आनयामि इति उक्त्वा अन्त गत्वा चहाशूर्पेण प्रविश्य तत्र पीठोपरि निक्षिपति)

पशुपति — गृहणन्तु शाघ्र । नोचेत् चहा शीतल भविष्यति (इति गृह्णाति)

गिरिधर — (गृह्णाति)

गिरिजा — (प्रविश्य चहा गृहीत्वा अन्यस्मिन् पीठ उपविशति)

(सर्वे चहापान कुर्वन्ति)

पशुपति — गिरिजे एते गिरिधर महोदया । एतेस्स्वपुत्रिकाया विवाहं निश्चितु अत्रागतवन्त त्वमपि आवयो भाषण भागस्वामिनी भव ।

गिरिजा — तदर्थमेव अहं अत्रोपविशम ।

पशुपति — कन्यकामुद्दिश्य सविस्तर कथयन्तु भवन्त ।

गिरिधरः — कन्यकायाः नाम जानकी सा पञ्चविंशतिवर्षीया चरम एम्. त्रि. वि. एस. कक्ष्याया वर्तते। सा अतीव सुन्दरी, रूपवती गुणवती सर्वसद्गुणाना सन्निधिः। काकस्य शावकः काकाय रोचते तथा नाहं कथयामि।

गिरिजा — अयि भो' गिरिधर महोदय। अहं पुत्रस्य गुणगाणान् कथयामि। पुत्रः अतीव सज्जनः। सः अमेरिकादेशे विद्यमानः अपि सः शाकाहारी भारतीय संस्कृति प्रेमिक' सस्कारयुतश्च। सः अधुनैव अमेरिकातः प्रत्यागतः। तस्य वयः त्रिंशति। सः वैद्यतन्त्र'। वधूवरयो दर्शनानन्तरं विवाहः निर्णीतव्यः विद्यते।

गिरिधरः — सम्यक् विद्यते। भवता अपेक्षा किं अस्मत्त'।

पशुपति' — वैवाहिक सर्वसन्नाहाः भवद्भिः कर्तव्याः वर्तन्ते।

गिरिधर — तथैव।

गिरिजा — वधूवरयोः परस्परदर्शनानन्तरमेव तयोः अनुमति प्रमाणं विवाहः भवितव्य. वर्तते।

पशुपतिः — किं भावता अभिप्राय।

गिरिधर — अङ्गीकार्य' एव। एकस्मिन् शुभमुहूर्ते वधूवरयोः दर्शन शुभमुहूर्तः निर्णीतव्यः विद्यते।

पशुपति — अवश्य तथैव कुर्मः।

गिरिधर. — वरशुल्क कियत् दातव्य इति भवता आग्रहः।

पशुपतिः — गिरिधर महाशय पश्य। आधुनिकेषु दिवसेषु धनस्य मूल्यं विद्यते। सर्वोऽपि मूढ' विवाहसमये कनिष्ट प्रमाणेन दशसहस्र भजते। अत्र अयं सर्व लक्षणोपेत' वैद्य अमेरिकात. प्रतिनिवृत्त' तस्य कृते कनिष्ट प्रमाणेन पञ्चति सहस्र रूप्यकाणि दातव्यानि अनन्तर तदितर वस्तु केतु उपरि दशसहस्राधिकं दातव्यं विद्यते। अपिच प्रथममेव प्रोक्त सर्व वैवाहिक मङ्गलकार्याः सर्व समारम्भाः भवद्भिः करणीयाः इति।

गिरिधरः — कतिपय दिवसानन्तरं भवन्त. सर्वे सहस्र विवाहार्थं कति जनाः समायान्ति पत्रद्वारा ज्ञापयन्तु। अपिच वधूवर दर्शनार्थं समयं चापि निश्चित्य ज्ञापयन्तु।

पशुपति — अहो भवता कथनस्यावश्यकता नास्ति। सर्वमहं सम्यक् विचारयामि।

गिरिधर — (उत्थाय) गच्छेयमहम्।

पशुपति — (उत्थाय) द्वारपर्यन्त गच्छति।

गिरिजा — (द्वारपर्यन्त गत्वा) नमस्ते गिरिधर महोदय पुनरागमनाय निरीक्ष्यामहे।

गिरिधर — नमोऽस्तु। (इति गच्छति)

गिरिजा — सहस्य विवाहार्थं सार्धलक्षरूप्यकाणि भविष्यन्ति।

पशुपति — सार्ध लक्ष रूप्यकाणि अस्मिन् काले अतीव लघु निमित्तमेव भविष्यन्ति।

गिरिजा — आयान्तु अत भोजनार्थम्। (इति अत द्वारपि गच्छत)

(यवनिका पतति)

* * *

चतुर्थ दृश्यम्

(राधा एकाकिना उपविश्य पठन्ती आस्ते। द्वार घण्टा नादते)

राधा — (उत्थाय द्वारसमीप गच्छति कपाटोद्घाटन विदधाति)

(तत प्रविशति गिरिधर)

राधा — भवदागमनं चिन्तयामि।

गिरिधर — किञ्चित् विलम्ब सञ्जात अद्य।

राधा — किं भवन्तः दत्ताङ्क गृहं गतवन्तः।

गिरिधरः — गत्वा आगच्छम्। तस्मादेव विलम्ब संजातः। (इति शयनकुर्च्यां उपविशति बूटु शिथिलयति टें शिथिलयति)

राधा — (तत्रागत्य बूटु टें च गृहीत्वा अन्तः निक्षिपन्ति)

गिरिधरः — किंचित् पानीय आनय राधे।

राधा — पानीय चहा च आनयेयम्। (इति अन्तः गच्छति)

गिरिधरः — कल्याणकरणं गृहनिर्माण च अतीव कष्ट भरिते आधुनिकेषु दिवसेषु।

राधा — (चहा पानीयं च आनीय तत्र निक्षिपति तत्रैव गिरिधरस्य पुरत एकस्या कुर्च्यां उपविशति) अधुना कथयन्तु किं वृत्त सविस्तरम्।

गिरिधर — कथने न किमपि विद्यते। सत्वर करणीय विद्यते।

राधा — सर्वं सम्यक् दृष्टं किम।

गिरिधरः — हा दृष्टम्।

राधा — कीदृशोय कुटुम्बः।

गिरिधरः — कुटुम्बस्तु समीचीनः सदृश्यते। ते सपन्नाः सुशीलाः सज्जना इव आभान्ति।

राधा — अत्रैव अस्मिन् पत्तने कियत् कालादारभ्य निवसन्ति।

गिरिधरः — तदह ना पृच्छम्।

राधा — जानकी विषयः आलोचित. तैः।

गिरिधरः — हा सविस्तर मया तामुद्दिश्य प्रोक्तम्।

राधा — वरशुल्क कियान् विद्यते।

गिरिधरः — वरशुल्काः पञ्चति सहस्रपर्यन्त विद्यते।

राधा — अहो पञ्चति सहस्रपर्यन्त विद्यते।

गिरिधरः — अपिच सर्वसन्नाहाः अस्माभिः कर्तव्याः विद्यन्ते।

राधा — आहृत्य सार्धलक्ष रूप्यकाणां विनिमयः भवति। बालः कथं विद्यते।

गिरिधरः — बालस्तु न दृष्टः। किन्तु वधूवरदर्शनानुपदमेव लग्नः निश्चितः भविष्यति।

राधा — सत्वर विवाह करणीयः अस्ति।

गिरिधरः — ममाभिप्राय अपि तथैवास्ति।

(द्वारघण्टिका नाद्यते)

राधा — जानकी समागता इति मन्ये। (उत्थाय द्वारसमीप गत्वा कवाटोद्घाटनं करोति। ततः प्रविशति जानकी)

गिरिधरः — बाले जानकि किं विलम्ब्य समागतम्।

जानकी — पितः मे मित्रस्य जन्मदिवसः अद्य समजनि। अहं मम वयस्याभिः जन्मदिवसार्थं। अम्बा कथयित्वा आगच्छम्।

गिरिधरः — बाले अन्तः गच्छ।

राधा — जानकि अहं तुभ्यं साधु वार्तां कथयिष्यामि।

जानकी — का वार्ता कथय त्‌ जननि।

राधा — आवां तव विवाह कर्तुं उद्युक्तौ अभवाव।

जानकी — मम विवाह विषये इयती त्वरा कथं मातः। अहं एम्. ए. परीक्षायां उत्तीर्णा भूत्वा परिणयिष्ये।

राधा — बालः अतीव सुन्दरः आजानुबाहुः इति ते पिता अवदत्।

जानकी — किं सः युवा पित्रा दृष्टः।

गिरिधरः — बाले मया सः न दृष्टः किन्तु तस्य पितरौ अवोचताम्। अपिच वधूवरयोः अङ्गीकारानन्तरमेव विवाहः भविष्यति तत्पूर्वं नहि।

राधा — तौ दम्पती पञ्चत्रिंशसहस्र रूप्यकाणि वरशुल्कं अपृच्छन्। सर्वे सन्नाहाः अस्माभिः करणीयाः सन्ति।

जानकी — मातः पिता इयन्तं धनं कथं दास्यति।

गिरिधरः — बाले तत्र किमर्थं एतत्। त्वं वरदर्शनानन्तरं तवाङ्गीकारं विशदय। यदि तुभ्यं रोचते सः, विवाहकरणे बाध्यता मम विद्यते।

जानकी — पितः इयन्तं धनं त्वं दातुं उद्युक्तः। पितः किं त्रिंशति सहस्र रूप्यकाणि दत्वा तं बालं क्रेष्यसि किं मदर्थम्।

गिरिधरः — बाले अत्र क्रय विक्रयस्य संबन्धो नास्ति। तौ दम्पती सपत्नौ। तयोः महान् प्रासादः वर्तते। तयोः महत् भूखण्डं च विद्यते। बालः अमेरिका देशात् प्रत्यागतः। एम्. डि. प्राचार्य।

जानकी — ते सपत्न कुटुम्बीकाः तथापि इयन्तं धनं काङ्क्षन्ते। ते सत्य अत्याशा पूरिताः।

गिरिधरः — आशायाः अवधिः नास्ति जगति बाले।

जानकी — यदि इयान् वरशुल्कः भवता दीयते तर्हि अयं विवाहसम्बन्धः मम अनपेक्षितः भविष्यति।

राधा — बाले राधे किं त्वं पाषण्डा भवसि। ते सुसंपन्नाः भूखण्ड सहिताः योग्याः। भवतु नाम। आवां कुर्वः ते विवाह। तत्र चिन्तं मास्तु।

जानकी — मम विवाहं कृत्वा भवन्तौ भिक्षापात्रं गृहीत्वा भिक्षाटनं करिष्यतः। मे अनुजौ पाठशाला विसृज्य भिक्षुकौ भविष्यतः। माता यस्य कस्यापि गृहे पात्र प्रक्षालनं कृत्वा जीवितं यापयिष्यति। अहं श्वशुरगृहे सुखमनुभवन्ती वसिष्यामि। भवतोः अभिप्रायः सम्यक् विद्यते।

राधा — किं ब्रवीषि जानकि।

जानकी — नहि शृणोमि भवता वाक्य। न मे रोचते वरशुल्कं दत्वा परिणय करणम्।

गिरिधरः — जानकि श्वः अहं गत्वा जन्म पत्रिकादीन् विलोक्य योग्य वधू-वर दर्शन वेला विनिश्चित्य आगच्छेयम्।

जानकी — इयन्त धन कुत्र विद्यते पित ।

गिरिधर — अद्येव मम भविष्य निर्वाहकनिधि मे सम्प्राप्त । अपिच विद्यते बाक्या लक्षपर्यन्त सर्वमपि व्ययीकृत्य नव विवाह करिष्याव ।

जानकी — इयन्त धन दत्त्वा विवाहकरण न मे रोचते पित ।

गिरिधर — त्व न जानासि वत्से । "अर्थोऽहि कन्या परकीय एव" ।

जानकी — पित त्व तवेच्छानुसार कुरु अह ममेच्छानुसार कुर्याम् ।

राधा — जानकि कि ते इच्छा ।

जानकी — विना वरशुल्क विवाह करणम् ।

राधा — तत् कथ साध्य भवति अस्मिन् वर्तमानयुगे ।

जानकी — सर्वं साध्य भविष्यति ।

गिरिधर — राधे त्व अन्त ग च्छ ।

राधा — बाले पित लग्नपत्रिका विलिखितु प्रकटयितु समीहत । त्व किमपि व्यतिरेक मावद ।

जानकी — पित तवच्छेनुसार त्व लग्नपत्रिका मुद्राप्य आनय ।

गिरिधर — अह अद्येव गत्वा सर्वं विनिश्चित्य आगच्छेयम् ।

जानकी — (मातु समीप गत्वा) मात कि मत्कृते इयन्ती परिवेदना क्रियते ।

राधा — जानकि त्व न जानासि पित्रो हृदय बाधा । त्व अङ्गीकुरु यत् पिता कथयति त्वत्कृते । भिन्न वैरुध्य मा कथय । (इति माता पुत्र्यौ अन्त गच्छत , गिरिधर सव सन्नाहोभूत्वा बहिर्गच्छति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

जानकी — (तत्र टेबुलोपरि उपविश्य पुस्तकात् एक छाया चित्रं वहिराकृष्य पश्यन्ती गायति)

गीतम् (भीमपलास रागे)

पश्यति मित्र काञ्चनमाला। भूषित वेश काचन बाला
प्रियतम चिन्तन रागकपोला। कुन्तल निर्जित नीरदमाला ध्रु

प्रतिपद जल्पन वीणा तन्त्री। पृथुल नितम्ब पराजित धात्री
कुवलय मञ्जुल चञ्चल नेत्री। चञ्चल चालन वैद्युत गात्री १

ज्योत्स्नालिङ्गन मधुर हसन्तम्। चन्द्र मनुते कालकृतान्तम
कुरुते प्रियतम चिन्तन सान्तम्। विरहितबाला तपति नितान्तम् २

पीन पयोधर चञ्चल हारा। निश्चल लोकन स्तम्भित तारा
भावज रूपित कृत सुस्मेरा। मनसिज पत्नी निभ साकारा ३

तडिदिव गौरी कुचभर भद्रा। सुन्दर हेला भावज मुद्रा
प्रियतम सगम समयेऽतन्द्रा। रतिपतिलीला जनित सुनिद्रा ४

गण्डस्थल विम्बित कर्णाभरणा। प्रियतम मर्दन रक्तिमवर्णा
नीलाम्बरवेष्टित सुप्रावरणा। कवरीभर मञ्जुल सूनाभरणा ५

राधा — (गीत प्रारम्भ समये आगत्य निश्शब्द शृण्वन्ती आस्ते। गीतावसाने प्रविश्य) जानकि गीत अत्युत्तम विद्यते, त्वयापि सम्यक् गीतम्।

जानकी — मह्य राचते गीतमेतत्।

राधा — केन विरचित मिदम्?

जानकी — गीर्वाणगेयचक्रवर्तिना विरचितमिदम्।

राधा — सत्यमेवायं गीर्वाण चक्रवर्ती। संस्कृत भाषाया एतादृशानि गीतानि कदापि मया न श्रुतानि।

जानकी — मातः न केवल त्वया। न केनापि एतादृशानि गीतानि श्रुतानि रचितानि च आधुनिक दिवसेषु सस्कृत भाषायाम्।

राधा — जानकि पिता बहिर्गत्वा बहुकालमभूत्। एतावत्पर्यन्त नह्यागत किमर्थमेव विलम्बः सजातः अद्य।

जानकी — पिता कुत्र गत. मातः।

राधा — तव विवाह लग्न निर्णेतु वधूवर दर्शन योग्य वेळा निर्णेतु गत।

(बहिः कवाट ताडनम् भवति)

जानकी — पिता आगत। (इत्युत्थाय विवृत द्वार करोति)

गिरिधर — (प्रविश्य) बाले जानकि तव लग्नसुमुहूर्तं विनिश्चित।

जानकी — कदा।

गिरिधर — माघमासे शुक्लपक्षे दशम्या गुरुवासरे गोधूळिसमये परस्परदर्शन शुभसमय विनिश्चित.। अनन्तर लग्नवेळा निश्चिता भविष्यति।

राधा — अह शर्करा आनयेय मुख मधुर कर्तुं। (इति अन्त. गच्छति)

जानकी — (कृत्वा अन्त गच्छति)

गिरिधर — श्व दुहित्रे किं किं अपेक्ष्यते सर्वमपि क्रेतव्य विद्यते।

राधा — गृहे कार्य समारम्भः कर्तव्य।

गिरिधरः — जानक्या सौवर्ण कङ्कणानि नाशिका भरण कर्णाभरणो च। अन्य अलङ्कार सचय च क्रेतव्य विद्यते।

राधा — तदह करिष्यामि। भवन्तः सर्वे बन्धून् तस्मिन् दिवसे आगन्तव्यमिति पत्रादिक प्रेषयन्तु।

(बहि द्वारघण्टा नाद्यते)

गिरिधर — वातु जानकि ! कोपा समागत - गत्वा कपाट उद्घाटय।

जानकी — (गत्वा पुन प्रत्यागच्छति) पित पत्राहर आगत्य पत्र दत्वा जगाम। इद पत्र। (इति तस्मै ददाति अन्त गच्छति)

गिरिधर — (तत्पत्र उद्घाट्य पठति)

महादय,

वय सर्व सोमवासरे युष्मद्गेह आगमिष्याम । सर्व सौक्याणि कुर्वन्तु। अस्मात् पश्चात् नहन पदवाधरा महान्त सन्त समागच्छन्ति। तथा किञ्चिदपि न्यूनता मा भूयात्। वय सर्व आहत्य द्विशतकाधिका भोजनार्थं आगच्छाम । तस्मात् यूय सावधानतया सर्वमपि कुरुत इति वार्तयामि।

एव
पशुपति

गिरिधर — (पत्र पत्रकञ्चुके निक्षिप्य) अय सत्यमेव पशुपति । वर्तमान दिवसेषु आहारन्यूनता वर्तते। अधिक भोजन पदार्थान् व्यर्थं मा कुर्वन्तु इति शासनस्य आदेश । तथापि एते द्विशतकाधिका भोजनार्थं आगच्छन्ति। अय बुद्धिहीन । डाम्बिकाय मानव ।

राधा — किं उच्यत भवद्भि पञ्चति सहस्रात्मक रूप्यकाणि वय वर शुल्क याचाम किन्तु द्विशताधिकजनेभ्य भोजन न दास्याम । मा विचारयतु भवान्।

गिरिधर — यूय नार्य न जानन्ति। पश्य वय उद्युक्ता भोजन दातु। किन्तु शतापेक्षया भोजनार्थं विवाहेषु न गन्तव्यमिति खाद्य पदार्थान् व्यर्थं न कर्तव्य इति शासनादेश । यदि शताधिक भोजन दीयत तत् कृत्य शासन धिक्कारित भविष्यति।

राधा — उच्चै न वक्तव्य। जानकी श्रोष्यति सर्वमपि अस्तव्यस्त भविष्यति।

गिरिधर — राधे अह विपणीं गत्वाऽऽगच्छेयम्। (इति निष्क्रमति)

(यवनिका पतति)

*   *   *

षष्ठं दृश्यम्

(राधाजानकीगिरिधरा एकत्रोपविश्य विवाहार्थं अपेक्षित वस्तुचय चीरादिक गणयन्ति)

राधा — अयं चीराऽऽभरणादिसमूह· कन्यादानसमये दातव्य । अय ताम्बूल विनिमय दिवसे वराय दातव्य. अस्ति। इदं वराय दातव्यं अङ्गुलीयकम्। (इति निक्षिपति)

गिरिधर — जानक्या पादाभरणौ हस्तकङ्कणादिकाः एकत्र स्थापनीया ।

राधा — हा जानामि। अहं तथैव स्थापयिष्ये।

जानकी — पितः अहं त्वया सार्कं रहसि भाषितुमुत्सहे।

गिरिधर — मत्सकाशे तव रहस्यं कथं बाले। अत्रैव प्रत्यक्षं वद किं ते भाषणीयं विद्यते।

जानकी — पित· किमर्थं भवान् मदर्थं कष्टमनुभवसि। पञ्चविंशतिसहस्र रूपकाणा राशि दत्वा भवान् वर क्रीणाति। अनन्तर शताधिक मूर्खेभ्य भोजनं ददाति। एवं विवाह करणे न मे रुचि. विद्यते। सर्वमपि आहत्य लक्षाधिकं धन भविष्यति तत् मे वर न भवति।

गिरिधर· — बाले आवा पितरौ त्वा इयन्तीं विद्यावतीं विधाय यदि सम्यक् समीचीन कुटुम्बेन सार्धं अपिच समीचीन वरेण सार्धं विवाहं न कुर्याव लोकः आवा निन्दिष्यति। इयं लोक परिपाटि । एतत् अस्मदीय कर्तव्यं विद्यते वासु।

जानकी — मे विवाहयत्नः विरमतु।

गिरिधरः — कथ भविष्यति विरमणम्। त्वा पतिगृहप्रेषणं अस्मदीय कर्तव्य विद्यते।

जानकी — पितः भवन्तौ मे पितरौ मे जन्मदातारौ मा क्रुद्धौ भूयास्ताम्।

राधा—जानकि किं ते कथनीयं कथय सत्वरम्। किमर्थं एव विलम्बः।

जानकी — पितः अहं परिणीतास्मि।

गिरिधरः — (क्रोधाश्चर्याभ्यां) वासु किं वदसि केन साकं वदसि। त्वं उन्मत्ता आसीः किम्।

जानकी — पितः मा क्षमा करोतु।

गरिधरः — (कुर्च्यां शयित्वा) हा बत किमापतित बाले, किं व्यवसितं त्वया। असाधु कृतं त्वया। (इति नेत्र निमील्य शयन कुर्च्या आस्ते)

राधा — किं ते मौर्ख्यं। त्व अबाल्यात मूर्खासि। स्वच्छन्द चारिणी असि। आवयो वचन न श्रृणोसि। (शिरसि हस्त निक्षिप्य) अहो बत किं कृतं त्वया। वशमर्यादा अतिक्रान्ता भवत्या। वशगौरवः मृत्तिकाया ममज्ज।

गिरिधरः — कथभूतोऽयं विवाहः। केन सार्थं कृतः।

जानकी — अह एकेन वैद्यप्राचार्येण सार्थं विवाहितः। आवयोः विवाहः प्रेमविवाहः।

राधा — अहो प्रेमविवाहः। वयं न जानीयावहे प्रेम। अद्य प्रेम श्वः प्रेनः। अद्य सन्तोष. श्वः दुःखम्। त्व मम गर्भात् राक्षसीव जाता।

गिरिधरः — किं वदसि बाले। त्व परिणीता। किमर्थं नोक्तवती भवती प्रथमतः। कदा परिणयः कृतः। कुत्र।

जानकी — मुम्बापुर्यां मुम्बादेवी सन्निधौ एकेन पुरोहितेन विवाहः कारितः। मे विवाह समारम्भविषयः राजपत्रे अपि प्रकाशितः आसीत्।

गिरिधरः — राधे अधुना वरपक्षीयान् किं कथयेयम्। (इति बाधा प्रकटयति) अस्मिन् विषमकाले युवतीयुवकाः पित्रो वाक्य न श्रृण्वन्ति, न परिपालयन्ति च।

राधा — कथ परिपालयिष्यन्ति कलाशालाः सर्वाः विश्वविद्यालयाः सर्वाः वेश्यागृहसंतुलिताः भवन्ति। ताः सर्वाः सत्य कलाशालाः भवन्ति।

गिरिधर — साम्प्रदायमनुसृत्य विवाह कर्तव्य । न केवल युवती युवकयो मेलनम। विवाह इति पदस्य विपुलाथ विद्यते। आधुनिका साम्प्रदाय न जानन्ति । जीवन मूल्यानि अपि न जानन्ति कवल अशन चित्र विचित्र वस्त्रालङ्करण कृत्वा वीथिनाटक नटका इव रथ्यासु आहिडते। तेषा मस्कृति नास्ति परम्पराच नास्ति । धिक नवीन जीवनम । जीवन आनद एव नास्ति। (इति चिन्ताक्रान्त आस्ते)

(द्वार कवाट ताडनम)

राधा (उत्थाय गत्वा द्वार उदघाटच पत्र आनयति तत पत्र गिरिधराय प्रयच्छति)

गिरिधर — (गृहीत्वा) अहो ते पशुपतादय विव हार्थं आगच्छन्तीति म य। अधुना किं कर्तव्य। (इति वदन पत्र उदघाटच पठति)

अयि गिरिधर महोदय

भवन्त विवाह प्रयत्नान मा कुर्वन्तु मे चिरञ्जीव विवाहित । म वरशुल्क विरोधी त स्मात अस्मदीय सहाय विना एम डि वद्म विद्यार्थिन्या परिणीतवान। तयो विवाह प्रम विवाह । एकस्मिन् देवालय शास्त्ररीत्या पुरोहित समक्ष परिणयकार्यक्रम समाप्त आसीत। तस्मात *वय नागच्छाम । अस्मिन विषय क्रोधस्तु मा काय । यत अस्मदाय दिवसा* गता । आधुनिका स्वेच्छया स्वमनोनुकूल कुर्वन्ति। तेषा विषय अस्मदीय शिरप्रवेश मास्तु । सरस विरस भविष्यति, क्षमध्वम ।

एवम
पशुपति

गिरिधर — अहो किमापतितम। किं कष्टम।

राधा — जानकि त्व वश राक्षसी जाता। त्व गृहात अपेहि। (इति *ता भत्सयति*)

जानकी — पितरौ अह भवन्तौ प्रणमामि। मा क्षमेथाम। अह परिणीता। अह मम गृह गच्छयम। तत्रैव वसेयम। अत्र वसितु मम अधिकार

नास्ति। भवन्तौ पितरौ ममाभ्युदयाय सर्वं सुखात्मकं कर्तुं व्यवसितौ। अहं वरशुल्क विरोधिनी तस्मात् एवं अकरवम्। ममापि स्वतन्त्रता विद्यते माधुकर्म करणे। पुरा पार्वती अपि स्वतपसा स्वनिश्चयेन चन्द्रशेखरं विचिक्रिये। अहमपि मम विद्या विद्वांसं परिणीतास्मि। मातः अहं मम पतिगृहं गच्छेयम्। तत्रैव वसेयम्।

गिरिधरः — जानासि जीवने यत् कष्टं सुखं वा भवति तत् त्वया अनुभोक्तव्यं विद्यते। अस्माकं तव सुखदुःख विषये न कोपि संबन्धः विद्यते।

(बहिः कवाट ताडनम्)

राधा — कोवा समागतः। (इति गत्वा द्वारं उद्घाटयति)

रामः — अयि मातः इद गिरिधर गृहम्।

राधा — हा एतत् गृहं गिरिधर गृहमेव।

रामः — किं ते गृहे सन्ति ?

राधा — सन्ति। अन्तः प्रविशतु भवान्।

रामः — धन्यवादाः। प्रविशामि। (इति प्रविशति) अयि भोः नमामि। (इति नमस्करोति)

गिरिधरः — उपविशतु भवान्। कोऽस्ति भवान्।

रामः — अयि भोः अहं एम्. टि. वैद्य प्राचार्यः।

गिरिधरः — तव नाम किम्।

रामः — मम नाम रामः।

गिरिधरः — त्वं कस्य पुत्रोऽसि।

रामः — अहं पशुपतेः पुत्रः।

गिरिधरः —भवान् किमर्थमागतोऽस्ति। तव विवाहः संजातः इति तव पिता पत्रं लिखितम्।

रामः — हा अहं अनुक्त्वा मम इच्छानुसारं विवाहमकरवम्।

राधा — अयि भोः राम, का ते कान्ता। तस्याः नाम किम्।

रामः — मम कान्तायाः नाम जानकी।

राधा — स कस्याः पुत्री।

रामः — सा राधायाः पुत्री।

राधा — कस्य पुत्री गिरिधरलालस्य।

गिरिधरः — कि मम पुत्र्या ते विवाहः संजातः।

रामः — हा।

गिरिधरः — कि विचार्य कथयसि।

रामः — हा विचार्य कथयामि।

राधा — कि जानकी भवता परिणीता।

रामः — सत्यं जानकी परिणीता।

जानकी — राम प्रणम्य। (पित्रोः सकाशं आगत्य) अयं मे पतिः अहं परिणीता। युवयोः न किमपि बाधा स्यात्।

गिरिधरः — बाले अयमेव संबंधः मम दृष्टः निश्चितश्च। आवयोः सम्बन्धं विना युवा द्वावपि परिणीतौ। एवमेव प्रपञ्चे विवाहः भवेत् यदि पित्रोः दुखं न भवति कष्टं न भवति। जानकि त्वं स्वयं परिणीताऽसि। पुत्रि अस्मद्गेहे कतिचन दिनानि यापयित्वा अनंतरं तव गृहं त्वं गच्छ। साधु कृतं भवता। तव इच्छानुसारं त्वं परिणीतासि। अहं युवयोः दम्पत्योः यत् मया भवतोः विवाहे व्ययीकर्तुं निश्चितं तत् सर्वमपि धनं उपायनमिव युवाभ्यां ददामि।

जानकी — पितरौ नाहं स्थातुमिच्छामि अत्र। मां नेतुं भवतोः जामाता आगतः। गच्छेयमहं अधुना मे भर्त्रा सार्धम्।

गिरिधरः – बाले अधुना का ते चिन्ता भवति। दिवसत्रयं उषित्वा गच्छताम्।

जानकी — पितः "अर्थो हि कन्या परकीय एव" इति महर्षिणा उक्तम्। तस्मात् अहं अधुना परकीया संवृत्ता।

गिरिधर — यथेच्छं गच्छतां भवन्तौ "शुभास्ते पन्थानः सन्तु"। (इति आशीर्वचनान् विदधाति)

(यवनिका पतति)

* * *



।। अपराजितम् ।।

(यवनिकाया बहि आगत्य ध्वनियन्त्र हस्ते गृहीत्वा)

व्यवस्थापक — सहृदय रसिकेभ्य स्वागत व्याहरामि। (इति किञ्चिन्नामित शरीरपूर्वकम्) अयि भो रसिक प्रेक्षका अद्य वय अपराजित नाम नाटक प्रदर्शयितु अतीव उत्सुकास्म । एतन्नाटक हिन्दु बौद्ध जैन धर्माणा कलासगमभूत अनन्ता एल्लोरा सौन्दर्यसगममुद्दिश्य कृतम्। अस्य नाटकस्य नाम अपराजित किमर्थं कृतम् ? इत्यस्य प्रश्नस्य एतत् प्रत्युत्तर भवति, यत् इद कलास्थान जगति न केनापि कलाखण्डन कृत स्थानेन पराजितमभूत्, तस्मात् इद अपराजित अभूत् इति। अस्य नाटकस्य कवि पण्डित परीक्षित् शर्मा। अय गीर्वाणान्ध्र भाषाप्रवीण । अनेन संस्कृत भाषाया महती नाट्य सृष्टि कृता। अस्मिन् नाटके अनन्ता एल्लोरामुद्दिश्य नानाअनुभव अपिच तथा विभिन्न अभिप्रायानुद्दिश्य अस्मिन् नाटके कवि सभाषणारूपेण चित्रणा नाटकीयता चक्रे। तत्र भवन्त श्रद्धया निश्शब्द नाटक पश्यन्तु इति आशास्महे। नमस्ते। (इति अन्त गच्छति)

(यवनिका अपसार्यते)

(रङ्गमञ्च द्वौ टेबुलौ स्तते तयो उपरि श्वेतवस्त्राच्छादन न्यस्त। तत्र टेबुलोपरि चषकानां चषका सामरा एक बृहत् झषपात्र च विद्यते। तत प्रविशति अभिनय दर्पण)

अभिनय — दर्पण अद्य गृह सर्व व्यवस्था समाचाननया सुष्टु शोभायमाना कर्तव्या अस्ति। (इति सर्व पात्राणि शुभ्रजति)

दर्पणा — का विशेष ।

अभिनय — अद्य अतिथय आगच्छन्ति अस्माकं गेहम्।

दर्पणा — तस्मात् स्व कृता अहेन कर्तव्या किम् ?

अभिनय — स्वच्छता सर्वदा कर्तव्या न तु अद्य केवलम्।

दर्पणा — के ते अतिथय । (इति सा एक वस्त्रखण्डेन सर्वं स्वच्छति)

अभिनय — दर्पणे अद्य चहपानार्थं सत्कारयुता विद्वास अस्मद्गेह आयान्ति।

दर्पणा — के ते।

अभिनय — ते विदेशेषु वसन्त भारतीया ।

दर्पणा — तेषा चहापानेन कि प्रयोजनम् ?

अभिनय — किं दातव्यम्। (इति हसति)

दर्पणा — तेषा पातु वशिका, मदिरा, बीर इत्यादिकमपेक्ष्यते। तेषा चह पानेन नोपयोग ।

अभिनय — ते अस्मत् गृह आयान्ति। अस्माभि यत् पीयते तदेव दातव्य विद्यते। नत्वन्यत्।

दर्पणा — किं दातव्यम् ? कथय त्वमेव।

अभिनय — चहावा उत काफीवा।

दर्पणा — ते यत् खादन्ति, पिबन्ति तत् दाने अतिथ्य भवति।

अभिनय — तथा नहि।

दर्पणा — तर्हि कथम्।

अभिनय — वय यत् ददाम तत् ते गृहीतव्यम्। ते भारतीया एव।

दर्पणा — ते विदेशेषु निवसन्ति बहूकालात्। तस्मात् ते विदेशीया एव।

अभिनय — ते सर्वे अत्रैव बाल्ये भारतवर्ष उषित्वा विद्यामभ्यस्तवन्त आसन्।

दर्पणा — विदेश निवासिना अखाद्य न विद्यते जगति।

अभिनय — तथा मा वद। तेभ्य यत् रोचते तत् ते खादन्ति। वय व्यक्तिगत इच्छानुसार न किमपि कर्तुं क्षमा । भिन्नरुचिर्हि लो

दर्पणा — आगन्तूणां नामधेयं किम्। ते कथं भूताः।

अभिनयः — ते परिणीताः। दम्पती द्वयं समागच्छति।

दर्पणा — दम्पत्योः नाम यथाक्रम कथय।

अभिनयः — शशिः चन्द्रिका च।

दर्पणा — तौ दम्पती ?

अभिनयः — हां तौ दम्पती।

दर्पणा — अपिच।

अभिनयः — अरुणः छाया च।

दर्पणा — तौ दम्पती ?

अभिनयः — हा तौ दम्पती।

दर्पणा — तेषा नामधेयानि भारतीय नामान्येव।

अभिनय. — हा तेषा नामध्येयानि भारतीयान्येव।

दर्पणा — तेषां नामधेयाना अर्थः कः।

अभिनयः — शशि इत्यस्य चन्द्रमाः इति चन्द्रिका इत्यस्य ज्योत्स्ना इति अर्थः।

दर्पणा — इदमर्थद्वय समीचीन विद्यते :

अभिनयः — अरुणः इत्यस्य सूर्यः इति। छाया इत्यस्य प्रतिबिम्बः इति।

दर्पणा — सर्वाणि नामानि अतीव सुन्दराणि।

अभिनयः — भारतीयसस्कृत्या, भारत देशेच किं न सुन्दरं किं न मधुर भवति। भारतीय सस्कृतिमवगाहितु कलात्मक हृदयमत्यावश्यम्।

दर्पणा — किं ते चीर धरन्ति उत पेन्ट् धरन्ति।

अभिनयः — नाह जाने।

दर्पणा — आधुनिकेषु दिवसेषु वेषभूषाधारणे प्रजानां न नियमः वर्तते।

अभिनयः — तस्मात् अहं वच्मि नाहं जाने इति।

दर्पणा — अधुना द्रक्ष्यावः।

अभिनयः — भवती चषकादीन् अत्रैव स्थापय। उपवेष्टुं एकं वर्तुल फलकं अपिच तं परितः षट् कूर्चिकासनानि स्थापय।

दर्पणा — वर्तुलफलक समावेशः भविष्यति किं अद्य। (इति व्यवस्था करोति)

अभिनयः — (विहस्य) तद्वत् भविष्यति।

दर्पणा — सर्वं व्यवस्था कृता समीचीना।

अभिनयः — दर्पणे बहिः कवाट ताडन भवति।

दर्पणा — (आकर्ण्य) द्वार घण्टानादमपि भवति।

अभिनयः — हञ्जे दर्पणे भवती गत्वा कवाटमुद्घाटयतु।

दर्पणा — अरे भवान् गत्वा द्वारमुद्घाटयतु।

अभिनयः — स्त्रीणां स्वागतव्याहरण सुन्दर आकर्षणात्मकं भवति।

दर्पणा — हा अहमेव गच्छेयम्। (इति कवाटोऽद्घाटन करोति)

(तत प्रविशन्ति क्रमेण अतिथयः। शशिः, चन्द्रिका, अरुणः, छायाच। शशिः घण्टा पेन्टुं अन्तः पटुं कृत्वा कलाकार शिरोजैः पूर्णपादप्राणे बद्ध्वा प्रविशति। चन्द्रिकापि तथैव प्रविशति। अरुणः आपाद मस्तक सूटचा धूम्र नळिका मुखे निक्षिप्य पायमान प्रविशति। छाया बाहुहीन निचोल धृत्वा सिगरेटु पिबन्ती प्रविशति)

दर्पणा — सुप्रभात अतिथिभ्यः। सुस्वागतम्। आयान्तु प्रविशन्तु अन्तः।

सर्वे — गुड् मार्निङ्। (इति कथयन्ति)

अभिनयः — (तेषां अभिमुख गत्वा) अभिवादये अतिथयः। (इति नमस्करोति)

सर्वे — (तस्य हस्तावलम्ब्य) हावु डु यु डु । (इति कथयन्ति)

अभिनयः — अत्रोपविशन्तु भवन्तः । (इति आसनानि दर्शयति)

सर्वे — वय अनुगृहीतास्मः । (इति कुर्चीषु उपविशन्ति)

(अभिनय. दर्पणाच उपविष्टे)

अभिनयः — किं जल अपेक्ष्यते ।

शशिः — नहि ।

दर्पणा — धूम्रवर्तिकायाः भस्मपेटिका इय गृहृणातु । (इति भस्मपेटिका तत्र स्थापयति)

शशि. — भोः अभिनय व. गृह अत्यन्त सुन्दरं कलामयं अस्ति ।

चन्द्रिका — सत्यमेव एतत् भवन मुननमिव प्रतिभाति ।

अभिनय. — गृहमार्गणे परिश्रमा कृता किम् ।

शशिः — नहि । भवद्‌भिः दत्तसंकेत पत्रं विद्यते खलु । अस्माभि. न कोपि परिश्रमः कृतः ।

अरुण — भवता गेहः राजप्रासाद इव राजते ।

छाया — (मुखात् धूम्र निसर्जयन्ती) इद गृहं कलाराधकाना गृहमिव प्रतिभाति ।

अभिनय. — सत्यमेव अय गेह कलाराधकाना गेहः ।

शशिः — भवन्तः कलाकारा किम् ।

दर्पणा — हा वय कलाकारा एव ।

शशि. — अभिनयमहाभाग न प्रोक्त भवता इत परम् ।

अभिनय — अनागतसदर्भः आसीत् ।

चन्द्रिका — अजन्ता एल्लोरा दर्शनसमये अपि भवता न प्रोक्तम् ।

दर्पणा — अजन्ता एल्लोरा दर्शनेन सर्वं इहलोकजीवन व्यसरम् ।

छाया — अयि अभिनय अहं एकं प्रश्नं त्वा प्रष्टुं इच्छामि।

अभिनय — कस्ते प्रश्नः।

छाया — अजन्ता अजन्ता इति सर्वोपि कथयति पदस्यास्य कः अर्थ।

शशिः — छाये अजन्तापदस्य अर्थं न जानासि भवति।

छाया - नाहं जाने। यदि त्वं जानासि तर्हि कथय।

शशि — न+ज = अज+अन्त = अजान्ता। ज ह्रस्वीकरणे अजन्ता इति मे प्रतिभाति।

चन्द्रिका — अर्थ क।

शशि — ज इत्यस्य जन्म न व्यतिरेकार्थक. अर्थात् जन्मरहिता।

चन्द्रिका — पुनर्जन्म रहिता।

शशि — अन्त. नाशनमपि न विद्यते। तस्मात् अजन्ता।

चन्द्रिका — अहो अद्भुतम् ते भाषणम् कथनम् च।

अरुणः — शशिमहोदय त्वं संस्कृतपण्डित किम्।

शशि — नाहं संस्कृत पण्डित। किन्तु पञ्चम कक्ष्यात एस. एस. सी. पर्यन्त संस्कृत सम्यक् अपठम्। तेन परिमित ज्ञानेन अहं एवं वच्मि।

अभिनय — शशि महोदय भवान् एस. एस. सी. पर्यन्त संस्कृतमधीतवान् अस्ति। अहो ते विद्या सम्पूर्णता प्राप्ता।

शशि — (विहस्य) अभिनय मे संस्कृत विद्या वर्षाकाल विद्या। तस्या गंभीरता नास्ति।

छाया — दर्पणे महोदये। मम किञ्चित् पानीयमपेक्ष्यते।

दर्पणा — ददामि। (इति जलपात्रात् पानीयं किरति)

छाया — (पीत्वा) प्रमादेन कलया कुत्र विद्यते दर्पण दर्पणे।

दर्पणा — महाभागे एहि मया सार्धं। (इति उत्तिष्ठति)

छाया — हां। (इत्युत्थाय गच्छति तयासाकम्)

अभिनयः — शशि महोदय भवतः संस्कृताभ्यासमुद्दिश्य अजन्ता दर्शनवेलायां न प्रोक्तम्।

शशिः — भवन्तमिव अहमपि अजन्ता दर्शनेन आश्चर्यचकितः भूत्वा सर्वमपि जगत् व्यस्मरम्।

अरुणः — जगति प्रायेण सर्वेषां कलाराधकाना समागमः अजन्ता एल्लोरायामेव भवति। एतत् कलाराधकानां संगमस्थानं भवति।

दर्पणा — अस्माकं सर्वेषां समागमः अजन्तायां संजातः। अजन्ता समागमः मित्रसमागमाय हेतुः भवति।

अभिनयः — अजन्ताएल्लोरासबन्धेन विना अस्मत् समागमस्य संभवः न भवत्येव अद्य।

अरुणः — अजन्ता शब्दस्योत्पत्तिः जाग्र इति मे मान्यता।

अभिनयः — अनेके नेक मार्गेषु व्युत्पत्ति कथयन्ति।

शशिः — किं ते अभिप्रायः। (इति अभिनयं पश्यति)

अभिनयः — ममाभिप्रायस्तु सुदीर्घः भवति। अधुना अत्र समयः अल्पः भवति। चहां शीतलता प्राप्नोति प्रथमतः चहपानं कुर्वन्तु। दर्पणे चहा वितरतु भवती।

छाया — अयि भो अभिनय भवान् संस्कृत जानाति ।

अभिनय — जानामि किञ्चित् ।

दर्पणा — किञ्चित् नहि बहु जानन्ति ।

शशि — भवान् एम् ए परीक्षायां उत्तीर्ण अस्ति ।

दर्पणा — अयं पण्डित ।

छाया — किं ? पण्डित ?

अरुण — पण्डिता संस्कृत सम्यक् जानन्ति ।

चन्द्रिका — एते एम् ए नहि किम् ?

दर्पणा — एते एम् ए अपि अकुर्वन् ।

चन्द्रिका — संस्कृत एम्. ए किम् ?

दर्पणा — हां संस्कृत एम्. ए अपिच भाषाशास्त्रे अपि एम् ए. अकुर्वन् ।

छाया — अहो एम् ए द्वयम ।

अरुण — अभिनये गाने च निष्णाता इति मे मति। ।

चन्द्रिका — तत् कथम् अनुमीयते भवता ।

शशि — अस्य रूपमेव तस्य पाण्डित्य महिमान च घोषयति ।

छाया — वय भवन्तमुद्दिश्य सविस्तर ज्ञातु उत्सुकास्म ।

शशि — अयि भो अभिनय भवतां सपूर्णं परिचय ।

अभिनय — दर्पण ते पृच्छन्ति प्रत्युत्तर देहि ।

दर्पणा — एते अभिनय सगीतेच लालसा संस्कृत पण्डिता । एते भारतीय परम्परां अभिलषन्ति । एत सर्वदा गृह कलाश्रम कर्तुं इच्छन्ति । एत कविवरा ।

शशिः — अभिनयः इत्यनेन नाम्ना केवल अनुमीयते अय एकः उत्तम कलाभिमानी इति।

अरुणः — अद्य अत्रैव आकण्ठं पर्वभोजन करिष्यामः यतः अय उत्तम कलाभिमानी इति।

छाया — अवश्य अत्रैव भोक्ष्यामः। (सर्वे हसन्ति)

चन्द्रिका — अभिनय महोदय अजन्ता वय सर्वे द्रष्टु गताः। अजन्ता व्युत्पत्तिमुद्दिश्य को भवता अभिप्रायः।

अभिनयः — अजन्ता इत्यस्य पदस्य अर्थः एवमिति मे मतिः।

शशिः — कथयन्तु अस्मान्, प्रकाशितवत' कुर्वन्तु।

अभिनयः — चिन्त धातु. विद्यते। स' धातु चुरादि गणीयः। तस्मात् धातो. नामवाचक रुप. चिन्ता भवति। न+चिन्ता=अचिन्ता अर्थात् अत्र निवसता जनाना लौकिक चिन्ता न भवति।

छाया — अजन्ता किम्।

अभिनयः — अचिन्ता अपभ्रंशरुपेण जाता अजन्ता। यत् शशिना प्रतिपादितं तदपि सत्यमेव। इय व्युत्पत्ति. चिन्त धातोः समुत्पन्ना इति मे मतिः।

शशिः — भवद्भि. सम्यक् प्रतिपादित यत' जगति यत् दृश्य तन्नश्य भवति तस्मात् मम व्युत्पत्ति' असाधु रिति मे प्रतिभाति। अयि भोः भवता अभिप्रायः कः अजन्ता सौन्दर्यमुद्दिश्य।

चन्द्रिका — भवान् पण्डितः कलाकारः कविश्च। यदि भवान् वक्तु न समर्थः अन्य. कः कथयितु समर्थ. भवति।

अभिनयः — अजन्ता कुडयचित्र सौन्दर्याणा आयतनम्। मानवस्य चित्रकलाया पराकाष्टास्थान इदम्। अजन्ता सुन्दरी सदृशाः जगति स्त्रियः न विद्यन्ते। एतत् सर्वं चित्रितमपि सहजसौन्दर्य शोभितमिवाभाति। मे अजन्ता चित्रकलापेक्षया एललारा शिल्पकला अतीव रोचते।

शशि — अहं एल्लोरामुद्दिश्य प्रष्टुं उद्युक्ता अभवम । किन्तु अजन्ता मुद्दिश्य कथनानन्तरं तं प्रश्नं प्रष्टुं निश्चितास्मि । किन्तु प्रसङ्गवशात भवानेव वक्तुं प्रयतते ।

अभिनय — एल्लोरा शिल्पकलाया आयतनम । जगति शिलासु शिल्पा न कुत्रापि एल्लोरा अतिक्रामन्ति सौन्दर्ये ।

चन्द्रिका — एल्लोराया अर्थ कः ।

अभिनय — वेरूळ ग्रामसकाश विद्यते, तस्मात स प्रदेश वेरूळ प्रदेश । तत्र द्वादश ज्योतिर्लिङ्गषु एक विख्यात वैद्यनाथ नामक शिवालय वर्तते । वेरूळ शब्द इल्वलपुर शब्दात प्रादुर्भूत कालक्रमेण एल्लोरा अभूत इति केषाचन मतम ।

अरुण — तत्र अनेक धर्माणा मूर्तिकला सदृश्यन्ते । तासां कलाना माहात्म्य सविस्तर कथय ।

अभिनय — तत्र धर्मत्रयाणा अमर सौन्दर्य सगम जात ।

छाया — के ते धर्मा ।

अभिनय — हिन्दुधर्म । बौद्धधर्म । जैनधर्मश्च ।

अरुण — ते कथ विभक्ता आसन ।

अभिनय — मध्ये हिन्दुधर्म शिल्पकला राजते । तस्य धर्मस्य उभयत बौद्धधर्म शिलाखण्डा जैनधर्म शिल्पखण्डाश्च राजन्ते ।

शशि — हिन्दु धर्म कलाखण्डस्य आयतनस्य नाम किम ।

अभिनय — आयतनस्य नाम कैलास देवालय इति । स देवालय एकस्मिन महाशिलाखण्डे तक्षित । तत्र सर्वे शिल्पा नृत्यन्ति गायन्ति हसन्ति विरूपन्ति विचारयन्ति च । सर्वोऽपि देवालय कलायतन भाति ।

चन्द्रिका — कथं अस्मदीय पूर्वजा त देवालय अतक्षन ।

अभिनयः — केवलं सत्वेन ते पूर्वजाः अकुर्वन्। पूर्वजानां शक्तीनां अवधयः न आसन्। ते कथं क्षपासु अन्धकारबंधुरकाननेषु, वर्षासु, आतपेषु शीतवातेषु, निर्जनारण्येषु अद्रिषु कैः साधनैः कथं कतिवत्सराणि अतक्षन् न कोपि जानाति।

अरुणः — अधुना विज्ञानशास्त्र प्रगति रूप भेजे। अधुना तादृशं कर्तुं सुकरं भवति।

अभिनयः — अधुनापि सुकरं न भवति। यदि सुकरं भवति तर्हि तादृश शिल्पसृष्टि कर्तुं अशक्ताः भवन्ति। सः युगः अन्यः। तेषां अभिरुचिः अन्या। सा अपरा सृष्टिः। इयं शिल्पकला इव कुड्य चित्रावलिः अपिच सर्व भारतीयकला अपराजिता भाति।

छाया: — आधुनिकाः न करिष्यन्ति आधुनिकाः कलां न जानन्ति।

अभिनयः - केवल आधुनिकाः विडम्बना करिष्यन्ति नान्यत्। आधुनिकाः कलामुद्दिश्य न जानन्ति।

छाया — अजन्ता चित्रकलापेक्ष्या एल्लोरा शिल्पकलापेक्ष्या लोके आधुनिक वेषभूषासु विद्यमानाः सुन्दर्यः मे परं शिल्पकलाः कुड्य चित्राणीव संदृश्यन्ते। आधुनिकाः सुन्दर्यः परं सौन्दर्यवत्यः इति मे प्रतिभाति।

अभिनयः — छाये त्वं सौन्दर्यमुद्दिश्य न किमपि जानासि।

शशिः — सौन्दर्यस्य व्युत्पत्ति का।

दर्पणा — अयि अभिनय एतावत्पर्यन्त अजन्ता प्रकरणमुद्दिश्य अपिच एल्लोरा प्रकरणमुद्दिश्य यत् अस्माभिः चर्चा कृता मया सा सर्वा सम्यक् लिखिता। अधुना सौन्दर्य प्रकरणं प्रारंभिष्ये।

अभिनयः — यत् विलिख्यते त्वयाऽधुना तत् सर्वं एक नाटकरूपेण भावि कलाकारैः प्रयोगरूपेण प्रदर्शयितुं योग्यं भवतीति मे अभिप्रायः।

दर्पणा — अस्मदीय भाषणं सर्वमपि नाटकरूपेण यथा प्रयोक्तुं योग्यं भवति तथा अहं लिखामि।

छाया — सौन्दर्यस्य व्युत्पत्तिं कथयन्तु भवन्त ।

अभिनय — हा कथयामि सौन्दर्यं व्युत्पत्तिं शृण्वन्तु भवन्त । सुन्दरताया भाव सौन्दर्यम् ।

छाया — सौन्दर्ये प्रकारा सन्ति किम् ।

शशि — यदि प्रकारा सन्ति सविस्तर कथयतु भवान् ।

अभिनय — चतुर्विधानि सौन्दर्याणि सन्ति ।

अरुण — तानि सर्वाणि कथ सक्रमिष्यन्ति चेतनाऽचेतनाना जगति ।

अभिनय — सौन्दर्यं न कोऽपि क्रष्यति । तत आपणे न लभते । तत् जन्मत सक्रामित भवति ।

छाया — भवान् एतत सुन्दर इति कथ निर्णयिष्यति । केवल वदन आकर्पणात्मक विद्यते इति सा नारी उत स पुरुष सुन्दरी सुन्दर इति कथयति किम् ।

अभिनय — सौन्दर्यं एकत्रैव न धनी भवति तत् सर्वव्याप्त देहे उत वस्तुनि दृश्यते । केचन सौन्दर्यं भावयितु अशक्ता भवन्ति कथ्यमाना अपि ते अवगाहितुं असमर्था भवन्ति ।

अरुण — तस्मात् कथ तै अवगाहयिष्यते ।

अभिनय — पश्य । अजन्ता एल्लोरा दर्शनेन कजुराहो दर्शनेन मानव सौन्दर्यमित्यस्य पदस्य अर्थं विचारयिष्यति ।

छाया — विना च एल्लोरा अजन्ता दर्शनं मानव सौन्दर्यं प्रति न चिन्तयिष्यति ।

अभिनय — न चिन्तयिष्यतीति नाह कथयामि । किन्तु कलाखण्डस्य दर्शनेन विचारहीनोऽपि पूर्णतया अवगाहन कर्तुं प्रयतिष्यति ।

अरुण — अय उतर अर्थरहित ।

अभिनय — यूय किमर्थं आगतवन्त अजन्ता द्रष्टुम् ।

अरुणः — लोकः मुक्तकण्ठं अजन्ता एल्लोरामुद्दिश्य कथयति तस्मात् द्रष्टुं आगतास्मः।

अभिनयः — किं दृष्टानि भवता ? किं तृप्तिः संजाता ?

अरुणः — कथने कीदृशः उत्साहः, श्रवणे कीदृशः आनन्दः, वर्तते तादृशः आनन्दः दर्शने न विद्यते।

चन्द्रिका — अरुण, तथा मा वद कतिचित् चित्राणि अतीव हृदयङगमानि सन्ति। कानिचन साधारणानि वर्तन्ते।

शशिः — ममापि न किमपि आश्चर्यकारकं विद्यते।

अभिनयः — आधुनिकाः जनाः स्वतः ते सुन्दराः न सन्ति। सौन्दर्यं न विचारयिष्यन्ति। सौन्दर्यं विलोक्यापि विचारधारा न प्रसारयन्ति। ते अतीव जीवन लोलुपाः भवन्ति।

चन्द्रिका — आधुनिकाना विमर्शनात्मका बुद्धिः वर्तते तस्मात् ते सर्वं सुन्दरमिति नाङ्गीकुर्वन्ति।

अभिनयः — (विहस्य) अधुना प्रपञ्चः विज्ञानं इति मोहान्धकारे पतित्व सर्वे विज्ञानेन बध्दा सर्वं विमर्शयन्ति तत् न योग्यम्।

शशिः — भवान् आधुनिकान् नाङ्गीकरोति।

अभिनयः — तथा नहि। अधुना प्रपञ्चे एकः व्याधिः प्रसृता अस्ति।

शशिः — का व्याधिः।

अभिनयः — आधुनिकाः प्रपञ्चे सुन्दरं असुन्दरं मन्वते। असुन्दरं सुन्दरं मत्वा कथयन्ति। सौन्दर्यं सर्वस्य कथं भवति इति न कदापि चिन्तां कुर्वन्ति। सर्वोऽपि अनुकरण व्याधिना पीडा भजते। अनुकरणेन सौन्दर्यं कथं भवतीति न कोपि उत न कोपि चिन्तयति। काकः न कुक्कुटायते न मयूरायते इति न कोपि चिन्तयति।

शशिः — सर्वोऽपि सुन्दरः सर्वापि सुन्दरी न भवतः किम्।

अभिनयः — नहि !

शशि — सुन्दरता कथं निर्धारयिष्यति भवान् ।

अभिनय. — सौन्दर्यं एक अवयवाश्रितं न भवति। तत सर्वत्र सर्वावयेषु प्रसारितं व्याप्तं भविष्यति । एकमात्र दर्शनेन प्रथम दर्शनेन केवलं आपादमस्तकं यत् आकर्षणात्मकं दृश्यते अपि च चलनेषु विभिन्नासु भङ्गिमासु आह्लादात्मकं भवति तदा तत् सौन्दर्यात्मक भविष्यतीति रसिकाना अभिप्रायः।

अरुणः — भवता प्रेक्तं सौन्दर्यं चतुर्विधं वर्तते इति तत् कथं प्रतिपादयतु।

अभिनय — अहं संस्कृत भाषाया सौन्दर्यमीमासा इति पुस्तकमेकं लिलिखामि। तस्मिन् ग्रन्थे मया बाह्य सौन्दर्यमुद्दिश्य एव प्रतिपादितम् ।

(१) जन्मतः सर्वाङगविकासेन संक्रामितम् ।
(२) पोषण व्यायाम संवर्धितम् ।
(३) स्नान विलेपनाहार्यादि प्रभासितम् ।
(५) विडम्बना वर्धितम् ।

चन्द्रिका — यदि भवता आलोचनानुसारं पश्येम सुन्दर पुरुषाः सौन्दर्यवत्यः स्त्रियः अतीव विरलाः भविष्यन्ति ।

अभिनयः — सौन्दर्यं सर्वत्र न भवति ।

दर्पणा — स्त्रीणा केशसंपत सौन्दर्य साधनं भवति ।

अरुण — येषा केशसंपत् विरलं भवति तेषा सौन्दर्यं नास्तीति भवता अभिप्रायः किम् ।

अभिनयः — प्रपञ्चसाहित्ये शिरोजानुद्दिश्य सर्वे कवयः अधिकतरं सुन्दरं वर्णयामासुः। सौन्दर्यस्य शिरोजसम्पत् अङ्गं भवति। न कापि तन्वी शिरोजान् तृणीं करिष्यति ।

अरुणः — तस्मात् ते सम्यक् केशकर्तनं विधाय शिरोजान् अलं कुर्वन्ति ।

अभिनयः — शिरोज कर्तनेन अलङ्कारः कथं भवति। तथा कर्तनमेव अयोग्यमिति मे अभिप्रायः। शिरोज कर्तनं नारीणा न्यूनसौन्दर्यस्य हेतुः भवति। तत न जानन्ति मौढ्याः नार्यः ।

चन्द्रिका — बह्व्यः स्त्रियः अर्धशिरोज कर्तनेन अत्यन्त सौन्दर्ययुक्ताः इव दृश्यन्ते ।

छाया — शिरोज कर्तनं सर्वेषां मण्डनं न भवति। कासाचन अतीव सुन्दरं भवति यदि ते स्वतः आजन्मत सुन्दर्य चेत्।

अभिनयः — तत् सत्य। सहज सौन्दर्यवतीना शिरोजकर्तनं शिरोज मण्डनं सम्यक् सुन्दरं च भवति न तु सर्वासाम्।

दर्पणा — शिरोज सम्पत् येषा विद्यते ते शतशः सौन्दर्यवर्धन कारक वेणीबन्धनानि करिष्यन्ति। शिरोज कर्तनेन एकमेव सौन्दर्य भवति पिशाचाना इव ।

अरुण — दर्पणे तथा मा वद। आङ्गलेयाः शिरोज कर्तनेन सुन्दर्यः भवन्ति।

अभिनयः — आङ्गलेयाना अन्यपाश्चात्याना तत् सम्यगेव भवति। यत ताः सर्वाः पुरुषवेषे विडम्बमाना. धूम्रपान कुर्वन्ति। तेषा शरीरधर्मः पुरुषाणामिव प्रतिभाति। तत् सौन्दर्य नास्ति। भारतीयाना सौन्दर्य विषये अनेके ग्रन्थाः विलिखिताः। भारतीयाना सौन्दर्य विषये अनन्य साधारण आलङ्कारिक परम्परा विद्यते।

चन्द्रिका — का सा परम्परा।

अभिनयः — चीरधारणं, शिरोजालंकरण, शृङ्गार चेष्टादिक करण इत्यादिकम्। अपि च स्त्रीणा शरीरतु पुरुषाणामपेक्षया भिन्नतया दृश्यते। तत् पाश्चात्य स्त्रीपुरुषेषु न सदृश्यते ।

दर्पणा — तस्मादेव सकल धरातल अजन्ता आगत्य प्राचीन संस्कृति ज्ञात्वा भारतीय सौन्दर्यस्य दासता भजते। शेक्स्पियर महाकविः एकस्मिन् नाटके भारतीय स्त्रीणा सहज सौन्दर्य चीरवेष्टने भ्राजते इति उल्लेखितवान्।

छाया — तत् कथम्।

अभिनयः — शरीरस्य विना चीर वेष्टनं अर्धनग्न वस्त्राच्छादनेन

मण्डन भवति तर्हि तत् मण्डन नहि तत् जुगुप्सा कारक मण्डन भवति। साधारणत गोपित वस्तुषु उत्सुकता रसिकता, अधिका प्रतिभाति। बहि प्रकटीकृत वस्तुषु उत्सुकता न भवति किन्तु जुगुप्सा भवति। केषाचन सहज सुन्दरीणा सर्वावयव पोषणेन मासवसादि विकारेण लावण्येन शरीर धर्म सम्यक उत्तजात्मक भवति। तादृशा स्त्रिय यत् किमपि कुर्वन्ति यत किमपि धरन्ति तत् सर्व सुन्दर भवति। न तु सर्वासाम्। मूढा जना तत् न पश्यन्ति अपि च न विचारयन्ति।

शशि — तस्मात् शिरोजालकरण, चोरमण्डन अन्यालङ्करणानि स्त्रीणा सौन्दर्य विषये उत्तम स्थानमभजन।

दर्पणा — शिरोज कर्तनेन सर्वा सौन्दर्यवत्य न भवन्ति।

अभिनय — यदि शिरोज कर्तनेन सौन्दर्याधिक्य भवेत् तर्हि निकृन्त शिरोजालङ्कृतवत्य नार्य सर्वा सुन्दर्य भवेयु एव। किन्तु तथा न भवन्ति। भूत प्रेत पिशाचादीना दृश्य कल्पयन्ति।

छाया — बालिकाना शिरोज कर्तन सम्यक् भवति।

दर्पणा — बालिकानामपि शिरोज कर्तन न सौन्दर्य प्रसादन भवति।

अभिनय — शिरोज कर्तनम् एक व्याधि रूपेण प्रसारिता। सौन्दर्य वितर्कितवत्य युवत्य पाश्चात्य व्यामोहेन कुर्वन्ति। ता न जानन्ति सौन्दर्य मुद्दिश्य किमपि 'किमवहि मधुराणा मण्डन नाकृतीनाम्।'

छाया — सौन्दर्यमुद्दिश्य कानि पुस्तकानि उत काव्यानि विद्यन्ते।

अभिनय. — सस्कृत भाषाया सर्वमपि अलकार शास्त्र सौन्दर्यमुद्दिश्यैवास्ति। साधारणत सस्कृत भाषाया सर्वेपि कवय यथासदर्भ सौन्दर्य शास्त्रमुद्दिश्य अकथयन्। तत् सर्वमपि शास्त्र पठित्वा विलोक्य च शिल्पिन शिल्पकला अवर्धयन्। सौन्दर्यशास्त्र सस्कृतभाषाया परिपुष्ट परिपूर्ण विद्यते।

दर्पणा — सर्वेपि अजन्तागुहा एल्लोरागुहाश्च बहुकालात् प्राक् सौन्दर्यप्रसाराय पूर्वजै चित्रिताः शिल्पिताश्चाभवन्। अल्पज्ञा मूढा. पाश्चात्या

व्यामोहे वंभ्रम्यमाना: अन्धा: परम्परागत संस्कृति अलङ्कारचयं च नाशयन्ति इति मे मनीषा।

अभिनयः — हा सा एव मम मनीषाऽपि।

छाया — शिरोज कर्तनं नारीणा असौदर्यस्य हेतुः इति भवता सिद्धान्तः।

दर्पणा — इयं सर्वेषा मनीषा न केवलं आवयोः।

अभिनयः — जगति सर्वं सौन्दर्ययुक्तं न भवति।

अरुणः — (जलं शरीपात्रात् सर्वेभ्यः वितरति) अद्य सौन्दर्यमुद्दिश्य बहु विषयाः ज्ञाताः आसन्। तथैव यदि नाट्यमुद्दिश्यापि किञ्चित् ज्ञाप्यते तर्हि वयं किञ्चित् भारतीयता ज्ञास्यामः।

अभिनयः — नाठ्यमुद्दिश्य कथयितुं अयं समयः नहि। अनन्तरं यदा कदापि कथयेयम्।

छाया — तथा मा वदतु भवान्। इयन्तं विषयं कथयन्तु यत् यः कोऽपि सम्बन्धः विद्यते वा नाट्यसौन्दर्ययोर्मध्ये।

अभिनयः — द्वयोर्मध्ये बहुसम्बन्धः विद्यते। सौन्दर्यस्य यथा चतुर्विध रीतयः वर्तन्ते तद्वत् नाट्यस्यापि चतुर्विध रीतयः वर्तन्ते।

छाया — कान्ताः। (इति धूम्रवर्ति ज्वालामति धूम्रं पिबति नाशापुटाभ्या धूम्रं त्यजति)

दर्पणा — (धूम्रपात्रं तस्याः पुरतः निक्षपति)

अभिनयः — कथयामि शृणु। आङ्गिक आहार्य वाचक अभिनयमिति नाट्यं चतुर्विधं वर्तते।

अभिनयः: — अङग सम्बन्धि अर्थात् करचालन शरीराकुञ्चनमित्यादिकं आङ्गिकं भवति। आहार्यं यथारसं वेषभूष कबरीभर धारणम्। वाचकमित्यस्य कुत्र कदा कथं विचार संचार प्रयत्नैः यथाभिनय भाषण कर्तव्यं तत् वाचकं भवति। अभिनयं नाम भाव प्रकटनया नवरसोन्मेष शालिन्या यदि कथावस्तु नटः अभिनयति सः अभिनयः भवति।

चन्द्रिका — अत्र सौन्दर्यस्य आवश्यकः कथम् भवति। सर्वोपि उपरोक्त प्रकारेण चतुर्विधाभिनयं करिष्यति।

अभिनयः – जगति सर्वे सर्वेषा नहि। कानिचन केषाचन अन्ये च अपेक्षा भवन्ति।

चन्द्रिका — नाट्य सुन्दराः सुन्दर्यः केवलं करिष्यन्ति ?

अभिनयः — केवलं सुन्दर्यः सुन्दराः अपि नाट्यं न करिष्यन्ति।

छाया — भवदीय भावनां विशदयन्तु।

अभिनयः — विना च सौन्दर्यं चतुर्विधाभिनयम् पराकाष्ठां न भजते।

चन्द्रिका — नाट्यं कर्तुं सुन्दर शरीरयष्टिः अपेक्ष्यते किम्।

अभिनयः — चञ्चलचालन गात्री सौन्दर्यमूर्तिः नाट्यं कर्तुं सक्षमा भवति। यदि सौन्दर्यं नास्ति सा नाट्यं कर्तुं अयोग्या भवति अनर्हा भवति।

छाया — सर्वाः स्त्रियः पुरुषाः सर्वे कर्तुं न शक्ताः किम् ?

अभिनयः — सर्वाः स्त्रियः कर्तुं शक्ताः भवन्ति। किन्तु सुन्दर स्त्रीणां नृत्यं नाट्यं लास्य प्रेक्षकानां आनन्ददायकं भवति। न तु सर्वासाम्।

छाया — तस्मात् सुन्दर्यः केवलं नाट्यशिक्षिताः भवितव्याः इति भवता अभिप्रायः।

अभिनयः — हा सुन्दर्यः नाट्यशिक्षिताः भूत्वा नाट्यकलां स्वीय सौन्दर्य हावभावादिभिः दर्शयित्वा रसिकजन मनोभिरामा करिष्यन्ति। अन्याः याः सौन्दर्यहीनाः सन्ति ताः सम्यक् शिक्षणा गृहीत्वा शिक्षिकाः भूत्वा कला सर्वव्यापिनीं कुर्वन्तु इति ममाभिप्रायः। विना च सौन्दर्यं, समसम विभक्ताङगं विद्युदीव स्फुरणं, शीघ्र कर चालनादिकं, ताल राग भावज्ञानं, कला क्लिष्टेन अभ्यस्तापि सा सौन्दर्यहीना भवति।

छायाः — विना सौन्दर्यं नाट्यं न भवति किम्।

दर्पणा — सौन्दर्यहीनं नाट्यं लावण्यहीन वपुरिव भवति।

अभिनयः — तन्नाट्य कदापि मनमोहनं न भवति।

अरुणः — पाश्चात्य देशेषु सर्वेपि नाटच कुर्वन्ति तत् सम्यगेव भवति।

अभिनयः — अधुना लोके सर्वोऽपि पाश्चात्य व्यामोह व्यधिना पीडितः अस्ति। सः सर्वं सर्वदा पाश्चात्य जीवनपद्धत्या तोलयित्वा पश्यति। एतादृश्य चिन्तना देशद्रोहकारी भवति। सर्वोपि देश स्वत्वेन विराजते। किन्तु वय भारतीयाः स्वत्व निहाय परान् अनुकुर्मः। इय स्थितिः पतनोन्मुखा भवति।

अरुणः — भवन्तः किञ्चित् आवेशेन कथयन्ति सर्वमपि।

अभिनयः — आवेशेन नहि महदाशयेन कथयामि। शृणु। पाश्चात्याना नाटचेषु भावः नास्ति। तेषु नाटचेषु केवलं चलनचालन भवति। तन्नाटच व्यायाम पूर्णम्।

अरुणः — नाटचशास्त्र सर्वं व्यायाम परिपूर्णं दरी दृश्यते।

अभिनयः — अङ्गी करोमि किन्तु व्यायामेपि भाव प्रकटना कथा वस्तुमाश्रित्य सर्वरससकुला सामाजिकान् आनन्द पारवश्यान् करोति। तादृशी भावना रसपूर्णता तेषु नाटचेषु शून्या भाति। तत् नाटच कामगुण प्रकोपयति। नाटचमुद्दिश्य भारतीय कल्पनाः अन्याः। भारतोयाना सर्वाः कलाः शृङ्गारपूर्ण भक्तिभावैः परिपूर्णा भूत्वा शान्ते पर्यवसिता भवन्ति। एतादृशी भावना तेषा न विद्यते। ते केवलं कामावाञ्छा अभिवृद्धचर्यं नाटच कुर्वन्ति। तत् सामूहिक।

छाया — द्वयोर्नाटचोः मध्ये महदन्तर विद्यते।

अभिनयः — पाश्चात्याना नाटचेषु भावः नास्ति। तेषु नाटचेषु कामुकता वर्तते। तेषा नाटचाना सौन्दर्य प्राधान्य नास्ति तत्र सर्वेपि नाटच कर्तुं सक्षमाः भवन्ति। ते सामूहिक नाटच करिष्यन्ति। मम दृष्टचा तन्नाटच नाटच नहि। तच्चशास्त्रं नहि। तन्नाटय सर्वोऽपि करिष्यति।

छाया — भारतीयाना कथ वर्तते।

अभिनयः — भारतीय नाटच जन्मतः याः सुन्दर्यः अत्यन्त उत्साहिन्यः विद्यन्ते तामामेव नाटच योग्य भवति न तु सर्वासाम्।

छाया — तथा यदि स्यात भारतीयाना नाटच सर्वेषा नोपयोग्य भवति। सर्वेपि तस्मिन् नाटच निष्णाताः न भविष्यन्ति।

अभिनय — सर्वेणापि नाटच निष्णात भवितु शक्यते। किन्तु ते नाटच करण अयोग्या भवन्ति। यदि तादृशाः सौन्दयहीना भावनारहिता नाटच करिष्यन्ति तर्हि सामाजिकेषु न कोपि रसग्राही भविष्यति। सर्वे सामाजिका कुडचस्तम्भा एव भविष्यन्ति। न केवल भारतीय नाटच, किन्तु जगति सर्वे सर्वेषा न भवन्ति। सर्वोऽपि सर्वं प्राप्तु यत्नः करण अयोग्य भवति।

अरुण — कथ तादृश नियम विनिमयाश्च विद्यन्ते।

अभिनय — सर्वं जगत् नियम विनियमाधीन वर्तते तस्मात जगति विद्यमानेष्वपि नियम विनियमा वत ते यत वय जगति वर्तामहे।

दपणा — यदि त्व आपण गत्वा किमपि वस्तुक्रयण सर्वाङ्ग सुदर वस्तु शल्य परीक्षा कृत्वा आनददायिन वस्तु आकषणात्मक वस्तु क्रीणासि किमथम्? तथैव जगति सर्वे आनन्दाकषणात्मक युवतीना नाटचमेव द्रक्ष्यन्ति आनन्दमनुभविष्यन्ति। इय लोकपरिपाटि। इय कला।

अरुण — सौन्दर्य नाटचयोमध्य अत्यन्त सन्निहितत्व विद्यते इति अधुना मया ज्ञातम्।

अभिनय — तस्मादेव अजन्ता कुडचचित्राणि एल्लोरा शिल्पानि कजुराहो शिल्पानि अचेतनानि किन्तु सर्वरसिकाना हृदयाह्लादकानि भवन्ति। यदि तानि सर्वाणि चलेयु तर्हि तानि देवता मूतय भूत्वा सव प्रपञ्च उन्मत्त करिष्यन्ति। एतादृश सौन्दर्य जगति न कुत्रापि विद्यते। शिरोज कतनेन चित्रविचित्र वेष्टनेन अङ्गरागादीना उपयोगन सौन्दयवत्य न भवन्ति।

चन्द्रिका — तर्हि केन प्रकारेण सौन्दमवत्य भवन्ति।

अभिनय — जन्मतः सक्रामित सौन्दय नृत्य नाटच सगीत कवितादिभि समिश्रित वपु सुन्दर भवति। यदि एतादृश सौन्दयमपत युवत्या उत पुरुष वतते तत् सौन्दर्य दिव्यमेव भवति।

शशि:—तस्मात् चित्रलेखनशिल्पकवितानृत्यगायनमित्यादि ललितकला साङ्गिकं इति कथयन्ति।

दर्पणा — तादृश सौन्दर्य संगीत कविता नाट्य शिल्पादीना अभ्यसनं प्रशिक्षितत्वं च पूर्वजन्म सुकृदादेव संजायेते नत्वन्यथा।

अभिनय: — चतुष्षष्टि कलानां समवाय: एव नाट्यं। नाट्ये कवितायां च सर्वकला: संदृश्यन्ते।

छाया -- अन्तत: निष्कर्ष: क:। का सुन्दरी भवति जगति। कथयन्तु।

अभिनय: — जगति अजन्ता, एल्लोरा, कजुराहो इत्येतत सौन्दर्य त्रयं अपराजितं भवति नत्वन्यत्। सर्वमपि भारतं कलामयं भवति। भारतस्य भरतखण्डमिति नामान्तरं विद्यते। अधुना अहं नामान्तरं करोमि तत् भारतं कलाखण्डं इति।

अरुण: — अधुना अभिनय: स्वीयरचित गीतिकाभ्य: एका गीतिकां श्रावयिष्यति गानरूपेण।

छाया — वयं सर्वे श्रोतुं उत्सुका: स्म: गायन्तु अभिनय महोदया:।

अभिनय: — अधुना मया गातव्यं किम्?

छाया — हां गातव्यम् इति सर्वेषां आग्रह:।

अभिनय: — अधुना नाहं गास्यामि। मया एकदा गीतं ता गानध्वनि मुद्रिका चालयेयम्।

चन्द्रिका — तथैव ध्वनिमुद्रिका चालयन्तु।

अभिनय: — दर्पणे ध्वनिमुद्रिका चालय।

दर्पणा — यथाज्ञापयति भवान्। (इति अन्त: गत्वा चालयित्वा आगच्छति)

गीतम् (भैरवी रागे)

रमते केया वर्षा तरुणी
वर्षासिञ्चित गात्री श्यामा
मलयाशानिल ज्वालितकामा
तटिदिव पीता चञ्चल रामा ध्रु.

ग्रीष्मातप ग्लापित मानसरङ्गे
भावजवल्ली वलयित तुङ्गे
केवल मन्मथ सहचर सङ्गे
सतत चिन्तनकर्शित मदङ्गे १

उद्घृत वसनात् दर्शित वर्तुलजङ्घा
वेणीबन्धन छलनात् दर्शितकक्षा
अधरस्पन्दन दर्शित चुम्बनशिक्षा
मनसिज कुड्मल दर्पितवक्षा २

अम्बरगलिता चान्द्रमसीशकला
जलधरगर्जन विगलितचपला
रम्भानर्तन स्रस्ता काञ्चीमाला
रमते युवजन भावजशाला ३

(सर्वे करताल ध्वनि कुर्वन्ति)

शशि — (उत्थाय) तत्र भवन्तो रसिका मित्रोत्तमा । अद्य अभिनय दर्पणे स्वकलात्मक दृष्ट्या भावनया च अस्माकं अजन्तामुद्दिश्य एलोरामुद्दिश्य सौन्दर्यं नाट्यमुद्दिश्य इष्टगोष्ठिषु सविस्तर अरोचताम् । तस्मात् अस्मन् पक्षात् ताभ्या धन्यवादान् वितरामि ।

दर्पणा — (उत्थाय) अस्मदीय भाषण सर्वमपि अपराजितम् इति नाटक रूपेण मम लेखिनीद्वारा परिसमाप्तम् । युष्मान् सर्वान् एतादृश सुसमय कारयान् च सरवाक्य शुभास्त पन्थान सन्तु इति अह परिसमापक वाक्यानि ब्रवीमि । ओशम् ।

(सर्व उत्थाय एकैकश हस्तचालन विधाय गच्छन्ति, रमते केषा ध्वनिमुद्रिका चलति सर्व गान शृण्वन्त सरन्ति)

(यवनिका पतति)

।। मतिभ्रमणम् ।।

(ततः प्रविशति घूर्णितशरीरः पिबन् सुमतिः)

सुमतिः — तमहं मारयेयम्। तं जीवन्तं न पश्यामि। तेन मित्रद्रोहः कृतः। सः पापात्मा। सः चिरकालं जीवितुं नार्हं। मधुरं जल्पन् मे उदरे छुरिकामचालयत्। सर्वं मे समक्षं वृत्तम्। मे मतिभ्रमणं जातम्। अहं सुमतिः। मे मतिः कलङ्किता। मे मतिः भ्रमते। मे निस्सारे संसारे शान्तिर्नास्ति। इयं पत्नी दुष्टा। अति कामतृष्णाभूयिष्टा। अत्याशा पूरिता। जगति अत्याशा दुःखास्पदा भवति। एषा पुंश्चली। अस्मिन् काले निरोधः व्यभिचाराय आस्पदं भवति। अयं मे मित्रं इति मया व्यवहृतम्। सः पातकं चकार। अहं कुत्र वसेयम्। अयं संसारः निस्सारः। जगत् सर्वं मायावृत्तम्। (इति अधः पतति)

(यवनिका पतति)

(ततः प्रविशति यवनिकापुरतः व्यवस्थापकः ध्वनियन्त्रं हस्ते गृहीत्वा)

व्यवस्थापकः — अयि भोः रसिकसामाजिकाः। अधुना युष्माभिः दृष्टं कथं सुमतिः जीवने भ्रामितमतिः संजातः। केन कारणेन तस्य मतिभ्रमणं जातम्। इत्येतत् सर्वं प्रत्यक्षं यूयं द्रष्टुं उपविष्टाः। नाटकदर्शने, नाटकप्रारम्भे अतिक्रान्तवेला माभूयात्। अहं नाटककर्तारं परिचयं विधाय नाटकमुपक्रमिष्ये। एतन्नाटकं गीर्वाणान्ध्र भाषाप्रवीणेन परीक्षित् शर्मणा कृतम्। अनेन आन्ध्र गीर्वाण भाषयोः महती सृष्टिः कृता। अनेन विविध काव्यानि विलिखितानि। सप्तविंशति नाटकानि परीक्षिन्नाटकचक्र इति नाम्ना प्रकाशितानि। अस्य गीर्वाण गेय चक्रवर्ती इति द्वितीय नाम विद्यते। अयं अखिल भारतीय कालिदास पुरस्कार ग्रहीता। अयं महाकविः। एतन्नाटकं अनेन महाकविना कथं चित्रितं भवन्तः प्रत्यक्षं पश्यन्तु

अनुभवन्तु। इति अह्ह आशासे। नमासि। (इति अन्त गच्छति)

(तत अपसायते यवनिका)

(सुमति, गायत्रीगौरीभ्या क्रीडन् आस्ते)

सुमति — वाले गायत्रि त्व विष्णुस्तोत्र शान्ताकार भुजग शयन श्लोक कथय।

गायत्री — (उपविश्य नमस्कुर्वन्ती कथयति)

शान्ताकार भुजग शयन पद्मनाभ सुरेशम्।
विश्वाकार गगन सदृश मेघवर्ण शुभाङगम्।
लक्ष्मीकान्त कमल नयन योगिहृध्यान गम्यम्।
वन्दे विष्णु भवभयहर सर्व लोकैकनाथम्॥

सुमति — एहि मम समीप अह त्वा चुम्बयम्।

गायत्री — (आगत्य पितर चुम्बति, पिता पुत्रिका चुम्बति)

सुमति — वाले अह सर्व जगत विस्मरामि तव चुम्बनन ते पितु जन्म सायक वभूव।

गौरी — पित अह त्वा चुम्बयम। (इति पितु समीप गच्छति)

सुमति — बाले गौरि, त्व प्रथमत या कुन्देन्दु तुषारहार श्लोक उक्त्वा मां विचुम्ब।

गौरी — (भूमौ उपविश्य नमस्कुर्व ती)

या कुन्देन्दु तुषारहारधवला या शुभ्रवस्त्रावृता।
या वीणा वरदण्ड मण्डितकरा या श्वेतपद्मासना।
या ब्रह्माच्युत शङ्करप्रभृतिभिर्देवैस्सदा पूजिता।
सामापातु सरस्वती भगवती निश्शेष जाड्यापहा॥

(इत्युक्त्वा धावन्ती पितरं गत्वा त चुम्बति)

सुमतिः — (ता उद्धृत्य स्कन्धे निक्षिप्य चुम्बति सापि पितरं चुम्बति) बाले गायत्रि त्वं अन्तः गत्वा मातरं अत्राह्वय।

गायत्री — तथैव पितः। (इति अन्त. गच्छति)

सुमतिः — (गौरीं हस्ताभ्या उद्धृत्य) एहि एहि चन्द्रभो.। मा बिभेहि चन्द्रभोः उदय शिखर हिण्डमाना चारु चन्द्रभोः यामिनी चुम्बनेन रागि चन्द्रभोः। एहि एहि। (इति ता कन्दुकवत् उपरि कृत्वा हस्ताभ्या गृहणाति)

गायत्री — (हठात् प्रविश्य) पितः माता वमति।

सुमति — कि माता वमति? (इति गौरीं अध सस्थाप्य अन्तः गच्छति) किञ्चित्कालानन्तरं तया सह प्रविशन्) हञ्जे कथं वमनमभूत्।

सुषमा — याथार्थ्येन वमन नहि किन्तु वमन शङ्का अभूत्।

सुमति — बाले युवा अन्त' गच्छताम्। (द्वावपि अन्त' गच्छत') सुषये पश्य, अस्माकं अधुना पुत्रिका द्वयं वर्तते।

सुषमा — अधुना किमासीत्।

सुमति -- तृतीयवार पुत्रोगा भवति, पुत्रिका वा भवति। इति मत्वा इतः परं सततिः मास्तु इति प्रथमत' एव निरोध शस्त्रक्रिया कारिता।

सुषमा — (सोफाया उपविश्य) उदरे अवकलनं भवति। किमपि उदरे परिभ्रमति।

सुमतिः — कथं ते उदरे परिभ्रमति? किमर्थं अवकलन भवति। अन्तर्वर्त्नी त्व तु न भवति। गच्छ त्वं स्वप। अहं मे मित्र सुधीर समीपं गत्वा त आनयेयम्।

सुषमा — गच्छन्तु भवन्त त आनयन्तु।

सुमति — पादत्राणे धृत्वा वहिः गच्छति।

सुषमा — (सोफाया शेते किमपि ऊहाचित्र कल्पयन्ती)

गौरी — शयन गृहात् अम्बे अम्बे। (इति रुदन्ती मातरं प्राप्नोति)

सुषमा — बाले गौरि एहि मदङ्क आरोह। (इति ता स्वीय अङ्कतल आस्य लालयन्ती गीत गायति)

गीतम् (मालकौंस रागे)

भ्रम भ्रम भ्रम भ्रमर
भज भज भज नीरज षण्टम्
पिब पिब पिब मधुबिन्दुम्
कुसुमात् कुसुम विटपात् विटपम् ध्रु.

झु झु झु गुञ्जसि मधुरम्
कुसुमे कुसुमे पिबसि च मकरन्दम्
झु झु झु शब्द कुर्वन्न काशम्
चपल व्रजसि वेगेनेव विमानम् १

प्रति कुसुम पीत्वा मकरन्दम्
कुरुषे परिमल कुसुमाकर विटपम्
मधुरस सभारित फलभर विटपम्
भ्रमर ते हृदय रसमय हृदयम् २

गायत्री — अधुना किमर्थं बहिर्गतः।

सुषमा — कार्यालय कार्यार्थं गतः।

गायत्री — अद्य कार्यालयः पिहितः अस्ति।

सुषमा — कथम्।

गायत्री — अद्य रविवासरः खलुः।

सुषमा — तर्हि मित्रगृहं गतः इति मन्ये।

गायत्री — अम्बे तव आरोग्य साधु न वर्तते किम्?

सुषमा — साधु विद्यते।

गायत्री — त्वं जृम्भणं करोषि। तव निद्रा नक्तं पर्याप्तं नाभूत् किम्?

सुषमा — गायत्रि अधुना संध्या समयः। त्वं प्रातिवेशिक बालिकाभिः साकं खेलितुं गच्छ। (बहिः गच्छति गायत्री। गौरीं शयनगृहे शाययित्वा प्रत्यागत्य एकान्ते उपविश्य चिन्तयन्ति आस्ते)

(बहिः द्वारघण्टा नादः भवति, सुषमा गत्वा द्वारं उद्घाटयति, प्रविशति सुमतिः)

सुमतिः — सुषमे कथं वर्तते ते स्थितिः।

सुषमा — यथापूर्वं विद्यते। विकारः भवति उदरे।

सुमतिः — वैद्यः सुधीरः आगमिष्यति अधुना। (किञ्चित् विचार्य) सुषमे बालिके कुत्र गतवत्यौ अधुना।

सुषमा — ते स्वपतः अन्तः।

सुमतिः — साधु ते आवयोः भाषणं न श्रुनवत्यौ।

सुषमा — एवं वदति भवान् कारणं किम्?

सुमतिः — अधुना मे मित्रं वैद्यः सुधीरः आगमिष्यति। अस्मदीय भाषणं पुत्रिके नाश्रृणुता इति मे अभिप्रायः।

सुषमा — बाले गौरि एहि मदङ्कं आरोह। (इति तां स्वीय अङ्कतले आरोप्य लालयन्ती गीतं गायति)

गीतम् (मालकौंस रागे)

भ्रम भ्रम भ्रम भ्रमर
भज भज भज नीरज षण्डम्
पिब पिब पिब मधुबिन्दुम्
कुसुमात् कुसुमं विटपात् विटपम् ध्रु.

झुं झुं झुं गुञ्जसि मधुरम्
कुसुमे कुसुमे पिबसि च मकरन्दम्
झुं झुं झुं शब्दं कुर्वन्नाकाशम्
चपलं व्रजसि वेगेनेव विमानम् १

प्रति कुसुमं पीत्वा मकरन्दम्
कुरुषे परिमल कुसुमाकर विटपम्
मधुरस संभारितं फलभर विटपम्
भ्रमर ते हृदयं रसमय हृदयम् २

ते पक्षानिल निसृत मञ्जुल शब्दम्
श्रुत्वा बालाः भय चकिता नित्यम्
बाला शकुन्तला भीता सोत्कम्पम्
मधुकर गुञ्ज नितरां निर्जन देशे मधुरम् ३

जम्बूफल सादृश्यं ते रूपम्
कुसुम परागे लुठितं ते देहम्
दृष्ट्वा फल बुद्ध्या सानन्दम्
आगच्छति प्रसितुं कीरकुलम् ४

(गानं श्रुत्वा गौरी सुप्ता गायत्री मातुः समीपमागच्छति)

गायत्री — मातः पिता कुत्र ?

सुषमा — पिता बहिर्गतः।

गायत्री — अधुना किमर्थं बहिर्गतः।

सुषमा — कार्यालय कार्यार्थं गतः।

गायत्री — अद्य कार्यालयः पिहितः अस्ति।

सुषमा — कथम्।

गायत्री — अद्य रविवासरः खलुः।

सुषमा — तर्हि मित्रगृहं गतः इति मन्ये।

गायत्री — अम्बे तव आरोग्यं साधु न वर्तते किम्?

सुषमा — साधु विद्यते।

गायत्री — त्वं जृम्भणं करोषि। तव निद्रा नक्तं पर्याप्तं नाभूत् किम्?

सुषमा — गायत्रि अधुना संध्या समयः। त्वं प्रातिवेशिक बालिकाभिः साकं खेलितुं गच्छ। (बहिः गच्छति गायत्री। गौरीं शयनगृहे शाययित्वा प्रत्यागत्य एकान्ते उपविश्य चिन्तयन्ति आस्ते)

(बहिः द्वारघण्टा नादः भवति, सुषमा गत्वा द्वारं उद्घाटयति, प्रविशति सुमतिः)

सुमतिः — सुषमे कथं वर्तते ते स्थितिः।

सुषमा — यथापूर्वं विद्यते। विकारः भवति उदरे।

सुमतिः — वैद्यः सुवीरः आगमिष्यति अधुना। (किञ्चित् विचार्य) सुषमे बालिके कुत्र गतवत्यौ अधुना।

सुषमा — ते खपतः अन्तः।

सुमतिः — साधु ते आवयोः भाषणं न श्रुतवत्यौ।

सुषमा — एवं वदति भवान् कारणं किम्?

सुमतिः — अधुना मे मित्रं वैद्यः सुवीरः आगमिष्यति। अस्मदीय भाषणं पुत्रिके नाश्रृणुता इति मे अभिप्रायः।

सुषमा — (विहस्य) अयं ते अभिप्रायः।

सुमतिः — त्वं ते आरोग्यंप्रति तस्मै सविस्तरं कथय।

(बहिः कवाट ताडनं द्वारघण्टा नादश्च)

सुषमा — (श्रुत्वा) कोवा समागतः इति मन्ये।

सुमतिः — क आगमिष्यति सुधीरात् ऋते। (इति उक्त्वा कवाटमुद्घाटयति)

(ततः प्रविशति शतष्कोपसहितः पेटिका हस्तः वैद्यवेषे सुधीरः)

सुषमा — (उत्थाय) अयि भोः सुधीर अभिवादये। (इति नमस्करोति)

सुधीरः — सुषमे कथं विद्यते ते आरोग्यम्।

सुषमा — मम आरोग्य सम्यक् वर्तते। न कोऽपि विशेषः।

सुमतिः — अरे सुधीर त्व अत्र उपविश। (इति आसनं दर्शयति)

सुधीरः — (उपविशति) अरे सुमते मे परिचारिका उक्तवती त्वं आगत्य प्रति निवृत्तोऽसि इति। तस्मात् अह भ्रातृजायायाः किमभूत् इति विचारयन् अनुपदमेवागच्छम् भ्रातृजाया द्रष्टुम्।

सुमतिः — भवान् तव भ्रातृजायाविषये अत्यन्तश्रद्धावान् इति जानाम्यहम्।

सुधीरः — अधुना किमापतितम्।

सुमतिः — तव भ्रातृजायायाः ह्यः प्रभृति वमनविकारः भवति किन्तु वमन न भवति।

सुधीरः — वमनं कथं भवति। अजीर्णतया भवति प्रायेण नत्वन्यथा।

सुमतिः — त्वं वैद्यः। तस्मात् त्वमेव जानासि। कारणं नाहं जाने।

सुधीरः — अधुना एता आपाद मस्तक परीक्षा करिष्यामि।

सुमतिः — सुषमे त्वं सर्वं तस्मै कथय सः शल्यपरीक्षा करिष्यति।

सुषमा — मम कापि बाधा नास्ति।

सुधीर — तव न कापि वाधा विद्यते इति जानाम्यहम्। तथापि परीक्षा कर्तव्या विद्यते।

सुमति — लोकोक्ति एव विद्यते कुटुम्बविषया गोपनीया व्याधिविषया घोपणीया इति। तस्मात् तव कुत्र का वाधा विद्यते सर्वमुद्दिश्य सुधीराय घोपय। सविस्तर कथय।

सुषमा — (आगत्य मञ्चे शेते)

सुधीर — (ता शतष्कोपेन परीक्ष्यते)

सुमति — किमस्ति कापि व्याधि ।

सुधीर — नहि। इति तस्या वामहस्त नाडी पश्यति।

सुमति — किमेषा रुग्णवती।

सुधीर — नहि। एषा अन्तर्वत्नी।

सुमति — (विषण्णवदन सुधीरेण सार्थम्) कथ एषा अन्तर्वत्नी जाता।

सुधीर — अह कथयेय अनन्तरम्।

सुमति — सुषमे त्व गच्छ अन्त । किञ्चित् चहा कृत्वा आनय।

सुधीर — भ्रातृ जाये नाह अभिलाषामि चहा किंतु काफी देहि।

सुषमा — हा सत्य काफी दास्यामि। (इति अन्त गच्छति)

सुमति — अरे सुधीर। कथ एषा अन्तवत्नी जाता।

सुधीर — सुमते कदा शस्त्रचिकित्सा सतान निरोधार्थं कृता।

सुमति — मास चतुष्टयमभूत।

सुधीर — क चकार शस्त्रचिकित्साम्।

सुमति — अत्र पार्श्वे विद्यमान वैद्य विद्यासागर ।

सुधीर — हा य विदशात् प्रत्यागत ।

सुमति — हा।

सुधीर — अथ तज्ञ ।

सुमति — कथ एषा अन्तर्वत्नी जाता।

सुधीर — क्वचित क्वचित शस्त्रचिकित्सा सफलता न प्राप्नोति। शस्त्रचिकित्सा कृतापि वीयनलिका वीर्यप्रवाहवेगेनविदलन प्राप्य वीर्यं स्रावयति। वीर्यवेगसमक्ष वीयनलिका शक्तिहीना भवति। तस्मात् कारणात् अन्तर्वत्नीत्व जात इति मे मति ।

सुमति — एव भवति किम ?

सुधीर — भवत्यव।

सुमति — तदा किं प्रयोजन शस्त्र चिकित्सया।

सुधीर — तस्मात् विचार्य शस्त्रक्रिया कतव्या। नोचेत अन्यमार्गं अनुसर्तव्यम भवति।

सुमति — शासनस्य आदेश खलु अधिकसर्तात मा भूयात इति। तस्मात एव मया कृतम् ।

सुधीर — अधुना ज्ञातम। पुन शस्त्रचिकित्सा कर्तव्या इति मे ऊह ।

सुमति — अह तस्य विद्यासागरस्य समीप गत्वा पृच्छयम्। कोत्र दोप इति।

सुधीर — सोऽपि एवमेत्र कथयिष्यति। गमन निरथकम। किन्तु षमने न कापि हानि ।

सुमति — सावकाश गच्छयम।

सुषमा — (प्रविश्य) सुधार महादय नीयता काफी। (इति काफी सुमतय सुधोराय च ददाति)

सुधीर — (काफी गृहीत्वा पिवति, सुमति अपि काफी पिवति) सुषमाभ्रातृजाय काफी सम्यक कृतवती। अह सर्वदा चहापेक्षया काफीमेव अधिक पिवामि।

सुमतिः — अरे सुधीर केचन कथयन्ति काफीपेक्षा चहपानं साधुरिति। तस्मात् सर्वदा अहं चहा पिबामि।

सुधीरः — द्वावप्येतौ निरर्थकौ। तथापि चहपानं साधुरिति मे मनीषा। यस्य यत् रोचते तत् ग्राह्यं भवति। (उत्थाय) अरे गच्छेयमहम्। वैद्यालये रोगिणः बहवः सन्ति। तान् सर्वान् परीक्ष्य औषधं दातव्यं वर्तते। यदि अहं तत्र न भवामि तर्हि संमर्दः अतीव भविष्यति। नमस्ते भ्रातृजाये। (इति नमस्कृत्य गच्छति)

सुमतिः — अयं अतीव सज्जनः वैद्यः। मे परममित्रम्।

सुषमा — अहमपि तं तथैव भावयामि। (इति द्वावपि अन्तः गच्छतः)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(ततः प्रविशतः कुमार्यौ, सुषमा रङ्गमञ्चे शेते सुमतिः सोफायां उपविश्य साप्ताहिकं पठन् आस्ते)

गायत्री — पितः अद्य कार्यालयं न गतं किं भवता।

सुमतिः — नहि।

गौरी — किमर्थमिति न गतं भवता।

सुमतिः — मातुः स्वास्थ्यं न सम्यक् विद्यते।

गौरी — माता ज्वरपीडिता किम्।

सुमतिः — हा बाले माता ज्वरपीडिता।

गौरी — (सुमति उत्सङ्गे उपविश्य) पितः अद्य अस्माकं भोजनं माता न पचति किम्।

सुमति — माता गच्छति।

गायत्री — माता अस्वस्था खलु कथं दास्यति।

गायत्री — पितः अद्य माता स्वपतु भवान् वयं च मिलित्वा पाकं अन्योन्य सहायेन कुर्मः।

सुषमा — (विहस्य) हसे बाले यदि यूयं सर्वे मिलित्वा पाकं करिष्यथ तर्हि खादकः कः अस्ति।

गायत्री — अहो मातः वयं सर्वे खादिष्यामः। सर्वं प्रसङगा बुभुक्षाहन्य माना भवन्ति।

सुमति — हा सत्यमुदीरितं गायत्रि। बुभुक्षितानां न रुचिर्न पाकः। सुषमे कुमार्यौ बुभुक्षिते त्वमेव उत्थाय स्वयंपाकं कुरु।

सुषमा — (उत्थाय) कुमार्यौ न बुभुक्षिते। भवानेव बुभुक्षितः इति मन्ये। (इति अन्तः गच्छति)

सुमति — हञ्जे अहं विद्यासागरं वैद्यगृहं गत्वा प्रत्यागच्छेयम्। अयि बाले अधुना गृहं विहाय बहिः मा गच्छताम्।

गायत्री — पितः भवान् अधुना अस्माकं किमपि खादितुं आपणात् आनय।

सुमति — अधुना कथम्। मातः स्वयंपाकं करोति। अनुपदमेव भोक्तव्यं विद्यते। अधुना अहं आपणं न गच्छामि।

सुषमा — भो। गृहे शाकाय न किमपि विद्यते। कोशातकीः, कारवेल्लान् उत पटोलीर्वा आनय।

सुमति — तथैव। (इति पादत्राणे धरति)

गौरी — पितः अहमपि त्वया साकं आगच्छेयम्।

सुमति — अहं अधुना वैद्यालयं गच्छामि। तत्र बालिकानां प्रवेशोनास्ति।

गौरी — अहं त्वया साकं आगमिष्यामि मा गृहाण। (इति तस्य पादबन्धनं स्वाय हस्ताभ्यां करोति)

सुमतिः — सुषमे, एहि पश्य एषा कथं मां बध्नाति।

सुषमा — (प्रविश्य) हसे गौरि तथा मा कुरु। अधुना पिता प्रत्यागमिष्यति। तव खाद्यमपि आनयिष्यति।

गायत्री — गौरि आवां अत्र क्रीडिष्यावः एहि। (इति तां कर्षति)

गौरी — (विलपन्ती गायत्रीसकाशं गच्छति)

सुमतिः — बाले गौरि अहं त्वत्कृते मोदकान् आनयेयम्। (इति तां सान्त्वयति)

गौरी — (निश्शब्दं भजते)

सुमतिः — (तां गौरीं विचुम्ब्य तस्याः हस्ते एकं रूप्यकं निक्षिप्य) बाले मा रुदि। अहं युवयोः मोदकान् आनयेयम्। अधुना अहं आगच्छेयम्।

गौरी — (विहस्य सुमतिं कण्ठे गृह्णाति)

सुमतिः — (तां उद्धृत्य चुम्बति)

सुषमा — अहो प्रेम अधिकं बभूव। अलं अनेन चुम्बनेन। त्वं सत्वरं गत्वा शाकादिकं आनय।

सुमतिः — हां अधुना गच्छामि। (इति तां गौरीं विसृज्य गच्छति)

सुषमा — बाले गायत्रि त्वं गत्वा कवाटं पिधेहि।

गायत्री — (गच्छति कवाटं पिनद्धि)

(सर्वे अन्तः प्रविशन्ति)

(यवनिका पतति)

*   *   *

तृतीयं दृश्यम्

(विद्यासागरस्य वैद्यालय, तत्र टेबुलोपरि औषध पात्राणि, बाटिलानि विद्यन्ते, तत्र विद्यासागर एकस्या सोफाया उपविश्य पठति, तत्र एका परिचारिका कर्म कुर्वन्ती आस्ते)

विद्यासागर — स्वसे, कथ विद्यते स बाल । यस्य श्व शस्त्रक्रिया कृता।

परिचारिका — महोदय, स पुष्णाति। सन्तोषी लसते।

विद्यासागर — स मृत्युमुखात् बहि निर्गत इति मन्ये।

परिचारिका — तत सत्यम।

विद्यासागर — *श्व: का विद्यते शस्त्रक्रियार्थम्। पश्येय देहि मे* नामसारिणीम।

परिचारिका — आनयामि भो । (इति सारणीमानीय ददाति)

विद्यासागर — श्व कर्करोगिण शस्त्रचिकित्सा करणीया विद्यते। सर्व सन्नद्ध कुरु। श्व दशवण्टावादन समये प्रात भविष्यति)

परिचारिका — अवश्य महोदय। करिष्यामि सर्व व्यवस्थाम्।

(विद्यासागर पुन पठन् आस्ते। बहि द्वारघण्टा वादनम् भवति)

विद्यासागर — स्वसे कोवा आगत । कवाट ताडयति गच्छ। उद्घाटय कवाटम।

परिचारिका — तथैव। गच्छामि। (इति गच्छति, कवाट उद्घाटयति) एहि भो अन्त । (सुमति अन्त आगच्छति)

सुमति — सुप्रभातम् वैद्य महादय।

विद्यासागर — सुप्रभातम। एहि सुमने। उपविशतु भवान्। (इति आसन दर्शयति)

सुमति — (उपविशति)

विद्यासागरः — अधुना आगमनस्य हेतुः कः।

सुमतिः — भवन्तं द्रष्टुं समागतोऽस्मि। न कोपि विशेषः।

विद्यासागरः — धन्योस्मि।

सुमतिः — अहं एकं प्रश्नं पप्रच्छुः अस्मि।

विद्यासागरः — कोऽयं प्रश्नः।

सुमतिः — निरोधार्थं कृत शस्त्रक्रिया यदा कदापि निष्फला भविष्यति किम्।

विद्यासागरः — अधुना अस्य प्रश्नस्य कारणं किम्।

सुमतिः — अहं ज्ञातुं इच्छामि।

विद्यासागरः — निष्फला भवितुं शक्यते। सर्वदा सर्व शस्त्रक्रियाः सफलाः न भवन्ति।

सुमतिः — कारण किं विद्यते तथा भवितुम्।

विद्यासागरः — अनेकानि कारणानि सन्ति। अधुना अस्य प्रश्नस्य आविर्भावः कुतः।

सुमतिः - भवान् मे शस्त्रक्रिया अकरोत् संतान निरोधार्थम्।

विद्यासागरः — हा सत्यं अह शस्त्रक्रिया अकरवम्।

सुमतिः — किन्तु मे जाया अन्तर्वत्नी जाता।

विद्यासागरः — अन्तर्वत्नी जाता कथम् ?

सुमतिः — तदर्थमेवाहं अत्रागत्य भवन्तं पृच्छामि।

विद्यासागरः — त्वं अन्तः एहि। त्वामहं परीक्ष्ये।

सुमतिः — (अन्तः गच्छति)

विद्यासागरः — (अन्तः गच्छति)

परिचारिका — (नौ विलोक्य हसन्ती शस्त्रक्रियार्थं सर्वं सामग्रिं सज्जयति)

सुमति — (प्रत्यागच्छति, पृष्ठत विद्यासागर आगच्छति)

विद्यासागर — सुधीर व मा विचारय। मे शस्त्रक्रिया सफलता जाता। कथ एतत् अन्तरनीत्व सवृत्त नाह जानामि। किन्तु सम्भव विद्यते। यत शस्त्र क्रियानन्तरमपि वीर्य प्रवाहवेगेन कामोद्रेकेन च वीयनलिकाया विदलन भविष्यति। तस्मात् बभूवेति मे अभिप्राय ।

सुमति — एषा शङ्का बहुधा पीडयति माम्।

विद्यासागर — भवान् भवत पत्नीं एकदा आनीय दर्शय मह्य, तदा परीक्ष्य कथयिष्यामि।

सुमति — सुधीर मे मित्रम्। सोऽपि तज्ञ वैद्य शस्त्रक्रियादक्ष सोऽपि एवमेकादीत्।

विद्यासागर — हा त सुधीर जानाम्यहम्।

सुमति — महोदय श्व अह मे पत्नीं आनीय तुभ्य दर्शयेयम्।

विद्यासागर — अवश्यम् दर्शय।

सुमति — (उत्थाय) नमस्ते। (इति गच्छति)

(विद्यासागर स्वसाच अन्त गच्छत)

(यवनिका पतति)

* * *

चतुर्थ दृश्यम्

(गायत्रीगौर्यौ काष्टत पुत्तलिकाभि । गायत्री एकस्मिन् कोणे खेलति, गौरी अन्यस्मिन् कोणे क्रीडति। गायत्री कुङ्कुमभरिणहस्ता गौरीसमीपमागत्य)

गायत्री — गौरि अद्य मे गृहे मे पुत्रिकायाः चम्पायाः विवाहः भवति। तस्मात् त्वं एहि। (इति कुङ्कुम रेखा तिलकयति)

गौरी — गायत्रि कति पुत्राः पुत्रिकाश्च सन्ति।

गायत्री — मे तिस्र पुत्रिका सन्ति।

गौरी — पुत्राः न सन्ति किम्।

गायत्री — न सन्ति।

गौरी — मम पितुः अपि पुत्राः न सन्ति।

गायत्री — मे तिस्रः पुत्रिकाः ताळीपत्रकृतका.। ता. सर्वदा चीना शुका वेष्टिताः वर्तन्ते।

गौरी — कोऽयं वरः तव चम्पायाः।

गायत्री — मे पिता आपणात् चम्पाकृते एका पुत्तलिका आनीतवान्। स. वरः। मे प्रथम पुत्री वधू.। तयो विवाहः भविता अधुना।

गौरी — अहं मम कुटुम्बेन साकं आगच्छेयम्।

गायत्री — एहि अवश्यम्। अहं गच्छामि।

गौरी — त्वं एधि तिलकयिष्यामि। अयं अस्य देशीय नारीणा परम्परागत साम्प्रदायः। (इति कुङ्कुम भरणी आनीय तस्मात् कुङ्कुम गृहीत्वा गौरी गायत्र्याः फाले तिलकयति)

(ततः प्रविशति सुमति.)

सुमतिः — (ता विलोक्य) किं कुरुतः भवत्यौ।

गायत्री — पितः अद्य मे कन्यकायाः विवाहः त्वमपि आगच्छ विवाहार्थम्।

सुमतिः — अरे तव पुत्रिकायाः विवाहः क्रियते। (इति ता चुम्बति)

गौरी — पितः मामपि चुम्ब। (इति त प्रतिगच्छति)

सुमति — (द्वावपि स्वनिकट गृहीत्वा आलिङ्गय चुम्बति)

सुषमा — (स्वयपाक गृहात् प्रविश्य) किं विलम्ब्य समागतम्।

सुमति — अह विद्यासागर गृह गत्वा प्रत्यागच्छम्।

सुषमा — किं शाक आनीतम्।

सुमति — अरे अह विस्मृतोऽस्मि शाकामानेतुम्।

सुषमा — अधुना किं कुर्याम्।

सुमति — मुद्गसूप कुरु। तदेव पर्याप्त भविष्यति। आम्रव्यञ्जन विद्यते। तक्र विद्यते।

सुषमा — मुद्गसूप अकरवम्।

सुमति — पर्याप्तम् भवति।

सुषमा — वैद्य विद्यासागर गृहम् गत किम?

सुमति· — हा विद्यासागर गृहम् गतम्।

सुषमा — किं स अवोचत्।

सुमति — स त्वा द्रष्टु अपिच आपादमस्तक वैद्यकीय परीक्षा कर्तुं इच्छति।

सुषमा — दृष्ट खलु तेन सुधीरेण।

सुमति — दृष्टमेव किन्तु अयमपि दिदृक्षति।

सुषमा — अयि बाले भवत्यौ अन्त गत्वा भोजन कुरुताम्। (द्वावपि गच्छत) अरे सुमते अह सर्वदा सन्निधि गन्तु नेच्छामि।

सुमतिः — स वैद्य। त्वा द्रष्टुमिच्छति।

सुषमा — परीक्षावसर· नास्ति अधुना।

सुमति — का ते चिन्ता। का ते भीतिः।

सुषमा — चिन्ता नहि। भीतिर्नास्ति।

सुमतिः — तर्हि विचल तस्य सकाशम्।

सुषमा — अधुना मे न कोपि रोगः वर्तते। केवलं वमनं भवति तदा तदा।

सुमतिः — वमनं रोगिणामपि भवति। यदि अन्यः रोगः विद्यते वा नोचेत् अन्तर्वत्नीत्वं वा वयं न जानीमहे। तस्मात् एकदा परीक्षाकरण योग्य इति मे अभिप्रायः।

सुषमा — सुधीरः जगाद खलु अन्तर्वत्नीत्वमिति।

सुमतिः — सः मे मित्रम्। तस्य हृदयं जानाम्यहम्। सः कदापि असत्यं न भणति।

सुषमा — तर्हि अधुना विद्यासागरस्य समीपे किमर्थम्।

सुमतिः — ते मूर्खता मा क्रोधिनं करोति।

सुषमा — हा आगच्छामि किञ्चित् काल उपविशन्तु। बालिकयोः भोजनानन्तरं आवां भुक्त्वा गच्छावः। (इति अन्तः गच्छति बालिके भुक्त्वा आगत्य)

गायत्री - पितः मम एका द्विचक्रीवाहनं क्रीणातु।

सुमतिः — अधुना नहि क्रेष्यामि यदि त्वं कक्ष्याया उत्तीर्णा भवसि तदा अहं क्रीत्वा आनयेयम्।

गौरी — पितः मम एका वृहती पुत्तलिका आनय।

सुमतिः — (गौरीं उत्सङ्गे नीत्वा) हा आनयेयम् पुत्तलिकाम्। (इति चुम्बति)

सुषमा — भोक्तुं आगच्छतु भवान्।

सुमतिः — आगच्छामि। बालिके भवत्यौ अन्तः आगच्छताम्। (इति ताभ्या अन्तः प्रविशति)

सुषमा — (तान् अनुसरति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(विद्यासागर टेबुलोपरि किमपि लिखन्नास्ते, टेबुलोपरि अनेकानि पुस्तकानि सन्ति, परिचारिका सिरजि सन्नद्ध कुर्वन्ती आस्ते)

(तत प्रविशत सुषमासुमती)

विद्यासागर — (विलोक्य) स्वागत, आगच्छताम्। अत्रोऽपविशता। (इति आसन दर्शयति)

सुमति — अनुगृहीतोऽस्मि। (इति उपविशति) एषा मम पत्नी सुषमा। (इति ता दर्शयति)

विद्यासागर — नमस्ते। उपविशतु भवती। (इति आसन दर्शयति सुषमा उपविशति) स्वसे। (इति परिचारिका आह्वयति)

परिचारिका — एषाऽस्मि।

विद्यासागर — स्वसे परीक्षागृहे सकलव्यवस्था कुरु।

परिचारिका — यथाज्ञापयति। (इति अन्त ग छति)

विद्यासागर — सुषमे, का ते बाधा।

सुषमा — मम न कापि बाधा विद्यत।

विद्यासागर — वमन भवताति तत्र भवा प्राप्तम्।

सुषमा — तदा तदा वमन भवति। तदा तदा उदरे किमपि चलतीव प्रतिभाति।

विद्यासागर — वमन प्रारम्भ कियत्कालमभूत्।

सुषमा — एक पक्ष अभूत्।

विद्यासागर — उदर अपि बाधा विद्यत इति भवन्या प्राप्तम्। सा बाधा असहना भवति उत सदा भवति ?

सुषमा — सज्जा भवति।

विद्यासागरः — एहि मत्सकाशम्।

सुषमा — (एति)

विद्यासागरः — (करदीपिकया तस्याः नेत्रयोः विलोक्य) भवती अन्तः परीक्षागृहं प्रविशतु।

सुषमा — (अन्तः प्रविशति)

विद्यासागरः — (तस्याः पश्चात् अन्तः प्रविशति)

सुमतिः — (साप्ताहिकानि दैनदिनानि पश्यन् आस्ते)

(तत्र दूरध्वनि यन्त्र नादः भवति, सुमतिः उत्थाय तत्र गत्वा फोनं गृहीत्वा) हलो नमस्ते इयं विद्यासागरस्य वैद्यशाला। अत्र न कोपि विद्यते न्यायवादी। संख्या वक्रिता। (इति फोनं निक्षिपति, आगत्य स्वस्थाने उपविशति। अत्रान्तरे विद्यासागर सुषमे प्रविशतः)

विद्यासागरः — सुमते, केय दूरध्वनिः।

सुमतिः — एतत न्यायवादिनः गृहं ? किं इति कोवाऽपृच्छत्। अहं अवदम् संख्या वक्रिता इति।

विद्यासागरः — केचन सर्वदा अपसंख्या भ्रामयित्वा पृच्छन्ति एवमेव। हो सुमते पश्य एषा अन्तर्वत्नी आस्ते। उक्तं खलु मया शस्त्रक्रिया सफला जातापि अन्तर्वत्नीत्वस्य संभवः अस्तीति। तस्मात् मा शङ्कां कुरु।

सुमतिः — न कापि मे शङ्का विद्यते। किन्तु एषा रोगार्ता जाता किं इति शङ्का समजनि। अधुना भवद्भिः प्रोक्तं खलु इतः परं न कापि शङ्का बाधते माम्।

विद्यासागरः — स्वसे चहपानादिकं वितीर्यताम्।

परिचारिका — वितीर्यते भोः। (इति अन्तः गच्छति)

विद्यासागरः — सुमते तव वयः कियत्।

सुमति — मम वय सप्तविंशति ।

विद्यासागर — तव पत्न्या वय ।

सुमति — तस्या वय चतुर्विंशति ।

विद्यासागर — कदा युवयो परिणय अभूत। तदा युवयो वय कियत्।

सुमति — सप्तवर्षेभ्य प्राक् विवाह समभूत। तदा एतस्या वय अष्टादश। मम वय एकविंशति ।

विद्यासागर — कति पुत्रा पुत्रिकाश्च विद्यन्ते।

सुमति — पुत्रिका द्वयम् वर्तते।

विद्यासागर — हा उक्त भवता पूर्वम्, यदा त्व निरोध शस्त्रक्रियार्थं आगतोसि तदा। विस्मृत मया।

विद्यासागर — तयो वयसी।

सुमति — वप षटकम वप चतुष्टय च।

विद्यासागर — इत पर सतानाभाव कल्याण भवति तव कुटुम्बस्य।

सुमति — तस्मादेव अह शस्त्रचिकित्सा अकारयम।

विद्यासागर — भवतु नाम पश्याम कि भविष्यतिवा। मा विचारय। (परिचारिका चहद्रोणान क्षरी पात्र एकस्मिन् विस्तीण सूर्पे सस्थाप्य आनयति तत्र निक्षिप्य गच्छति)

विद्यासागर — (*चहा वितरणार्थं क्षरीपात्र उद्धरति*)

सुषमा — भवान् मा करोतु। अह वितरण कुर्याम। (इति तस्य हस्तात् क्षरीपात्र गृहीत्वा द्रोणषु वितरति, सर्वे चहा पिबन्ति)

विद्यासागर — स्वसे सर्वं शस्त्रक्रियार्थं यथा निर्दिष्ट कृतम्।

परिचारिका — यथा निर्दिष्ट कृतम् भो ।

सुमतिः — (उत्थाय वैद्यस्य हस्ते हस्तं निधाय करचालनं कृत्वा) नमस्ते गच्छावः। (इति वदति)

सुषमा — नमस्ते। (इति उत्थाय सुमतिना सार्धं गच्छति)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(प्रातः अष्ट घण्टावादन समयः गायत्रीगौर्यौ पुस्तकपेटिके गृहीत्वा पाठशालां गन्तुं उद्युक्ते, सुषमा सर्वं सज्जयित्वा ते प्रेषितुं प्रयतते, सुमतिः अन्तः स्वपिति)

गायत्री — मातः अद्य शालागमने विलम्बः जातः आवां गच्छावः।

सुषमा - (द्वावपि विचुम्ब्य) अप्रमत्ततया गन्तव्यम्। (इति ते प्रेषयति कवाट बन्धनं करोति)

सुमतिः — (उत्थाय आगत्य कुर्च्यां उपविश्य) सुषमे चहा देहि। (इति पत्रिका पठति)

सुषमा — (चहा आनीय तस्मै दत्वा) किमद्य कार्यालयं न गच्छति किम्।

सुमतिः — गच्छेयम्। किञ्चित् विलम्ब्य गच्छेयम्।

सुषमा — (किञ्चित् साशङ्कम्) विलम्ब्य कथम्। अधुना सत्वरं स्नात्वा पाथेय गृहीत्वा गच्छतु भवान्। सर्वं कर्म परिसमाप्तम्।

सुमतिः — तथैव। (इति चहा पीत्वा उत्थाय अन्तः गच्छति)

सुषमा — (स्वात्मान अलङ्कुर्वन्ती आस्ते)

(बहिः द्वार घण्टानादः)

सुषमा — (सत्वर गत्वा कवाट उद्घाटयति, सुधीरेण सार्धं शनै) अरे त्व अधुना सत्वर समागतोऽसि। एतावत्पर्यन्त सुमति कार्यालय न गत ।

सुधीर — (शनै) भवतु नाम। अह किमपिकैतववाद करिष्ये। (इति अन्त प्रविशति)

सुषमा — एहि एहि सुधीर महाशय एहि। (आश्चर्येण)

सुधीर — भ्रातृजाये तव आरोग्य कथ वर्तते। भ्राता सुमति गृहे वर्तते किम् ?

सुषमा — मम आरोग्य पूर्ववत् वर्तते। न चिन्ता कार्या। सुमति महोदय स्नाति। उपविशतु भवान्। (इति आसन दर्शयति)

सुधीर — (उपविशति पत्रिका पठति)

(तत प्रविशति सज्जित सुमति)

सुमति — (सुधीर विलोक्य) अरे अधुना कथ अत्रागमनम्।

सुधीर — अत्र पार्श्वे एक रोगिण द्रष्टु समागतोऽस्मि मार्गमध्ये भवदीय गृहम्। सुषमा आया कथमास्ते इति द्रष्टु आगतोऽस्मि।

सुमति — रुग्ण द्रष्टु समागत भवान्। तथा कथय।

सुधीर — अय मृत्युमुखी आस्ते। त द्रष्टु समागतोऽस्मि।

सुमति — (किञ्चित् साशङ्कम्) अरे सुधीर, अह अधुना कार्यालय गच्छामि। मया सार्धं सुषमा तत्र वैद्यालयप्रति आनयेयम्। ता अह तत्र वैद्यालय विहाय कार्यालय गच्छेयम्। त्व ता सम्यक् शल्यपरीक्षा विधाय तस्यै बलवर्धनार्थं किमपि औषध सूचय।

सुधीर — अहमपि तदेव सूचयितु समागतोऽस्मि। त्व भवत यथा रोचत तथा कुरु।

सुमति — मम यानस्य स्वच्छताकरणार्थं अयच्छम् एतावत्पर्यन्त नहि गतम्। दिनद्वय प्राप्स्यते मया। तत अधुना आया तव यानेन आगच्छतु ।

सुधीर· — तव कथनस्य आवश्यकता नास्ति। अहं युवां मम कारू याने नेष्यामि।

सुषमा — (सुषमा सम्यक् अलकरोति)

सुमति — सुषमे तुभ्यं किं रोचते मे ऊहा रचना।

सुषमा — हा तथैव करोतु भवान्। मह्यं रोचते भवदीय कल्पना। संध्या समयपर्यन्तं अहं तत्रैव सुधीरस्य वैद्यालये स्थास्यामि भवत. आगमन पर्यन्तम्।

सुमतिः — त्वं सम्यक् औषधं गृहीत्वा तत्रैव विश्रान्ति सुखमनुभव। बालिके कदा गृहं प्रत्यागच्छत ?

सुषमा — सार्धं पञ्चघण्टावादन समये ते प्रत्यागच्छत.।

सुमति — अहं सार्धं घण्टाचतुष्टये सुधीर वैद्यालयं आगच्छेयम्।

सुषमा — तथैव।

सुधीर — अरे सुमते, भातृजाये सुषमे एताम् मया मार्गम्। (इत्युक्त्वाय ताभ्या साकं गच्छति)

(यवनिका पतति)

* * *

सप्तमं दृश्यम्

(सुधीरस्य वैद्यालय तत्र एकस्मिन् कोष्ठे सुधीर सुषमे सलपन्त्यौ आस्ताम्, तत्रैव गवाक्षस्य पार्श्वभाग सुमति कुड्यकर्णौ भूत्वा सर्वं शृणोति)

सुधीर — प्रयसि सुषमे, ते अन्तर्वत्नीत्वं मदीय सगमात् जातम।

तत् आवा जानीवहे। सुषमे त्वा अह पूर्वं अकामय, किन्तु ते पितरौ मया सार्थं नाऽकुरुता ते विवाह। अह एतावत्पर्यन्त अविवाहित। लोकदृष्टया। किन्तु आवा दम्पती मनसा वचसा कमणा च ते द्वावपि पुत्रिके आवयो. सजाते। आवा जानीव ।

सुषमा — अरे सुधीर त्व शतथा सुधीर । त परित्यज्य त्वत्सकाशे निवसितुमिच्छामि। किन्तु अह तत सर्वं कर्तु अशक्ताऽस्मि। त्व मे प्रिय· त्वमेव मे भर्ता। (इति तस्य स्कन्ध देश आनमति)

सुधीर — प्रेयसि। (इति तस्या कवरी भर शिरश्च स्पृशति जिघ्रति।

सुषमा — अरे अह त्वामेव पति कामये। (इति रोदिति)

सुधीर — त्व मे जाया। त्व मे नेत्रकौमुदा। (इति ता सान्त्वयति)

सुषमा — अरे सुधीर। अह पुन सुमते गृहम् गन्तु नेच्छामि अत्रैव वसिष्यामि। मे प्रथमत आरभ्य तस्योपरि न किञ्चिदपि प्रम वर्तते। पित्रो आग्रहेण तेन सार्थं विवाहाय अङ्गीकृताऽसम। सर्वदा त्वमेव मे मनसि विराजसे। मे न किञ्चिदपि बाधा विद्यते। सवमपि भवत दर्शनेन अन्तर्हिता भूत्।

सुधीर — अय वायुसेनाधिकारी यत् किमपि वञ्चित भवति स अस्मान् सर्वानापि मारयिष्यति। तस्य पुरत नाह किमपि भवामि। अह व्याघ्र समक्ष हरिण एव।

सुषमा — यदि स अस्मान् सर्वान् मारयितु प्रयतते तर्हि वय सर्वे विष पीत्वा उत पोटासिय सैनेढुमत्वा मरिष्याम अय म निर्णय । (इति त द्वाभ्या हस्ताक्ष्या स्पृशति त आलिङ्गितु प्रयतते)

(यवनिका पतति)

* * *

॥ वयं पञ्चाधिकं शतम् ॥

व्यवस्थापकः—(यवनिकायाः पुरतः आगत्य ध्वनियन्त्रं हस्ते गृहीत्वा)

अयि भोः सामाजिकाः निमेषद्वये वयं नाटकं प्रारभिष्यामहे। नाटक प्रारम्भे किञ्चित् वयं वक्तुं उत्सुकास्मः। देशे विविधभावना विराजमानाः प्रजाः परस्परं कलहायमानाः वर्तन्ते स्वार्थ सम्पादनाय। जगति कलह प्राणिनः सहजः एव। कलहस्य अस्तित्वेऽपि शान्तवृत्त्या अन्योन्य सहायेन जीवनयापनं योग्यं इति, तदेव भारत संरक्षणं भवतीति, तादृशी ऐक्यता अधुना अपेक्ष्यते इति भावना अनेन नाटक प्रदर्शनेन वयं ज्ञापयामः। प्रजाः कलहायमानाः अपि राष्ट्रस्य संकटकाले एक चित्तीभूय देशसंरक्षणार्थं प्रयतमानाः वयं पञ्चाधिकंशतं इति बुध्या देशरक्षणं कुर्युः इति भावयन् कविः एतन्नाटकं लिलेख। वयं पञ्चाधिकंशतं इत्यस्य नाटकस्य प्रणेता पण्डित परीक्षित शर्मा। अयं गीर्वाणान्ध्र भाषा प्रवीणः। महाकविः। अयं स्वीय रचनाभिः विंशतितमे शताब्दे गीर्वाण भारतीं लोकभारतीं विधातुं कटिबद्धः प्रयतते। अस्य कवेः गीर्वाण गेयचक्रवर्तीति उपनाम विद्यते। कालावधिः व्यतीता अधुना नाटकं प्रदर्शयिष्यामः। नमासि भूयासि।

(इति नमस्कृत्य गच्छति यवनिकान्तरम्)

(ततः यवनिका अपमार्यते)

(रङ्गस्थलमध्ये धान्यराशिं विधाय तां परितः कृषीवलाः मण्डलं विधाय चंभ्रम्यमानाः नाट्यादिकं कुर्वन्तः गायन्ति)

गीतम् (मालकौंस रागे)

ओ ! ! ! ओ ! ! ! चल रे चल हस रे हस
सर रे सर नट रे नट रे नटारे ध्रु.

क्रान्ति भाव मार्ग दर्शने परा वयम्
शान्तिदीप्त मानसा मुदाऽनिशम्
दीनजीव जीवदा नीरदा भृशम्
पूर्ण हर्ष भासुरा कर्षका वयम् १

श्रमवारि निचय सिञ्चितोर्वरारे
बीजवपन श्यामसुन्दरी वसुन्धरारे
शलाटुपत्र सूनचित्रिता भूमि रे
रामराज्य मार्गयान कर्षका वय रे २

सुजल सुफल सकस सस्य पूर्ण शालिनी
निखिल प्राणि जीवनादान मेदिनी
अच्छ मधुर सलिल पूर्ण वेगवाहिनी
फुल्ल कुसुमगन्ध लिप्त मन्दहासिनी ३

तरणि किरण तप्त धरणि कर्षकावयम्
जलदवारि सिक्त भूमि स्नातकावयम्
तुषार पवनायु प्रकृति लालिता वयम्
निखिल सस्य राशिपूर्ण हर्षिता वयम् ४

मन्द चलन वायुगीत श्रामिका रे
अमन्द वेग कार्यकरण यान्त्रिकारे
धरणि खनन दीक्षिता सागरा रे
अचल भिदन कुशल कुलिश रूपकारे ५

(गीतावसाने सर्वे उपविश्य एक स्वरेण एव उच्चारन्ति)

धनुर्धराय विद्महे सर्व सिध्यै च धीमहि।
तन्नोधरा प्रचोदयात् ओं शान्तिः शान्तिः शान्तिः ॥

(इति सर्वे धान्य राशि नमस्कुर्वन्ति)

सूर्यः — (नारिकेळ गृहीत्वा भिन्ते तच्च देव्यै नैवेद्यं ददाति, तानि शकलानि सर्वेभ्यः प्रसादमिति ददाति, सर्वे गृहीत्वा भक्त्या खादन्ति)

केदारेश्वरः — अयि सुहृदः जननीधरा अस्मभ्य इयन्ती धान्यराशि प्रददौ। अस्मिन् वर्षे जननी धरणी अतीव करुणामयी जाता। अस्मदीय परिश्रम. सफलः जातः।

सूर्यः — अयि भोः सखायः। वयमेव सर्वं जगत् अन्नधान्योत्पादनेन सजीवित कुर्मः। यदि वय कृपीवलाः न स्याम जगति मानवाः किं खादिष्यन्ति। विचार्यमाणे वयमेव नितरा भोजन दातार।

केदारेश्वरः — प्रकृति माता अस्माक सर्व सौख्य जनयति। भगवान् कर्मसाक्षी कर्मचारिणः अस्मान् सदैव रक्षति। वय वरुणदेव सप्रार्थ्य उर्वरा भीत्वा भूमि सीता विधाय ता सस्य श्यामला कुर्म।

सूर्यः — अयि केदार। अस्मत् ऋते अपर कः देशरक्षणे समर्थः अस्ति। वय कृषकाः धान्य उत्पादयामः। तेन कारणेन नागरिका तत् धान्य क्रीत्वा सुखेन भुजते। यदि वय नोत्पादन कुर्मः तर्हि सर्व जनाळिः बुभुक्षया उपवास विधाय अस्त गमिष्यति।

केदारेश्वरः — तस्मात जगति न कोऽपि अस्मान् निर्लक्ष्यभावेन पश्यति। वय देश श्रीमन्तं कुर्मः। वयमेव सर्वेषु मानव समुदायेषु उत्तमाङ्ग समानाः पुण्यप्रदाश्च इति मे मनीषा।

सूर्यः — भवता यत् प्रोक्त तत् अलीक न भवति। किन्तु जगति सर्वे मानवाः प्रभाविताः महिमान्विताः सन्ति। पश्य ये सुशिक्षिताः विद्यन्ते ते जीवने मानवेभ्य ज्ञानदान विद्यादानं च विधाय मोक्षद्वार उद्घाटयन्ति। ये सरक्षका. विद्यन्ते ते देश विदेशीयाना दार्टभ्यः सरक्षन्ति। ये व्यापारिणः। वर्तन्ते ते सर्वे अस्मदीय उत्पादन सर्वत्र देशे यथा मूल्य वितरन्ति। तस्मात् सर्वाः सस्या प्रभावान्विताः वर्तन्ते। नात्र विद्यते निम्नोन्नत भावः उत तरतम भावश्च।

केदारेश्वरः — मूलतः सर्वेषा प्राणिना आहार. अत्यतावश्यकः वर्तते। अशनबाधा निवारणानन्तरं सर्वाणि आवश्यकानि भवन्ति। वयं देशे क्षुत्

बाधा निवारयाम., तस्मात् कारणात् वय वरिष्ठा. इति भावना मे सर्वदा प्रतिभाति।

सूर्य — विचार्यमाणे वय कियन्तं कष्ट अनुभूय धान्य उत्पादयाम तदनुमेय न भवति केषामपि। वर्षासु सिक्ताः भवाम । आतपेषु तापिता भवाम । नीहारेषु शीतवातेषु कम्पिता भवाम । दिवारात्र क्षेत्रेषु कष्ट अनुभूय वय धान्य उत्पादयाम । वय प्रकृति जननी करुणाकटाक्ष सर्वधिता भवाम ।

केदारेश्वरः — अरे सोम एका धूम्रवर्ती देहि।

सोम — अरे केदार धूम्रपत्रवर्ति विद्यते। (इति तस्मै ददाति)

केदारेश्वर — (तत् गृहीत्वा मुखे निक्षिपति, सोम त वर्ती ज्वालयति, स वर्ती पिबन्) य अस्मान तृणीकरिष्यति स मूर्ख भवति। अस्मयीय सौख्यमेव भारत देश सौख्य इति य चिन्तयति स एव अस्मदीय कल्याणकारक स एव अस्मदीय देवः। अस्मात् ऋते भारत किं खादिष्यति। ततः वय भारत देशस्य सरक्षका । वय प्राणिना प्राणदातारः।

सूर्य — अरे केदार, एवमेव वय अत्र भाषण कुर्वन्त तिष्ठेम तर्हि क्षेत्र कम न भविष्यति। उत्तिष्ठ रे। (इति स्वय उत्तिष्ठति) चल। (इति उत्तरीयेन शिरोवेष्टन विधाय) वय कर्म कृत्वा अस्मदीयाधिक्य औन्नित्य च दर्शयिष्याम । (इति धूम्रवर्ति पिबन् गच्छति, सर्वेऽपि उत्थाय तेन सार्थं गच्छन्ति)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(कृषीवलस्य कुटीरः तत्र सः रज्जु विरचयन् आस्ते, ततः प्रविशति हरिर्नाम खिन्नवदनः बुभुक्षितः)

हरिः — (आत्मगतम्) अहो पूर्वजन्मनि कियान् पापः कृतः मया। अहं अस्मिन् जन्मनि पंचमो भूत्वा जातः। मदीय वंशजान् चातुर्वर्णीया· पंचमान् इति तृणीकुर्वन्ति। अहं तृषितोऽस्मि, बुभुक्षितोऽस्मि। न कोपि विद्यते अत्र मह्यं पानीय दातु, उत खाद्यं च दातुम्। एते मानवा· सर्वदा स्वार्थाय प्रयतमानाः जीवन यापयन्ति। भवतु नाम। जगति दारिद्र्यस्य भावनाया न किमपि स्थान विद्यते। दरिद्राणा भावनाः अजागलस्तनसमाना भवन्ति। (इति इतस्तत. विलोक्य) हां अत्र एक कृषीवलगृहं विद्यते। तस्य गृहं गत्वा पानीय खाद्यं च पृच्छामि। (इति कतिचित् पदानि गत्वा, कृषीवलं विलोक्य, सम्बोधनापूर्वकं एव कथयति)

अयि भोः दास। अहं तृषितोऽस्मि, बुभुक्षितोऽस्मि। किञ्चित्, खाद्यं पानीय च भवान् ददातु।

दास· — (किञ्चिदुन्नमितशिर तं याचकं दृष्ट्वा) कस्त्वम् ?

हरिः — भोः अह हरि ।

दासः — अरे त्वं हरि कथम् ?

हरिः — अहं सत्यमेव हरि·।

दासः — सर्वोऽपि हरि. न भवति।

हरि! — अहं नाम्ना हरि·।

दासः — वयं दासा·। अपि च धरणीदासाः क्षेत्रपालकाः। वयं उर्वरा भित्वा धान्योत्पत्तिं कुर्मः।

हरिः — तस्मादेव भवता सन्निधिं भिक्षार्थमागतोऽस्मि। तत्र भवन्तः धरणी पुत्रा ।

दास – अस्मानुद्दिश्य स्तोत्र मा कुरु।

हरि — स्तोत्र नहि दासप्रभो। सत्य ब्रवीमि।

दास — यूय अस्मदीय क्षेत्र कर्मकरा । वयं दातारा भवन्त ग्राहका ।

हरि — सत्यमुदीरितम्।

दास — हञ्जे। (इति जाया आह्वयति)

(तत प्रविशति दासपत्नी रजना)

रजना — किं आह्वयति भवान् मा ?

दास — हा आह्वयामि।

रजना — किमर्थम्।

दास — पश्य एतस्य नाम हरि ।

रजना — तस्मात् किं कर्तव्यम्।

दास — तस्मै पातु जल भोक्तु यत् किमपि खाद्य प्रयच्छ। (इति रज्जु गृहीत्वा अन्त प्रविशति)

रजना — (अन्त प्रविश्य अन्नपानीय च आनीय) अरे हरे इद खाद्य गृहाण। (इति खाद्यपूर्ण पत्रपुट भूमौ निक्षिपति) इद पानीय कलश गृहाण। (इति अध निक्षिपति निर्लक्ष्य भावेन)

हरि — किमेतत् मात । एव निर्लक्ष्यभावेन तृणीकारबुद्ध्या ददाति भवती। अहमपि मानव सभक्तिक प्रेम्णा यदि दीयते तत् ससन्तोष हरिणा भुज्यते।

रजना — अरे शतमूर्ख, भिक्षार्थं आगत्य, मा तृणीकरोषि। अह भक्त्या ददामि गृहाण। (इति उक्त्वा अन्त गच्छति)

हरि — (खाद्य स्वीय वस्त्राञ्चलेन बध्वा पानाय पात्रा पात्र तत्र अध निक्षिपति)

रजना — (प्रविश्य) अरे हर क्व निक्षिपसि कलश एव ? कलश अधोमुख निक्षिप।

हरिः — तथैव। (इति अधोमुखं निक्षिपति)

रंजना — (अन्तः प्रविश्य कलशान्तरेण पानीय मानीय तत्र विद्यमान कलशोपरि संप्रोक्ष्य तत् पात्र हस्ते गृहीत्वा नयति)

हरि· — मानः किमर्थमेवं करोति भवती।

रंजना — त्वं हरिजनः। हरिजनेन स्पृष्टं जलेन पवित्री कर्तव्यं इति मे माता मह्यं जगाद तस्मादहं एवं करोमि।

हरिः — क्षेत्रे वयं धान्यं उत्पादयामः तत् सर्वधान्यं युष्मदीयगृहे वर्तते किं गृहं अपवित्रं जातम् किम्?

रजना — मुखं पिधेहि। अधिकं मा वद। त्वं अस्पृश्य· अपेहि मन्मुखात्।

हरिः — हा अस्पृश्यः भवति, हरि· पापात्मभिः।

रंजना — अरे त्वं साधु व्यवहर। वयं क्षेत्राधिकारिणः त्वा हनिष्यामः। त्वं सर्वदा अस्मदीय भूम्या कर्मकारी असि।

हरिः — इयं भारतभूमिः, कर्मभूमि· पुण्यभूमिः इति परम्परागताभिप्रायः इति श्रुतं मया। अत्र सर्वे कर्मकराः एव तथैवाहमपि। अहं कर्मणा जीवामि।

रंजना — अरे अधिकं मा वद। त्वं गृहे भुक्त्वा गृहदारुफलकानि गणयसि अपेहि। (इति कृत्वा सा तं तृणीकरोति)

हरिः — शूद्राणामपि अहं अस्पृश्यः, किमेतत् मे जन्म। (इति चिन्तया निर्गच्छति)

रंजना — अयं नीचः। नीचाना स्वभावः दुरतिक्रमः। यदि दया दर्शयिष्यामः तर्हि ते अस्मत् स्कन्धोपरि उपवेक्ष्यन्ति। (इति मुखं वक्रितं कुर्वन्ती अन्तः गच्छति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(गुप्त मोदकैः अपि च अन्य खाद्यपदार्थैः स्वीय आपणे उपविष्टः अस्ति तत· प्रविशति हरिः)

हरिः — नमो नमः गुप्तमहोदय ।

गुप्तः — कोऽसि त्वम्। (इति आपादमस्तकं पश्यति)

हरि· — अहं हरिः।

गुप्त· — त्वं हरि· कथम् ।

हरिः — अह हरिः एव।

गुप्तः — हरिः इत्यस्य पदस्य मर्कट· इति अर्थः भवति।

हरिः — हरि· इत्यस्य पदस्य अनेके अर्थाः सन्ति।

गुप्तः — सन्तु नाम। अधुना त्वया कि अपेक्ष्यते ।

हरि· — मम पुत्रिकायै खादितुं एकं मोदकं भवान् यच्छतु इति अहं याचे।

गुप्तः — अरे हरे इदं याचकाना स्थानं नहि। इदं आपणं वर्तते। अत्र विक्रेतु वस्तुचयः सस्थाप्यते।

हरि· — एक यच्छतु भवान् इति अहं याचे।

गुप्त· — किं रूप्यकं वर्तते तव समीपे।

हरिः — मत्सकाशे न किमपि विद्यते।

गुप्तः — रूप्यकेन विना मोदक कथं भवति।

हरि· — अहं ते क्षेत्रे कर्मकारः।

गुप्तः — तव क्षेत्रे तव कर्म कृते तदैव मूल्यं दत्तम्।

हरिः — हा स्वल्पमेव दत्तं तदैव मूल्यम्। रूप्यक अनन्तरं दास्यामि, अधुना मोदकं ददातु।

गुप्तः — यदि हस्ते रूप्यकं विद्यते तर्हि मुखे मोदकः भवति। नोचेत् तिरोगमनमेव वरम्।

हरिः — अहं दरिद्रः। कर्म कृत्वा जीवामि। एतावत्पर्यन्तं मया न भुक्तं। अधुनैव भुक्त्वा आगतोऽस्मि।

गुप्तः — दरिद्रः इति कथयसि, कुत्र भुक्तं त्वया।

हरिः — तत्र दासगृहे किञ्चित् खादितुं प्राप्तं, तत् भुक्त्वा आगच्छामि।

गुप्तः — दासः तुभ्यं खाद्यं विनामूल्यं अयच्छत् किम्?

हरिः — हां विनामूल्यं दत्तवान्।

गुप्तः — अहं वणिक्। लक्ष्मीदर्शनं विना ते मोदकं न दास्यामि।

हरिः — अहं कर्म कृत्वा जीवामि। मत्सकाशे अधुना रूप्यकं नास्ति।

गुप्तः — अहं तुभ्यं कर्म दास्यामि।

हरिः — यच्छतु भवान्।

गुप्तः — हञ्जे रत्ने। (इति पत्नीं आह्वयति)

(ततः प्रविशति रत्ना)

रत्ना — किं आहूतास्मि।

गुप्तः — हां।

रत्ना — किमर्थम्?

गुप्तः — अस्मै काष्ठविदलनं कर्म दत्वा कर्म समाप्त्यनतरं तस्मै एकं रूप्यकं दत्वा प्रेषय।

रत्ना — तथैव। (इति अन्तः प्रविश्य, कुठारमानीय तत्र निक्षिप्य संमार्जनीं गृह्णाति)

हरिः — (शनैः कुठारं गृहीत्वा रथ्यां गच्छति)

रत्ना — (गृह समार्जयन्ती) प्रात प्रभृति न कोपि ग्राहक समागत, एतावत्पर्यन्त लक्ष्मीदर्शन न बभूव, किन्तु अमुष्मै रूप्यक दातव्य, कि अर्थ विद्यते अस्मिन् व्यापारे ?

गुप्त — हञ्जे अय व्यापार उत्तरोत्तर बलवान् भविष्यति। विचार मा कुरु।

रत्ना — उपविश्य भाषण क्रियते भवता परिश्रम न कदापि कृत । (इति वेगेन समार्जयति, तत प्रविशति हरि कुठारहस्त)

हरि — मात काष्ठविदलनकर्म कृतम्।

रत्ना — अरे त्व तत्रैव तिष्ठ। एक पदमपि मा विचल।

हरि — मात रूप्यक दीयताम्। अय कुठार इद काष्ठचयश्च। (इति तत्र निक्षिपति)

रत्ना — (अन्त गत्वा जलकलशहस्ता प्रविश्य कुठारोऽपरि काष्ठचये च सप्रोक्ष्य अन्त नयति)

हरि — मात किमर्थं जलेन काष्ठचय कुठार च सिञ्चसि।

रत्ना — अरे त्व अस्पृश्य त्वया स्पृष्ट नाह शक्या ग्रहीतु तस्मात् जलेन पवित्र करोमि। (इति जलेन सिञ्चति)

हरि — मात जलेन सर्वाणि पवित्रीकृतानि भवन्ति किम् ?

रत्ना — हा पवित्रीकृतानि भवन्तीति मे मातामही अवदत्। तस्मात् अह एवं करोमि।

हरि — वय अस्पृश्या किन्तु अस्माभि सर्वरपि कर्म कारयित्वा यूय सुख मनुभवथ। मात धरण्या सर्वे मानवा देवपुत्रा तरतमभेद कुत ?

रत्ना — स एव वदति सर्व श्रुत्वा भवान् मौन वहति किम् ? (इति भर्तार गुप्त कथयति)

गुप्त — अरे हरे ! किमर्थमेव प्रजल्पसि। त्व तत्र सीमोल्लङ्घन मा कुरु, गच्छ।

हरिः — अहं स्थिता गतिं विचारयामि।

रत्ना — त्वं तव गतिं विचारय। स्थिता लोकगतिं किं विचारयिष्यसि।

हरिः — रूप्यकं देहि मात।

गुप्तः — एतावत्पर्यन्तं तस्मै रूप्यकं न दत्तं किम् ?

रत्ना — नहि, स. मत्कृत कार्यं दृष्ट्वा प्रजल्पति। रूप्यकदाने अपि मे समयः नास्ति। (इति रूप्यकं हरेः संमुखं निक्षिपति)

हरिः — किमर्थमेवं भेदभावं दर्शयसि।

रत्ना — अरे मूर्ख, मुखं पिधेहि। किं त्वं मा पाठं बोधयसि। अपेहि रूप्यकं गृहीत्वा मम संमुखात्।

हरिः — (आत्मगतम्) अहो बत एषा काळी भूत्वा मा तृणी करोति। अहं अनेन रूप्यकेन मोदकं क्रीत्वा गच्छेयम्। (इति गुप्तसकाशं आगत्य) अयि भोः श्रेष्ठिन् मोदकं दीयता। (इति रूप्यकं भूमौ निक्षिपति)

गुप्तः — (सन्तोषेण रूप्यकं गृहीत्वा तस्मै मोदकं कर्गजे बध्वा भूमौ निक्षिप्य) गृहाण। (इति कथयति)

हरिः — अयि भो गुप्त, मया दत्तं रूप्यकं स्पृश्यं भवति किम् ?

गुप्तः — लक्ष्म्याः स्पृश्याऽस्पृश्यता नास्ति। सा सर्वातीता जगज्जननी। (इति धनपेटिकायां निक्षिप्य धनपेटिकां नमस्करोति)

हरिः — (गृहीत्वा) नमः गुप्तमहोदय। (इति निर्गच्छति)

रत्ना — अल्पानां स्थानं यावत्पर्यन्तं दातव्यं तावत्पर्यन्तमेव दातव्यं नत्वधिकं, यदि अधिकं स्थानं दीयते तर्हि ते आगत्य अस्मदीय उत्तमाङ्गे उपविशन्ति। (इति कुठारं काष्ठचयं च गृहीत्वा अन्तः प्रविशति)

गुप्तः — लक्ष्मीः लोला। लक्ष्मीः मा न कदापि त्यक्ष्यति। मदीय रूप्यकं पुनः मत्सकाशं आगतम्। काष्ठविदळनकर्मापि जातम्। भवतु नाम मोदकः गतः। अयं व्यापारः लक्ष्मीसंवर्धनकारकः भवति।

लक्ष्मीं क्षीरसमुद्रराजतनया श्रीरङग धामेश्वरीं
दासीभूत समस्त देववनिता लोकैकदीपाङकुराम्
श्रीमन्मन्द कटाक्षलब्धविभवत् ब्रह्मेंद्रगङगाधरां
त्वां त्रैलोक्य कुटुम्बिनीं सरसिजां वन्दे मुकुन्दप्रियाम्॥

(इति धनपेटिका नमस्कृत्य धच्छति)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(ग्रामाध्यक्ष, जिष्णुशमा, यशोवमा, भानुगुप्त दिवोदास इत्यादय भूमौ उपविष्टा सन्ति)

प्रतीहारी (प्रविश्य) अयि अध्यक्ष महोदय, द्वारि कश्चन हरिनामक पौर भवता दिदक्षया तिष्ठति)

ग्रामाध्यक्ष — (सगान् विलोक्य) अरे प्रवशय तम।

प्रतीहारी — तथैव। (इति निर्गच्छति)

(तत प्रविशति हरि)

हरि —(प्रविश्य नतमस्तक पञ्चाङगुल्य दर्शनिधाय) अभिवादय पथायतिभ्य।

ग्रामाध्यक्ष — किं त कथनीय निवदय। अत्राऽपविश।

हरि — (भूमौ उपविशति कथयति च) प्रभो, अह दरिद्र। मम कृत्वापि दश कर्म कर्तुं समर्थ न कनापि परिकाल्यत।

विष्णुशर्मा—इदं वाक्य श्रुत्वा मम अतीव आश्चर्यं भवति। किमेतत् सत्यम् ?

हरिः — हा इदं सत्यमेव भो ।

विष्णुशर्मा — कथं ? कुत्र कुत्र किं वृत्त तत् सविस्तर कथय।

हरिः — न कोपि पानीयमपि ददाति पातुम्।

यशोवर्मा — कुत्र कुत्र भवता प्रयतितम्।

हरिः — अस्मिन् ग्रामे दासस्य समीपे प्रयतितम्।

यशोवर्मा — कोऽयं दास ।

हरि. — शृङगाटिकाया दक्षिणत· द्वितीय सौधे कश्चन दास निवसति स ।

भानुगुप्तः — किं याचितं भवता।

हरिः — महोदय अह बुभुक्षितोऽस्मि, तृषितोस्मि किञ्चित् पातु खादुं अपि च यत् किमपि कर्म कर्तुं च ददातु इति अयाचम्।

भानुगुप्तः — दत्तवान् किम् ?

हरिः — दत्तवान्। किन्तु त्व अस्पृश्य अत्र न किमपि विद्यते. दत्तं अत्वा पानीयं च पीत्वा गच्छ इति अवदत्।

दासः — अनन्तरम्।

हरि· — अहं अस्पृश्यः इति तस्य पत्नी मया पीत पानीयपात्रं जलेन प्रोक्ष्य शुद्धिं कृत्वा अन्तः निनाय। तेन कर्मणा अह अवमानित. अभवम्।

ग्रामाध्यक्षः — एतत् कर्म अवमानहेतुः न भवति। किन्तु आरोग्य हेतुः शुद्धिमूलकः भवति। तस्य समक्षे करणं कर्म एतत् गर्ह्यं भवति इति मे मतिः।

विष्णुशर्मा —- अनन्तर किं जातं ? कथय।

हरि. — अहं एकस्य गुप्तस्य गृहं अगच्छम्।

विष्णुशर्मा — तत्र किं जातम्।

हरिः — अहं एक मोदक मे कुमार्यै नमपृच्छम्।

भानुगुप्त — हा गुप्त किमवादीत्।

हरि — विना च रूप्यकेन मोदक न दास्यामि इति अवादीत्।

विष्णुशर्मा — अनतर कि जातम्।

हरि — अह अवद अह कर्मजीवी इति।

विष्णुशर्मा — ततस्तत ।

हरि — स गुप्त भार्यामाहूय अस्मै काष्ठविदाळनकर्म दत्त्वा तत् कर्म समाप्यनतर तस्मै रूप्यकमेक देहि इत्यवोचत्।

विष्णुशर्मा — ततस्तत ।

हरि — अह तत् कर्म अकरवम्।

विष्णुशर्मा — अनन्तरम्।

हरि — सा नारी काष्ठसचय, कुठारे च पानीय सप्रोक्ष्य तत् द्वय अन्त निनाय।

यशोवर्मा — ततस्तत ।

हरि — अह अपृच्छ ता मात य किमर्थमेव करोषि इति।

यशोवर्मा — सा अवादीत् त्व अस्पृश्योऽसि। तव हस्तस्पर्शेया एतानि सर्वाणि मलिनानि जातानि इति।

यशोवर्मा — अहो तत ।

हरि — तत् श्रुत्वा अह नतमस्तक स्वात्मान विनिन्दन् तत सर्व युष्मभ्य निवेदयितु अत्रागतोऽस्मि।

प्रतीहारी — (प्रविश्य) अहमस्मि।

यशोवर्मा — गुप्तदासौ आनय अस्याः पञ्चायत्याः समक्षम्।

प्रतीहारी — यथाज्ञापयति भवान्। (इति निर्गच्छति)

(यवनिका पतति)

* * *

पंचमं दृश्यम्

(तत्र पञ्चायति सदस्याः उपविष्टाः सन्तिः)

ग्रामाध्यक्षः — कोऽत्र भोः।

प्रतीहारी — (प्रविश्य) एषोऽस्मि भोः।

ग्रामाध्यक्षः — सत्वरं दासं प्रवेशय।

प्रतीहारी — यथाज्ञापयति देवः। (इति नमस्कृत्य गच्छति)

(ततः प्रविशति दासः)

दासः — नमासि महोदय। (इति नमस्करोति)

ग्रामाध्यक्षः — दास एहि अत्र उपविश। (इति आसनं दर्शयति)

दासः — (उपविशति)

ग्रामाध्यक्षः — अयि दास, भवान् भवतः पत्नी च अस्पृश्यता पालयतः इति हरिणा प्रतिपादितं अस्ति। किं तत् प्रतिपादन सत्यम्।

दासः — हा हरिणा यदुक्तं तत् सत्यमेव भोः।

शर्मा — किमर्थं कृतं तथा।

भानुगुप्त — हा गुप्त किमवादीत्।

हरि — विना च रूप्यकेन मोदक न दास्यामि इति अवादीत्।

विष्णुशर्मा — अनतर कि जातम्।

हरि — अह अवद अह कर्मजीवी इति।

विष्णुशर्मा — ततस्तत ।

हरि — स गुप्त भार्यामाहूय अस्मै काष्ठविदाळनकर्म दत्वा तत् कर्म समाप्यनतर तस्मै रूप्यकमेक देहि इत्यरोचत।

विष्णुशर्मा — ततस्तत ।

हरि — अह तत् कर्म अकरवम्।

विष्णुशर्मा — अनन्तरम्।

हरि — सा नारी काष्ठसचय, कुठारे च पानीय सप्रोक्ष्य तत् द्वय अन्त निनाय।

यशोवर्मा — ततस्तत ।

हरि — अह अपृच्छ ता मात य किमर्थमेव करोषि इति।

यशोवर्मा — सा अवादीत् त्व अस्पृश्योऽसि। तव हस्तस्पर्शया एतानि सर्वाणि मलिनानि जातानि इति।

यशोवर्मा — अहो तत ।

हरि — तत् श्रुत्वा अह नतमस्तक स्वात्मान विनिन्दन् तत् सर्वं युष्मभ्य निवेदयितु अत्रागतोऽस्मि।

यशोवर्मा — अध्यक्षमहोदय श्रुत खलु भवता सर्वम्। जगति जना एव निधा वर्तन्ते।

ग्रामाअध्यक्ष — अस्पृश्यतामुद्दिश्य कठोरदण्ड भवितव्य वर्तते।

यशोवर्मा — कोऽत्र भो ।

प्रतीहारी — (प्रविश्य) अहमस्मि।

यशोवर्मा — गुप्तदासौ आनय अस्याः पञ्चायत्याः समक्षम्।

प्रतीहारी — यथाज्ञापयति भवान्। (इति निर्गच्छति)

(यवनिका पतति)

*   *   *

पंचमं दृश्यम्

(तत्र पञ्चायति सदस्याः उपविष्टाः सन्तिः)

ग्रामाध्यक्षः — कोऽत्र भोः।

प्रतीहारी — (प्रविश्य) एषोऽस्मि भो ।

ग्रामाध्यक्षः — सत्वर दासं प्रावेशय।

प्रतीहारी — यथाज्ञापयति देवः। (इति नमस्कृत्य गच्छति)

(ततः प्रविशति दासः)

दासः — नमामि महोदय। (इति नमस्करोति)

ग्रामाध्यक्षः — दास एहि अत्र उपविश। (इति आसनं दर्शयति)

दासः — (उपविशति)

ग्रामाध्यक्षः — अयि दास, भवान् भवतः पत्नी च अस्पृश्यता पाल्यतः इति हरिणा प्रतिपादितं अस्ति। किं तत् प्रतिपादन सत्यम्।

दासः — हा हरिणा यदुक्त तत् सत्यमेव भोः।

शर्मा — किमर्थं कृतं तथा।

दास — इयमस्पृश्यता रूकात् तु परम्परागता देशे प्रचलति। अह साम्प्रदायमनुसरम्।

शर्मा अयि दास, अय साम्प्रदाय दात देशमार्गति मानाशय। अय मध्य काले मनात पक्षिप्ति साम्प्रदाय इति विचारय।

दास — क जने सौलभ्य विद्यते किन्तु आचरणे दुष्कर भवति।

शर्मा — तस्मादेव आचरणार्थं प्रयतनाय इति कथयामि।

दास — दश सर्वत्र सर्वोऽपि अस्पृश्यता पाल्यति। एषा मत्विषयका नहि।

शर्मा — तदनपाल्न साम्प्रतमसाम्प्रत इति अह भणामि।

दास — अयि भा समाज सर्वत्र तरतम भावाभ्या अस्पृश्यता सर्वजगप सन्दृश्यत विमुत म द्रपये।

शर्मा — कुत्र दृश्य।

दास हारजनष्व प चमकारसगा इति मातङगाया इति भेदा सन्ति कथमह हरिजन स्पृशेयम्।

मानुगप्त — आय दास स्पृश्यता अस्पृश्यता च आरोग्यस्वच्छताव्यवहाराभ्या भवत ।

दास — हरिजना सर्वदा पशुमासस प्रण वमकुर्व त ते अस्व च्छतापूर्णा क्य ते स्पृश्यता पाळयेयम्।

शर्मा — तत् सत्यमेव। अनारोग्यमानुपस्पशा विषये आरोग्यसूत्राणि परिपालनायानि भवन्ति। किन्तु मानव अमानव इव विलोकन पाप भवति।

ग्रामाध्यक्ष — (करतलध्वनि करोति)

प्रतीहारी — (प्रविश्य) एषास्मि भो।

ग्रामाध्यक्ष — शुप्त प्रवेशय।

प्रतीहारी — तथैव। (इति नतमस्तक गच्छति)

(ततः प्रविशति गुप्तः)

गुप्तः — नमोनः। (इति नमस्करोति)

ग्रामाध्यक्षः — एहि गुप्तवर्य उपविश। (इति आसनं दर्शयति)

गुप्तः — (उपविशति)

ग्रामाध्यक्षः — गुप्त महोदय भवान् भवतःपत्नी च अस्पृश्यता पालयित्वा आगन्तुकान् अवमानितान् कुरुतः इति हरिः अकथयत् किं तत् सत्यम्।

गुप्तः — सत्यमेव।

ग्रामाध्यक्षः — किमर्थमेवं कृतम्।

गुप्तः — सर्वत्र सर्वोऽपि अस्पृश्यता पालयति मम विषये कोऽयं अपराधः।

शर्मा — अस्पृश्यता सर्वं व्याप्ता विचाय ब्रवीषि किं तत् सत्यं कथय।

गुप्तः — अपि भोः तरतमभेदाः सर्वत्र विद्यन्ते समाजे पश्यतु भवान्। उदाहरणार्थं अयं ब्राह्मणः अयं क्षत्रियः एषः वैश्यः एष शूद्रः इति अयं अन्यः हरिजनः इति च।

यशोवर्मा — तं भेदभावं नाशयितुमेव वयं प्रयतामहे।

गुप्तः — तत् कथं भविष्यति। येन केनापि नाम्ना समाजे जनसमुदायं विभज्य पालनीयं भवति। तरतमभाव नाशनं असम्भवमिति अस्पृश्यता निवारणं असहजमिति मे अभिप्रायः।

यशोवर्मा — पाश्चात्य देशेषु अयं भावः नास्तीति लोकः कथयति। अस्मदीय देशे कुतः अयं भावः।

गुप्तः — तत्रापि विद्यते रूपान्तरेण तरतम भाव।

यशोवर्मा — कथ विद्यते विस्तारय।

गुप्तः — धनिक वर्गः, निर्धन वर्गः, श्रामिक वर्गः इति च। तत्र अन्योन्य दर्शनमपि पातकमिति तत्रस्थ वर्गाणा भावः। काळिम वर्णीयान् विलोक्य श्वेत वर्णीयाः

अस्पृश्यता भावनापेक्ष्या पापपुण्यभावनया व्यवहरेन्ति। तत्र कालिम श्वेतवर्णयोर्मध्ये मारण होमः भवति।

यशोवर्मा — अस्मदीय देशे सर्व मानव सौभ्रातृत्वं अधुना अपेक्ष्यते।

गुप्तः — अस्मदीय देशे चातुर्वर्ण्यव्यवस्था विद्यमानायां सर्व्यां परस्पर स्नेह भावेन वर्तन्ते। तत्र तथा न वर्तन्ते। तस्मात् भारतवर्षे अतीव सहिष्णुता वर्तते इति ज्ञातव्यं विद्यते भवता।

विष्णुशर्मा — तस्मात् अनुकम्पा भावेन वयं भारतीयाः सर्वानापि स्नेहपूर्ण भावनया पश्यामः यतः आत्मा एकः इति। अत्र अस्पृश्यता अधुना विडम्बना भवत्येव। किन्तु न कोऽपि परमार्थतः अनुपालयति अस्पृश्यता इति मे मतिः।

गुप्तः — अयि भोः अयं हरिः मम सकाशं मोदकार्थं समागतः। अहं विना मूल्यं न दास्यमीति अवदम्। सः कर्म याचे। तस्मै दत्तं कर्म मया। धनं च प्राप्तवान्। एतत् सर्वं कथं बभूव केवलं अनुकम्पा भावनया। समाजे सर्वोऽपि अन्योन्याश्रयेण जीवनं यापयति।

यशोवर्मा — तत् सत्यमेव भवता यत् उदीरितं तत् सर्वं अङ्गीकरोमि। किन्तु त्व हरिजनः इति भवतः पत्नी तेन स्पृष्टं काष्ठचयं कुठारं च जलेन संप्रोक्ष्य अन्तः निनाय किमेतत् साधु भवति।

गुप्तः — एवं करणे तस्य जीवनस्य किमापतितम्। लोके अयं व्यवहारः एवमेव प्रचलति। तत्रासाधुभावना नास्ति।

ग्रामाध्यक्षः - अस्मिन् ग्रामे मम अध्यक्षताया न कुत्रापि अस्पृश्यता पालनीया अस्ति।

विष्णुशर्मा — अहं देशसमैक्यनावश्यकतामुद्दिश्य अस्पृश्यता निवारणार्थं जनाना भाषणादिकं विधाय समाजं बलवत्तम कर्तुं इच्छामि।

ग्रामाध्यक्षः — अयि शर्मन् भवान् राज्ये अस्पृश्यता निवारणार्थं, समाज बलकरणार्थं भाषणं विदधातु।

विष्णुशर्मा — अहं प्रतिग्रामं ग्रामं ग्रामं अस्पृश्यता निवारणार्थं प्रचाराय वक्तॄन् प्रेरयिष्यामि।

ग्रामाध्यक्षः — अयि भोः हरिदासगुप्तवर्मशर्म महोदयाः यूयं सर्वे गच्छथ श्वः प्रभृति यूयं सर्वे समाजं वलवत्तमं विधातुं प्रयतत । (इति उत्तिष्ठित सर्वे उत्तिष्ठन्ति एकैकशः गच्छन्ति)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(ग्रामे शृङगाटिकाया एकस्या वेदिकाया कुर्च्या शर्मा आसीन वर्तते गुप्त दास हरि इत्यादयः सामाजिकाः भूत्वा उपविष्टाः वर्तन्ते, अन्ये च बहव. सामाजिकाः वर्तन्ते)

विष्णुशर्मा — (उत्थाय) अयि भोः मित्रोत्तमा· मया किञ्चित् कथनीयं वर्तते । यत् अहं भावयामि तत् कथयामि । भवता प्रश्नाना प्रत्युत्तरं अहं दास्यामि भवन्तः पृच्छन्तु । अयि सुहृदः वयं सर्वे एकराष्ट्रीयाः भारतीयाः । केचन प्रथयतः अह अमुक प्रान्तीयः इति उक्त्वा प्रान्तीयताया प्राधान्य यच्छन्ति । तदहं न सेहे । तादृशी भावना राष्ट्रद्रोह कारिणी भवति दुराभिमानपूर्णा भवति । तस्मात् प्रान्तीयता वाद निर्मूल्य देशप्रेम वर्धन कर्तव्यमस्माभिः ।

हरि· — (उत्थाय) राष्ट्रभावना कथं भवति मानवानाम् । (इति उपविशति)

विष्णुशर्मा — राष्ट्रीय भावना भारतीय ग्रन्थपठनेन संगीत नृत्यसाहित्य वेदान्त शास्त्राभ्यासेन देशे सर्वत्र देशभक्तिः मानुषेषु भविष्यति ।

गुप्तः — अधुना बहवः पठन्ति सकल परीक्षासु उत्तीर्णता भजन्ते ।

विष्णुशर्मा — एताः विद्याः परीक्षाश्च सर्वाः उदर पोषणार्थं कर्म करणार्थमेव उपयुक्ताः भवन्ति किन्तु ताभिः परीक्षाभिः ताभिः विद्याभिः देशभक्तिः न भवति । एभि· मानवाः स्वार्थिनः भवन्ति न तु देशभक्ताः ।

हरि· — देशभक्तिः कथ सपादनीया भवति निवेदयतु भवान्।

विष्णुशर्मा — सर्वैरपि भारतीयैः संस्कृत भाषा अभ्यसनीया भवति तर्हि तदैव देशभक्तिः तेषु भविष्यति नत्वन्यथा।

हरिः — [उत्थाय] चातुर्वर्ण्य निर्मूलनं कथं भविष्यति।

विष्णुशर्मा — चातुर्वर्ण्यं निर्मूलनस्य आवश्यकता नास्ति।

हरि· — तत् कथम्।

विष्णुशर्मा — यतः वयं सर्वे भारतीयाः। अस्माकं भावना संस्कृतिश्च एका एव। ब्रह्मज्ञानं यस्य अस्ति, यः त्याग करोति, यः सुखं नोपेक्षते यः साधारण जीवनेन जीवति स ब्राह्मण·। सः यः कोऽपि वा भवितुमर्हति। तथैव य· देशरक्षणे निरतः भवति स. क्षत्रियः। यः वाणिज्य करोति सः वैश्यः। य. क्षेत्रेषु धान्योत्पादनं करोति सः शूद्रः। यः पशुपालनादिक करोति सः हरिजन.। सर्व सर्वमपि भवितुं शक्तः भवति। यदि चातुवर्ण्य विभागः नास्ति तर्हि येन केनापि नाम्ना व्यवहार लोके कर्तव्य. भवति। तदापि लोके व्यवहारार्थं तरतम भावः देशे राष्ट्रेच भ त्येव।

हरिः — तस्मात् प्राचीन व्यवस्था समीच ना साभिप्राया अर्थयुक्ता इति भवतः अभिप्रायः।

विष्णुशर्मा — समाजे केचन स्वार्थपराः सकुचित भावनया तरतम भावनादीन् राष्ट्रहितापेक्षया राष्ट्रनाशाय उपयोग अकुर्वन्। वय सर्वे इतः पर, स्वस्तिरस्तुनः, स्वस्तिर्मानुष्येभ्यः। शंनो अस्तु द्विपदे। श चतुष्पदे इति आपभावनानुरूप बहुजन हिताय, बहुजन सुखाय व्यवहरिष्यामः।

दासः — एव कर्तु शक्य भवति किम्?

विष्णुशर्मा — कर्तु शक्य भवति। यादृशी भावना यत्र सिद्धिर्भवति तादृशी।

हरिः — अधुना सर्वत्र देशे अस्पृश्यता व्याप्ता विद्यते, कदा तस्या अन्तः भविष्यति .

विष्णुशर्मा — अस्माकं सर्वेषा विदितमेव यत् अस्मदीय राष्ट्रं बहुविशाल अनेक समस्यापरिपूरितं च। सर्वमपि दुःखं एकवारं अपास्तकरण कथं भवति। कतिपय वर्षानन्तरं सर्वमपि सुखमय परिष्कृतं भविष्यति। सर्वजन योगक्षेमकल्याणार्थं अस्मदीय नेतारः दिवारात्रं प्रयतन्ते।

हरिः — अयि भोः दरिद्रता सर्वत्र नरीनर्तिकदा प्राणिनः सुखान्विताः भवेयुः।

विष्णुशर्मा — वयं सर्वे मिना च तरतमभावः देशहिताय देश औन्नत्ये संहत्य जनहितकारकं कर्म कुर्मः तदा दरिद्रता दरिद्रभावं प्राप्स्यति। न केनापि कदापि अकर्मकृता भवितव्यम्।

हरिः — न कदापि समाजे समभावना भवितुं अर्हति।

विष्णुशर्मा — समभावना जनयितुं प्रयतिष्यामः "यत्ने कृते यदि न सिध्यति कोऽत्र दोषः"। समाजे नैक विभागाः सन्ति तथापि सर्वविभागाः प्रधान पञ्च विभागेषु अन्तर्हिताः भवन्ति। भारतवर्षे ते एवं सन्ति, ब्राह्मण, क्षत्रिय, वैश्य, शूद्र हरिजनाः ए ते पञ्चवर्णाः समाजपुरुषस्य पञ्चप्राणाः। नत्र उच्चनीच भावोनास्ति। यदि समाजः एकेन हीनः भवति पतनोन्मुखं भविष्यति, इति भावनया व्यवहारः कर्तव्यः इति मे अभिप्रायः।

हरिः — न कदापि सर्वेषा पञ्चवर्णाना संसृष्टिः भवति वसुधातले। जगति तरुषु अनेके विभिन्न तरवः सन्ति। व्यष्टिरूपेण तेषा अस्तित्वं राजते। पक्षिषु बहवः विचित्र पक्षिणः विभिन्नरावराजिताः तेषा व्यक्तिमत्व प्रदर्शयन्ति ते न कदापि समान शीलतया एकचित्तीभूय सन्ति।

विष्णुशर्मा — भवता प्रतिपादितं सत्यमेव। सर्वोपि स्वीय चातुर्येण जगति अस्तित्वं दर्शयति। श्रृण्वन्तु एका वृत्तकथा कथयामि। महाभारते यदा गन्धर्वाः दुर्योधनादीन् निगृह्य गताः तदा भीमः एवं जगाद।

हरिः — किमिति जगाद।

विष्णुशर्मा — यत् वयं कर्तुं उद्युक्ताः तदेव कृतं गन्धर्वैः इति।

हरि — दुर्योधनादय वञ्चनशीला तस्मात् सम्यगेव वृत्त इति ममापि द्योतते तादृशी भावना।

विष्णुशर्मा — तथा मा वद। तस्मिन् समये धर्मराज एव जगाद भीमप्रति।

दास — किमिति।

विष्णुशर्मा — अरे भीम, एते दुर्योधनायः परा न सन्ति। एते अस्मदीय भ्रातर। कौरव पाण्डवयोर्मध्ये विद्वेषपूर्ण भावना वर्तते। वय सर्वे सर्वदा कलहायमाना स्म। किन्तु अधुना परा अस्मदीय बन्धून् देशजान् गृहीत्वा अगच्छन्। तत वय अस्मदीय भेदभाव परस्पर द्वेषभाव सत्यज्य तान् जेतु वय पञ्चाधिक शत इति भावनया अस्मदीये मिलित्वा शत्रुनाशन कुर्याम इति।

हरि — तदा कि जातम्।

विष्णुशर्मा — तदा अर्जुन गत्वा गन्धर्वादीन् जित्वा कौरवान् विमोचयामास। तद्वत् वयमपि भेदभाव सत्यजमाना अपि राष्ट्रहिताय राष्ट्रसुखाय धर्मरक्षणाय परस्पर स्नेहभावनया वय पञ्चाधिक शत इति न्यायेन भारतवर्षे जीवेम इति मे आदेश।

(हरिदास गुप्तादय उत्थाय परस्पर आलिङ्गयन्त शर्मण समीपमागत्य एकैकश शर्माण आलिङ्गय) वय देशरक्षणे पञ्चाधिक शतम्। (इति उन्नमित मुष्टिहस्ता क्रमश गच्छन्ति)

(यवनिका पतति)

॥ न स्त्री स्वातन्त्र्यमर्हति ॥

(व्यवस्थापकः यवनिका पुरतः आगत्य ध्वनिग्रहण यन्त्रं हस्ते गृहीत्वा)

अयि भोः प्रेक्षकाः अद्य वयं महाकविना गीर्वाणगेयचक्रवर्तिना सप्तविंशति नाटक प्रणेत्रा पण्डित परीक्षित् शर्मणा विरचित "न स्त्री स्वातन्त्र्य मर्हति" इति नाटकं प्रदर्शयितुं उत्सुकास्मः। अयं कविः इतःपूर्वं ललितगीतालहरी इति गेय काव्यं, विंशति सर्गात्मकं यशोधरा महाकाव्यं, एकोत्तरशत गीतात्मक अक्षयगीत रामायणं इत्यादिकं काव्य सतानं उत्पाद्य गीर्वाण प्रपञ्चे प्रथितयशाः अभवत्। समाजे समकालीनाः प्रतिभा व्युत्पत्ति रहिताः केचन पण्डितं मन्यमाना समकालीन प्रतिभान्वितं महाकविं विलोक्य ईर्ष्याऽसूयाभ्यां परिवेष्टिता तस्य कवेः नामापि उच्चारयितुं दुराभिमानेन विचेष्टमानाः भवन्ति। सहजेयं प्रवृत्ति परम्परागता भवति। समाज परिवर्तनोन्मुखाः केचन नायकान् मनमाना आत्माना मान्यता प्राप्त्यर्थं विपरीतार्थान् अस्य वाक्यस्य परिकल्प्य स्मृति कर्तारं मनु तिरस्कृत्य, समाजे स्वोपभोगार्थं, स्त्री स्वातन्त्र्य मर्हति इति घोषयन्ति। तानुद्दिश्य अय कवि तेषां बुद्धिहीनता दर्शयन् मनोः कृते उत्तमः धर्मशास्त्रकर्ता एतावत्पर्यन्तं जगत्या नोद्भूत इति दर्शयन् न स्त्री स्वातन्त्र्य मर्हतितीत्यस्य वाक्यस्य अर्थः कियत्पर्यन्त परिमित इति दर्शयन् एतन्नाटकं लिलेख। कथं इम भाव अय कविः पात्रैः संसूचयमास भवन्त विदाङ्कुर्वन्तु। नमामि।
(इति नमस्कृत्य अन्त. गच्छति)

(यवनिका अपसार्यते)

(ततः प्रविशति धौतपरिधान मण्डितः उत्तरीयेन भूषितः शिखायज्ञोपवीत माथुर विभूति समलङ्कृतः हस्ते मनुस्मृतिं धृत्वा न्यायाधीशः चतुर्वेदी। तत्रैव एक स्मिन् दिग्विभागे तस्य पुत्री सुषमा कुर्च्यां उपविश्य टेबुलोपरि लिखन्ती आस्ते। टेबुलाया अनेकानि पुस्तकानि श्रेण्या निक्षिप्तानि सन्ति। चतुर्वेदी इतस्ततः चरन् मनुस्मृति पश्यन् पठति।

पिता रक्षति कौमारे। भर्ता रक्षति यौवने।
पुत्रो रक्षति वार्धक्ये। न स्त्री स्वातन्त्र्यमर्हति॥

(अहह) साधुक्त मनुस्मृतिकारेण। अथ मनु· तस्मिन् समये विद्यमान समाज परिस्थितिमनुसृत्य एन स्मृति ग्रन्थ लिलेख। समाज सर्वदा परिवर्तते। परिवर्तनानुसार कतिचित् नवीन परिवर्तनानि कर्तव्यानि सन्ति। किन्तु मनुदूषणेन, मनुस्मति दाहनेन कि भवति परिवर्तना समाजे ? एतादृश कर्मकरण तेषा मूर्खत्व नीचत्व दर्शयतीति कथने न किमपि साहस भवति। (इति शयन कुर्ष्या उपविशति)

सुषमा — पित भवान् न्यायाधीश। सर्वमपि न्यायशास्त्र चुलिकीकृत भवता। सर्वमपि शास्त्र ते करतलामलक विद्यते। अद्य मनुस्मृति पारायण करोषि कुत।

चतुर्वेदी — बाले तव प्रश्न सार्थ विद्यते। शृणु। बहव मूर्खा स्त्रीणा स्वातन्त्र्य परिकल्पनीय इति कथयित्वा, स्त्री स्वातन्त्र्यानन्तर ता अनुभवितुकामा इच्छन्ति। तस्मात् मनु द्विषति। तदह न सेहे। मनुस्मृति सर्वदा पठनीय विद्यते भारतीयानाम्।

सुषमा — पित अस्मदीय विधिविद्यालये अपि प्राध्यापका मनु शतथा स्तुवन्ति। नाह जाने किमर्थं केचन ब्रुवा त अध पातयन्ति।

चतुर्वेदी — येनकेनाप्युपायेन प्रसिद्ध पुरुषोभवेत्। तस्मात् यथाकथचित् स्वीय व्यक्तिमत्व प्रदर्शयितु केचन वक्रगत्या प्रयतन्ते। तदेवात्र कारणम्।

सुषमा — कि पुरा स्त्रीणा स्वतन्त्रता नासीत् ?

चतुर्वेदी — प्राचीन भारतवर्षे स्त्रीणा यत् स्वातन्त्र्य अवर्तत तत् स्वातन्त्र्य न कुत्रापि जगति अवर्तत।

सुषमा — पित मनु न स्त्री स्वातन्त्र्य मर्हतीति किमर्थं प्रत्यपादयत।

चतुर्वेदी — मनो काले समाजे स्त्री अपहरण स्त्रीमानभङ्गादय असीमिता अभवन्। स्त्री यदि गृह विहाय रथ्याया गच्छेत् तर्हि पुन सा गृहमागमिष्यतिवा नवा इति भीति अवर्तत। तस्मात् मनु तत्कालीन समाज परिस्थितिमनुसृत्य नियमानठि लिलेख इति केषाचन मतम। नदपि मे मत भवति।

सुषमा — पितः न स्त्री स्वातन्त्र्य महतीति वाक्यस्य अर्थः किंयत् पर्यन्तं समाजे अनुपालनीयः भवति।

चतुर्वेदी — जगति पुरुषाणामिव स्त्रीणामपि स्वातन्त्र्य जन्मतः संक्रामितं भवति। किन्तु समाजे कतिपय स्थानेषु कतिपय समयेषु तासां स्वतन्त्रता स्वच्छन्दता मा भूयादिति मे मतिः। जगति सर्वोऽपि नियमानुसारं जीवति। मानव समाजे विशिष्य स्त्रीजीवनं नियमान्वितं भवितव्यमिति शास्त्रज्ञाना समाजशास्त्रज्ञाना मतम्।

सुषमा — कुत्र कस्मिन् समये स्त्रीणा स्वच्छन्दता मा भूयात्।

चतुर्वेदी — व्यभिचार गृहाणा समीपे, गलिच्छ समाजे पानशाला समीपे रात्रौ च न स्त्री स्वातन्त्र्यमर्हति। तथा सार्थं कोऽपि संरक्षकः संबन्धीकः सर्वदा रथ्याया गमन समये गन्तव्यः भवति। तथा यदि स्यात् अन्यः पशुः इव न व्यवहरिष्यति। तस्मात् मनुः एवं न्यगादीत्।

सुषमा — यदि स्वच्छन्दचारिणी भवति तर्हि किं भविष्यति ?

चतुर्वेदी — किं भवति ? अधः पतनं भवति अन्ततः मरण भवति। यदि स्त्री-पुरुषौ पवित्र कर्मणा वरर्मनाच स्याता तर्हि तयोः संततिः आरोग्येण नतिष्यति। स्वच्छन्दाचरण स्वच्छन्द वेषभूषा धारण, अर्धनग्न वेषधारण, कामोद्दीपन हेतुभूत अलंकरणादिक, सर्वथा स्वशरीर स्तनभर नाभीदेशप्रदर्शन एकैक समाजनाशाय हेतुः भवति, किमुत समवाय विषये।

सुषमा — वेषभूषा धारणे अपि न स्त्री स्वातन्त्र्यमर्हति ? एतत् कथं पितः।

चतुर्वेदी — बाले पुरुष प्रकृति विलसिते अस्मिन् प्रपचे सर्वोऽपि प्राणिः निसर्ग शक्त्या आकर्षितः भवति। यथा पुष्प विलोक्य भ्रमरः मकरन्दपानाय सवेग पुष्पं गच्छति तथा पुरुषः स्त्रिया आकर्षितः भवति। अपिच एकः पशुः एका पशवो स्वजातीया विलोक्य यथा अनुगच्छति तद्वत् स्त्रियं विलोक्य पुरुषः रिरसति।

सुषमा — अय निसर्गः एव।

चतुर्वेदी — तथा मानव समाजे न भवितुमर्हति।

सुषमा — कुत ?

चतुर्वेदी — समाज व्यवहार नियमबद्ध भवति। यदि नियमोल्लघन भवति तर्हि समाज पतनमेव भवति। पशूनामिव मानवेष्वपि स्वैरविहार यदि स्यात् तर्हि समाज पशुसमाज भविष्यति। तर्हि वय रथ्यासु चरितु अशक्नुम भवेम। सर्वत्र काम रथ्यासु रसो भूत्वा प्रवहिष्यति। तस्मात् मानव समाजे स्त्रीणा पुरुषाणामिव स्वतन्त्रता न शोभते।

सुषमा — अत्र वेषभूषासबन्ध। कुत'।

चतुर्वेदी — अत्र वेषभूषा सबन्ध पटुतर भवति। असीमित कामोद्दीपन भूत वेषभूषादिक भवेत् तर्हि समाजे सवत्र अविनीति प्रवहयिष्यति। तदा रथ्यासु हत्या चुम्बनालिङ्गनादय कामक्रीडादिक दिनायास भविष्यन्ति। तस्मात् अप्रमत्ततया स्त्रीभि समाजे व्यवहृतव्यमिति अनुभवज्ञा अवदन।

सुषमा सर्वदा स्त्रीणा जीवन पुरुषायत्त भवितव्य किम ?

चतुर्वेदी — हा भवितव्य इति मनो अभिप्राय ।

सुषमा — तद्वत् पुरुषाणा जोवितमपि वनितायत्त इति मे अभिप्राय ।

चतुर्वेदी — सत्यमेव स्त्रीपुरुष जीवित अन्योन्यायत्त भवति। नर नार्या बलवत्तर। तस्मात साधारणत स्त्रिय सकटात सरक्षिष्यति नर। स्त्रीपुरुषो आधाराधयो। तस्मात् लोकोक्ति विद्यते खलु विनाश्रय न शोभ ते पण्डिता वनितालता इति। तत जीवितान्त य कमपि आश्रित्य स्त्री स्वीय जीवित निर्वाहनीया इति सामाजिकाभ्युदय काक्षिणो अभिप्राय।

सुषमा — तस्मात आवयो सभाषण निष्कृष क ?

चतुर्वेदी — तस्मात कारणात जीवने योग्य आश्रयभूत पुरुष प्राप्य जीवन यापन साधु इति ममाभिप्राय ।

सुषमा — पित मम विद्यालय गन्तव्य विद्यते। अह गच्छयम। (इति उत्थाय अ त गच्छति)

चतुर्वेदी — "प्राप्तेच षोडशो वर्षे पुत्रं मित्रवदाचरेत्" इति पुत्र विषयेऽपि मनुना सत्यमुदीरितम्। अधुना तत् सर्वं अस्माभि· समाजे अनुभूयते। आधुनिकाः पुत्राः समाजे कुपुत्राः भवन्ति। तै. पितरौ मित्रवत् व्यवहरतः। एतत् सर्वं स्वानुभवेन पूर्वमेव मनुना निगदितमासीत्। देवाय मनवे नमः। (इति नमस्करोति अत्रान्तरे तस्य पत्नी वेदवती चहाचषक हस्ताप्रविश्य)

वेदवती — प्रातः प्रभृति कुमार्या साकं मनुस्मृतिचर्चा कुर्वन्नास्ते भवान्। किमद्य भवता न्यायालयं न गम्यते।

चतुर्वेदी — हा किमर्थं न गम्यते? अवश्यं गम्यते।

वेदवती — चहा पिबतु। (इति चहा तत्र त्रिपादपीठे निक्षिप्य अन्तः गच्छति)

चतुर्वेदी — (चहा गृहीत्वा पिबति)

(यवनिका पतति)

* * *

द्वितीयं दृश्यम्

(विद्यालयस्य प्रधानचार्यस्य लेखनकक्षा, तत्र प्राचार्यकेशव· कुर्च्या उपविश्य टेबुलोपरि पत्रेषु किमपि लिखन् अस्ति, ततः प्रविशति इतिहास प्राध्यापक· माधव·)

माधवः — अयि भोः अन्तः प्रवेशयम।

केशव. — विनापरोध प्रविशतु।

माधवः — नमस्ते। (इति नमस्कृत्य समीपस्थ आसने उपविशति)

केशव. — को विशेषः।

माधव — अयि भो कक्ष्याया युवतीना व्यवहारः केवल असभ्यपूर्ण. अमर्यादायुतः भवति।

केशव — कस्या कक्ष्यायाम्।

माधव — बि. ए. चरम वर्षीय अ, विभाग कक्ष्यायाम्।

केशव — तासा नामानि गृहीत्वा तासा पितृभ्या निवेदयतु पत्ररूपेण वार्तयतु।

माधव — प्रतिसप्ताह अह निवेदयामि।

केशव — कि प्रत्युत्तरमागतम्?

माधव — नहि।

केशव — कास्ता युवत्य? तासा नामानि कथयतु।

माधव — कक्ष्याया सर्वा निर्लज्जायुता व्यवहरन्ति।

केशव — अग्रेसराया नाम कथयतु।

माधव — अग्रेसराया नाम शालिनी।

केशव — अहो बत। सा?

माधव — किम्?

केशव — न किमपि विद्यते। सर्वोपि प्राध्यापक तामेवोद्दिश्य कथयति यत् सा विद्यालये विश्वसुन्दरी जाता इति।

माधव — सा निर्लज्जा अस्ति।

केशव — सा किं करोति कक्ष्यायाम्?

माधव. — सा सर्वान् युवकान् विलोक्य नेत्रस्पन्दन करोति हावभावादिक प्रकटयति।

केशव — ततस्तत।

माधवः — सर्वे युवकाः तामेव पश्यन्तः नेत्रस्पन्दन कुर्वन्ति हस्तसंज्ञया ता प्रेरयन्ति।

केशवः — एतादृशी स्थितिः सर्वविद्यालयेषु सर्वकक्ष्यासु देशे सर्वत्र *विद्यते।*

माधवः - एतादृशी स्थितिः भवति सर्वत्र देशे ? विचार्यमाणे मे शरीरं दहति। सा शालिनी अर्ध निचोलावृता भवति। ऊरुभाग पर्यन्त परकरीं धरति। यदा सा कक्ष्याया प्रविशति तदा सर्वे युवकाः बहुशीत्कारं उद्गारच कुर्वन्ति।

केशवः — सा निर्लज्जा गणिका समाना इति सर्वे प्राध्यापकाः कथयन्ति एकदा भवान् ता आहूय साधु व्यवहर्तव्या भवत्या इति बोधयतु।

माधव. — केषामपि वाक्य सा न श्रृणोति।

केशवः — तर्हि ता मत्सकाशं प्रेषयतु।

माधव — भवानेव चतुर्थ कर्मचारिणा पत्र कक्ष्याया प्रेषयतु। तदा अध्यापकः तत् पत्रं कक्ष्याया पठित्वा ता भवन. सकाशं सम्प्रेष्यति।

केशवः — हा सम्यक् प्रोक्तं भवता। तथैव कुर्याम्।

माधवः — गच्छेयमहम्। नमस्ते। (इति नमस्कृत्य गच्छति)

केशवः — (एकस्मिन् पुस्तके पत्र विलिख्य आह्वान घण्टा ताडयति)

(ततः प्रविशति सागरोनाम चतुर्थ कर्मचारी)

सागर· — (प्रविश्य) नमस्ते। (इति नमस्करोति)

केशव. — हा सागर त्वं पत्रमेतत् गृहीत्वा बि. ए. अन्तिम वर्षीय अ कक्ष्याया आध्यापकाय दर्शय। (इति ददाति पुस्तकम्)

सागर. — तथेव भोः। (इति गृहीत्वा गच्छति)

केशव. — (विचारयन्नास्ते)

(तत चतुर्थ कर्मचारी द्वारस्थः रामना प्रविश्य एकं पत्र प्रधानाचार्याय यच्छति, प्रधानाचार्यः गृहीत्वा पठित्वा)

अरे रामन्ना ता प्रवेशय।

रामन्ना — तथैव। (इति निर्गच्छति)

केशव — (लिखन् आस्ते)

(तत प्रविशति नैकपुस्तक हस्ता अत्यन्तकामुकवेषा अर्धनग्न शरीरा शालिनी)

शालिनी — (प्रविश्य) नमस्ते प्राचार्यवर्य। (इति नमस्करोति)

केशव — (लिखन् ता दृष्ट्वा) एहि बाले। उपविश।

शालिनी — (उपविशति)

केशव — बाले कथ पठसि।

शालिनी — सम्यक् पठामि। भो किमाहूतास्मि।

केशव — हा भवती आहूतासि।

शालिनी — को विशेष।

केशव — विद्यते बहुविशेष।

शालिनी — कथयतु भवान्।

केशव — बाले त्व विद्यालय किमर्थमागच्छसि ?

शालिनी — विद्यार्जनाय।

केशव — यदि विद्यार्जनाय आगच्छसि तर्हि अय वेष अनुचित। बाले त्व चीरधारिणी भूत्वा अङ्गर्गी सम्यक् धृत्वा भारतीयनारीवेषे विद्यालय एहि। कक्ष्याया विनयभूषिता व्यवहर।

शालिनी — आचार्यवर्य भवदीयोक्ति तथ्या भवति। किन्तु मे एतादृश वेषे भूयाधिक रोचते।

केशव — त्व तव गृहे आत्मान अलङ्कृत्य यथेच्छ विहर। किन्तु विद्यालये विद्यालयस्य आवरणे एतादृशी स्थिति अयोग्या अननुरूपा भवति।

शालिनी — महोदय, अहं प्रयतिष्ये। किन्तु वेषभूषाविषये युष्माकं इयान् आग्रहः कुतः ?

केशवः — वेषभूषा यथास्थिति यथासन्दर्भं राजते। सर्वत्र यथायोग्यं वक्तव्यं अपि च व्यवहर्तव्यं वर्तते बाले।

शालिनी — ईदृशी वेषभूषया अनिष्टापत्तिः का ?

केशवः — त्वन्मूलक अयं विद्यालयः भवति विद्या-लयः अपि च कामालयः। तथा मा भूयात् इति मे भावना।

शालिनी — (अवहित्थया) भवन्तः शिक्षकाः सन्ति। विद्यां शिक्षयन्तु छात्रान्। तदेव युष्माकं कर्णीय विद्यते। अपि च तदेव शोभतेच। वेषभूषाविषये बोधन युष्माकं अयोग्यं अधिक प्रसङ्गोऽपि असाम्प्रतम्।

केशवः — बाले साधु समुदीरितं त्वया। त्व गमिष्यसि।

शालिनी (कपोलेहस्त निक्षिप्य) विनाशकाले विपरित बुद्धिः। (इति पार्नीयं पिबति)

(यवनिका पतति)

* * *

तृतीयं दृश्यम्

(ज्योत्स्नाऽनन्दौ चहा पिबन्तौ वार्तापत्रिका पश्यन्तौस्तः मुखपृष्ठे शालिनींहत्या दृष्ट्वा ससभ्रमाश्चर्यांन्ता ज्योत्स्ना कथयति आनन्दः)

आनन्दः — ज्योत्स्ने पश्य।

ज्योत्स्ना — किम् ?

आनन्दः — श्रृणु। विद्यालयं गच्छन्तीं युवतीं शालिनीं दामोदरनाम युवा मोटर सैकलोऽपरिता उपावेश्य गृहं नीत्वा तत्र स्वीयागारे तामुपभुज्य अमारयत् इति पोलीसधिकारिणः अवदन्। तस्मिन् विषये अधिक अन्वेषणा चलत्येव।

ज्योत्स्ना — छ छ आधुनिक दिवसेषु जनेषु दया, पापभीतिः सभ्यता नम्रताश्च विलुप्ताः सन्ति। किमर्थं छात्राः विद्यालयं गच्छन्ति। तत्र ते किं कुर्वन्ति न कोऽपि विचारयति। एवं विचार्यमाणे मे प्रतिभाति कतिपय वर्षानन्तरं देशः पशु जीवनमयः भविष्यतीति।

आनन्दः — एतादृशी स्थितिः देशे भविष्यतीति न केनाप्यनुमीयते। अधुना सर्वोऽपि मानवः जीवन मूल्यानि संत्यज्य केवल अर्थ संपादने अपि च सुखानुभवे च निमग्न भवति। पूर्वं चार्वाकः एकः भवति। किन्तु अस्मिन् काले सर्वेऽपि चार्वाकाः

ज्योत्स्ना — भारतस्य ईदृशी स्थितिः पाश्चात्य साम्प्रदायानुकरणेन भवतीति मे मतिः।

आनन्दः — अनुकरणं दोषः एव। अनुकरणं एकव्याधिरूपेण प्रसृतं भवति। परधर्म अनुकरणेन समाजः अकालमरणं प्राप्स्यति। उक्तं खलु परधर्मः भयावहः इति।

ज्योत्स्ना — आधुनिक चलनचित्रै समाजः दोषयुक्तः भवति। आधुनिक चलनचित्रसृष्टिः केवल अर्थ सम्पदनार्थं अपि च प्रजासु अविनय कामपरीतभावैः हत्याप्रोत्साहनादिक प्रजनयितुं हेतुपूर्णा भवति।

आनन्दः — सत्यं भणसि त्वं ज्योत्स्ने। यदि चलन चित्रसृष्टिः स्थगिता भवति प्रजासु कलासृष्टिः पठनशक्तिश्च अधिके भविष्यत। प्रजाः न्याय मार्गे च व्यवहरिष्यन्ति।

ज्योत्स्ना — अधुना साधु परिवर्तना लोके भवितुं अशक्या भवति। यतः प्रजाः अविनयमार्गेषु वक्रितपथिषु यथेच्छं चरन्तः सन्ति।

आनन्दः — अवश्यं समाजः सन्मार्गगामी भविष्यति। अयं समयः संधि-समयः। क्षेमकल्याणकृते निरीक्षा कर्तव्या।

ज्योत्स्ना — गृहेषु पितरौ स्वीय संतानाय न किमपि वर्तनमुद्दिश्य कथयन्ति। तेषां कथयितुमपि समयः नास्ति। बालिकाः युवत्यश्च विद्यालयार्थं एतस्मात् प्रदेशात्

तं प्रदेशं, तस्मात् प्रदेशात् एवं प्रदेशं गच्छन्त्यागच्छन्ति च। गमनागमने मध्येमार्गे किं भवति, गुण्डा उत मवाली उत दादा ताः मध्येमार्गे कथं रुन्धन्ति किं कुर्वन्ति न कोऽपि विचारयति। अस्मिन् विषये पितरावपि दोषिणौ भवतः।

आनन्दः — युवकाः युवत्याश्च विद्यालयं गच्छन्ति उत कुत्रापि कामालयं गच्छन्ति न कोऽपि चिन्तयति। समाजे पूर्वसमाजरचना पापभीतिः कर्मशिक्षणादयः नष्टाः अभवन्। अधुना समाजः राक्षससमाजः न तु मानवसमाजः भवति।

ज्योत्स्ना — यत् किमपि कथ्यते चेत् तत् सर्वं अरण्यरोदनं भवति।

आनन्दः — सत्यमुक्तं भवत्या न कोऽपि शृणोति अस्मदीयं भाषणम्।

ज्योत्स्ना — यदि सर्वोऽपि जनः भारते एवं विचारयिष्यति तर्हि एकस्या क्षपाया देशः धर्ममार्गपरिवर्तितः भविष्यति।

आनन्द — अधुना आवाभ्यां पत्रिकायां अत्र अस्मिन् प्रदेशे सम्भूतविषयमुद्दिश्य विचार्यते। एवं देशे सर्वत्र एकस्मिन् दिवसे कति बलात्काराः भवन्ति, कति युवत्यः म्रियन्ते न कोऽपि जानाति। वत देशसंस्कृतिः पङ्किलता प्राप।

ज्योत्स्ना — आधुनिक विद्यार्थी विद्यार्थिन्यः केवलं वेषैः विद्यालये कालं यापयन्ति। न ते पठन्ति नियमबद्धाश्च भवन्ति।

आनन्दः — युवत्यः विद्यालयं गच्छन्त्यः किमर्थं निरवधिसज्जितवेषैः अलंकृता भवन्ति नाहं जाने।

ज्योत्स्ना — ताः विद्यार्जनाय।

आनन्दः — विद्यार्जनाय उत सुखार्जनाय नोचेत् धनार्जनाय।

ज्योत्स्ना — तव भाषणे आन्तर्यं नाहं जानामि।

आनन्दः — पठनार्थं वेषः कुतः? सतु सामान्यवेषः नहि, अर्जनार्थवेषः। ताः य कमपि कामयितुं, आकृष्टुं उत व्यापारार्थं गच्छन्तीति मे ऊहः। समाजे सर्वमपि अस्तव्यस्तं स्त्रीमूलकं भवति।

ज्योत्स्ना — स्त्रीमूलकं इति भवन्तः पुरुषाः मन्वते। तदसङ्गतम्। पुरुषाणां विषयेऽपि अविनयः भवति। सर्वत्र समाजः पुरुषमूलकं अस्ताव्यस्तं भवति इति मे मनीषा।

आनन्दः — ज्योत्स्ने भवत्या प्रोक्तं सत्य भाति मे। पश्य यत्र गुडं विद्यते तत्र पिपीलकाः रेखायां गच्छन्ति, गुडमाधुर्यता प्राप्त्यर्थं। यदि गुडं न स्यात् तर्हि पिपीलिकारेखायाः अभाव एव।

ज्योत्स्ना — गुडा भावः न भविष्यति।

आनन्दः — गुडाभावः न भविष्यति। किन्तु पिपीलिकेभ्यः गुडं परिरक्षणीयं भवति। तावदेव कथने मे सारांशः।

योत्स्ना — वैराणि स्त्रीमूलकानीति तवाभिप्रायः।

आनन्दः — हां सत्यमेव "बद्धमूलस्य मूलंहि महद्वैरतरो स्त्रियः। ट्रायदहनं भारतरामायणादिकं स्त्रीमूलकमेव खलु।

ज्योत्स्ना — वयं पिपीलिकाः नहि। युक्तायुक्त विचारणायुक्त मानवाः। सर्वं विचार्य करणीयं विद्यते।

आनन्दः — यदि कामभावना उत वामना उद्भवतः तदा युक्तायुक्त विचारणा विनष्टा भवति। तस्मात् कामभावना यथा नोद्भवति तथा वस्त्र धारण कर्तव्यं अस्ति। विद्यालये रथ्यासु कथं कामोद्दीपन वस्त्रधारणम्। सर्वमपि अस्तव्यस्त समाजे स्त्री मूलतः भवति नत्वन्यथा।

ज्योत्स्ना — आधुनिक समाजे जीवनं प्रश्न परपरापूर्णं वर्तते। विवाहः एव जटिलप्रश्नः भवति समाजे। पितरौ शुल्कं दत्वा विवाहकरणे अशक्तौ भवतः। विना च शुल्क विवाहः न भवति। तस्मात् पितरौ युवतीनां स्वच्छन्दतायाः परम प्रामुख्य स्थान यच्छत। तस्मात् पितरौ येनकेनापि युवकेन विवाहः निश्शुल्कः भविष्यति चेत् भारः न्यूनीकृतः भविष्यतीति चिन्तयतः। अधुना समाजः सर्वथा विपवलये संलग्र. अस्ति।

आनन्दः — स्त्रीणां स्वच्छन्दता वृत्तिः निस्सीमा भवति। तस्मात् बलात्कारेण मरणं भवति तासां। शालिन्यः मरणं स्वच्छन्दतावृत्ति कामुक भावनावच्छिन्न मरणमिति वितर्क्यते। एते पोलीस अधिकारिणः कथ अन्वेषयन्ति अन्ततः न्यायालयः किं आदिशति पश्यावः। अत्र आवयोः वाद प्रतिवाद कथम्। उत्तिष्ठ कार्यालयसमयः भवति। अद्य सत्वरं गन्तव्यं विद्यते कार्यालय प्रति। (इति अन्तः गच्छति)

ज्योत्स्ना — अति सर्वत्र वर्जयेत्। (इति चहाचषकौ गृहीत्वा अन्तः प्रविशति)

(यवनिका पतति)

* * *

चतुर्थं दृश्यम्

(उच्च न्यायालयः तत्र न्यायाधीशस्य आसनं वर्तते, उभयतः वादि प्रतिवादि न्यायवादिनः वर्तन्ते, ततः प्रविशति न्यायाधीशः चतुर्वेदी, सर्वे उत्तिष्टन्ति, चतुर्वेदी उपविशति अनन्तरं सर्वे उपविशन्ति)

चतुर्वेदी — (टेबुलोपरि विद्यमान पत्राणि विलोक्य) अपराधिनं प्रवेशयतु।

पुलिशः - (नमस्कृत्य, गत्वा अपराधिनं आनयति, अपराधी कथयितुं साक्षिपञ्जरे प्रविशति)

अभियोक्ता — (भगवद्गीता गृहीत्वा अपराधिसकाशं गत्वा तस्य हस्तं भगवद्गीतोपरि निक्षिप्य) मदुक्तिमनुसृत्य भण।

दामोदर. — तथैव।

अभियोक्ता — अहं सत्यं कथयामि, असत्यं न कथयामि।

दामोदर.— अहं सत्यं कथयामि असत्यं न कथयामि। अयि भोः न्यायाध्यक्षाः न्यायवादिनः अपिच प्रेक्षकाः शृण्वन्तु। यदि मम कथने असत्यं स्यात् तर्हि मम रज्जु गळ बन्धन शिक्षा भवतु।

न्यायाधीशः — दामोदर सविस्तर शान्तं यथाक्रम कथयतु। तत्र न्यायानुरूपोपण्ट भविता।

दामोदर — अयि भो अहं एक सज्जन । अहं वर्षद्वयात् प्राक् अस्मिन् विद्यारण्य विद्यालये पठित्वा त्रि ए परीक्षाया उत्तीर्य विश्वविद्यालयात् प्रमाण पत्र गृहीत्वा उद्योगार्थं बहु प्रायतम्। न कुत्रापि मे उद्योग लब्ध । अह मम जीवने सर्व कक्ष्यासु प्रथम अभवम्। त्रि ए प्रथम कक्ष्याया उत्तीर्ण । एतावत्पर्यन्त मे जीवित अक्लाइमक्स वर्तते।

वादिन्यायवादी — भवान् अधुना किं करोति ।

दामोदर — उद्योगाभावे अहं पेरेल प्रदेशे बालकेभ्य शिक्षणं ददामि भारतीय सस्कृति बोधयामि। तन्मार्गेण यत् धन प्राप्यते तत् अपर्याप्त भवति। तस्मात् एकेन मित्रेणसार्धं मद्योत्पादन कर्म करोमि। वस्तुत नाह जाने कथ मद्य उत्पादयन्ति। किन्तु तत्कृते मदीय अशदान वर्तते।

वादिन्यायवादी — भवान् मद्य न पिबति।

दामोदर — नाहमपिबम्। नाहं पिबामि। नाह पास्यामि।

वादिन्यायवादी — मद्यमुत्पादयसि, किन्तु मद्य न पिबसि, श्रुत्वा मे आश्चर्यं भवति।

न्यायाधीश — हा कथयतु दामादर।

दामोदर — एकदाह विद्यालय द्रष्टुमगच्छम्।

वादिन्यायवादी — तत्र त्व किं द्रष्टु गतवानसि।

दामोदर — अह तस्मिन् विद्यालये अपठम्। तस्मात् एषा मे मातृसस्था इति बुध्या तत्र ता विद्यारण्यकलाशाला द्रष्टु अगच्छम्।

वादिन्यायवादी — ततस्तत ।

दामोदर — तदा एका युवती अत्यन्त कामुकदर्शना कुचकचभारनिम्नो न्नतशरीरा सरसाङ्गी मया दृष्टा आसीत्। तस्या वेष मदनक्रीडार्थं आह्वयती वास्ते। अह ता दृष्ट्वा कामवासनावशग अभवम्। एव कदापि मे जीवने नाभूत्। तदाह भीत्या कामतृष्णया तस्या सकाश गत्वा किं त्व मया सार्धं ओबरायन् शरिटान्

हान्ल आगमिष्यास इत्यपृच्छम्। अनुपदमव सा मया सार्धं आगन्तुं चरम। तदाह ता म परल गृहमानयम्।

वादिन्यायवादी — ततस्तत ।

दामोदर — तदा सा अवग्त् अधुना आन्नायन् शरिटान् हाटल न गम्यत किं इति।

वादिप्रतिवादी — ततस्तत ।

दामोदर — तावत्पर्यन्त गन्तु मदन नाङ्गाक्राति मा। अत्रैव त्वरमति मगमार्ं इति ताम नभयम्।

न्यायाधीश — तदा किमभूत्।

दामोदर — अयि दामादर अह त्वया साक विवाहितुमिच्छामि इति सा अवादीत्।

वादिन्यायाधीश — विवाहार्थं त्वया अङ्गीकृत किम् ?

दामोदर — नहि।

न्यायाधीश — कुत ।

दामोदर — सा मा अन्यथा चिन्तितवती।

न्यायाधीश — सा किं चिन्तितवती ?

दामोदर — आधुनिकपु दिवसपु गुण्डा शतश कामना पूरयिष्यन्ति सर्व सौख्यपु प्रापयिष्यन्ति, यदपक्षत तत् आनाय दास्यति सर्वदा सुरक्षा भवति। एतादृश सुख अन्यत्र न लभ्यत। अह त्वा परिणेष्यामि इति।

वादिन्यायवादी — ततस्तत ।

दामोदर — अह गुण्डा नहि। अह एक सज्जन सुशिक्षित सस्कारवान्। त्वदाय दर्शनेन तव अर्धनग्न वेषेण अह उन्मत्त भूत्वा कामुको भूत्वा तवाङ्गाकारण त्वा अन्वभवम्।

वादिन्यायवादी — ततस्तत ।

दामोदर — तदा सा ओबरायन् शरिटाम् कदा नेष्यसि मा इत्य पृच्छत्। तदाह अद्य रात्रौ गच्छाव इत्यवोचम्। अत्रान्तरे मे सप्तमित्राणि आगत्य मा कवाटोद्घाटन कुरु इति जगर्जु। तदाह उदघाटितवानस्मि।

वादी — ततस्तत।

दामोदर — ते सप्तमित्राणि मा बहिरागच्छ इत्यवोचन्। अह बहि आगच्छम्। तदा ते सर्वे मा भर्त्सयित्वा एकैकश ता यथेच्छ अन्वभवन्। तदा तस्य आक्रन्दन श्रुत्वा अह भीत अद्रवम्। तदा किमभूत् नाह जाने। तस्मात् नाह हन्तक भवामि।

वादिन्यायवादी — तस्या मरण भवन्मूलक जातम।

प्रतिवादिन्यायवादी — अवरोधः क्रियतेमया वादीन्यायवादी दामोदर पीडयति। एतादृशी स्थिति अयोग्या।

न्यायाधीश — वादिन्यायवादिन् भवान उपविशतु। अयि भो प्रति वादिन्यावादिन् भवान् पृच्छतु दामोदरम।

प्रतिवादिन्यायवादी — दामोदर सज्जनमानुषस्य जीवने इय स्थिति कथ सभूता विशदय।

दामोदर — अयि भो शृण्वन्तु अह सामान्य मानुष। मम जीवते न कस्याप्यपकारमकरवम। अह सवदा शालाया विद्यालये च सर्वं विषयेषु प्रथम। मम चारित्र्य सवत्र सवदा आदशप्राय भवति सर्वेषा छात्राणाम। भवन्त मा उद्दिश्य अन्वेषण कृत्वा विचारयन्तु। तादृश सवगुणमण्डितोऽह एकदा शालिनी दृष्टवा काम सतप्त अभवम। एषा शालिनी अत्यन्त कामुकी स्वरुपेण मनोविकारकारणीभूतेन आहार्येण, अर्धनग्नशरीरेण मा उन्मत्त चक्र। तस्मात अह्न विवश. तस्या सकाश गत्वा तस्या अङ्गीकारेण ता गृह नीत्वा अन्वभवम्। अह सप्तमित्रेभ्य भीत अद्रवम। अनन्तर किमभूत नाह जाने। तस्मात नाह कारक. तस्या मरणस्य।

प्रतिवादीन्यायाधीश — अयि न्यायधीश महोदय पुरुष प्रकृति विलसिते जगति सर्वेषा स्त्रीपुरुषाणा सतकर्म कर्तुं जन्मत स्वातन्त्य वर्तते।

न स्त्री स्वातन्त्र्यमर्हतीत्यस्य वाक्यस्यअर्थं नैके अनेक मार्गेषु संकुचितार्थान् परिकल्पयन्ति, स्त्रीणा संपूर्णं स्वातन्त्र्यमावश्यकं इति। यदि स्त्री अर्धनग्नवस्त्राच्छादनेन रथ्यासु गच्छेत् तर्हि एतादृशी स्थितिः भवतीति अवगन्तव्यं भवति।

वादिन्यायाधीशः — पुरुष मानवता ज्ञात्वा समाजे व्यवहर्तव्यः किन्तु न पशुभावेन।

प्रतिवादिन्यायाधीशः — जगति आकर्षणशक्ति निरोध्दुं वयं के। पुरुषः आज्यवदोपमः स्त्री कृपीटयोनिः। तयो अन्योन्यालोकनेन काम. प्रज्वलितः भवति। तस्मात् सर्वदा अति जागरूकतया स्त्रियः व्यवहर्तव्याः भवन्ति।

वादिन्यायवादी — भवान् दामोदर निरपराधिनं कर्तुं प्रयतते।

प्रतिवादिन्यायवादी — भवान् प्रकृतिधर्मानभिज्ञः दामोदर अपराद्ध विधातुं प्रयतते। अस्मिन् विषये न्यायाधीशस्य पन्थाः प्रमाणं भवति।

वादिन्यायवादी - अयं स्त्रीस्वातन्त्र्य विरोधी।

प्रतिवादिन्यायवादी — अपि भोः भवान् भवतः स्वसारं स्त्री स्वातन्त्र्यमावश्यकमिति नक्त उत अर्धनग्नवेषेण दिवा एकाकिनीं विहर्तुं प्रेषय।

वादिन्यायवादी — अनावश्यक असाधु वदति भवान् न्यायाधीशस्य पुरत।

प्रतिवादिन्यायवादी — मम कथने अयमेव तात्पर्यं। स्त्रीणा सर्व विषयेषु स्वतन्त्रता समानता अर्हतादय अवश्य जन्मत· संक्रामिता। किन्तु रथ्यासु निर्लज्जाः भूत्वा स्वच्छन्दचारणाः न भवितव्या। ताः स्त्रीमर्यादा सीमोल्लंघन न कर्तव्या·। पुरुषाः अपि तथैव वर्तनीया· इति ममाभिप्राय। अत्र विद्यमान रहस्य अज्ञात्वा मूर्खाः केचन मनुस्मृति ज्वालयन्ति। तेन कर्मणा तेषा मौर्ख्यमेव प्रकटी क्रियते। मनो. उत्तमः बुद्धिमान् सहितकारः उत स्मृतिकार· एतावत्पर्यन्त जगति नोद्भूतः। समाज परिवर्तनानुरूपं अर्थः निर्वचनीय भवति। किन्तु पुस्तकदाहन नहि। समाज नाशन कारकाः पंडित मन्यमानाः आधुनिका· कामुका· पुरुषाः स्त्री स्वातन्त्र्यमर्हतीति विविधार्थान् परिकल्प्य स्वातन्त्र्ययुता स्त्रिय अनुभवन्ति। तासा कौटुम्बिकजीवन नाशयन्ति। अधुना जगति स्त्रीणा विद्यमानं नोचेत् अविद्यमान अवयवप्रदर्शन

व्याधिरूपेण परिव्याप्त भवति। तथा करणमेव स्त्री स्वातन्त्र्यमिति कामुकाः कामुक्यः यथेच्छं विहरन्ति।

वादिन्यायवादी — अधिक प्रसङगोऽयं भवति।

न्यायाधीशः — आदेशः। (इति टेबुलं ताडकेन मारयति) तस्य भाषणे व्यत्ययं मा करोतु भवान्।

प्रतिवादिन्यायवादी — अयं दामोदरः सज्जनः। अयं उद्दीपित भावेन, तस्याः अङगीकारेण तयासार्धं सुखमन्वभवत्। सा अन्यैः मारिता न तु अनेन। तस्मात् अयं शिक्षार्हः न भवति।

न्यायाधीशः — दामोदरः नीयतां अन्त.। अद्य सभा स्थगिता भवति। दिन द्वये निर्णयः भविष्यति। (इत्युत्थाय गच्छति, सर्वे उत्तिष्ठन्ति गच्छन्ति)

(यवनिका पतति)

पंचमं दृश्यम्

(न्यायधीशः चतुर्वेदी, तस्या पत्नी वेदवती पुत्रिका सुषमा च एकत्र उपविश्य शालिनी हत्याकाण्डमुद्दिश्य संलपन्तः सन्ति।

वेदवती — शालिनीहत्याविषयः अत्र न्यायालये चर्चा भवति, हन्तकस्य कीदृशी शिक्षा भवद्भिः विधीयते कथयन्तु।

चतुर्वेदी — न्यायालयीनविषयाः न्यायालये चर्चनीयाः भवन्ति न तु गृहे।

सुषमा — दोषः कुत्र विद्यते? कः दोषी अभूत् पितः।

चतुर्वेदी — बाले त्वमपि न्यायशास्त्रं पठसि, पत्रिकायां हत्याकाण्डमुद्दिश्य पठसि, कस्ते निष्कर्षः तं हत्याकाण्डमुद्दिश्य।

सुषमा — पित· मम एव स्फुरेति सर्वोऽपराध शालिन्याः इति।

चतुर्वेदी — त्व एव विचारयसि ?

सुषमा — विचारधारा नक्रिता किम् ?

चतुर्वेदी — न्यायवादिना बहुमार्गा सन्ति। ते सर्वे सत्यासत्य मार्गपूर्णाः भवन्ति।

वेदवती — तस्मात् लोके एका प्रथा विद्यते यत् न्यायवादिनस्सर्वे अन्याय वादिन. इति।

चतुर्वेदी — वाले, अपि च वेदवति वय सत्यमार्गानुयायिन। सर्वदा अस्माभि सत्यमार्गे केवल गन्तव्य विद्यते। असत्यमार्गगमनापेक्षया मरण योग्य इति मे मति। वय भारतीय परम्परा प्रेमिण अन्याय उक्त्वा विधाय च जीवनयापन अस्माक अयोग्य भवति। वय सर्वदा तत्वान्वेषिण। अस्माक सर्वदा हरिश्चन्द्रादय पूज्या अनुसरणीयाश्च भवन्ति।

वेदवती — तस्मादेव अह अपृच्छ कीदृशीशिक्षा दीयत इति।

चतुर्वेदी — हञ्जे वेदवति। मया कथित खलु वय सत्यमार्गानुयायिन। अत्र न्यायाल्यीनविषया गृहे चर्चनीयाश्च न भवितव्या इति। अह इयन्त काा यामि लोक अधुना भारतीयता विस्मरन् अन्य देशीयाना धर्मप्रभावेन क्रमश पतनोन्मुख भवति। एतादृशी भावना निराङ्कुशा विद्यते।

सुषमा — तत कि कर्तव्य पित।

चतुर्वेदी — शैशवे केवल भारतीय माहात्म्यमुद्दिश्य बालिकाबालकाना कथनीय विद्यत। नोचेत् कतिपय दिवसानन्तर सर्वे युवती युवका पशव भूत्वा रथ्यासु विहरिष्यन्ति जीवित मूल्यानि विस्मृत्य। प्रपञ्च मकुटायमान भारतराष्ट्रस्य कीर्ति कलङ्किना भविष्यति। भारत अस्या स्थित्या परकीय भविष्यति अनतर पाशविक आचरणभरित भविष्यति।

सुषमा — पित अस्मदीय विद्यालये केचन विद्यार्थी विद्यार्थिन्य भारतीय संस्कृति भारतीयविद्या भारतीयान् सर्वदा टीका कुर्वन्ति। ता टीका श्राव श्राव मे

चतुर्वेदी — तथैव गच्छ।

(तत्र टेबुलोपरि दूरध्वनियन्त्र शब्दायते)

सुषमा — (*गत्वा दूरध्वनिं गृहीत्वा*) हेलो, हां हां एतत् चतुर्वेदीनां गृहम्। हां हां ते गृहे सन्ति। हां परन्तु भो आह्वयेयं तान्। (पितरमुद्दिश्य) पितः कोपि शर्मा आह्वयति। (*इति ग्रहणमुष्टिं टेबुलोपरि निक्षिप्य गच्छति*)

चतुर्वेदी (उत्थाय गत्वा ग्रहणमुष्टिं हस्ते धृत्वा) हेलो अहं चतुर्वेदी भणामि। नमस्ते। एतावत्पर्यन्तं न किमपि विनिश्चितम्। दिनसद्वये सर्वमपि समाप्तं भविष्यति। धन्यवादाः। (इति ग्रहणमुष्टिं यन्त्रे निक्षिप्य) सर्वोऽपि स्वार्थं समाहते अपि च स्वात्मानं उन्नतं मनुते। छ छ। (इति वदन् आगत्य कुर्च्यां उपविशति)

वेदवती — (चहाकरण्टकसूर्पग्राहिनी आयाति तत्र टेबुलोपरि करण्टकसूर्पं निक्षिप्य उपविशति)

विद्यालयं त्यक्तुं इच्छा भवति। तत्र सर्वे वेषभूषिताः असंस्कारिणः असंस्कारिण्यः आयच्छन्ति। न कोऽपि जानाति भारतेतिहासं, भारतीय गत वैभवं वर्तमान भारतीयस्थिति च। सर्वेऽपि राष्ट्रभक्तिहीनाः। ते पठित्वा न्यायवादिवृत्ति स्वीकृत्य किं करिष्यन्ति नाहं जाने।

चतुर्वेदी — भारतदेशे सर्वत्र स्थितिः एवं विद्यते। एतादृशी स्थितिः परिवर्तनीया भवति।

वेदवती — एकः कुटुम्बः एवं विचिन्त्य किं करिष्यति।

चतुर्वेदी — एवं सर्वोऽपि विचिन्त्य अकर्मकृत् भवेत् चेत् देशः कार्यहीनः वृद्धिहीनः भविष्यति। आमूलतः विद्यायाः स्वरुपः परिवर्तनीयः भवति।

सुषमा — ममापि तथैव प्रतिभाति पितः। न कोऽपि भारतीयता उद्दिश्य चिन्तयति अस्मिन् प्रदूषिते प्रपञ्चे।

चतुर्वेदी — प्रथमतः कामोद्दीपन कारकं अलङ्करणं रथ्यासु शालासु विद्यालयेषु तदयन्त्र अवरोद्धव्यं विद्यते। स्त्रीणां पुरुषाणां बालिकानां बालकानां वृद्धानां च सर्वत्र भारतवर्षे वेषभूषा निर्णयः एकः नियमबद्धः भवितव्यः। यदि प्रथमतः अश्लीला अयोग्या चलनचित्र सृष्टिः निरुद्धा भवति, तर्हि वेषभूषा निर्णयः अनुपदमेव आचरणयोग्यः भविष्यति।

सुषमा — सर्वत्र व्यवहारे क्रमशिक्षणावश्यकता भवति।

चतुर्वेदी — सत्यं वदसि बाले।

वेदवती — एषा भवत पुत्री खलु। तस्मादेव भवतः प्रतिमा जाता प्रतिभया।

चतुर्वेदी — (विहस्य) सत्यमुदीरित भवत्या वेदवती। किञ्चित् चहा करोतु।

वेदवती — आनयेयम्। (इत्युत्थाय अन्त. गच्छति)

सुषमा — पित अहं अद्य मम मैत्रिण्याः गृहं गच्छेयम्।

चतुर्वेदी — त्वं कदा गमिष्यसि।

सुषमा — अद्य मध्याह्ने एकघण्टावादन समये गच्छेयमहम्। पुनः चतुर्वादनसमये संध्याकाले समागच्छेयम्।

चतुर्वेदी — तथैव गच्छ।

(तत्र टेबुलोपरि दूरध्वनियन्त्रं शब्दायते)

सुषमा — (गत्वा दूरध्वनिं गृहीत्वा) हैलो, हां हा एतत् चतुर्वेदीनः गृहम्। हा हा ते गृहे सन्ति। हा धरतु भोः आह्वयेयं तान्। (पितरमुद्दिश्य) पितः कोऽपि शर्मा आह्वयति। (इति ग्रहणमुष्टिं टेबुलोपरि निक्षिप्य गच्छति)

चतुर्वेदी - (उत्थाय गत्वा ग्रहणमुष्टिं हस्ते धृत्वा) हैलो अहं चतुर्वेदी भणामि। नमस्ते। एतावत्पर्यन्तं न किमपि विनिश्चितम्। दिवसद्वये सर्वमपि समाप्तं भविष्यति। धन्यवादाः। (इति ग्रहणमुष्टिं यन्त्रे निक्षिप्य) सर्वोऽपि स्वार्थं समीहते अपिच स्वात्मानं उन्नतं मनुते। छ छ। (इति वदन् आगत्य कुर्च्यां उपविशति)

वेदवती — (चहाकरण्डकसूर्पवाहिनी आयाति तत्र टेबुलोपरि करण्टकसूर्पं निक्षिप्य उपविशति)

चतुर्वेदी — (चहा गृहीत्वा पिबन्) हसे वेदवति अधुना स्नात्वा, पूजा विधाय न्यायालयं गन्तव्यं विद्यते, किं स्नातुं जलं उष्णमभूत् ?

वेदवती — कदाचा उष्णमभूत्। अद्य भवान् भुक्त्वा न गच्छति किम् ?

चतुर्वेदी — नहि अद्य सोमवती अमावास्या खलु, अद्य उपवासः क्रियते।

वेदवती — मध्याह्ने किञ्चित् अल्पाहारार्थं गृहं प्रत्यागच्छतु।

चतुर्वेदी — तथैव। (इति उत्थाय अन्तः गच्छति)

वेदवती — (अनुनासिका स्वरगुञ्जनेन गायन्ती, करण्टकसूर्पं गृहीत्वा अन्तः प्रविशति)

(यवनिका पतति)

* * *

षष्ठं दृश्यम्

(न्यायालय तत्र सर्वे स्वीय स्थानेषु उपविष्टा सन्ति तत प्रविशति चतुर्वेदी न्यायाधीश सर्वे उत्तिष्ठन्ति, न्यायाधीश उपविशति, सर्वे उपविशन्ति)

प्रतिवादिन्यायवादी — अयि न्यायाधीश महोदय अय दामोदर न शिक्षार्ह न च दण्डनीय । शाल्न्या हत्या अन्यै कृता।

चतुर्वेदी — साक्षिण वचनमनुसृत्य अन्तिमनिर्णय करणीय वर्तते।

प्रतिवादिन्यायवादी — साक्षिण प्रवेशयतु। (इति पोलीसु कथयति, पोलीस साक्षिणमानयति स साक्षी चतुष्फलक पञ्जरे स्थित्वा गीतापुस्तकोपरि हस्त निक्षिप्य तिष्ठति)

अभियोक्ता — अयि भो साक्षि, अह यत् ब्रवीमि तत् अनुसृत्य भण। अह सत्य ब्रवीमि, सत्यादन्यत् न ब्रवीमि।

साक्षी — अह सत्य ब्रवीमि सत्यादन्यत् न ब्रवीमि। (इति कथयति)

प्रतिवादिन्यायवादी — कि भवता शाल्न्या हत्या दृष्टा ?

साक्षी — हा दृष्टा मया।

न्यायाधीश — त्व सविस्तर कथय।

साक्षी — अमावास्यक्षपाया एक घण्टा वादनसमये अह मूत्रयितु उत्थाय मम गृहात् बहिरागच्छम्। तदा कुर्कुरा भौ भौ कुर्वन्तिस्म। तदाह अन्तर्हित मम प्राङ्गणे शववाहकान् अपश्यम्। ते दामोदरगृहात् एक शव बहिरानीय त एकस्मिन् मञ्चे पिण्डीकृत्य सस्थाप्य चत्वार पुरुषा वहन्त अचलन्। एक मार्गदर्शक अभूत्। अन्यौ द्वौ पार्श्वत शवस्य दण्डहस्तौ भूत्वा निश्शब्द अगच्छताम्। ते सव दामोदरस्य मित्राणि मद्यव्यवसायभागस्वामिन ।

प्रतिवादिन्यायवादी — कि त्व सर्वान् विलोक्य ते एते इति। स्मरिष्यसि किम् ?

साक्षी — अवश्य स्मरिष्यामि।

प्रतिवादिन्यायवादी — तान् दोषिणः प्रवेशयतु।

पुलिशः — (तान् प्रवेशयति)

प्रतिवादिन्यायवादी — किं त्वं जानासि एतान्।

साक्षी — (तान् दृष्ट्वा) हा एतेसप्त शालिनी घातुकाः।

प्रतिवादिन्यायवादी — एतस्मादन्यत् किमपेक्ष्यते भोः।

न्यायाधीशः — अयि भो· एतावत्पर्यन्तं समालब्धवार्तानुसारं दामोदरः सज्जनः पुरुष· इति सर्वे विद्यासंस्थेभ्यः पत्राणि समागतानि। सः स्वजीवने कुत्रापि न कस्यापि अकरणीयंकृत्यं चकार। एषः शालाया विद्यालये अधुना स्वजीवन निर्वहणे च कदापि अकार्यं न चक्रे। अयं शालिन्याः कामोद्दीपन वेषभूषाभ्या तस्याः अश्लीलपूर्णवर्तनाभिः मोहितः तस्याः अङगीकारं प्राप्य तयासार्कं रेमे। .अत्र तेन न कोप्यपराधः कृतः। तथापि अनेन अज्ञातरीत्या तस्याः मृत्योः कारणं प्रकल्पितं। तस्मात् शिक्षास्मृतौ विनिर्दिष्ट नियमानुसारं एतेषा सप्त घातकाना रज्जुगळबन्धनेन मरणशिक्षा विधीयते, दामोदरस्य सहस्र रूप्यकाणा दण्डः विधीयते। (इत्युक्त्वा उत्थाय गच्छति, पोलीस अधिकारी सप्त हन्तकान् अन्तः नयति, दामोदरः सर्वैरपि अभिनन्द्यते क्रमशः सर्वे गच्छन्ति)

कर्मचारी — अरे गणक न स्त्री स्वातन्त्र्यमर्हतीति यत् मनुना प्रोक्तं तत् युगान्तेऽपि सत्यं भवति। केचन कामुकाः स्वार्थमभिलषन्त. न स्त्री स्वातन्त्र्यमर्हतीत्यस्य स्वीय कुटुम्बे विद्यमान स्त्रिय स्वातन्त्र्यं नार्हन्ति तत् भिन्नं स्त्रीमण्डलं स्वातन्त्र्यमर्हति। अन्य कुटुम्बेषु विद्यमानास्त्रियः यथेच्छं पुरुषाः इव निर्भीकाः समानार्हतया व्यवहर्तव्याः इति कथयन्ति।

गणकः — तथा कथने तथा प्रचारकरणे को लाभः।

कर्मचारी — को लाभः शृणु। स्वेच्छायुताना कामिनीना सहवासेन अनायास लब्ध संभोगलाभः एव महान् लाभः।

गणकः — तदर्थमेव सातत्य व्यभिचारार्थमेव ते तथा नानार्थान् परिकल्पयन्ति। अहो ज्ञातं अधुना। पूर्वेद्युः एका महिळा एकत्र सभाया एवं जगाद।

कर्मचारी — किमिति।

गणक — अह सुशिक्षिता पदवीधरा पदधरा। मे गृहे स्वतन्त्रता विद्यते। मे पति सर्वदा मह्य आर्थिक स्वतन्त्रता यच्छति। मम गृहे वाक् स्वातन्त्र्य अपिच सर्व प्रकार स्वातन्त्र्य विद्यते। केचन चोरा स्त्रीमुक्तता स्त्रीमुक्तता इति मुक्तकण्ठ सभासु घोषयन्ति गर्जन्ति। अधुना स्त्रीणा न क पि न्यूनता विद्यते। ता समाजे पुरुषसमाना भवन्ति। नाह जाने तेषा हृदि अभिप्राय क इति।

कर्मचारी — सा नारी तेषा चोराणा मानसिकभाव अपठत् इति मे मति ।

गणक — (पेटिका बध्नन्) ते चोरा स्त्रीस्वातन्त्र्यमिति उक्त्वा स्त्री स्वातन्त्र्यानन्तर ता यथेच्छ अनुभवितु अय मार्ग इति मनसि चिन्तयन्ति। अत्र विद्यमान रहस्य अनभिज्ञाता प्रजा वञ्चिता भवन्ति। मनुना यदुक्त तत् सत्य। स्त्री सर्वदा मानाभिमान शीललज्जारक्षणार्थं सर्वदा सर्वदशासु यथा सन्दर्भं वयोमर्यादा मनुसृत्य परेभ्य वचकेभ्य गुण्डेभ्य सरक्षणीया इति मनो अभिप्राय ।

कर्मचारी — पशुपेक्षया हीना केचन पुरुषा शाला गच्छन्तीं बालिका अपि च चातुर्मास वयस्का बालिका यथेच्छ अनुभूय अमारयन् इति वय दिनपत्रिकासु पठाम । एतत् सर्वं दिव्यज्ञानेन मनु पूर्वमेव विचार्य।

पिता रक्षति कौमारे। भर्ता रक्षति यौवने।
पुत्रो रक्षति वार्धक्ये। न स्त्री स्वातन्त्र्यमर्हति ॥

इ युक्तवान्।

गणक — अय विषय अतिविस्तारेण सुदीर्घं विचारणाय भवति। तस्मात् अह वन्मि प्रश्नचिह्नेन "न स्त्री स्वातन्त्र्यमर्हति ?" इति।

(यवनिका पतति)